THE BOOK WAS DRENCHED

TEXT FLY WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY

OU_180998

UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY

Call No. 582 / K 14 A Accession No. G.S. 66

Author Kalidasa.

Title Abhijnana-shakuntalam.

This book should be returned on or before the date last marked below.

॥ श्रीः ॥

श्रीमहाकवि कालिदासप्रणीतं

॥ अभिज्ञानशाकुन्तलं नाम नाटकम् ॥

कुम्भघोणे राजकीयविद्याशालायां प्रधानपण्डितवरेण

शतावधान श्रीनिवासाचार्येण

विरचितया व्याख्यया समेतं साङ्गानुवादं च

चेन्नपुर्यां

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्,

इत्येतैः प्रकटितम्।

1930.

चेल्लपुर्यां
वाविल्ल मुद्रणालये
॥ सम्मुद्रितम् ॥

॥ शाकुन्तल भूमिका ॥

नाट्यप्रबन्धानां प्रबन्धमाधुर्यमन्यदेव । येनात्र भूयसी रसास्वादसामग्रीसंपत्तिः । रसास्वादश्च परः पुरुषार्थः सहृदयानां । सात्त्विकाङ्गिकवाचिकाहार्यरूपैश्चतुर्विधैरभिनयैश्चक्षुषोर्हि विषयमिहोपनीयते काव्यार्थः । उक्तं हि मालविकाग्निमित्रे "त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यत" इति । चतुर्णामप्यभिनयानामभ्यर्हितो वाचिकाभिनयो नाट्यस्य जीवातुः यः प्रबन्धाश्रयः । प्रबन्धश्च शब्दार्थमयः फलमिव त्वग्दलमयमन्तर्बहिश्च रससंभृत एव नटसामाजिकयोः कीर्तिप्रीतिहेतु र्भवेत् । भूयसा च प्रबन्धाः पृथुलबीजत्वचइव फलपाकाः प्रकामाडम्बरितशब्दार्था मृग्यरसा भवन्ति । कालिदासस्य तु काव्यं बीजत्वङ्निर्मुक्तमिव सहकारफलमनुपसृष्टां प्रीतिमावहतीति स्फुटमिदं काव्यरहस्यविदां । समग्राहि प्रबन्धश्रीः कालिदासकृतिषु । यत्र सन्नपि कश्चिद्दोषबिन्दुर्दीपज्ञदर्शनविषयो हिमकरबिम्ब इव कलङ्कलेशो रसास्वादं नावसादयति । यथा स्वतो मधुरेषु सुवदनानां वदनेष्वयथायथमपि विहितं प्रसाधनमन्यामेव विच्छित्तिशब्दितां लक्ष्मीमादधाति "स्वल्पोप्यनादरन्यासो भूषणाङ्गाम्बरस्रजां । यः परां जनयेच्छोभां सा विच्छित्तिरुदाहृता" इति हि विच्छित्तिलक्षणम् । "कोपेऽपि कान्तं मुख" मित्यादि चैवंप्रायं । एवंमेषा महाकवीनां काव्येषु काव्यश्रीः क्वचिदयथायथोपपादितेनापि वस्त्वलङ्कारविन्यासेन भूयसैव दर्शनीयतामायातीति

निपुणमत्रोदाहरणम्। कालिदासस्य काव्यमर्वाग्रामायणमहाभारताभ्यां उक्तरूपामेव काव्यश्रियमसुलभामभिसन्धायाहुः । "द्वित्रा एव कवयो द्वित्राण्येव काव्यानी "ति । असकृदनुभूयमाना एव हि लोके विशेषा महाकवीनां काव्येषु दृश्यमानाः स्वेन चानुभवेन संवादं नीयमानाः शतशोऽपि परिचये नवनवा इव भावकैर्भाव्यन्ते । शब्दाश्च लोकव्यवहारेष्वनारतं परिवर्तमानाएव ग्रथनाविशेषे मणय इव कामपि श्रियं श्रयन्ति । अभिनवा अपि शब्दार्थाः संघटनावैगुण्यान्निम्नोन्नतवृत्तयो दन्ता इव मुखशोभां दूषयन्ति काव्यलक्ष्मीम्। तथा हि शब्दार्थाश्रयानलङ्कारान् संघटनाश्रयांश्च गुणदोषान् विभजन्ति । देशकालवयोविद्याव्यवहारभेदादुत्तमाधममध्यमप्रकृतीनां नारीनराणां नानैव निरूप्यमाणा वेषभाषाचेष्टाप्रवृत्तयो यथालोकं काव्येषु निक्षिप्ताः किल काव्यविदां प्रीतिमुपहरन्ति । स चायमभूमिः परिसंख्यानस्य प्रमेयराशिर्महाकविप्रतिभायामेव व्युत्पत्तिविमलीकृतायां विविक्त विविक्तमात्मानं दर्शयति । चर्मचक्षुषां विप्रकर्षेऽपि हि प्रतिभाचक्षुरकुण्ठप्रसरं । जननान्तरशतोपचितसुकृतं कञ्चिदेव हि पुरुषं प्रतिभादृशा दृशिमन्तमुपस्थापयति लोके विधिः । निरर्गलनिर्गलत्प्रतिभास्रोतसामपि कवीनां कस्य चिदेव रविकरशलाकेव रसापूरणस्फारीकृतप्रकाशा भवति भारती । इयमेव च काव्यश्रीर्नाम । यया तनीयानपि वाक्यखण्डः पुनः पुनरपि विभाव्यमानः प्रत्यग्र इव रोमहर्षणः काव्यज्ञानां । यया च वाञ्छितानि निरङ्कुशप्रतिभाविलासविजृम्भितान्यपि भूयसां कवीनां काव्यानि पाकच्युतानीव फलानि दोषासहानां सहृदयानां नाभिलाषपूरणे प्रभवन्ति । रामा-

यगं महाभारतं चोभयं प्रतिभारससंपदोस्सहोदयोपजातं दुग्धोदपूरवद्विपुलं च मधुरं च । यतः काव्यार्थानादाय वाङ्मयान्यपरे कवयः प्रणयन्ति । अर्वाचां च कवीनां कालिदासः प्रथमः । यस्य परिच्छेदवत्यपि प्रतिभा वर्षधारेवायत्नपातिनी विमला चापर्युषितरसा च । अस्य हि महाकवेः काव्येषु रसभावालंकारयोजना शब्दार्थरेखा वा निपुणशिल्पिशिल्पकलाया इव विषयवशादुच्छूनतां तनुतां च दधानाऽपि बन्धुरतया रचनाया वैषम्यानुपलम्भादभिन्नकान्तिः काव्यदृशां शश्वदपि विमृदिता न यातयामा भवति । यथा हि नानाविधवसनाभरणकुसुमाङ्गरागादि योजनविरचिता नागरिकसैरन्ध्रीप्रसाधनकला वरतनोरेकामेव रूपश्रियमुपस्कृत्य समग्रयति । इदं चात्र किमपि रहस्यं काव्यरचनायाः । यः किल लोके कामिनोः प्रथमसमागमे चक्षूरागात् प्रभृति यावदङ्गसङ्गं व्रीडाभयौत्सुक्यसंकीर्णवृत्तिर्भावव्यतिकरक्रमः । सोयमुत्तमप्रकृतिषु भवन् दर्शयितुमसुकरः कवीनां । भट्टबाणः प्रौढो गद्यकविर्हर्षचरिते सरस्वतीदधीचयोः प्रथमसौहृदे दधीचेन मालतीप्रेषणं तया चासंनिधौ सावित्र्याः सरस्वत्यै रहसि दधीचप्रार्थनाऽऽविष्करणमित्यादिकं नायिकानायकयोः प्रथमोपवर्णितगुणप्रकर्षस्यासदृशमिव दर्शयति । कादम्बर्यामपि प्रथमं चन्द्रापीडं दृष्टवत्या एव पुनः प्रासादमारुह्य पश्यन्त्याः प्रयत्नेन शृङ्गारचेष्टाऽऽविष्करणं पत्रलेखया च श्लिष्टवचनेन चन्द्रापीडाय कादम्बरीरागावेदनं च तथाविधं । भवभूतेरपि मालतीमाधवे मालत्या लवङ्गिकाप्रेषणेन माधवमथितवकुलदामोपनायनं सशिष्यायाः कामन्दक्या महान्यत्नो देवतागृहे मकरन्दस्य मालतीवेषग्रहणं नायकयोराक-

स्मिकश्च समागम इत्यादिकं स्वभावादवीयः । वीरचरितेऽपि सीतारामयोर्भावव्यतिकरः प्रौढत्वयसोरिव दर्शितः । न मुग्धयोर्गुरुगौरवयन्त्रितयोरिव । एवमन्यत्रापि यूनोः प्रथमसमागमसंदर्भः किमपि विरूप एव दृश्यते । नैवं कालिदासनिबन्धेषु । अयमेव हि संदर्भो निकषः काव्यपरीक्षायाः । यथा रघुवंशे इन्दुमतीस्वयंवरे षष्ठे सर्गे (६८) श्लोकेन "तस्यां रघोः सूनुरुपस्थितायां वृणीत वा नेति समाकुलोऽभूत् । वामेतरः संशयमस्य बाहुः केयूरबन्धोच्छ्वसितैर्नुनोद ॥" इति प्रदर्श्य ८०, ८१, ८२, "ततस्सनन्दावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या । दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत् संवरणस्रजेव ॥ सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुं । रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्त्वा निराक्रामदरालकेश्याः ॥ तथा गतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे । आर्ये व्रजावोऽन्यत इत्यथैनां वधूरसूया कुटिलंददर्श" ॥ इत्यादिना संदर्भेण नैसर्गिको वधूवरयोः हृदयसंगः प्रत्यक्षमिव दर्शितः॥

यथा च कुमारसंभवे तृतीयसर्गे ६७, ६८, श्लोकाभ्यां "हरस्तु किंचित् परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः । उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ विवृण्वती शैलसुताऽपि भावमङ्गैः स्फुरद्भालकदम्बकल्पैः । साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥" इत्युपक्षेपः, पञ्चमे च सर्गे तपसि स्थिताया गौर्यास्तापसब्रह्मचारिणा परमेश्वरेण सह संवादक्रमः, प्रियपरिवादासहतापर्यन्तेन रागातिरेकेण जिगमिषोर्गौर्यास्तादृशप्रेमदर्शिना परमेश्वरेण निरोधनं, तत्कालसदृशश्चालापः ।

८४, ८५, ८६, " इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला । स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥ तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पद-मुद्धृतमुद्वहन्ती । मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराज-तनया न ययौ न तस्थौ ॥ अद्यप्रभृत्यवनताङ्गितवास्मि दासः क्रीत-स्तपोभिरिति वादिनि चन्द्रमौलौ । अह्राय सा नियमजं क्लममुत्स-सर्ज क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥" इति श्लोकैर्दर्शितश्चोभ-योश्चित्तसमावेशः, तथापि पितृपरतन्त्रतया पित्रनज्ञापनाय सखी-मुखेनेश्वरस्य निवेदनं, षष्ठे च सर्गे । (८४) "इति वादिनि देवर्षौ पार्श्वे पितुरधोमुखी । लीलाकमलपत्राणि गणयामास पार्वती " ॥ इति भावप्रदर्शनं च, परश्च सन्दर्भः परस्परभावबन्धं तरुमिवाङ्कुर-पल्लवशाखाप्रसवादिग्राहिणमुच्छ्राययन् व्यतीतमप्यर्थं वर्तमानमिवा-परोक्षयति । यथा च मालविकाग्निमित्रे चित्रदर्शनाद्राज्ञो मालवि-कादर्शनाभिलाषः, नृत्यदर्शनावसरे विदूषकेण प्रश्नव्याजेन मालवि-काहासोत्पादनादितरेतरानुरागोदयः, प्रमदवने चाशोकदोहदार्थमुप-गताया राज्ञा समागमप्रकारः समुद्रगृहे च द्वयोरभिगमः, परश्च संदर्भः क्रमशो विजृम्भमाणविस्रम्भमनुरागपोषमेव दर्शयति । यथा च विक्रमोर्वशीये असुरबन्दीग्रहान्मोचिताया उर्वश्याः स्वं रथमारो-पितायाः प्रभावोपकारपरवशीकृतात्मनो गुणगौरवादेकासनवशेन य-दृच्छोपनतादर्शनादितश्चानुरागोद्भवः पुनः पुनः सङ्गविरहाभ्यां कामपि भूमिं गमितः । यथा वा शाकुन्तलेऽपि वृक्षसेचनप्रसक्तानां मुनिकन्यानां विस्रब्धविहारदर्शनात् " अणसूए अदअपिणद्धेण थण-

वक्कलेण पिअंवदाए दिढं णिअंदिदाह्मि दाव णम्," इति शकुन्तलावचने "हला एत्थ दाव पयोहरवित्थारइत्तअं अत्तणो जोव्वणं ववालंह" इति प्रियंवदाप्रतिवचनस्य, (प्रियंवदा) "हला अणसूए अविजाणासि किं णिमित्तं सउंदला वणजोसिणिं अदिमत्तं पक्खां दित्ति। (अनसूआ) ण खु विभावेमि कहेहिकहेहि (प्रियंवदा) जह वणजोसिणी अणुरूवेण पाअवेण संगदा एव्वंणाम अहं वि अत्तणो अणुरूवं वरं लहेअंति। इत्यादेश्चोक्तिप्रत्युक्तिक्रमस्य श्रवणादुपजातरागस्य राज्ञो मधुकरवृत्तान्तव्यपदेशेन प्रवेशः कुमारीभिः प्रश्नप्रतिवचनव्यतिकरे शकुन्तलाया लज्जामदनसंप्लवः परां भूमिं गमिष्यतः प्रणयस्य प्रचयक्रमादुपक्षिप्तः तदनुरोधी चोत्तरः संदर्भः।तदिदं रसयोजनवैदग्ध्यं कालिदासस्याधिगुणं। यत्रान्ये भवभूतिबाणप्रभृतयोऽपि न सिद्धिमध्यरुक्षन्। त्रय एव च कालिदासस्य नाट्यप्रबन्धा उपलभ्यन्ते मालविकाग्निमित्रं, विक्रमोर्वशीयं, शाकुन्तलं च। तत्र मालविकाग्निमित्रमुत्पाद्यकथावस्तुकं धीरललिताख्येन शृङ्गारिणा नायकेनोपेतं प्रकरणं नाम रूपकं। अग्निमित्र एव हि पुराणे निर्दिष्टनिर्देशः। न पुनरिदं कथावस्तु रेखयाऽपि क्वचिदुन्मीलितपूर्वं। विक्रमोर्वशीयं च महाभारतादिप्रसिद्धेतिवृत्तमपि पश्चादुर्वशीविरहसमागमादेः कविनैव योजनान्मिश्रं दिव्यनायिकाश्रयाच्च त्रोटकाख्यमुपरूपकं। शाकुन्तलं तु प्रख्यातेतिवृत्तं धीरोदात्तनायकं नाटकं रूपकेषु प्रथमं। "महासत्वोऽतिगम्भीरः कृपावानविकत्थनः। स्थिरो निगूढाहङ्कार" इत्युक्तधीरोदात्तलक्षणसमग्रो हि दुष्यन्तः। शकुन्तला दिव्याङ्गनाप्रसूतिर्महातेजसो विश्वामित्रस्य तेजोविवर्तः काश्यपस्य च संवर्धनात्

सुतेति रूपलावण्यधर्मधैर्यादयोगुणास्सहजा एव ह्यस्याः । तदुभयाश्रयं ब्रह्मक्षत्रप्रभावानुभावप्रवृत्तिनिदर्शनं लोकस्यैव दर्शनाच्छ्रवणाद्वा गुणोन्नतिमादधानं वस्तुनायकादिप्रकर्षसदृशन वार्णागुणविशेषेण च कदाचिदपि काव्यविदां हृदयान्यविजहदिदं शाकुन्तलं नाटकरत्नं समाभ्यधिकवार्तावर्जितं किमपि पदमामादयति । येनाहुः "नाटकेषु शकुन्तला" इति। शाकुन्तलनाम्ना चात्र नायिकाप्राधान्यं प्रतीयते । महाभारतेऽपि शकुन्तलोपाख्यानव्यपदेशः शकुन्तलायाः प्राधान्यमवगमयति । सा हि जन्मतो गुणतश्च विशिष्यते । येन राजर्षेर्महाप्रभावस्यापि दुष्यन्तस्य चरितं नानयाऽननुविद्धं किमप्युदाहरणपदवीमुपाश्रितं । तदिह महाभारतवदेव शाकुन्तलव्यपदेशेनेतिवृत्तमुपात्तं । अङ्गुलीयवृत्तान्तस्तु केवलमत्र कविना स्वयं योजितः । यदाश्रयमभिज्ञानशाकुन्तलाभिधानं नाटकस्य । अभिज्ञानवृत्तान्त एव हि षष्ठसप्तमयोरङ्कयोराश्रयः । षष्ठसप्तमौ चाङ्कौ किरीटमिव पुरुषस्य प्रबन्धस्यैव कामपि शोभामावहतः । यतः सपीठादिव शिखराद्विमानं प्रबन्धरत्नमिदं दर्शनीयामुन्नतिमुपयाति । ये खल्वपल्लवितमनीषा विच्छायवाचः पूर्वप्रबन्धानुहरणजीविनाश्च प्राकृताः कवयः । तेषां कविप्रख्याऽभिलाषपरवशानां बहुशः प्रयस्यतामपि काष्ठभारैरिव पुरुषशिरांसि विरसैरवसानैर्दुर्दर्शनि काव्यानि भवन्ति । महतां तु कवीनां वाग्विलासस्तरुरिव सर्वतः पुष्पपल्लवैर्नवेदृशब्दार्थैरुपचितः प्रकामरमणीयामग्रतो लक्ष्मीं गृह्णाति । कथावस्तुनो यस्मिन् पर्वणि विगलितवेद्यान्तरं दशान्तरं सहृदयहृदयान्यनुभवन्ति, तद्धि पचेलिमं रसभरनिर्भरं निगमनस्थानं कालिदासीय-

नाटकानां । विशेषतस्तु शाकुन्तलस्य । अत्र कथावस्तु विनिवेशेऽपि कवेर्वैदग्ध्यमनुचिन्तनीयं । महाभारतात् किलेदमुद्धृतं कथावस्तु । महाभारते शाकुन्तलोपाख्यानमेवमुपाख्यातं । यथा, दुष्यन्तो राजर्षिर्मृगयानुषङ्गात् कण्वाश्रमं विवेश । फलाहरणार्थं-गते महर्षौ तस्य दुहित्रा शकुन्तलया यथावदुपपादितार्हणस्तद्गुणविशेषाक्षिप्तचेतास्तस्या एव मुखात्तदुत्पत्त्यादिवृत्तान्तमवधार्य भार्यार्थेतां स्वयं वरयामास । निजगर्भसम्भवस्य कुमारस्य पितृराज्यभागित्वेन समयेन परिणयमिच्छन्तीं प्रतिश्रुत्य मनोरथमुपच्छन्दयंस्तां सपाणिं जगृहे । प्रतिप्रयाते च स्वनगरीं महर्षिभयज्वरार्दिते राजनि प्रत्यागतो वनान्तराद्दुहितरं व्रीडाविलक्षां यथापूर्वमनुपसर्पन्तीं पश्यन् प्रभावविदितार्थः प्रसन्न एवान्वमन्यत मुनिः । आपन्नसत्त्वा तु शकुन्तला त्रिषु वर्षेष्वतीतेषु महातेजसमसूयत कुमारं । कृतसंस्कारश्च महर्षिणा दुर्धर्षस्सबालस्सर्वानेव सत्त्वान् बलेन दमयन् सर्वदमन इति तापसैः कृतव्यपदेशस्तत्रैव तपोवने विहरन्नातिष्ठत् । द्वादशवर्षं च समधिगतशस्त्रशास्त्रविज्ञानं यौवराज्ययोग्यमेनमाकलय्य काश्यपो महर्षिः सपुत्रां शकुन्तलां शिष्यैर्नीयमानां पतिगृहं प्रजिघाय । नगरप्रवेशमनिच्छत्सु बहिरेव प्रतिनिवृत्तेषु कण्वशिष्येषु सपुत्रा शकुन्तला स्वयमेव राजद्वारमुपगम्य दौवारिकैर्निवेदितागमना प्रवेशिता च राजानमभिगम्य वत्स प्रणम पितरमिति पुत्रमादिदेश । किं कर्तव्यं तव वा पुत्रस्य वा तापसि मयेति चानुयुक्ता राज्ञा प्रतिश्रुतपूर्वं पुत्रस्य यौवराज्याभिषेकं स्मारयामास । जानन्नपि तमर्थमजानानिव राजा परिग्रहमेवाप्रतिपद्यमानो धर्मपत्नीं प्रत्याचख्यौ । तयोर्दम्पत्यो-

र्धर्माश्रये विवादे स्वचारित्रविस्रम्भान्निःशङ्कं सदसि राजानमवधूय धर्मवादिन्यां शकुन्तलायामशरीरिया वाचा सत्यापिते परिणये देवदूतेनानुशिष्टः प्रतिजग्राह दुष्यन्तः सपुत्रां पत्नीं । उवाच च सदस्यान् जाने चाहमेनां परिगृहीतपूर्वां । यदा युष्माकं परोक्षमावयोः सङ्गतं तदा पुत्रमस्या राज्ये निवेशयन् शङ्कनीयः स्यामिति मध्यस्थ इदानीमस्मि संवृत्तः । अशरीरया वाण्या देवदूतशासनेन चावचनीयः सम्प्रति भवद्भिरनुमोदितः कुमारं यौवराज्येऽभिषेक्ष्यामीति । ततश्च तथैवानुमतः कुमारमभ्यषेचयदिति"। एवमस्मिन् महति चरिते धीरोदात्तस्य दुष्यन्तस्य प्रतिश्रुतानिर्वहणं तद्रोपनाय न परिणयस्यैवापलापो धर्मपत्न्याश्च प्रत्याख्यानमित्येष विरूपो मिथ्याचारः । महाभरतं तु महतामपि संभावितप्रमादं सुलभस्खलितं च नाकलङ्कं चरितं प्रायेण भवतीति निदर्शयद्यथावृत्तं वृत्तमुपन्यस्यन्न दुष्यति । नाटकस्य तु रसमेव केवलं सामाजिकभावनाभूमौ निषेक्तुं प्रवृत्तिः । अन्यतमं साधनमत्रेतिवृत्तं । तच्च कविधीपरिपूतमवगलितदोषतुषमेव समीहितसंपत्तये प्रभवति । तथा चोक्तं ध्वनिकृद्भिः । "सन्ति सिद्धरसप्राया ये च रामायणादयः । कथाश्रया न तैर्योज्या स्वेच्छा रसविरोधिनी" ॥ इति कारिकां व्याचक्षाणैः "तेषु कथाश्रयेषु तावत् स्वेच्छैव न योज्या । यदुक्तं "कथामार्गे न चातिक्रम" इति । स्वेच्छाऽपि यदि योज्या तद्रसविरोधिनी न योज्या । इदमपरं प्रबन्धस्य रसाभिव्यञ्जकत्वे निबन्धनं । इति वृत्तवशायातां कथं चिद्रसाननुगुणां स्थितिं त्यक्त्वा पुनरुत्प्रेक्ष्याप्यन्तराऽभीष्टरसोचितकथोन्नयो विधेयः । यथा कालिदासप्रबन्धेषु यथा

च सर्वसेन विरचिते हरिविजये । यथा च मदीय एवार्जुनचरिते महाकाव्ये । कविना प्रबन्धमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यं । तत्रेतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत् तां भंक्त्वाऽपि स्वतन्त्रतया रसानुगुणं कथान्तरमुत्पादयेत् । न हि कवेरितिवृत्तमात्रनिर्वहणेन किंचित् प्रयोजनं इतिहासादेव तत्सिद्धेः" इति। तथा च य एव बीजो पक्षेपात् प्रभृति नैकरूपैः साधनसङ्ग्रहैर्बाधविधूननैश्च यत्नोपपादितपरिपोषो रसः।सकथं वैरस्य दुःस्थो नोद्वेगाय सहृदयानां । तथा च यदर्थः परिश्रमः कवेर्वा नटस्य वा तदेव हि समूलकाषंकषितं भविष्यति । यदिह चरिते काष्ठागतेन मदनाभिनिवेशेन विभावादिसाधनसामग्रीबृंहित वृत्तिना यत्नपरिणीताया निरवद्यगुणभूषणायाः प्रणयिन्याः प्रणयपरिभावि नायकवृत्तं । तदिदं स्मरणादस्मरणाद्वा सञ्जातमुपनिबध्यमानं पूर्वरूपविपर्ययाद्रसमेव पङ्कक्षोभाविलमिव सलिलमनादेयमावहेत् । यद्यपि लोकवृत्तमनेकरूपं । यथाभूतार्थदर्शनं चेष्यत एव द्रष्टृभिः तथाऽपि "नायकानां नायिकानां चाभिजनविद्यावृत्तवशादुत्तममध्यमाधमप्रकृतिवशाच्च गुणदोषविभागविभक्तानीतिवृत्तानि बहुधा यथावदुपदर्शयन्ति रूपकाण्युपरूपकाणि च नानैव लक्ष्यन्ते । विशिष्टाभिजनविद्यावृत्तयोः प्रकृत्या चोत्तमयोर्नाटकप्रबन्धवस्तुनोः शकुन्तलादुष्यन्तयोरुदात्तो रसबन्धो न मनागपि वैगुण्यं सहत इति कथावस्तुलेशो विसदृशोऽपि सुसदृशः प्रणीतः कविना । आलेख्यं च कविकर्म चेत्युभयमिदं सामान्यविशेषाश्रयमन्यथा चान्यथा च निर्मीयते । तत्र विशेषतश्चैत्रमैत्रादिव्यक्तिरूपमालिखितुकामेन शिल्पिना गुणो वा दोषो वा यस्य

यथोपलब्धस्तस्य तथोपपादित एव चित्तस्य गुणाय भवति । सामान्यतस्तु पुरावृत्तविश्रुतगुणान् लोकोत्तरान् पुरुषानालिखता यावता दोषा दूरीक्रियन्ते गुणाश्चोपनीयन्ते । तावता यत्नेन कलाकौशलमाविष्कर्तव्यं भवति । कविभिरपि रामयुधिष्ठिरादीन् स्वकालोपलब्धान् विशिष्य वर्णयद्भिर्व्यासप्राचेतसादिभिर्यथोपलम्भं गुणो वा दोषो वा व्यक्तिगतो दर्शितः । नाटककृतस्तु गुणोत्तरस्त्रीपुंसयोश्चरितापदेशेनरसप्रकर्षं दर्शयितुमेव संरम्भ इति सामान्यानुरोधी कथावस्तुविनिवेशो लेशतो विपरिणमय्यापि परां शोभामानीयते महाकविना । यदत्रदुर्वासदृशापनिबन्धनं राज्ञः परिग्रहानाकलनं, ततश्चाधर्मभीरोस्संशयमग्नहृदयस्य सत्यपि रागे सर्वप्रकारहृदयंगमादिन्द्रियार्थादात्मनिरोधः । तदिदमुदात्तगुणस्य कथानायकस्य गुणमेव बहूकरोति । पञ्चमाङ्के हि "अहिणवमहुलोलुवो तुमं तह परिचुंबिअ चूदमञ्जरिं । कमलवसदिमत्तणिव्वुदो महुअर विह्मरिदोऽसि णं कहं ॥" [अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीं । कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथं ॥] इति हंसपदिकागीतश्रवणात् परं, "किं नु खलु गीतमेवंविधार्थमाकर्ण्यैतज्जनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि" इति परिचिन्तनं, अग्रे च "संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । तथाह्यनया ॥ मय्येव विस्मरणदारुणचित्तवृत्तौ वृत्तं रहःप्रणयमप्रतिपद्यमाने । भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या भग्नं शरासनमिवातिरुषा स्मरस्य" इत्येवमान्तररागव्यतिकीर्णमेव शापमहिम्ना विस्मरणं रसस्य नापकर्षाय । "रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुको भवति यत्

सुखितोऽपि जन्तुः। तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि" इति च संस्कारशेषस्य प्रेम्णो विमुक्तेत्थंभावस्य सद्भावआविष्कृतः। यथा यथा चायं शापेनास्तमितव्यक्तिः प्रणयः। तथा तथा चाभिज्ञानदर्शनाद्विमुक्ते शापे सानुशयं रागं समुच्छ्राययन् पुनः समागमे प्रकामरसनीयतामापादयति। यदि च नाम शकुन्तलाहस्तादविच्युतमङ्गुलीयं भवेत्। तर्हि शापवृत्तान्तस्यैव न कश्चिदर्थः स्यात्। किंच विस्मृत्य प्रत्याचक्षाणस्य तदात्व एवाङ्गुलीयकदर्शनाद्राज्ञः प्रत्यभिज्ञानमगृहीतस्मृतिप्रमोषनिमित्तानां सदस्यानां तपस्विनां च समक्षं लघूकृतात्मनः स्वात्मनि विलक्षस्य प्रत्युत वैरस्याय स्यात्। समकालमेव विरूपयोस्तिरस्कारपुरस्कारयोरकस्मात् सम्भवो हि न महापुरुषसुलभ इत्यंगुलीयविभ्रंशकथनमत्र महागुणं। अथ च शापो मोक्षो वा यदि शकुन्तलाया विदितावभविष्यतां तदा नात्मना शकुन्तलाया राजान्तिकगमनमलप्स्यतावसरं। अङ्गुलीयकमेव हि तर्हि प्रथमं विसृज्येतायेनैष पारिप्लवो न प्रसंजेत्। तथा च नोत्तरस्य संविधानस्यावतारः स्यात्। स हि सन्दर्भो विप्रलम्भाश्रयः। यतः प्रबन्धः सातिशयं स्वदते। द्विप्रकारस्तु विप्रलम्भः योगपूर्वश्चायोगपूर्वश्च। यस्सङ्गतयोर्वियोगः स योगपूर्वः। यश्च दर्शनश्रवणादिभिश्चित्तासङ्गमुपेतयोस्सङ्गमप्रतिबन्धः सोऽयमयोगपूर्वः। उभयविधोऽप्यसौयावता गुरुरनुभूयते तावता कमनीयतां नयति पुनःसङ्गमं शाकुन्तले चायोगविप्रलम्भो मिथश्चक्षूरागारम्भस्सङ्गमोपपादनावधिर्मनागेवोपक्षिप्तः। तपोवने हि विवाहः। कावकाशस्तत्र विरहपरिणाहस्य। दर्शितं चेदं कविना चतुर्थाङ्कविष्कम्भे "दुक्खसीले तव-

स्सिअणे को वा अब्भत्थिअदि" [दुःखशीले तपस्विजने कोवा अभ्यर्थ्यते] इत्यनसूयावचनेन। तदेवं योगविप्रलम्भमेव परिशिष्यमाणमन्ते भविष्यतः सम्भोगशृङ्गारस्य परभागमादधानमादाय प्रवृत्तो नाटकीयवस्तुनः पश्चिमखण्डः प्रबन्धस्य शेखरायमाणो विजयते। यदत्र निर्वर्तितसुरतकृत्यस्य कश्यपसमक्षं राज्ञः प्रियासङ्गमे कश्यपमुखाद्विदितविस्मरणकारणस्य स्ववृत्तं प्रत्यनवज्ञानं, शकुन्तलायाश्च प्रेयस्यविस्रम्भपरिहाणं, तदुभयं भूयोऽपि परस्पररतेरतिशयमुपपादयति। तथा च विक्रमोर्वशीये गन्धमादनवने शापालुताभावं गतामुर्वशीं विप्रयुज्य जलदागमोद्दीपितोन्मादस्य पुरूरवसः कालेन कृच्छ्रादुपलब्धः सङ्गमः कमपि विशेषं पुष्यति। मालविकाग्निमित्रे तु मालविकाप्रतिकृतिदर्शनात् प्रभृति जातरागस्याग्निमित्रस्य, प्रागेव च माधवसेनसङ्कल्पावगमादग्निमित्रगुणश्रवणाच्च सञ्जातमनःसङ्गायाः शुद्धान्तमासाद्य च विशेषतो जातरागायाः मालविकायाश्च, नृत्यप्रसङ्गेन प्रमदवनसमवायेन चेतरेतरहृदयपरिज्ञाने सति देवीविरोधादनिष्पत्तिः सङ्गमस्य श्रेयानयोगविप्रलम्भः। ईदृशेष्वेव संविधानेष्वयोगविप्रलम्भो गुरुश्चारुश्च भवति। यो हि पदे पदे लब्धमिव समागममुपदर्शयन्नाशाबन्धं च दीर्घीकुर्वन् यूनोश्चित्तमाकर्षति, स एव परिणाममधुरो विप्रलम्भः प्रबन्धस्य भूषणं। कुलशीलादिव्यपदेशशालिनोश्च योगात् पूर्वमुत्कण्ठायाश्चिरावस्थायिन्याः सम्भवो न सुलभः। तदित्थमयोगविप्रलम्भस्य चारुत्वं कविप्रतिभासर्वस्वमेव स्यात्। विशेषस्तु शाकुन्तलस्य लोकोत्तरप्रभावसौभाग्ययोः शीलाचारपरिपालनव्यसनिनोर्धार्मिकयोः शकुन्तलादुष्यन्तयोरिति-

वृत्तविस्तरः कान्तासंमितोपदेशरूपः । काममेष रसघन इव प्रबन्धो मूलमध्याग्रेषु निर्विशेषमधुरः सहृदयैरास्वाद्यते । तथाऽपि विभावानुभावसात्त्विकव्यभिचारिपरिचितो रसान्तरैश्च यथायोगं योजितः क्रमेण सामाजिकमनीषामेकरसीकुर्वन्नवसाने मध्यन्दिन इव दिनमणिः समग्रां दीप्तिमूरीकरोति । स हि महताऽपि व्ययेनानवाप्तापचयस्य प्रभावो महाकविप्रतिभाणवस्य । चतुर्थाङ्के तु महर्षेर्दुहितृविरहप्रसङ्गे मनः संक्षोभः- शकुन्तलायाश्च पितृविरहासहता, वीतरागैरपि प्रकृतिवासनाया निश्शेषदुस्तरतां, पतिप्रणयिनीनामपि कुलवधूनां शरीरबन्धुवियोगस्य निष्ठुरतां च व्यनक्ति । विप्रलम्भस्तु स्नेहस्य कश्चिन्निकष इति चात्र सन्दर्भे स्फुटीभवति । अङ्कान्ते च "अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः । जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा" इति कण्ववाक्येन "दुस्त्यजं किं धृतात्मनां" इति भागवतोक्तं विवेकिनां "स्वायत्तं धैर्यं च दर्शितं । अपरश्चैष विशेषश्चतुर्थस्याङ्कस्य । दलद्वयमिलितं हि शाकुन्तलं नाटकं । अत्रादिमं दलं नायिकां प्राधान्येनाश्रित्य प्रवृत्तं । तपोवने हि पितृभवनोषितां शकुन्तलामागन्तुको राजा परिजगृहे, अथ दुष्यन्तप्रधानं द्वितीयं दलं । तद्धि स्वाङ्गीकारार्थिनीं राजकुलोपस्थितां शकुन्तलामधिकृत्य प्रवृत्तं । अन्ते स्वर्गाधिरोहणमिन्द्रारिनिरसनं च राज्ञ एव हि विशेषः । एवं विभक्तविशेषयोरुभयोरपि दलयोर्मध्यमणिरिव दीप्तश्रीश्चतुर्थोऽङ्कः य एव हि सप्तमाङ्कावसाने हेमकूटे कश्यपाश्रमे सापत्याया: शकुन्तलायाः प्रियतमसमागमाभ्युदयः प्रस्तुतः स हि सर्वः कण्वेन दुहितृवत्सले-

नाशासितश्चतुर्थाङ्के। काश्यपश्च कण्वः। तदेवं नाभिरिव नाटकस्य कृत्स्नस्य चतुर्थाङ्कः। गुरुशिष्यसमुदाचारश्चात्र कण्वशार्ङ्गरवसंवादे ग्राह्यगुणोलोके विशेषतःपरिगणनामर्हति। तथा हि "वत्सशार्ङ्गरव भगिन्यास्ते मार्गमादेशय" इत्यादिषु गुरुर्विनेये पितृवद्वत्सलतां दर्शयति। विज्ञानसंवादे तु दर्शनीये "पश्य वनौकसोऽपि सन्तो लोकज्ञा वयं" इत्यादौ मित्रविस्रम्भेण शिष्यं सम्भावयति। शिष्योऽपि "भगवन्निमे स्मः" "गृहीतस्संशयः" इत्यादिषु पितृवन्निदेशवर्तित्वं, "भगवन्नोदकान्तात् स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरं अत्र संदिश्यनः प्रतिगन्तुमर्हसि।", "न खलु धीमतामविषयो नाम" इत्यादिपु च सुहृद्वृत्तिं दर्शयति। एवमयं व्यतिकरः सौहार्दहृद्यामसंकरविविक्तामुन्नतां गुरुशिष्यस्थितिमभिव्यनक्ति। षष्ठाङ्के च "स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे" इति दुष्यन्तवाक्येन समग्रगृहीतविद्याचारेपु गुरुशिष्येपु सैव हि गुरुवत् प्रतिपत्तिर्दर्शिता। एवमीदृशविशेषशालितामादायोच्यते "तत्रापि च चतुर्थोऽङ्कः" इति। तत्र च "अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनस्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च तां। सामान्यप्रतिपत्तिपूर्वकमियं दारेपु दृश्या त्वया भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः" इति श्लोको दुष्यन्तानुशासनमपदिश्य नियमनियतात्मनामप्यपत्यस्नेहश्चित्तविक्षेपहेतुरिति, महाकुलीनतायाः प्रतीक्ष्यप्रतिपत्तिरनुयायिनीति, दाम्पत्यमन्यादृशं स्थानं प्रेम्ण इति च लोकतत्त्वमनुदर्शयन् सामान्यप्रतिपत्तिप्रार्थनया च सत्यपि स्नेहे स्वार्थे मध्यस्थता महतां स्वो भाव इति च व्यञ्जयन्, शरी-

रसंबन्धादपि न्याय एवाद्रियते मनीषिभिरिति च ध्वनयन् सामान्यतो लोकमनुशास्ति । अथ च " शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः " इति च शकुन्तलामाश्रित्य यावल्लोकावस्थायी कुलवधूचारित्रपथः प्रकटीकृतः । " अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला । तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं मम विरहजां न त्वं वत्से शुचं गणयिष्यसि " इति श्लोकश्च महत्यपि विभवे कृत्यावधानं प्रभुत्वसुलभमदालस्यलोभादिवर्जनं चेत्यादिगुणसंग्रहं प्रधानं प्रत्याययति । " भूत्वा चिराय चतुरन्तमहीसपत्नी दौष्यन्तिमप्रतिरथं तनयं निवेश्य । भर्त्रा तदर्पितकुटुम्बभरेण सार्धं शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् " इत्यनेन च सार्वभौमत्वमपि विमृश्यमानमायासायैवान्ततः । वीतरागतैव निर्वृतिरात्मवतामित्ययमर्थः स्फुटीभवति। तदेवं स्त्रीपुंसयोः समुचितोपदेशसंग्रहं त्रैकालिकहितानुबन्धिनं दधानं सार्वलौकिकानुभवसंवादपेशलमेतदिह श्लोकचतुष्टयं सारगणनामर्हति। येनोच्यते " तत्र श्लोकचतुष्टयं " इति । न चैतावता चतुर्थाङ्कादुपरि नाटकस्य माधुर्यापचयः शक्यशङ्कः । यतो यथा पार्थिवो रसो मूलादारोहन् पादपस्य स्कन्धाग्रे शाखाप्रशाखाद्यग्रिमावयवधारणक्षमां सारवत्तां निक्षिपन्नपि क्रमशः पल्लवेषु कुसुमेषु फलेषु रूपरसगन्धानन्यांश्चान्यांश्च सममुपचिनोति, तथैव चास्मिन्नपि नाटके सन्दर्भाश्रयो रसः क्रमेणाङ्कादङ्कमारोहं श्चतुर्थेऽङ्के कमपि परिपोषं

गृह्णन्नपि यथोत्तरमतिशायिनीं माधुर्यलक्ष्मीमनुदर्शयत्येव। अत्रैके ब्रूयुः महर्षिणा स्वशिष्यजनेनैव प्रापितां गौतमीसनाथां मुनिदुहितरं विस्मृतसम्बन्धोऽपि स्वैरिणीनिर्विशेषं विरसं निरसितुं प्रवृत्तो नायकगुणैर्हीयते राजा। साक्षादनभिज्ञातां प्रति पश्चादङ्गुलीयकदर्शनादनुशयो निबध्यमानः प्रकृतीनां हि पृथग्जनवदनवस्थितवृत्तं प्रभविष्णुं दर्शयन् लघूकुर्यात्। तदेवमुपकल्पितेनाप्यभिज्ञानवृत्तान्तेन नायकापकर्षो न निवारितः। तदप्यभिज्ञानं प्रत्याख्यानदशायामेव यदि दर्शितमभविष्यत् तदानीमभिज्ञानप्रत्यभिज्ञातां तदात्व एव भर्ता भार्यां प्रत्यपत्स्यत। तथा च तिरस्कारपारुष्यमपि नायकस्य विसदृशं नातिभूमिमारोहेत्। पञ्चमाङ्केन च नाटकं समाप्तं स्यात्। तदेवं निरर्थकमेव शेषयोरङ्कयोरुत्थानमिति। तदिदमविमर्शसुन्दरं। तथा हि। यदि नाम पञ्चमाङ्कमात्रेण परिसमाप्तं नाटकमिदं स्यात्। तर्ह्यपरिणतफलकल्प प्रौढरसाभिलाषिणां रसविदामास्वादपूरणाय न कल्पेत। तुल्योत्कण्ठा व्यग्रयोरेव हि यूनोः कृच्छ्रोपपादितः सङ्गमाभ्युदयो भवति भावनीयो भावकानां। चतुर्थे चाङ्के नायिकागतमेव केवलं विरहौत्सुक्यं प्रदर्शितं। तदपि कालविलम्बप्रतिसन्धानमात्रानिमित्तं। शकुन्तलाया अपि दुर्वासश्शापानवधारणादपायशङ्काविरहेण काष्ठागतं न भवति। अन्यतश्च, शापविस्मृतप्रणयस्य प्रत्युत कैव कथा नायकस्य विरहोत्कण्ठायाः। तथाविधयोश्च समागमोपनिबन्धो रसं पाकात् प्रच्यावयेत्। यत उक्तमनेनैव कविरत्नेन।

"तप्तेन तप्तमिव संघटनाय योग्यं" इति "यदेवोपनतं दुःखात् सुखं तदसवत्तरं। निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः"

इति च । यदि च कविना दुर्वासश्शापो विस्मरणहेतुर्नोपादायिष्यत, तदा तथाविधप्रियाप्रणयेनानुपदमेव राज्ञा यानसेनादिपरिकरोपनीतायाः शुद्धान्तप्रवेशनमात्रेणेतिवृत्तस्य समाप्तेश्चतुर्थ एवाङ्को नावातरिष्यन् । यदपि प्रियतमायाः सदसि परुषवचनैरवधूननं रसभङ्गायेति । तत्रापीदमस्त्यवधारणीयं - न ह्यत्र शकुन्तलानाभिसङ्गहे मनागपि राज्ञो वैरस्यं गम्यते । विस्मरणादेव हि शापनिमित्तात् परपरिग्रहभीरुणा धार्मिकेण रागवतैव सता राजर्षिणा कथमपि रमणीयादपि विषयान्मनः प्रतिवार्यते । जननान्तरानुभव इव च प्रियाप्रणयो विगलितेत्थंभावो वासनाशेषः परिग्रहपरिहारयोश्चित्तमनवस्थयन्ननवधारणविसंष्ठुलं राजानं विप्लावयति । तथा हि " अहिणवमहुलोलुवो तुमं तह परिचुम्बिअचूदमञ्जरिं । कमलवसदिमत्तणिव्वुदो महुअर विम्हरिदोऽसि णं कहं " इति हंसपदिकागीतिनिशमने सति, " किं नु स्थलु गीतमेवंविधार्थमाकर्ण्य इष्टजनविरहादितेऽपि बलवदुत्कण्ठितोऽस्मि इति कृतचिन्तः पश्चात् " अथवा । रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्यत्सुको भवति यत् सुखितोऽपि जन्तुः । तच्चेतसा स्मरति नूतमबोधपूर्वं भावास्थिराणि जननान्तरसौहृदानि" इति स्वेनैवाश्वस्तोऽपि तया चिन्तयाऽन्तरविमुक्त इति स्फुटीकृतं " इति पर्याकुलस्तिष्ठती " त्यनेन । अङ्कान्ते च निष्क्रान्तायां शकुन्तलायां " शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति " इति गूढरागत्वमेव दर्शितं । उपस्थितायाः शकुन्तलायाः प्रथमदर्शनेऽपि " का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या । मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणां " इत्यने-

नविविक्तविवेको रागोदयः प्रदर्शितः। अथ च "इदमुपनतमेवं-रूपमक्लिष्टकान्ति प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन्। भ्रमर इव विभाते कुन्दमन्तस्तुषारं न च खलु परिभोक्तुं नापि शक्नोति हातुं।" इति च विशदावभासविप्लुतं विरहौत्कण्ठ्यमेव स्पष्टीकृतं। एवं "सन्दिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते। तथा ह्यनया। मय्येव विस्मरणदारुणचित्तवृत्तौ वृत्तं रहः प्रणयमप्रतिपद्य-माने। भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या भग्नं शरासनमिवाति-रुषा स्मरस्य" इत्यादिकं च रसातिशयमेव धर्मलोपसंशयप्रतिरुद्ध-प्रसरं गमयति। एवमादिभिरनुभावैः राज्ञश्चित्तसमवस्थां जानतैव हि पुरोधसा स्वगृहं शकुन्तला निनीषिता। अनुमतं चेदं राज्ञा। ततश्च ज्ञायते संस्कारमात्रावस्थो राज्ञः शकुन्तलाप्रणयोऽस्त्येव। न तु निश्शेषप्रमुषित इति। दृष्टे चाभिज्ञाने निवृत्तशापस्य सपदि संस्कारोद्बोधादनुस्मरणं गूढानुरागसन्धुक्षणाद्रतिमेव परां कोटिमारो-पयति। प्रकृतीनां च शकुन्तलायां तपोवनादुपगतायां स्वबन्धुभिरुप-नीतायां न चारित्रलोपशङ्काऽवसरः। प्रभोरनवक्लप्तिदुस्थामवस्थां शकुन्तलायाश्च स्वात्मप्रत्ययनिष्कम्पां वृत्तिमवलोक्य स्वामिन्येव प्रमा-दातिशङ्केति च तेनैव प्रकरणेन स्फुटीभवति। पुरोहितगृहगामिन्याश्चा-प्सरस्तीर्थोपान्ते तेजोमयदिव्यवनितापरिग्रहस्तामेव सम्भावनामव-स्थापयति। षष्ठाङ्के चोपनिबद्धो विप्रलम्भाभिधारः पूर्वरसमेवाविच्छेदेन बहुलीकुर्वन् समागमस्य महतीं शोभामुपनयति॥

यदिह धनमित्रस्य श्रेष्ठिनो व्यसनप्रसङ्गादापन्नसत्त्वायाः प्रेय-स्याः परित्यागानुशयेन प्रवृद्धेन मूर्च्छनं राज्ञः, यच्च मातलिसमास्क-

न्दितस्य विदूषकस्यार्तप्रलापेन तेजोऽभिभवासहतया महापुरुषसुल भया क्षोभात् प्रतिबोधः, तदेतदखिलमतीव रसनीयमनुभूयते उत्तररामचरितादिषु शश्वन्मोघप्रतिबोधौ लघुनैव हेतुनोपनिबद्धं महापुरुषगुणाननुगुणौ सहृदयानां रसास्वादं मनाग्विकलयत एव मारीचाश्रमे पुत्रदर्शने पुत्रस्य क्षात्रियत्वपुरुवंश्यत्वयोस्तात्पितुर्धर्मपत्नी परित्यागित्वे मातुः शकुन्तलाभिधाने वा विदितेष्वपि सर्वोपाधि व्यभिचारातिशङ्कयाऽन्तर्गतोत्कण्ठाऽतिशयप्रदर्शनं लोकानुभवसंवा दादतितरांहृदयङ्गमं । उत्तररामचरिते रामस्य कुशलवानुदर्शने विक र्तनकुमारच्छायायाः स्वसादृश्यस्य सीतासमानतायाश्चात्मनैवावधार णमनुत्सुकस्य तटस्थस्येव विस्रब्धमनुसन्धानं प्रतिभाति । अन्ततश्चात्र शकुन्तलासङ्गमप्रकारः कण्वपमुखाच्छापपरिज्ञानं च किमपि सहृद यसंवेदनीयं तत्त्वान्तरम् ॥

अत्र नायिकासमागमस्य प्रथमं तपोवने पश्चाच्च मारीचाश्रमे देवभूमौ वृत्ततया विदूषकव्यापारस्य परिमितः प्रसङ्गः । तत्र द्वितीयाङ्के राज्ञ एकाकिनस्तपोवनावस्थानं संविधातुं मृगयाविनिवर्तनाय च देवीशासनापदेशेन सेनाप्रतिप्रेषणप्रस्तावाय च चक्षुः प्रीतिमनस्सङ्ग पर्वारूढस्य शकुन्तलाश्रयस्य राजानुरागस्य प्रदर्शनाय च विदूषकस्य नर्मसचिवस्य प्रवेश उपक्षिप्तः । पञ्चमाङ्कारम्भे च हंसपदिकागी तप्रसङ्गेन शकुन्तलादर्शनात् पूर्वं तिरोहितविवेकां सौषुप्तिकविस्फुरण सधर्मिणीं भूतपूर्वप्रणयप्रतिपत्तिमुत्तरप्रबन्धार्थव्यापिनीमुपक्षेप्तुं नर्म सचिववृत्तान्तः स्तोकमवतारितः । षष्ठे चाङ्के व्यक्तिं गतस्य शकुन्त लाविप्रलम्भस्य विनोदोपायस्य च रूपं निरूपयितुं भूयः प्रियासङ्ग-

हेतोस्त्रिदिवारोहणस्य मातलिप्रवेशेनोपोद्घातमारचयितुं विरुद्धरसेनामर्षेण विरहविषादं व्यवधातुं च विदूषकवृत्तान्तनिवेशः परां शोभामावहति ॥

अत्र नाटके शकुन्तलासख्यौ चानसूयाप्रियंवदे रूपशीलविज्ञानादिगुणशालिन्यौ दर्शिते । यथा तृतीयाङ्के "हला सउंदले अणब्भन्तराखु वअं मअणगदस्स उत्तंदस्स । किंदु जारिसी इदिहासणिबन्धणेसु कामअमाणाणं समवत्था सुणीअदि तारिसिं दे पेक्खामि" इति प्रियंवदावचनतो युगपदेव शीलविज्ञाने दर्शिते । चतुर्थाङ्के च "सहिअणुपजुत्तभूसणो अअं जणो । तह वि चित्तकम्मपरिअएण दाणिं दे अंगेसु आहरणविणिजो अं करेमो" इत्यनेन कलाकौशलमाविष्कृतं । तयोश्चानसूया यवीयसी ऋजुभाषिणी च, प्रियंवदा तु मनाग्ज्यायसी वक्रोक्तिशीला च । तदिदमसङ्करेण तत्रालापव्यतिकरे स्फुटमवसीयते । शकुन्तलायाश्च श्लोकरचनालेखनादिप्रस्तावेन विद्याविनीतत्वं व्यक्तमेव ॥

अन्यदप्येवमस्य प्रबन्धस्य प्रत्यङ्गसौभगं परामृश्यमानमुत्तरोत्तरं गम्भीरं च मधुरं च सहृदयसर्वस्वं नास्मादृशां वचनविषये भाति इति विरम्यते ॥

ति. ई. श्रीनिवासाचार्यः,
शतावधानः.

APPENDIX A.

॥ श्रीः ॥

॥ पद्मपुराणकथा ॥

शेषउवाच—

दुष्यन्तो नाम राजर्षि श्चन्द्रवंश विभूषणः ।
पौरवः सुमहातेजा वेदवेदाङ्गपारगः ॥ १
धनुर्विद्यासु निपुणः सर्वराज गुणान्वितः ।
कन्दर्प इव सौन्दर्ये धैर्ये च तुहिनाचलः ॥ २
समुद्र इव गम्भीरः कुबेर इव ऋद्धिमान् ।
प्रतापे वासवसमस्तेजस्वी भानुमानिव ॥ ३
सत्सु स्निग्धो यथा चन्द्रो धर्मतन्त्रे यथा मनुः ।
सप्रजाः पालयामास नृपः पुत्रानिवौरसान् ॥ ४
कदाचिन्मृगयां राजा स जगाम बलैर्वृतः ।
रम्यं स्यन्दनमारुह्य नानामणिगणाचितम् ॥ ५
अथारण्ये ददर्शासौ मृगमत्यन्तमूर्जितम् ।
तमन्वधावद्राजर्षिः मृगमात्तशरासनः ॥ ६
मृगोपि बलवांस्तस्मिन्नुत्प्लवेन महीयसा ।
धावत्येव ततो राजा बद्धामर्षोऽनुधावति ॥ ७
ततः कण्वाश्रमाभ्याशे मृगं प्रति महाबलः ।
सन्दधे शरमत्युग्रं शब्दभेदिनमाशु वै ॥ ८

तं तथा संहितशरं कण्वशिष्याः सुदूरतः ।
अब्रुवन्नाश्रममृगो न हन्तव्यो महीपते ॥ ९
तदाश्रममृगेत्येवं कर्णार्द्धमागते स्वरे ।
संजहार महाबाणं पौरवः पौरुषान्वितः ॥ १०
प्रत्याख्यातसमुद्योगस्तृषार्त्तस्स महीपतिः ।
तोयमन्वेषयन्कन्या ददर्शाप्सरसां समाः ॥ ११
स्वानुरूपघटैः कक्षविन्यस्तैः सरसः पयः ।
आहृत्य सिञ्चतीर्बाला वन्यानाश्रमपादपान् ॥ १२
तासां मध्येऽतिरम्यांगी कन्या नाम्ना शकुन्तला ।
राजानं प्रेक्ष्य सुस्निग्ध मुवाच वचनं द्विज ॥ १३
त्वमद्यातिथिरायातः सत्कृतो यास्यसि ध्रुवम् ।
इदमासनमेतत्ते पाद्यमर्घ्यं च गृह्यताम् ॥ १४
तद्वागमृतसंतुष्टो गृहीत्वातिथिसत्क्रियाम् ।
मदनाशुगसंपातकिञ्चित्स्पृष्टमनोरथः ॥ १५
उवाच राजा दुष्यन्तः कासि कस्यासि भामिनि ।
पश्यामि त्वां वरारोहे देवीमिव दिवश्च्युताम् ॥ १६
राजन्योहं पुरुकुले दुष्यन्तो नाम भूपतिः ।
तच्छ्रुत्वा सा सखीं प्राह कथयस्व ममोद्भवम् ॥ १७

सख्युवाच—

राजन्यो गाधितनयो विश्वामित्रो महामनाः ।
वसिष्ठेन जितो युद्धे ब्रह्मण्येन बलीयसा ॥ १८
गर्हयन्क्षत्रियबलं ब्रह्मण्यं बहुमानयन् ।

ब्राह्मण्यार्थी तपस्तेपे बहुवर्षसहस्रकम् ॥ १९
तद्दृष्ट्वा भयमापन्नः शक्रः संमन्त्र्य दैवतैः ।
मेनकां प्रेषयामास तपोविघ्नाय पार्थिव ॥ २०
सागत्य पुरतस्तस्य स्वर्गाभरणभूषिता ।
प्रलोभयामास मुनिं विश्वामित्रं सविभ्रमैः ॥ २१
जितेन्द्रियोपि कामेन तदपांगधनुश्च्युतैः ।
कटाक्षबाणैः राजेन्द्र विव्यधे गाधिनन्दनः ॥ २२
धैर्याच्च्युतोथ बाहुभ्यामाश्लिषन्मेनकां मुहुः ।
रेमे च मदनाविष्टः क्षणात्संज्ञामवाप सः ॥ २३
व्रीडितस्तां विसृज्याथ वनेऽस्मिन्प्रययौ द्रुतम् ।
मेनकापिच तं गर्भं विमुच्य गहने वने ॥ २४
शक्रलोकं समापेदे न प्रैक्षत पुनर्नृप ।
शकुन्तैरथ गर्भोऽसौ ररक्षे पृथिवीपते ॥ २५
अतः शकुन्तला नाम नृपेयं वरवर्णिनी ।
कण्वस्तु सुमहातेजाः कन्यां वीक्ष्य वने स्थिताम् ॥ २६
अनुकम्प्य स्वसुतात्वे कल्पयामास सुन्दरीम् ।
मुनिना संभृता कन्या तं तातं मन्यते सदा ।
सुतां कण्वस्य विद्धीमां मुनिवर्यस्य भूपते ॥ २७

दुष्यन्त उवाच—

सुव्यक्तं राजपुत्रीयं यथा कल्याणि भाषसे ।
अन्यथा पौरवाणां हि मनो नैवानुरज्यति ॥ २८
भार्या भवतु सुश्रोणी ममेयं मृगलोचना ।

सुवर्णमालां वासांसि कुण्डले परिहाटके ॥ २९
नानापत्तनजे शुभ्रे मणिरत्ने सुशोभने ।
आहरामि महाभागे निष्कादीन्यतुलानि च ॥ ३०
सर्वं राज्यं प्रदास्यामि भार्या भवतु ते सखी ।
गान्धर्वेण च मां भीरु विवाहेन वृणोतु च ।
विवाहानां हि रंभोरु गान्धर्वः श्रेष्ठ उच्यते ॥ ३१

शकुन्तलोवाच—

फलाहारो गतो राजन्पितामेऽत आश्रमात् ।
मुहूर्तं तु प्रतीक्षस्व स मा तुभ्यं प्रदास्यति ॥ ३२

राजोवाच—

इच्छामि त्वां वरारोहे भजमानामनिन्दिते ।
त्वदर्थं मां स्थितं विद्धि त्वद्गतं हि मनो मम ॥ ३३
आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः ।
आत्मनैवात्मनो दानं कर्तुमर्हसि सुव्रते ॥ ३४

❀ ❀ ❀

सत्वं मम सकामस्य सकामा वरवर्णिनी ।
गान्धर्वेणैव धर्मेण भार्या भवितुमर्हसि ॥ ३५

शकुन्तलोवाच—

यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम ।
प्रदाने पौरवश्रेष्ठ शृणु मे समयं प्रभो ॥ ३६
प्रतिजानीहि सत्यं मे यथा वक्ष्यामि तेऽनघ ।
मम जायेत यः पुत्रः सभवेत्त्वदनन्तरः ॥ ३७

युवराजो महाराज सत्यमेतद्ब्रवीमि ते ।
अभिज्ञानञ्च राजेन्द्र देहि स्वमङ्गुलीयकम् ।
यद्येतदेवं राजेन्द्र अस्तु मे संगमस्त्वया ॥ ३८

शेषउवाच—

एवमस्त्विति तां राजा प्रत्युवाचाविचारयन् ।
अयि च त्वां हि नेष्यामि नगरं स्वं शुचिस्मिते ॥ ६९
एवमुक्त्वास राजर्षिस्तामनिन्दितविग्रहाम् ।
जग्राह विधिवत्पाणावुवास च तया सह ॥ ४०

❀ ❀ ❀

प्रेषयिष्ये च नेतुं त्वां वाहिनीं मन्त्रिभिस्सह ।

❀ ❀ ❀

इति तस्याः प्रतिज्ञाय स नृपो मुनिसत्तम ॥ ४१
मनसा चिन्तयन्प्रायाद्दत्वा चाप्यङ्गुलीयकं ।
काश्यपस्तपसा युक्तः श्रुत्वा किं नु करिष्यति । ४२

❀ ❀ ❀

एतस्मिन्नन्तरे विप्र कण्वोप्याश्रममाश्रयत् ।
शकुन्तला तु पितरं ह्रिया नोपजगाम तम् ॥ ४३
विज्ञायाथ च तां कण्वो दिव्यज्ञानेन मारिष ।
उवाच भगवान्प्रीतो व्रीडमानां शकुन्तलां । ४४
त्वयाद्य भद्रे रहसि मामनाभाष्य यः कृतः ।
पुंसा सह समायोगो न स धर्म्योपघातकः ॥ ४५
क्षत्रियस्य हि गान्धर्वो विवाहः श्रेष्ठ उच्यते ।

सकामायां सकामस्य निर्मन्त्रो रहसि स्मृतः ॥ ४६
महात्मा भविता पुत्रस्तव सुभ्रु महाबलः ।

❀ ❀ ❀

यइमां भोक्ष्यते कृत्स्नां भूमिं सागरमेखलाम् ॥ ४७

शेष उवाच —

परेऽहनि मुनौ याते विरहेण शकुन्तला ।
न लेभे मनसः शान्तिं चिन्तयन्ती महीपतिं ॥ ४८
क्षणं निश्वासबहुला सुष्वाप धरणीतले ।
लिलेख च नखेन क्ष्मां नाललाप सखीजनैः ॥ ४९
क्षणं विलोकयामास दिगन्तान्लोललोचना ।
ध्यायन्ती जगतीनाथं क्षणं प्राप्तमनोरथा ।
आस्ते स्म धरणीपृष्ठे ध्यानस्तिमितलोचना ॥ ५०
एतस्मिन्नन्तरे विप्र दुर्वासास्तपसा ज्वलन् ।
आजगामाश्रमपदं कण्वस्य द्विजसत्तम ॥ ५१
दूरादुच्चैर्बभाषेऽथ केयं पर्णोटजे स्थिता ।
विलोकयतु मां प्राप्तमतिथिं भोजनार्थिनं ॥ ५२
इत्युच्चैर्मुहुराभाष्य न प्राप्यातिथिसत्क्रियां ।
तपोधनस्तु कोपात्तु शशाप क्रोधनो मुनिः ॥ ५३
यं त्वं चिन्तयसे बाले मनसाऽनन्यवृत्तिना ।
विस्मरिष्यति स त्वां वै अतिथौ मौनशालिनी ॥ ५४
इत्येवमुक्ते वचने क्रोधाद्दुर्वाससा तदा ।
सखी प्रियंवदा नाम शुश्राव क्रोधभाषितं ॥ ५५

त्वरयाथ समागम्य पाद्यादिकृतसंचया ।
प्रसादयामास मुनिं मूर्ध्ना तच्चरणं गता ॥ ५६

प्रियंवदोवाच—

पौरवस्य इयं राज्ञी दुष्यन्तस्य महीभृतः ।
विश्वामित्रात्मजा बाला मेनकाप्सरसस्सुता ॥ ५७
कण्वस्य दुहिता चेयं पालनात्सुपतिव्रता ।
चिन्तयन्ती पतिं मुग्धा विरहेण सुविक्लबा ॥ ५८
न किञ्चिदभिजानाति नाथवांस्तेन सत्कृतः ।
नावज्ञानान्नगर्वाच्च तत्भवान्क्षन्तुमर्हति ।
यया न विस्मरेद्राजा शापान्तं कुरु तापस ॥ ५९
ततः प्रसन्नो दुर्वासाः प्राह शापान्तकारणं ।
विस्मृतिस्तस्य राजर्षेस्तावदेव भविष्यति ॥ ६०
प्रियंवदे नृपो यावदभिज्ञानं न पश्यति ।
इति कृत्वा स शापान्तं गृहीत्वा सत्क्रियां ययौ ॥ ६१
अथ तस्यास्तथा गर्भो राजर्षेस्तेजसा भृतः ।
शशीव विशदे पक्षे वर्धते स्म दिने दिने ॥ ६२
कण्वोपि भगवान्दृष्ट्वा दोहदं समुपस्थितं ।
मुदा परमया युक्तः पृष्ट्वाभिलषितं हितं ।
संभावयति वन्यानि मूलानि च फलानि च ॥ ६३
अथ तां सप्तमे मासि गर्भे स्फूर्तिमुपेयुषि ।
उवाच भगवान्कण्वो मुनिमण्डलमध्यगां ॥ ६४
कन्या पितृगृहे नैव सचिरं वासमर्हति ।

लोकापवादस्सुमहान्जायते पितृवेश्मनि ॥ ६५
नार्या पतिः गतिः भर्ता तपश्च परमं पतिः ।
दैवतं गुरुरार्यश्च पतिस्त्रीणां परं पदं ॥ ६६
यं प्रोष्यसि देवि त्वं भविता समहाबलः ।
राजपुत्रो वने स्थास्यत्ययं नाप्युचितो विधिः ॥ ६७
अतस्त्वां प्रेषयिष्यामि निकटं तस्य भूभृतः ।
पत्युः प्रेमा हि नारीणां परं सौभाग्यमुच्यते ॥ ६८

शकुन्तलोवाच—

पितस्तेनुगृहीतास्मि पतिदर्शनवार्तया ।
नानुज्ञां प्रार्थये तुभ्यं स्नेहभङ्गभयात्तव ॥ ६९

❀ ❀ ❀ ❀

तदद्यैव गमिष्यामि राजर्षेस्तस्य चान्तिकम् ।
अनुज्ञां देहि मे तात कृपया तापसोत्तम ॥ ७०
तच्छ्रुत्वा भगवान्कण्वस्स्नेहप्रसवविप्लुतः ।
अनुज्ञाय मुनीनन्यान्मुनिपत्नीश्च सुव्रताः ॥ ७१
उवाच परया प्रीत्या प्रेषयामि शकुन्तलां ।
भर्तुर्गृहाय कल्याण्या कल्याणं कुरुत ध्रुवम् ॥ ७२
ताश्च वाक्यं मुनेः श्रुत्वा प्रेमाश्रुक्लिन्नलोचनाः ।
आशीर्भिरनुकूलाभिः प्रायुञ्जन्त शकुन्तलाम् ॥ ७३

❀ ❀ ❀ ❀

अथ गुल्मलतावृक्षान्हरिणान्हरिणाङ्गनाः ।
उवाच कण्वः प्रेमार्द्रो मुंचन्नश्रुकलामुहुः ॥ ७४

युष्माकं परमप्रेम्णा वासितेयं सुता मम ।
सर्वे कुरुत कल्याणं सुखं यातु शकुन्तला ॥ ७५

❀ ❀ ❀ ❀

आहूय गौतमीं वृद्धां सखीं चास्याः प्रियंवदां ।
उवाच श्लक्ष्णया वाचा शिष्यौ चापि महाव्रतौ ॥ ७६

यात यूयं महीभर्तुं दुष्यन्तस्य पुरं प्रति ।
इमां शकुन्तलां राज्ञि समर्प्य पुनरेष्यथ ॥ ७७

इति तस्य वचः श्रुत्वा गौतमी च प्रियंवदा ।
मुनिः शार्ङ्गरवः शिष्यस्तथा शारद्वतो मुनिः ॥ ७८

तथेति प्रतिगृह्याथ मुनेराज्ञां स्वमूर्धसु ।
शकुन्तलां पुरस्कृत्य पन्थानं प्रतिपेदिरे ॥ ७९

❀ ❀ ❀ ❀

अथ मध्याह्नसमये प्राप्य प्राचीं सरस्वतीं ।
मुनेः शिष्यौ च मध्याह्नक्रियां चक्रतुरेव तौ ॥ ८०

❀ ❀ ❀ ❀

शकुन्तलापि तत्रैव स्नानार्थमुपचक्रमे ।
प्रियंवदाकरेन्यस्य अभिज्ञानाङ्गुलीयकं ॥ ८१

प्रियंवदा तु तद्गृह्य वसनाञ्चलमध्यतः ।
यावन्न चस्तवती तावत्पपात सलिले द्विज ॥ ८२

प्रियंवदाभिया तस्यै वृत्तान्तं नन्यवेदयत् ।
शकुन्तलापि तत्सख्यै पप्रच्छापि न विस्मृता ॥ ८३

ततः स्नात्वा च ते सर्वे समाप्य विधिवत्क्रियां ।

दुष्यन्तपुरमापेदु स्तास्त्रियस्तौ च तापसी ॥ ८४
राजद्वारं समासाद्य कण्वशिष्यौ महामते ।
ऊचतुस्तौ प्रतीहारं तूर्णं राज्ञे निवेदय ॥ ८५
कण्वस्य निदेशेन राजद्वारमिहागतौ ।
शिष्यौ तस्य शार्ङ्गरव शारद्वत समाह्वयौ ॥ ८६
सुता तस्य च कल्याणी द्वे अन्येच द्विजस्त्रियौ ।
प्रतीहारस्ततो गत्वा राज्ञे सर्वं न्यवेदयत् ॥ ८७
राजा पुरोधसं प्राह गौतमं हृदि चिन्तयन् ।

❀ ❀ ❀ ❀

पाद्यादीनि पुरस्कृत्य विधायातिथिसत्क्रियां ॥ ८८

❀ ❀ ❀ ❀

यद्विशेषविवक्षापि तयोरस्ति विवक्ष्यतन् ।
विज्ञापयिष्यसि पुनस्तद्विचार्य करोम्यहम् ॥ ८९
इति तद्वाक्यमादाय पुरोधाः स तपोधनः ।

❀ ❀ ❀ ❀

राज्ञोक्तं सर्वमाचष्टे ददर्श च शकुन्तलाम् ॥ ९०

❀ ❀ ❀ ❀

पप्रच्छ च मुनी केयं सुन्दरी जगदद्भुता ।

❀ ❀ ❀ ❀

शिष्यावूचतुः—
विश्वामित्रसुता चेयं मेनकागर्भसंभवा ॥ ९१
कण्वेन पालिता राज्ञी दुष्यन्तस्य महीपतेः ।
सेयं संप्रेषिता ब्रह्मन्कण्वेन नृपमन्दिरम् ॥ ९२

राज्ञे निवेदयत्वद्य तद्भवांस्त्वरया द्विज ।
नेयं राज्ञी द्वारदेशे स्थातुमर्हा महीपतेः ॥ ९३

शेषउवाच—

पुरोधास्तदुपाकर्ण्य संभ्रमेण महीपतिम् ।
गत्वा निवेदयामास वृत्तान्तं मुनिभाषितं ॥ ९४
दुष्यन्तस्तदुपश्रुत्य विस्मृतिं परमां गतः ।
उवाच ब्राह्मणं ब्रह्मन्वचसा कटुना नृपः ॥ ९५
नैवं स्मरति मच्चित्तं कुत्र का मे विवाहिता ।
गणिका कापि विप्रेन्द्र च्छलेन समुपागता ॥ ९६

गौतमउवाच—

न तथा दृश्यते राजन्नन्तः सत्त्वा वरानना ।
अनुजानीहि राजेन्द्र त्वदन्तिकमुपानये ॥ ९७
विलोकय परं रूपं यदि ते स्मृतिरुद्भवेत् ।
प्रवेशनीया शुद्धान्ते नारी श्रीरिव रूपिणी ॥ ९८

❀ ❀ ❀ ❀

इति राज्ञानुनीतेनाभ्यनुज्ञातो द्विजोत्तमः ।
आनाययामास मुनी ताःस्त्रियश्च सुलक्षणाः ॥ ९९
आशीर्भिरनुयोज्याथ कण्वाशिष्यौ महामती ।
ऊचतुः कण्वसंदेशं निषण्णौ जगतीपतिम् ॥ १००

शिष्यावूचतुः—

त्वामाशिषा वर्धयित्वा प्राह त्वामावयोर्गुरुः ।
इयं शकुन्तला नाम विश्वामित्रसुतानघ ।

मेनकासंगमाज्जाता पालिता दुहिता मम ॥ १०१
मृगयाचारिणारण्ये गान्धर्वेण महीपते ।
विधिना यद्गृहीताभून्ममानुज्ञां विनाऽपिहि ॥ १०२
तत्साधुरिति तं मन्ये क्षत्रियाणामयं विधिः ।
तव सा बिभ्रती तेजो वस्तुं नार्होटजे मम ॥ १०३

❀ ❀ ❀ ❀

जनयिष्यति यं पुत्रमियं राज्ञी शकुन्तला ।
चक्रवर्ती राजराजो महात्मा स भविष्यति ।
इत्याशिषा नियुज्य त्वां गुरुराह महातपाः ॥ १०४

❀ ❀ ❀ ❀

राजोवाच—

कति सन्तीह गणिका भ्रमन्ति कामसेवया ।
❀ ❀ ब्राह्मणाः विविधाः सन्ति तापसाइछद्मरूपिणः ॥१०५
तासामनुग्रहेणैव समं ताभिर्भ्रमन्ति च ।
भुञ्जते विपुलान्भोगान्गणिकाभिरुपार्जितान् ॥ १०६
निशम्य नृपतेर्वाक्यं शिष्यौ कण्वस्य तापसौ ।
क्षेप्तुर्विरहेणास्याः पश्चात्तापमवाप्स्यसि ॥ १०७

❀ ❀ ❀ ❀

अथसा गौतमी वृद्धा जगाद जगतीपतिम् ।
नैवमर्हसि भो राजन् विश्वामित्रसुतां प्रति॥ १०८

❀ ❀ ❀ ❀

अन्तःसत्त्वा महाभागा त्वया राजन्विवासिता ।

समाहितेन मनसा स्मर पश्य च सुंदरीम् ।
इत्युक्त्वा मोचयामास शिरश्छादनमंबरम् ॥ १०९

राजोवाच—

पौरवाणां कुले जाताः सतां मार्गे कृतास्पदाः ।
नवयं रूपमात्रेण गणिकानां भ्रमामहे ॥ ११०
एवं वदति भूपाले व्रीडितेव तपस्विनी ।
निस्संख्येन च दुःखेन तस्थौ स्थूणेव निश्चला ॥ १११

❀ ❀ ❀ ❀

सा मुहूर्तमिव ध्यात्वा दुःखामर्षसमन्विता ।
भर्तारमभिसंप्रेक्ष्य क्रुद्धा राजानमब्रवीत् ॥ ११२
कथं न स्मरसे राजन्मृगयामधिगच्छता ।
गान्धर्वेण गृहीतो यत्पाणिर्मे विधिना नृप ॥ ११३
इति श्रुत्वा तु वचनं शापेनास्तमितस्मृतिः ।
अब्रवीन्न स्मरामि त्वां कस्य त्वं दुष्टतापसि ॥ ११४

❀ ❀ ❀ ❀

शकुन्तलोवाच—

कुतः प्रियंवदे साध्वि अभिज्ञानमिहानय ।
धूर्त्तमेनं सभामध्ये क्षेपयामि नराधिपम् ॥ ११५

❀ ❀ ❀ ❀

प्रियंवदा तु नीचैस्तां जगाद मृगलोचनां ।
कर्णान्तिके समासाद्य पतितं ते तदम्भसि ॥ ११६
तदुपश्रुत्य कल्याणी रंभेव मरुता हता ।
पपात भूमौ निश्चेष्टा हा हतास्मीति वादिनी ॥ ११७

❀ ❀ ❀ ❀

पुरोहित उवाच—

अत्र वक्ष्यामि ते मन्त्रं शृणु राजन्महामते ।
यावत्प्रसवमत्रैव नारी तिष्ठतु ते गृहे ॥ ११८
यदि ते सदृशं पुत्रं कामिन्येषा प्रसोष्यति ।
ततस्तवैव भार्येति वेत्स्यामस्तदनन्तरम् ॥ ११९

❀ ❀ ❀

यावत्प्रसवमेतान्तु वासयेहं निजालये ।
प्रसवे सति कल्याणी स्वयमेव गृहीष्यसि ॥ १२०
इत्युक्त्वा गौतमो ब्रह्मन्सान्त्वयित्वा शकुन्तलां ।
स्वगृहायैव तां नेतुं विमनामुपचक्रमे ॥ १२१

❀ ❀ ❀ ❀

एतस्मिन्नन्तरे विप्र मेनकाप्सरसां वरा ।
तेजोरूपा व्योममध्यात्तडित्पातं पपात सा ॥ १२२
किमिदं किमिदं चित्रमिति जल्पत्सु सर्वतः ।

❀ ❀ ❀ ❀

शकुन्तलां समादाय अंकमारोप्य सत्वरं ।
अंबरं विजगाहे सा तत्केनापि न लक्षितं ॥ १२३
एवंगते तु दुष्यन्तः खेदमाप ततो भृशं ।
दैवेन रचितां मायाममन्यत तदा नृपः ॥ १२४

शेषउवाच—

एकदा स महीपालो मन्त्रिभिर्ब्राह्मणैः सह ।
प्रजानां वेदितुं वृत्तं बभ्राम नगरे द्विज ॥ १२५

तत्र राजभटः कश्चिद्दृढमाबध्य धीवरं ।
दण्डेन ताडयन्नुग्रैर्वचोभिः समतर्जयत् ॥ १२६
राजाभरणमेतद्वै यत्त्वया चोरितं छलात् ।
अतो वध्यत्वमापन्नं त्वां नयामि नृपान्तिके ॥ १२७
इत्युक्त्वा तं करे गृह्य ताडयन्बहु मूर्धनि ।
राजान्तिकमुपानीय राजानमिदमब्रवीत् ॥ १२८
एष धीवरको राजंश्चोरयित्वाङ्गुलीयकम् ।
त्वन्नामचिह्नितं लोके विहितं रत्ननिर्मितम् ।
विक्रेतुमुद्यतः पापो मया दृष्टो महीपते ॥ १२९
राजा तं प्राह दाशेदं कुतो लब्धमिदं त्वया ।
कथयाभयमेतत्ते दत्तं जानीहि सांप्रतं ॥ १३०

धीवरउवाच—

जात्याहं धीवरो राजन्मत्स्यमात्रोपजीवकः ।
चौरिकां नैव जानामि न च सूनां न धूर्तताम् ॥ १३१

❀ ❀ ❀ ❀

एकदा जालमादत्य सरस्त्यामहं नृप ।
स्थितः प्रत्याशया तत्र तीरस्थं तरुमाश्रितः ॥ १३२
रोहितः कोऽपि बलवान्जाले बद्धो बभूवह ।
ततोऽहं जालमुत्तार्य दृष्ट्वा रोहितमुद्धतं ॥ १३३
खड्गेनकृत्तवान्सद्यः परमानन्दनिर्वृतः ।
ततस्तदुदरे लब्धमेतद्रूपाङ्गुलीयकम् ॥ १३४
कस्येति न विजानामि तदहं नगरे तव ।

विक्रेतुमागतो बद्धो भटेनानेन भूमिप ॥ १३५

राजोवाच—

देहि पश्यामि कस्यैतत्किरूप मङ्गलीयकं ।
त्वमेतन्मूल्यमादाय सुखेनैव व्रजालयं ॥ १३६
इत्युक्त्वा पाणिनादाय यावद्राजा सपश्यति ।
निपतन्ति स्म नेत्राभ्यां तावदेवाश्रुबिन्दवः ॥ १३७
प्रेयसीं तामनुस्मृत्य तथा गान्धर्वकर्म च ।
गर्भाधानञ्च सर्वं तत्मूर्छितो निपपातह ॥ १३८

❀ ❀ ❀ ❀

केनापि दैवयोगेन सर्वं तद्विस्मृतं मया ।
हन्त पापं कृतं भूरि मया निष्करुणात्मना ।
आसन्नप्रसवा भार्या त्यक्ता देवसुतोपमा ॥ १३९

❀ ❀ ❀ ❀

एवं विलपमानं तं राजानं गौतमोऽब्रवीत् ।
तद्गतं नानुशोचस्व समाश्वस परन्तप ।

❀ ❀ ❀ ❀

यद्गतं तद्गतं राजन्नानुशोचन्ति पण्डिताः ॥ १४०

शेष उवाच—

विमृशत्स्वेव तेष्वव देशान्तरचरश्चरः ।
राज्ञे निवेदयामास यद्दृष्टं सागरांभसि ॥ १४१
राजन्सांयात्रिको नाम्ना धनवृद्धि र्महाबलः ।
विपन्नः सागरे सप्त वाहयन्संभृतास्तरीः ॥ १४२

स चानपत्यस्तस्येष्टा नावो रत्नेन पूरिताः ।
तवैव कोशमर्हन्ति गृह्यतामचिरेण ताः ॥ १४३

राजोवाच—

यान्तु मे मन्त्रिणः सम्यग्जानन्तु तत्परिग्रहान् ।
यदि काचिद्भवेद्भार्या गर्भिणी वणिजः क्वचित् ॥ १४४
सैव तद्धनमादद्यान्नाधिकारी तदा नृपः ।
तच्छ्रुत्वा मन्त्रिणो गत्वा विज्ञाय च विशेषतः ॥ १४५
राज्ञे निवेदयामासु र्वृत्तान्तं ब्राह्मणर्षभ ।
अत्रैव नगरे राजन्भार्या तस्य विलासिनी ॥ १४६
अन्तः सत्त्वा वणिक्पुत्री वर्तते च पतिव्रता ।
राजा प्राह तरीस्थानि यानि यानि धनानिच ॥ १४७
तानि तस्यै ददत्वद्य भटा मे यान्तु सत्वराः ।
इति प्रस्थाप्य राजेन्द्रो भटांस्तद्धनरक्षणे ॥ १४८
द्विगुणेनैव शोकेन दह्यते स्म ततोऽब्रवीत् ।
ममात्यन्तमेवमेव मम राज्यस्य दुर्गतिः ॥ १४९

❀ ❀ ❀

अन्तः सत्त्वा महाभागा या सा भार्याप्युपस्थिता ।
उपेक्षिता प्रमादेन मन्दभाग्येन सा मया ॥ १५०
अत ऊर्ध्वं मया दत्तं पानीयं विधिनापि च ।
पास्यन्ति पितरः कोष्णनिश्वासेन मलीमसं ॥ १५१

❀ ❀ ❀ ❀

नैवं विधस्य दुष्टस्य दारुणस्य दुरात्मनः ।

तथाविधा वरारोहा भार्या भवितुमर्हति ॥ १५२
एवं विलपमानस्य दुष्यन्तस्य महीपतेः ।
व्यतीयुस्त्रीणि वर्षाणि शोचतोऽहर्निशं द्विज ॥ १५३
अथासौ देवराजेन समाहूतो ययौ दिवं ।
त्रिदिवेश्वरवध्यानां निधनाय सुरद्विषां ॥ १५४
निर्वाह्य देवताकर्म रथं मातलिसारथिं ।
आरुह्य भुवमायास्यन्मारीचाश्रममभ्ययात् ॥ १५५
तत्र काचिज्जरा नारी ब्राह्मणी बालमद्भुतं ।
लालयन्ती नृपं वीक्ष्य ददावासनमन्तिके ॥ १५६
बालस्तु तावद्वेगेन प्रविश्य गहनं वनं ।
निबध्य पंच पंचास्यान्लतामिः समुपानयत् ॥ १५७
उवाच वृद्धामेतेषां कति दन्ताः समुन्नताः ।
निम्ना वा कति मध्या वा गणयित्वा वदाशु मे ॥ १५८
दुष्यन्तस्तु तदालक्ष्य बालस्याद्भुतविक्रमं ।
चिन्तयामास मेधावी भार्याविरहकातरः ॥ १५९
पौरवादप्यहो बालो धत्तेऽधिकपराक्रमं ।
सर्वराजश्रिया युक्तो न विप्रस्तदयं भवेत् ॥ १६०
चेतो मे वहते स्नेहं दृष्ट्वा बालं दुरासदं ।
कारणं तत्र पश्यामि यन्ममेयमपुत्रता ॥ १६१
इति चिन्तापरे राज्ञि सिंहः कोऽपि स्वबन्धनं ।
छित्त्वा नखेन दुर्वीर्यो गन्तुं प्राक्रमत द्विज ॥ १६२
दूरादुत्प्लुत्य तं बालो निगृह्य पुनरेव तं ।

उवाच किं रे पञ्चास्य प्राप्तोसि ब्रह्मबालकं ।
पौरवोऽस्मि न जानासि क्षत्रियो रणकोविदः ॥ १६३

तदुपश्रुत्य राजर्षेः किंञ्चिदुच्छ्वसितं मनः ।
बालभाषितमित्येव सम्यक्श्रद्धापिनाभवत् ॥ १६४

अथागमत्काश्यपोऽपि वनात्कुशसमिद्धरः ।
विलोक्य तत्र राजानं दुष्यन्तं मुमुदे भृशं ॥ १६५

आशीर्भिस्तमथाभ्यर्च्य विधायातिथिसत्क्रियां ।
पप्रच्छ कुशलं राज्ये देवानां च तपोधनः ॥ १६६

राजा तत्सर्वमाचष्टे मुनिवाचा गतश्रमः ।
अथोवाच विहस्यैष कोयं बालस्तपोधन ।
महाबलो महाबाहुः पौरवोऽहमिति ब्रुवन् ॥ १६७

कश्यप उवाच —

तवैव तनयो राजन्यमसूत शकुन्तला ।
दमनः सर्वसत्त्वानां सिंहादीनां महाबलः ॥ १६८

तत्सर्वदमनो नाम मयैवास्य निरूपितं ।
भरस्वेति च वच्मि त्वां ततोऽसौ भरतो भवेत् ॥ १६९

दुर्वाससा हि शापेन त्वया या विस्मृता पुरा ।
त्यक्ता मेनकयानीय मयि न्यस्ता मनस्विनी ॥ १७०

सा ते शकुन्तला राज्ञी सुषावेमं कुमारकं ।

❀ ❀ ❀ ❀

अत एनं महीभर्तः सतं तं प्रापयाम्यहं ॥ १७१

एष ते गृह्यतां पुत्रश्चक्रवर्ती भविष्यति ।
आहर्ता सर्वयज्ञानां महाभागवतो नृप ॥ १७२

इत्युक्त्वा ब्राह्मणीं प्राह वृद्धां देवगुरुर्मुनिः ।
शकुन्तलामिहानीय समर्पय महीपतौ ॥ १७३

इत्युक्ता ब्राह्मणी गत्वा समाहूय शकुन्तलां ।
राज्ञे समर्पयामास राजा च मुमुदे भृशं ॥ १७४

APPENDIX B.

१. बलवदपि शिक्षितानां
आत्मन्यप्रत्ययं चेतः । Act I Verse 5.

२. आर्तत्राणाय वः शस्त्रं
न प्रहर्तुमनागसि ॥ Act I Verse 11.

३. अथवा भवितव्यानां
द्वाराणि भवन्ति सर्वत्र । Act I Verse 15.

४. किमिवहि मधुराणां मण्डनं नाकृतीनाम् । Act I Verse 18.

५. सतां हि संदेहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ॥ Act I Verse 20.

६. भाग्यायत्तमतः परं ॥ Act IV Verse 17.

७. अर्थो हि कन्या परकीय एव ॥ Act IV Verse 22.

८. भवन्ति स्थिराणि जननान्तरसौहृदानि ॥ Act V Verse 2.

९. भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ Act V Verse 12.

१०. अतः परीक्ष्य कर्तव्यं विश्वासात् संगतंरहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ Act V Verse 24.

११. उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी । Act V Verse 26.

१२. वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ।
Act V Verse 28

१३. शहए किलजे विणिंदिएण खुदेकम्मविवज्जणीअए ।
सहजं किलयद्विनिन्दितं न खलु तत्कर्म विवर्जनीयं ॥
Act V Verse I.

१४. प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते जन्तुः ।
Act VI Verse 31.

१५. पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते ॥Act VII Verse 13.

१६. छाया न मूर्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥ Act VII Verse 32.

१७. आर्तानां भयमपनेतुमात्तथन्वा Act VI Verse 27.

१८. हंसोहि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ।Act VI Verse 28.

१९. उच्छेत्तुं प्रभवति यन्न सप्तसप्ति-
स्तन्नैशं तिमिरमपाकरोति चन्द्रः । Act VI Verse 30.

२०. सर्वः कान्तमात्मीयं पश्यति । II Act.

२१. प्रत्युत्पन्नपतिस्नैणं VI Act Prose.

२२. सर्वः सगन्धेषु विश्वसिति VI Act Prose.

INTRODUCTION

काव्येषु नाटकं रम्यं तत्र रम्यं शकुन्तला
तत्रापि च चतुर्थाङ्कस्तत्र श्लोकचतुष्टयम् ॥

In the opinion of Sanskrit scholars drama is the most perfect form of literary art and among the dramatists, Kalidasa is considered the best; of the three plays of Kalidasa, Abijnana Sakuntala is considered the best play; in that play the fourth act is considered the best portion and in that Act four *slokas* are deemed to be perfect gems. To the Western mind Sakuntalam appeals most in Sanskrit literature. Goethe's praise of Sakuntala is well-known.

" Wouldst thou the young year's blossoms and the fruits of its decline,

And all by which the soul is charmed, enraptured, feasted, fed ?

Wouldst thou the earth and heaven itself in one sole name combine ?

I name thee, O Sakuntala, and all at once is said."

(Translated by Mr. E. B. Eastwick.)

Humboldt considers that Kalidasa has by the tenderness in the expression of feelings and by the richness of his creative fancy, attained to a lofty place among the poets of all nations. Schlegel would place Kalidasa foremost among the sons of song. Prof. Lassen considers him the brightest star in the firmament of Indian poetry. Sir Monier Williams who was

responsible for a very early edition of the play with an English translation and with notes says: "No composition of Kalidasa displays more the richness of his poetical genius, the exuberance of his imagination, the warmth and play of his fancy, his profound knowledge of the human heart, his delicate appreciation of its most refined and tender emotions, his familiarity with the workings and counter-workings of its conflicting feelings,—in short, more entitles to rank as the Shakespeare of India.

Masters of Sanskrit literature have similarly an uniform chorus of praise for Kalidasa. उपमा कालिदासस्य is a *oft-quoted saying*. *Says Bana Bhatta.*

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥

Who indeed does not feel delighted by the sweet words uttered by Kalidasa as by the bunches, of flowers which overflow with honey.

Nor is Kalidasa merely a prince among poets. His sweet sayings on ethics and morality are found quoted by the philosophers who came after him. For example, Kumarila quotes with approval [the saying] that Kalidasa places in the mouth of King Dushyanta

सतां हि संदेहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ।

In fact in both the senses which the word 'Kavi' implies, Kalidasa was the 'Kavi' *par excellence*:

पुरा कवीनां गणनप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावा-
दनामिका सार्थवती बभूव ।

When once upon a time there was an enumeration of the *Kavis*, Kalidasa was counted as the first on the little finger and even to-day as there is no *Kavi* to equal him, the next finger *Anamika* remains rightly so named.

The characteristic features of Kalidasa's style are "a compact but never abrupt brevity, a soft gravity and smooth majesty, a noble harmony of verse, a strong and lucid beauty of chiselled prose, above all an epic precision of phrase, weighty, sparing and yet full of colour and sweetness;"* and in his dramatic style there is "an extraordinary grace and suavity which makes it adaptable to conversation and the expression of dramatic shade and subtly blended emotion."* A strong visualising faculty was with Kalidasa an abiding and unfailing power, and "the concrete presentation which this definiteness of vision demands suffused with an intimate and sovereign feeling for beauty of colour and beauty of form constitutes the characteristic Kalidasian manner.'†

We find Acharya Dandin quoting from a verse of Kalidasa in Sakuntalam as an example of felicity of expression.

लक्ष्म लक्ष्मीं तनोतिति प्रतीतिसुभगं वचः ।

---

* Sri Aurobindo's Kalidasa p 17.
† Sri Aurobindo's Kalidasa p. 18.

drama or *Rupaka* has three characteristics, *Vastu* or plot, *Netha* or hero and *Rasa* or sentiment. (1)

(1) Vastu is divided into *Adikharika* or principal and *Prasangika* or subsidiary. The subsidiary plot may be either Pataka or Prakari. In a Pataka, the principal characters take part. In the Prakari, the principal characters do not take part. The plot is divided into three stages, *Bija*, or seed, *Bindu* or drop and *Karya* or fulfilment. The Vastu is again classified according as the plot is borrowed from a *Purana* or is an original, or a combination of both. The plot again has five stages or *Avastas*,—the *Arambha* or beginning stage, the *Yatna* or effort stage, the *Praptyasa* or the stage of progress towards solution, the *Niyatapti* or overcoming of obstacles and the *Phalagama* or final climax. The link between one stage and another is called *Sandhi* and the four links are known as *Pratimukha, Garbha, Avamarsa* and *Nirvahana*. The first stage *Arambha* is introduced by the *Mukha-sandhi*. The subject matter dealt with in any portion of the play helps us in classifying it and giving a name to it. The *Vishkambha* and Pravesaka

---

Rasa or sentiment is peculiar in that it is essentially universal in character—common to all trained spectators and has essentially no personal significance, Sentiment different from an ordinary emotion. It is generic and disinterested while an emotion is individual and immediately personal. An emotion may again be pleasant or painful, but a sentiment is marked by that impersonal joy characteristic of the contemplation of the Supreme Being by the adept.

The spectacle evokes in the mind of the spectator the impressions of the emotion of love, which experience has planted there and this ideal and generic excitation of the emotion produces in him that sense of joy which is known as sentiment.

suggest incidents while other portions are *Drisya-sravya*. Speeches by the characters have the following stage directions. They are *Prakasa* (Aloud), *Swagata* (or aside) and *Netha-sravya* (which is either *Janantika* or *Apavari*taka*) and is intended to be heard only a person near the speaker. A fourth classification may also be added, the *Akasa-bhashita* or speaking in the air. In this the speaker addresses somebody not in the scene and pretends to hear a reply and repeats it before asking further questions. Such an *Akasa-bhashita* occurs in the *Vishkambha* before Act III.

The play opens with a *Nandi* which is followed by the entrance of the *Sutradhara* in the stage and his conversation with the Nati with a view to introduce to the audience the dramatist and the play, and they lead on to the First Act.

An examination of the several Sanskrit plays shows that the choice of Sutradhara lies with the characters who have to enter immediately in the First Act. If a lady character enters we find that the *Sutradhara* opens the conversation in the prelude with a male friend. But if the Act opens with the entrance of male characters only as in Sakuntala, the Nati appears in the prelude. This convenient arrangement is only to be expected when we find that the prelude refers to the part that the Sutradhara and his companion are going to take in the play. In the Sakuntala, the mukha-sandhi ends with the king's desire to marry Sakutala as expressed in Act I. The *Prayatna* begins with Act II, when we find the hero placed in a dilemma, because of the conflicting calls of duty which

form the *Pratimukha-sandhi.* The *Garbha-sandhi* includes the curse and the hope expressed in Kanva's words, that 'lasting union would soon result'. The *Vimarsa-sandhi* covers the major portion of Act VI and includes the invitation of Indra; and the *Karya* is accomplished in the last Act.

Thus the five sections are: (1) Act I and Act II up to the place of the Commander's departure.

(2) From the king's confession of love to Sakuntala to end of Act III.

(3) Act IV and Act V up to the moment when Gautami removes the veil from Sakuntala's face.

(4) From the above place to end of Act VI; and

(5) Act VII.

The *antara-sandhis* are the letter to Dushyanta and the *Matali* episode in Act VI. The Pataka-stanaka occurs in the voice behind the scenes in Act II.

The dominant Rasa in the play is *Sringara.* (1) The drama is therefore appropriately preluded by a song describing the vernal season, as specially fit for enjoyment. The season cast its witchery over the hero and the heroine whose thoughts naturally revert towards love. The conversation between Sakuntala and her companions in the course of their occupation of watering the trees and creepers, naturally leads to a discussion about Sakuntala. With matchless art Kalidasa has chosen for the depiction of the sentiment of love, an offspring of a celestial nymph

(1) Dr. Keith on page 159 of his book "Sanskrit Drama" says. Kalidasa excels in depicting the emotion of love from the first suggestions in an innocent mind to the perfection of passion.

as the heroine, just as he has chosen a Yaksha lover as the hero of his love poem.

In Act I the king remarks: "Then indeed this lady is born of an Apsarasa?"

Anasuya: "Even so"

The king: "This fits in (S) How indeed can this form be born among mortals! The tremulous flash of lightning does not arise from the earth."

By placing the heroine is nurture in a hermitage Kalidasa gives prominence to spirituality which underlies and pervades the sentiment of love in its fullest and best expression. It is this emphasis of the poet, that makes the transition from the City in Act VI to the Himalayan region in Act VII imperceptible and at the same time appropriate. The separated lovers are not brought together till "they have passed through the baptism of sorrow and become ready for a perfect re-union of hearts. There is no explanation, no apology, no recrimination nor any demand for reparation. Sakuntala has now learnt in silence the lessons of her suffering; and with his former self-complacency and impetuous desires left behind, the king comes, chastened and subdued a wiser, sadder man"; so says Sir Rabindranath Tagore; but we have already pointed out that there is no such revolutionary change in the character of the king or in that of Sakuntala.

Besides the sentiment of love, we have the heroic sentiment in the hermits' verses in Act 11, the element of horror in Matali's menace to the Vidushaka in Act VI, terror in the description of dusk at the end of Act III, pathos from the arrival of Kanva up to the end of that

Act, fury in the cries of despair in Act VI. And wonder in the incident of the amulet in Act VII.

RECENSIONS.

It is quite natural to expect several recensions of such an old classic, like the Sakuntala of Kalidasa. The recensions have been classified under three types, the Bengali recension, the Devanagari recension and the South Indian recension. The last is the shortest and the Bengali recension is the longest. Dr. Pischel is of opinion that the Bengali recension is probably the most faithful to the original. This opinion is supported by the fact that the quotations from the Sakuntala in the earlier anthologies agree mostly with the readings in the Bengali recension. Dr. Pischel is also of opinion that the Prakrit retains the form, which Kalidasa gave to it, in the Bangali recension. In the Dravidian and the Devanagari recensions the Prakrit is not *Sauraseni*, but is a wild mixture of various dialects. He also thinks that in the South India Senskrit dramas have been both adulterated and abridged. In the Preface to the second edition of Dr. Pischel's Sakuntala, Dr. Capeller says that the numerous variations of manuscripts in the matter of stage directions are quite unworthy of full registration, as they, along with the use of interjectory phrases, like, ha, dhik or bhoh were mostly blunders and arbitrary peculiarities of the scribes. Among the proper names also there are variations. Anasuya occurs as Anusuya in the Devanagari manuscript and Dushyanta as Dushmanta and Madhavya as Mathavya.

There are four old commentaries to the play (1) By Sri Krishna Natha called *Pravesika* (2) The commentary by Katayavema called Kumaragirirajarya. (3) the commentary of Raghavabatta; (4) the commentary of Srinivasacharya, probably earlier than Raghavabatta's is also

available. Then there are some extant passages of the commentary of one Sankara.

The Bengali recension is so full of repetitions and amplifications that Sir William Jones observed that the play might easily be reduced to five Acts of moderate length by throwing the third Act to the second and the Sixth Act to the fifth ; and he added that it must be confessed that the whole of Dushyanta's conversation with the buffoon and great part of his courtship in the hermitage might be omitted without any injury to the drama. But such a curtailment of the play would in our opinion injure the drama. There is, as has been pointed out already, a lapse of over five years between the Fifth and Sixth Acts. Dushyanta's conversation with the Vidushaka is made by Kalidasa's skill an essential part of the drama. Mr. Patankar thinks that the amplifications of the Bengali recension, as a whole, do point to an unscrupulous tampering with the genuine text, in whatever form the genuine text may have reached the hands of the Bengali Pandits, affected with such *cacoethes scribendi*. The oldest manuscripts extant have the closest affinity with the Bengali recension and the ages of the commentators may be assumed, to determine the ages of the texts used by them. But the mechanical adjustment of ages of the manuscripts is not sufficient as a proof of the genuineness or otherwise of their text ; and he concludes that although Dr. Pischel's view is otherwise, the manuscripts seem to point to the only conclusion, that it is the South Indian copies that have preserved the text generally unadulterated and unamplified.

In connection with the question of the recensions, it may be interesting to note the suggestion made by Dr. Keith that probably Kalidasa himself wrote and rewrote his play many times and what seemed to be amplifications or adulterations may easily be alternative

variations of the same author mixed up together by a careless editor scribe.

Dr Keith points out that Kalidasa handles again with perfect art many of the incidents found in his earlier drama. He does not hesitate to repeat himself; we have in the first and third Acts the pretty idea of the king in concealment, hearing the confidential talk of the heroine and her friends. The same *Motif* is found in the Malavikagnimitra—Act III. Like Urvasi, Sakuntala, when she leaves the king, makes a pretext—her foot pricked by a thorn and her tunic caught by a branch—to delay her going. In the same way both express their love by letters; the snatching by a bird of the magic stone in the Vikramorvasiya is paralleled by Matali's seizure of the Vidushaka in Act VI. Ayuz has a peacock to play with, as the little Bharata with a lion, but in each the comparison is all to the advantage of Sakuntala. The same maturity is seen in the changes made in the narrative of the Mahabharata which the poet had before him. Sakuntala's dawning love is depicted with perfect skill; her marriage and its sequel alluded to with delicate touches, the shy heroine would not dream of telling her birth herself; her maidens even are too modest to do more than hint and leave the experienced king to guess the rest. Before the king, she utters no threat but behaves with perfect dignity stunned as she is by his repudiation of their love. Dr. Keith also traces the influence of Bhasa on Kalidasa. He says at 114 of his book.

"The results of this influence are all to the good. He owes to it the relative simplicity of his diction and his freedom from the excesses of the poetic equivalent of the nominal style which came to dominate later Sanskit literature. The use of long compounds is obviously and plainly undramatic; carried to excess, it must have rendered a Sanskrit drama unintelligible even to a highly

cultivated audience as far as the verses were concerned; and it is an essential dramatic merit in Bhasa that his expression is far easier to follow than is much of the later dramatic poetry. Resemblances in Kalidasa both as regards matter and manner to Bhasa's plays are collected by Dr. Keith. It may be added that probably one reason why Kalidasa does not deal in his drama with the epic was because Bhasa had dealt with it already. (1)

As Dr. Keith says, the epic has apparently weighed too heavily on the author (Bhasa) whose resource for incidents is remarkable by its absence. Kalidasa has apparently learnt the lesson from the failure of Bhasa.

We may conclude this introduction by quoting the opinion of two eminent orientalists about this play.

" No composition of Kalidasa displays more richness of his poetical genius, the exuberance of his imagination, the warmth and play of his fancy, his profound knowledge of the human heart, his delicate appreciation of its most refined and tender emotions, his familiarity with the workings and counter-workings of its conflicting feelings, in short more entitles him to rank as the Shakespeare of India " (2)

" Kalidasa, the celebrated author of the Sakuntala, is a masterly describer of the influence which nature exercises upon the minds of lovers. Tenderness in the expression of feeling, and richness of creative fancy, have assigned to him his lofty place among the poets of all nations." (3)

---

(1) It may also be pointed out that Professor Mahamahopadhyaya S. Kuppuswami Sastriar presiding at a lecture on the "The Dramatic element in Valmiki" referred to the fact that Kalidasa unlike later Sanskrit dramatists refrained from the *Rama* story and stated that this fact alone is enough to show the high regard which Kalidasa had to Valmiki's powers of dramatic narration.

(2) Prof. Sir Monier Williams. (3) Alexander Von Himboldt.

॥ श्रीरस्तु ॥

॥ अभिज्ञानशाकुन्तलम् ॥

नाम

॥ नाटकम् ॥

॥ प्रथमोऽङ्कः ॥

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १

॥ अभिज्ञानशाकुन्तलव्याख्याप्रारम्भः ॥

संमूर्च्छद्भिर्गुणनादश्रवणहृतहृदां संभ्रमादाद्रुतानां
मावेप्व्यासेदुषीणां व्रजहरिणदृशां मण्डलेनाभिवीतः ।
एकैकस्याः पुरस्ताद्युगपदुभयतश्चात्तमायाशरीरः
शैलूषो गोपवेषः कलयतु कुशलं रासलीलायुवर्नः ॥

सर्वमेव लौकिकं वस्तुजातं स्पर्धामोहादिकलिलमपि सरसकाव्येषु निपुणनटकर्मसु च बिंबितं ह्लादैकरसमिति स्थितं तावत् । तत्रापि दृष्टं वस्तु सविशेषं भावनालम्बं दृष्टं येनाहुः ; " सन्दर्भेषु दशरूपकं श्रेयः " इति । यदुपज्ञं चाय भाणकः ; " नाटकान्तं कवित्व " मिति । तदेवं महाकविप्रणीतं " नाटकेषु शाकुन्तले " ति प्रतीतोत्कर्षं शाकुन्तलं नाम नाटकं प्रयोक्ष्यमाणः " यद्यप्यंगानि भूयांसि पूर्वरंगस्य नाटके । तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये " इति

पूर्वरङ्गप्रधानाङ्गतया निर्दिष्टां नान्दीमाशीरूपामादौ सूत्रधारः प्रयुङ्क्ते । **यास्सृष्टि-रित्यादिना** । या जलरूपा तनुः स्रष्टुः आदौ भवा आद्या सृज्यत इति-सृष्टिः । प्रथमं सृज्यामित्यर्थः । " अपएव ससर्जादौ " इति स्मरणात् । या चा-ग्निमयी तनुः विधिना शास्त्रविधानेन विधौ यज्ञादिकर्मणि वा हुतं प्रक्षिप्तं हूयत इति हविः आज्यादिद्रव्यं " अर्चिष्युचिहुसृंपिच्छादिन्छदिभ्यइसिः " वहति उद्देश्यदेवतां प्रापयति । ' अग्निमुखा वै देवाः " इति श्रुतेः । या च यजमान-रूपा तनुः होत्री होमस्य कर्त्री । ये द्वे रवीन्दुरूपे तनू पाठे यथासंख्यमहोरात्र-रूपं विधत्तः विभजतः । अथवा मासादिरूपं तिथिनक्षत्रादिरूपंच यथासंख्यं-विभजत इत्यर्थः । श्रुतिविषयः श्रवणग्राह्यः गुणः शब्दरूपो यस्यास्सा या न-भोमयी तनुः विश्वं व्याप्य विभुत्वात् सर्वमाक्रम्य स्थिता । यां पृथिवीरूपां तनुं सर्वेषां भूतानां चिदचिद्रूपाणां वस्तूनां प्रकृतिर्मूलकारणमित्याहुः । येन भूतधात्रीव्य-पदेश इति भावः । " निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तेः परिगणनस्य प्राधि-कत्वात् ' इति वामनोक्त्या इति शब्देनात्र कर्मणोऽभिहितत्वात् प्रकृतिरिति प्रथमा । प्राणिनो जन्तवः यया वायुरूपया तन्वा प्राणवन्तः वायोर्जगत्प्राणत्वात् । धान्येन धन-वानित्यादिवद्ययेत्यभेदे तृतीया । ताभिः पृथिवीजलानल निलखेचरमत्वदिन्दुयजमानरूपा-भिरष्टाभिस्तनुभिः प्रपन्नः प्राप्तः ईशः वस्सामाजिकान् अवतु रक्षतु । 'एवं जगच्छरीर-स्वोक्त्या परमेश्वरस्य स्वत एव जगद्रक्षणस्वाभाव्यं व्यज्यते । हव्यवहनहोतृत्वादिभिश्च सर्वक्रियाराध्याराधकरूपत्व विश्वव्याप्तत्वाच्च परमात्मत्वं प्रणादद्वयेन च जीवरूपे-णानुप्रवेशनं इत्यादिकमभिव्यज्यते भवति । वायोः प्रत्यक्षस्पर्शाश्रयत्वान्नभसश्च तथावि-धशब्दाश्रयत्वाच्चील नभ इति प्रतीत्या नीलत्वेना लङ्कारिकैरभ्युपगम द्वा प्रत्यक्षाभिरित्यु-पपन्नं । अत्राष्टमूर्तित्वप्रतिपादनेन नाटकीयपात्राणामनेकभूमिकत्वमपि महोपि सुश्लिष्टस्सामा-जिकरंजनाय भूयादित्यर्थतः प्रार्थित भवति । " रंगं प्रसाद्यमधुरैः श्लेषैः काव्यार्थसूचकैः " " अर्थतश्शब्दतोवापि मनाक्काव्यार्थसूचनं " इत्याद्यनुरोधत् ।ाख्यातृसंप्रदायाच्च प्राप्तं काव्यार्थसूचनं यथा । ईशो जगन्नियन्ता राजा अवतु रक्षतु स पञ्चभिस्तनुभिर्दिक्पालांशैः प्रपन्नः प्राप्तः । " अष्टाभिर्लोकपालानां मात्राभिर्निर्मितो नृपः " इति स्मरणात् । प्रत्य-क्षाभिरिति विशेषणेनातीन्द्रियाणामपि दिगीशांशानामय मेक. प्रत्यक्षावतार इति व्यति-रेको व्यज्यते । स्रष्टुः भुवनान्तरसृष्टिकर्तुः ब्रह्मणः आद्या प्रथमा सृष्टिः शाकुन्तलेत्यर्थः ।

नान्द्यन्ते ।

आद्यशब्दोयमभ्यर्हितार्थः । विधिहुतं शास्त्रसिद्धेन गान्धर्वविवाहेन आहितं हविः दुष्यन्ततेजोरूपं वहति इति च "दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः" इति वक्ष्यमाणं गर्भधारणं व्यज्यते । "वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवन्ति" इत्यादिश्रुतिषु निषेकस्याहुतिव्यपदेशात् । या च होत्रेति धर्मपत्नीत्वं व्यज्यते । येद्धे अनसूयाप्रियंवदे कालं सङ्केतकालं विधत्तः निवेदयतः । "चक्कवाअवहुए आमन्देहि सहअरं उवट्टिदा रअणी" इत्यादिना सङ्केतकालज्ञापनात् । श्रुतिविषयगुणा प्रत्यादेशानन्तरं "स्त्रीसंस्थानं वाप्सरस्तीर्थमाराद्धाश्चिष्यैनां ज्योतिरेकं तिरोभूत्" इति वक्ष्यमाणप्रकारेण तिरोभावाददृश्येत्यर्थः । विश्वं व्याप्य विश्वं अतिरिच्य हेमकूटे मारीचाश्रमे देवभूमौ स्थिता । सर्वाणि भूतानि प्रकृतयः प्रजाः यस्यास्सा पुनः पतिसमागमाद्राज्ञीभावं प्राप्तित्यर्थः । यया भरतजनन्या प्रजातन्तुप्रवर्तनादराजकत्वपरिहारेण प्राणिनः प्राणवन्त इति । यच्चापि "यत्राष्टाभिर्द्वादशभिरष्टादशभिरेववा । द्वाविंशत्या पदैर्वापि सानान्दी परिकीर्तिता ॥" इति नान्द्यां पदनियमउक्तः । सचात्र व्यभिचरति । तथापि यैर्नान्द्यां पदनियमो नाङ्गीकृतः तन्मतेनेदं । नियमेपि "श्लोकपादं पदं केचित् सुसिङन्तमथापरे । परेवान्तरवाक्यैकस्वरूपं पदमूचिरे" इत्युक्त्या अवान्तरवाक्यैरष्टाभिर्नियता नान्दीयमित्यव्यभिचारः । **स्रग्धरावृत्तम्** ।

नान्द्यन्त इति । नन्दिन इयमिति वा नान्दी देवताऽस्या इति वा नान्दी । तदुक्तं भावप्रकाशे "नन्दी वृषो वृषाङ्कस्य जगदादौ जगत्पतेः । नृत्यतः कल्पनायोगाज्जगाम किल रङ्गतां । तस्य तद्रूपसम्बद्धा पूजा नान्दीति कथ्यत" इति । अथवा नन्द्यते समृद्धिर्नीयत इति, नन्दयति सभ्यानिति वा नान्दी । यथा भावप्रकाशे "देवतादिनमस्कारमङ्गलाराम्भपाठकैः । या क्रिया नन्द्यते नाट्यारम्भे नान्दीति सा स्मृता । सभ्यान्नन्दयतीत्येवं सापि नान्दीति कथ्यत" इति । नान्दीरूपः योयमन्तः पूर्वरङ्गावसानं तस्मिन् । अथवा नान्द्याः अन्ते अवसान इति षष्ठीतत्पुरुष इति नांद्यन्तशब्दो द्वेधा व्याख्यातो भावप्रकाशे । सूत्रं काव्यार्थसूचनं धारयतीति सूत्रधारः । सच स्थापकशब्दितो नान्दीप्रयोक्तुरन्य एव नट इत्येके । तदुक्तं दशरूपके "पूर्वरङ्गं विधायादौ सूत्रधारो विनिर्गते । प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः" । इति, "नान्द्यन्तेऽनुप्रविष्टेन सूत्रधारेण धीमता । प्रस्तावनाय रङ्गस्य वृत्तियोज्या हि भारती" इति च । तन्मते सूत्र-

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य।) आर्ये यदि नेपथ्यविधानमवसितं तर्हीतस्तावदागम्यताम्।

प्रविश्य।

नटी—[1]अज्ज इअं म्हि। आणवेदु अज्जो को णिओओ अणुचिट्ठीअदुत्ति।

---

[1]आर्य इयमस्मि। आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयतामिति।

धार इत्यनन्तरं प्रविश्य पुष्पाञ्जलिं विकीर्य पठतीत्यध्याहार्यं। ये तु नान्दी प्रयोक्तैव सूत्रधार आमुखं प्रस्तौतीत्याहुः। तेषां मते पठतीत्येतावदध्याहार्यम्।

नेपथ्येति। भूमिकापरिग्रहस्थानाभिमुखमित्यर्थः। 'भगवन्तोऽवरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः। विप्रामात्याप्रजाश्चार्या नटीसूत्रभृतौ मिथः' इति वचनात् नटीसूत्रधारयोः परस्परमार्यशब्देन सम्बोधनं। नेपथ्यविधानं भूमिकाविरचनं। अवसितं समाप्तं स्यादेवपूर्वत्कर्मणिक्तः। नियुज्यते प्रवर्त्यते अस्मिन्निति नियोगः व्यापारः। परितस्सीदन्त्यस्यामिति परिषत् संपदादित्वात्क्विप्। अभिलक्ष्यं रूपं दृश्यप्रबन्धो नाटकादिर्यैस्तेभिरूपाः। "रूपं दृश्यतयोच्यत" इति दशरूपके। "रूपं तु श्लोकशब्दयोः। पशावाकारसौन्दर्ये नाणके नाटकादिके। अन्धावृतौ स्वभावे च" इति हैमः। नाट्यकलाभिज्ञैरित्यर्थः। "अभिरूपो बुधे रम्ये" इति मेदिनी। भूयिष्ठा प्रचुरा। कालिदासेन ग्रथितं विरचितं वस्तु कथाशरीरं यस्य तेन "यत्तत्रानुचितं किंचिन्नायकस्य रसस्य वा। विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत्," "एकाहचरितैकार्थमितिवृत्तमासन्ननायकं। पात्रैश्चित्तुरैरङ्कैः तेषामन्ते च निर्गमः" इत्याद्युक्तं दशरूपके। भावप्रकाशे च "सूच्यमेव भवेत्किंचिद्दृश्यं श्रव्यमथापरं। नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः। विरसं लौकिकापेतमशास्त्रीयं चयद्भवेत्। तद्वस्तु सूचनीयं स्यात्", "युद्धं राज्यभ्रंशं मरणं नगरोपरोधनं चैव। अप्रत्यक्षकृतानि प्रवेशकैस्संविधेयानि" इत्यादि। अत इहेतिहासप्रसिद्धेऽपि वस्तुनि राज्ञः परिणयविस्मरणादिकं लोकविरुद्धमिति दुर्वासश्शापादिकं कवेस्संविधानमित्याद्यूहनीयं। नवशब्देन भाससौमिल्लादिकृतीनां सामाजिकैर्दृष्टपूर्वत्वं कालिदासकृतेरिदंप्रथमदर्शनत्वं च व्यज्यते। अतश्च सामाजिकादरणीयत्वं दर्शितं भवति। नाटकेन

सूत्रधारः—आर्ये अभिरूपभूयिष्ठा परिषदियम्। कालिदासग्रथितवस्तुना नवेन नाटकेनोपस्थातव्यमस्माभिः। तत्प्रतिपात्रमाधीयतां यत्नः ।

नटी—[1]सुविहिदप्पओअदाए अज्जस्स ण किंवि परिहीअदि ।

सूत्रधारः—आर्ये कथयामि ते भूतार्थम् ।

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥५॥

---

[1]सुविहितप्रयोगतयार्यस्य न किमपि परिहीयते ।

करणेन उपस्थातव्यं प्रवर्तितव्यं। तत् तस्मात् अभिरूपाणां सामाजिकानामाराधनीयत्वात् महाकवेः काव्यस्याभिनवस्याभिनेयत्वाच्चेत्यर्थः। प्रतिपात्रं विशेषादेकैकस्मिन्नपि पात्रे "अव्ययं विभक्ति" त्यादिना यथार्थेऽव्ययीभावः। योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि" यथार्था इत्युक्तेः। यत्नः अवधानं आधीयतां न्यस्यतां। नियोक्तृत्वधानादेव हि निरोज्याः स्वकर्मणि न स्खलन्तीति भावः। अत्र "भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः" इत्युक्तलक्षणाया भारतीवृत्तेरङ्गेषु प्ररोचनावीथीप्रहसनासुलेषु प्ररोचनाख्यमङ्गं भवति। 'उन्मुखीकरणं तत्र प्रशंसातः प्ररोचने'ति लक्षणात्। अत्र हि निरुपपदेन कालिदासनामग्रहणेन कवेः सुप्रसिद्धतां व्यञ्जयता, नवशब्देन च नाटकान्तरवैलक्षण्यतात्पर्यं गर्भीकुर्वता सुधीकृता कविकाव्ययोः प्रशंसा। अग्रिमेण च "सुविहितप्पओअदाए" इति नटीवचनेन नटप्रशंसा च कृता भवति। सुविहितः पात्रेषु सम्यक् प्रतिष्ठापितःप्रयोगः नाट्यं येन तथाभूततया पूर्वमेवपात्राणां सुशिक्षितत्वादित्यर्थः। आर्येत्येति सम्बन्धसामान्ये षष्ठी पूर्वेण सम्बन्धः। किमपीति क्रियाविशेषणं। परिहीयत इति कर्मकर्तरि लकारः। अल्पमपि वैकल्यं न भवेद्येन प्रतिपात्रं यत्नाधानापेक्षेति भावः। भूतार्थं यथावस्थितं विषयम्।

आ परितोषादिति। विदुषां सदसद्विवेकिनां आ परितोषात् प्रीतियावत् पदद्वयं चेदं। "आङ्मर्यादाभिविध्योः" इति विभाषाधिकारात्। प्रयोगविज्ञानं

नटी—[1]अज्ज एवं एदं। अणन्तरकरणिज्जं दाव अज्जो आणवेदु।

सूत्रधारः—किमन्यदस्याः श्रुतिप्रसादनतः।

नटी—[2]अज्ज कदमं उण चदुं अहिकरिअ गाइस्सं।

सूत्रधारः—नन्विममेव नातिचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयतान्तावत्। संप्रति हि।

---

[1]आर्य एव मेतत्। अनन्तरकरणीयं तावदार्य आज्ञापयतु।

[2]आर्य कतमं पुनर्ऋतुमधिकृत्य गास्यामि

नाट्यकौशलं साधु निर्दोषं न मन्ये। बलवत् दृढं। स्वरादिपाठादव्ययं। शिक्षितानां अभ्यस्तवतामपि शिक्षतेरत्राविवक्षितकर्मत्वेनाकर्मकत्वात् कर्तरिक्तः। चेतः मनः आत्मनि स्वस्मिन् विषये अप्रत्ययं विस्रंभरहितम्। 'विदुषामपि निजरूपप्रतिपत्तिः परतएव संभवति। स्वमहिमदर्शनमक्ष्णोर्मुकुरतले जायते यस्मा' दिति न्यायादिति भावः। यत्तु आपरितोषादिति ल्यब्लोपे पञ्चमी। आपरितोषः सम्यक्परितोषः। विदुषां सम्यक्परितोषमुद्दिश्येत्यर्थः। न साधुमन्य इति काकुः साध्वेव मन्यइत्यर्थः। तत्रहेतुः बलवच्छिक्षितानां चेतः आत्मनिविषये अप्रत्ययं अपिः प्रश्ने सप्रत्ययमेवेत्यर्थः; अशिक्षितानां हि स्वस्मिन्नप्रत्ययः ननु सुशिक्षितानामिति भावः इति व्याख्यानं तत् श्लोकस्वरसविरोधात्, कथमपि ते भूतार्थमिति प्रक्रमवैरूप्यात्। काकुपरिकल्पनक्लेशात्, 'गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि' इति कोशतः प्रश्नार्थस्यापेः प्रतिषेधपर्यवसानानौचित्याद्विचक्रमेणान्वयक्लेशाच्च न मनोरमम्। अनन्तरकरणीयं अनुपदकर्तव्यं। तावत् प्रथमं। 'प्रतिपात्रमाधीयतां यत्न' इति तु नाट्यपरिसमाप्तिं यावदनुष्ठेयमिति भावः। अस्याः परिषदः। श्रुतिप्रसादनतः श्रवःप्रीणनात्। कतममिति "रंगं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः। हृतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत्" इत्युक्तमनुस्मृत्य प्रश्नः। अधिकृत्य विषयीकृत्य। नातिचिरप्रवृत्तमिति नञर्थस्य नेत्यव्ययस्य सुप्सुपेति समासः। समग्रगुणमित्यर्थः अत एव उपभोगस्य जलक्रीडादिरूपस्य क्षमं योग्यं। अतिचिरप्रवृत्तत्वे वर्षर्तुधर्मसङ्करात् अचिरप्रवृत्तत्वे वसन्तधर्मानत्ययाच्च न समग्रोपभोगार्हत्वमिति भावः। "भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः" इति वचनात् प्रथमं सूत्रधारस्त्वयमारभते।

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥३॥

नटी—[1]तह । (इति गायति ।)

[2]इसि धुम्बिआइ भमरेहिं सुउमारकेसरसिहाइं ।
ओदंसअन्ति पमदाओ द अमाणा सिरीसकुसुमाइं ॥४॥

---

[1]तथा ।....

[2]ईषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि
अवतंसयन्ति प्रमदा दयमानाः शिरीषकुसुमानि ॥

सुभगेति । सुभगसुखः सलिलावगाहो येषु ते पाटलायाः पुष्पं पाटलं "अवयवे च प्राण्योषधिवृक्षेभ्यः" इति विकारावयवयोः प्राक्षस्याणः । "पुष्पमूलेषु बहुल" मिति वक्तव्यात्लोपः "पुष्पं क्लीबेऽपि पाटला" इति कोशात् पाटलमिति रूपं । तस्य संसर्गेण सुरभयो घ्राणतर्पणा वनवाता येषु ते, प्रच्छायेषु प्रभूतच्छायेषु प्रदेशेषु सुलभा निद्रा येषु ते, परिणामेषु सायंसमयेषु रमणीया आतपापगमेन हिमाभावेन च सुखावहाश्च भवन्ति "कृत्यल्युटो बहुल" मिति बहुलग्रहणात्कर्तर्यनीयर् । अत्र राज्ञश्शकुन्तलासमागमस्य ग्रीष्मवालिक्योपक्षेप्यमानत्वादिहापि ग्रीष्मवर्णनं । सलिलावगाहशब्देन चक्रावर्तोर अंगुलीयकस्य निमग्नत्वं, सुभगशब्देन पुनर्लाभेन सुखावहत्वं पाटलसंसर्गपदेन शकुन्तलाया भानुमतीग्रहणं, सुरभिवनवातपदेन मारीचाश्रमावस्थानं, छायाशब्देन दुर्वासश्शापः, निद्रापदेन दुष्यन्तस्य परिणयविस्मरणं, परिणामरमणीया इति च सुखावसानत्वमासूचितम् । आर्यावृत्तम् ।

इसीति । भ्रमरैः ईषच्चुम्बितानि अत्यर्थसुकुमारतया भ्रमद्भिरेव सद्भिर्मनागास्वादितानि सा हि भ्रमरवृत्तिर्यदानिष्पीड्य रसादानं । सुकुमारकेसरशिखानि कोमलकिंजल्काग्राणि शिरीषकुसुमानि ग्रीष्मकालिकानि प्रमदाः दयमानाः क्लेशभयादनतिस्पृशन्त्यस्त्यः अवतंसयन्ति कर्णपूरीकुर्वन्ति । अत्र च शिरीषकुसुमशब्देन शकुन्तला गम्यते । ईषच्चुम्बितशब्देन सकृदाजसमागमः । शोभनः कुमारः केसरशिखेव प्राधान्याद्दुस्सङ्गला-

सूत्रधारः—आर्ये साधु गीतम्। अहो गीतानुबद्धचित्तवृत्तिरालिखित इव सर्वतो रङ्गः। तदिदानीं कतमत्प्रकरणमाश्रित्यैनमाराधयामः।

नटी—[1]णं अज्जमिस्सेहिं पढमं एव्व आणत्तं अहिण्णाणसाउन्दलं णाम अपुव्वं णाडअं पओएण अहिकरीअदुत्ति।

---

[1]**नन्वार्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशाकुन्तलं नामापूर्वं नाटकं प्रयोगेणाधिक्रियतामिति।**

ळित्वाच्चेति पुत्रलाभः। प्रमदाअवतंसयन्ति इति च सर्वान्तःपुरसम्भावितत्वमित्येवं प्रकृतार्थः सूचितो भवति। रागेण स्वरसंयोगविशेषेण अनुबद्धा अनुस्यूता चित्तवृत्तिर्मनः प्रवृत्तिर्यस्यासौ रङ्गः। "मञ्चाः क्रोशन्ती" त्यादिवदौपचारिकः प्रयोगः। सामाजिका इत्यर्थः। आलिखितः चित्रार्पितइव। रसपारवश्यान्निष्पंद इत्यर्थः। कतमत् बहुविधं किरूपं। 'अदूडतरादिभ्यः पञ्चभ्यः' इत्यदादेशः। प्रक्रियते अभिनीयत इति प्रकरणं रूपकमित्यर्थः। रूपकविशेषपरस्यापि सामान्यवृत्त्याऽत्र प्रकरणशब्दस्य प्रयोगः। आराधयामः प्रीणयामः। प्रथममेव। पूर्वरङ्गात्प्रागेव। आर्यमिश्रैः सामाजिकैः। "शिरसा प्रथमगृहीता" मित्यादिषु दर्शनात्। "इदं प्रयोक्ष्ये युष्माभिरनुज्ञा दीयतामिति। संप्रार्थ्याः सूत्रधारेण प्रार्थनीया इति स्मृताः। त्वया प्रयोगः क्रियतामित्युत्कण्ठितचेतसः। ये सूत्रेण प्रार्थयन्ते ते सभ्याः प्रार्थनीयाः स्मृताः" इत्यादिलक्षणानुसाराच्च सामाजिकाभिमतज्ञानानन्तरमेव पूर्वरङ्गविधानं प्रसिद्धं। येनाभिनेयवस्तुसदृशनान्द्यादिप्रवर्तनमित्यवसेयं। एतेन कालिदासग्रथितवस्तुनेत्यादिपूर्ववाक्ये अभिज्ञानशाकुन्तलनामधेयेनेति पाठकल्पनं केषांचिद्दूयेतिस्पष्टं। शकुन्तलाया इदं शाकुन्तलं चरितं उपचारात्तद्विषयं निबन्धनमपि शाकुन्तलं "तस्येदं" इत्यण अभिज्ञानप्रधानं शाकुन्तलमिति मध्यमपदलोपी समासः। महाभारतगृहीतस्यापीतिवृत्तस्य अभिज्ञानांगुलीयकवृत्तान्तश्रारुत्वातिशयाय हि कविना स्वयमुत्प्रेक्षितः। प्रयोगेण अभिनयेन अधिक्रियतां प्रवर्त्यतां। अनुबोधितः स्मारितः। अस्मिन् गीतश्रवणक्षणे। तत्सर्वं परिषदादेशः अस्मदारम्भश्चेत्यादिकं। विस्मृतं चित्तपारवश्यादिति भावः॥

[सूत्रधारः—आर्ये सम्यगनुबोधितोऽस्मि । अस्मिन्क्षणे विस्मृतं खलु तत्सर्वं मया । कुतः ।

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥ ५ ॥

। इति निष्क्रान्तौ ।

॥ प्रस्तावना ॥

ततः प्रविशति मृगानुसारी शरचापहस्तो राजा रथेन सूतश्च ।

सूतः—(राजानं मृगं चावलोक्य ।) आयुष्मन् ।

तवेति.—हारिणा मनोहरेण तव सम्बन्धिना गीतस्य गेयप्रबन्धस्य रागेण स्वररचनाविशेषेण प्रसभं बलात् हृतः अनन्यमनाः कृतोऽस्मि । सामाजिकाराधनप्रवृत्ततया जागरूकोऽपि परवशः कृत इति प्रसभशब्दार्थः । किमुत सामाजिकाइत्यर्थापत्तिर्व्यज्यते कथमिवु । एष सन्निहितप्रवेशः । दुष्यन्तो नाम राजा । अतिरंहसा अतिशयितवेगेन । सारं चित्रवर्णमङ्गं यस्य तेन कृष्णसारेणेव " सारङ्गः पशुपक्षिणोः " इति शकन्ध्वादिः । इदं प्रयोगातिशयो नामामुखाङ्गं । तल्लक्षणमुक्तं भावप्रकाशे ' एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः । पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः । एष राजेव दुष्यन्त इत्यादौ स प्रतीयते " इति ।

प्रस्तावनेति । तल्लक्षणमुक्तं भावप्रकाशे " नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहितास्सल्लापं यत्प्रकुर्वते । चित्रैर्वाक्यैः स्वकार्यार्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनेति सा ' इति ।

आयुष्मन्निति । " रथी सूतेन चायुष्मान् पूज्यैरिशष्यात्मजानुजाः " इति दशरूपके ॥

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम् ॥ ६ ।

राजा—सूत दूरमनुसारेण वयमाकृष्टाः । अयं पुनरिदानीमपि ।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभिया भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥७॥

(सविस्मयं) कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः ।

सूतः—आयुष्मन् उत्खातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः । तेन मृग एव विप्रकृष्टान्तरः संवृत्तः ।
संप्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति ।

कृष्णेति । कृष्णश्चासौ सारश्चबलश्चेति कृष्णसारः । 'वर्णोवर्णेन' समासः । तस्मिन् मृगे अधिज्यं अधिरोपितमौर्वीकं 'प्रादिभ्यो धातुजस्य वाच्यो वाचोत्तरपदलोपः' इति समासः । कर्मणि प्रभवतीति कार्मुकं । "कर्मण उकञ्" धनुः येन तस्मिंस्त्वयि च चक्षुः ददत् अर्पयन् । "नाभ्यस्ताच्छतु" रिति निषेधान्नुमभावः । अहं मृगानुसारिणं दक्षध्वस्थे मृगानुगामिनं पिनाकिनं साक्षात्पश्यामीव । प्रभावान्मृगानुसरणात् पिनाकतुल्यधनुर्धारणाच्चेतिभावः । अवातीतस्यापि पिनाकिवृत्तान्तस्य प्रत्यक्षायमाणत्ववर्णनाद्भाविकमलङ्कारः । तदुक्तं "भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णन" मिति । तच्च धनुर्धरत्वमृगानुसारित्वरूपसामान्यधर्मभावितामुपमामुपजीवतीति तयोरङ्गाङ्गिभावेन संकरः ॥ **वयमिति** । "अस्मदो द्वयोश्च" इति बहुवचनम् ॥

ग्रीवेति । अनुपतति अनुयायिनि स्यन्दने अस्मदीये ग्रीवायाः कन्धरायाः भङ्गेन तिर्यगावर्जनेन अभिरामं मनोहरं यथा तथा मुहुः पुनः पुनः बद्धा न्यस्ता दृष्टिः

राजा—तेन हि विमुच्यन्तामभीशवः

सूतः—यदाज्ञापयत्यायुष्मान्। (रथवेगं निरूप्य।) आयुष्मन् पश्य पश्य।

मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः।
आत्मोत्थितैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाय समेव रथ्याः ॥८॥

येन सः। शरस्य पतनाद्भिया भयेन हेतुना 'भयभीतभीतिभीभिरिति वाच्य' मिति पञ्चमीतत्पुरुषः। पश्चार्धेन शरीरस्यापरभागेन "अपरस्य पश्चभावो वक्तव्य" इति सिद्धम्। भूयसा बाहुल्येन मृद्वादीनां धर्मपरत्वमुक्तं। भूयसा पश्चार्धेनेति वा। पूर्वकायं शरीरस्य पूर्वभागं 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे'। प्रविष्टः संश्लिष्टाङ्गत्यर्थः। 'प्रविशन्तीव चांगानि' इत्यादिषु लज्जाभयादिभिरङ्गसंकोचे प्रवेशव्यपदेशो दृश्यते। अर्धावलीढैः असमग्रास्यादितैः अतएव श्रमेण विवृतात् मुखात् वक्त्रविवृतात् श्रोत्रियैः दर्भैः गृहीतपूर्वैः कुशग्रासैः कीर्णवर्त्मा परिक्षिप्तमार्गः। अत्र किरतेरास्तरणार्थत्वाद्दर्भाणां करणत्वं मार्गस्य च कर्मत्वं "अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः" इत्यादिवत्। प्रक्षेपार्थत्वे तु दर्भाणां कर्मत्वं मार्गस्याधिकरणत्वं च स्यात्। अयं मृगः। इदानीं उदग्रमुन्नतं प्लुतमुत्पतनं यस्य तथा भूततया। नियत्याकाशे बहुतरमधिकारं उर्व्यां स्तोकमल्पं च प्रयाति। सकृदुत्पतने दूरलङ्घनादिति भावः। स्वभावोक्तिरलङ्कारः। "सूक्ष्मवस्तुस्वभावयथावद्वर्णनं स्वभावोक्ति"रिति तल्लक्षणं। प्रयत्नप्रेक्षणीयः दूरगत इत्यर्थः। उत्खातिनी निम्नोन्नतस्थलवती। रश्मिसंयमनात् प्रग्रहाणामावश्यकात्। विप्रकृष्टं व्यवहितं अन्तरं मध्यप्रदेशो यस्यसः। दुःखेनासद्यते प्राप्यत इति दुरासदः। "ईषदुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्"। अभीशवः प्रग्रहाः 'अभीशुः प्रग्रहे रश्मौ' इत्यमरः। निरूप्य अभिनीय। स्रग्धरा वृत्तम्।

मुक्तेष्विति। रश्मिषु प्रग्रहेषु "रश्मिः पुमान् दीधितौ स्यात् पक्ष्मप्रग्रहयोरपि" इति मेदिनी। मुक्तेषु शिथिलितेषु सत्सु निरायताः पूर्वचरणप्रसारणाद्वेगादी-

राजा—सत्यम् । अतीत्य हरितो हरीन्वर्तन्ते वाजिनः । तथा हि ।

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो
र्न मे दूरे किंचित् क्षणमपि न पार्श्वे रथजवात् ॥ ९ ॥

सूत पश्यैनं व्यापाद्यमानम् । (इति शरसंधानं नाटयति ।)

। नेपथ्ये ।

भो भो राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

पर्याकृताः पूर्वकायाः शरीरपूर्वभागाः येषां ते । "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" । निष्कम्पाः चक्रभ्यारूढतृणादिवद्वेगानुरोधात् पृथक्चलनरहिताः चामरशिखाः कर्णचामरान्ताः येषां ते । निभृताः निश्चलाः ऊर्ध्वाः उन्नताश्च कर्णा येषां ते । आत्मना स्वेन हेतुना उत्थितैरपि रजोभिरलङ्घनीयाः अनतिक्रमणीयाः । रजउद्गमात् पूर्वमेव पदोल्लेपादिति भावः । अमी रथंवहन्तीति रथ्याः युग्याः "तद्वहति रथयुगप्रासङ्गं" इति यत्प्रत्ययः । मृगस्य जवे अश्वमया ईर्ष्ययेव धावन्तीति हेतूत्प्रेक्षा । सा च वेगस्वभावोक्त्या "आत्मोत्थितैरपि रजोभिरलङ्घनीया" इति सम्बन्धेऽप्यसम्बन्धरूपातिशयोक्त्या च संसृज्यते । वसन्ततिलकं वृत्तम् ।

हरितः हरित्संज्ञान् हस्तिवर्णान् वा हयान् सूर्याश्वान् "हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात्तृणे" इति मेदिनी । "विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्या परितः स्फुरन्त्या । रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः" इत्यादितः सूर्याश्वानां हरितवर्णत्वं प्रसिद्धम् ।

यदिति । यत् वस्तु आलोके प्रथमदर्शने सूक्ष्मं दूरत्वादल्पाश्चारं । तत् वस्तु सहसा अनन्तरक्षण एव विपुलतां सन्निकर्षान्महत्त्वं व्रजति प्राप्नोति । सूक्ष्मत्वविपुलत्वयोः अव्यवहितपूर्वोत्तरक्षणानुभवेन वेगातिशयो व्यज्यते । किंच यत् तरुगुल्मा-

सूतः—(आकर्ण्यावलोक्य च ।) **आयुष्मन् अस्य खलु ते बाणपातवर्तिनः कृष्णसारस्यान्तरे तपस्विनः संप्राप्ताः ।**

राजा—(ससंभ्रमम् ।) **तेन हि निगृह्यन्तां वाजिनः ।**

सूतः—**तथा** (इति रथं स्थापयति ।)

(ततः प्रविशत्यात्मनातृतीयो वैखानसः॥)

वैखानसः—(हस्तमुद्यम्य ।) **राजन् आश्रममृगोऽयम न हन्तव्यो न हन्तव्यः ।**

दिकं वस्तु अर्धे मध्ये विच्छिन्नं विभागेनावस्थितं । तदपि कृतसन्धानं कृतसंयोगमिव भवति । तदपि वस्तुनोरन्तरं झटित्यतिलङ्घनान्नावसीयत इति भावः । अपि च यत् शाखादिकं वस्तु प्रकृत्या स्वभावतः वक्रं कुटिलं तदपि नयनयोः समरेखमृजुरूपं भवति । झटित्येव शुक्लपीतादिरूपमात्रप्रतिभानादिति भावः । रथजवाद्धेतोर्मे किंचित् किमपि वस्तु क्षणं क्षणमात्रमपि " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीया । नदूरे न च पार्श्वे । दूरदृष्टमासीदति आसन्नं च दूरीभवत्यचिरेणेति भावः । अत्र सूक्ष्मत्वस्थूलत्वादीनां विरोधप्रतिभानस्य वेगातिशयेन परिहारात् विरोधाभासालङ्कारः । तदनुप्राणिता च वेगस्वभावकथनरूपा स्वभावोक्तिः । **शिखरिणीवृत्तम् ।**

व्यापाद्यमानं हन्यमानं सन्तं पश्य वर्तमानसामीप्याद्वर्तमाननिर्देशः । तेनबाणस्य लक्ष्यादनपराधस्यूचितः ।

बाणपाते बाणस्य पतनावधौ वर्तत इति तथाभूतस्य नातिविप्रकृष्टस्य नचातिसन्निकृष्टस्येत्यर्थः । अन्तरे कृष्णसारस्य तव च मध्य इत्यर्थः । संप्राप्तः अतो न बाणप्रयोगावसर इति भावः । निगृह्यन्तां रश्मिसंयमनेन स्थाप्यन्तां । तृतीयः त्रित्वसंख्यापूरणः " त्रेस्संप्रसारणं च " इति पूरणार्थे तीयप्रत्ययः, । रेफस्य संप्रसरणमृकारः, । ' संप्रसारणाच्च ' इति च पूर्वरूपं । आत्मनश्चेति पूरणप्रत्ययान्तेन समासविधानादात्मनातृतीय इति समस्तं पदं । विखनसा प्रोक्तं वैखानसं वानप्रस्थधर्मः तदधीते वेदवेति वैखानसः ' प्रोक्ताल्लुक् ' । " पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा । कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः " इत्युक्तलक्षणो मुनिरित्यर्थः । हस्तमुद्यम्येति प्रतिषेधव्यंजनमिदम् ।

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं ?
क्व च निशितनिपाता वज्रसाराः शरास्ते ? ॥ १० ॥

तत्साधु कृतसंधानं प्रतिसंहर सायकम् ।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ॥ ११ ॥

राजा—एष प्रतिसंहृतः । (इति यथोक्तं करोति ।)

न खल्विति । हिंसाभीरुत्वमाविष्कर्तुं प्रथमं निषेधप्रयोगः । द्विरुक्तं च । मृदुनि अस्मिन् मृगस्य हरिणस्य शरीरे अयं निशिततर इत्यर्थः । बाणो न खलु न खलु सन्निपात्यः नैव प्रयोज्यः । कथमिव तूलराशौ अग्निरिव । यथा स्फुलिङ्गकणपातमात्रेण महानपि तूलराशिर्निरवशेषीभवति तथास्यादित्यर्थः । क्वचित्युष्पराशाविति पाठः । अनुकम्पिता हरिणाः हरिणकाः 'अनुकंपायां' इति कः । तेषां सम्बन्धि अतिलोलं अकारणभंगुरं जीवितं च क्व । निशितनिपाताः तीक्ष्णधाराः कठोरपतना वा । वज्रस्य कुलिशस्येव सारः स्थिरांशो येषां तथाभूताः । सारपुंखा इति पाठे दृढमुष्टिदेशा इत्यर्थः । वज्रधारा इति साधीयान् पाठः । ते तव शराश्च क्व । वज्रसारा इति विशेषणेन गिरिदलनक्षमत्वं व्यंजितं । अत्यन्तदुर्बले निशितायुधप्रयोगो नोचित इति भावः । अयं विरूपघटनारूपो विषमभेदः । तूलराशाविवाग्निरिति वाक्यार्थोपमा मृदुनीति विशेषणस्य अनुचिताचरणरूपप्रतीयमानार्थगर्भत्वात् परिकरश्च 'विशेषणसाभिप्रायत्वं परिकरः' इत्यलङ्कारसर्वस्वे 'साभिप्रायत्वं प्रतीयमानार्थगर्भीकारः' इति च तत्रैव व्याख्यातं । एतेषां त्रयाणामलङ्काराणां तिलतण्डुलवत् पृथगवस्थानात् संसृष्टिः ॥ **मालिनीवृत्तम्** ॥

तदिति । तत् मृगस्यावध्यत्वात्, साधु सम्यक् कृतसन्धानं सायकं प्रतिसंहर सन्धानाद्विमोचय । अथवा तत्साधिति पृथग्वाक्यं यद्यनीये वस्तुनि कठोरस्यारंभः तत्साधु विपरीतलक्षणयानुचितमित्यर्थः । वः क्षत्रियाणामित्यर्थः । शस्त्रं आयुधं

सूत तपोवनवासिनामुपरोधो मा भूत् । एतावत्येव रथं स्थापय । यावदवतरामि ।

सूतः—धृताः प्रग्रहाः । अवतरत्वायुष्मान् ।

राजा—(अवतीर्य ।) विनीतवेषप्रवेश्यानि तपोवनानि नाम । इदं तावद्गृह्यताम् । (इति सूतहस्ते धनुश्चाभरणानि चोपनीय ।) यावदाश्रमवासिनः प्रत्यवेक्ष्येपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः ।

सूतः—यदाज्ञापयत्यायुष्यमान् ।

इति निष्क्रान्तः ।

राजा—(परिक्रम्यावलोक्य च ।) इदमाश्रमपदं । यावत्प्रविशामि । (प्रविश्य । निमित्तं सूचयित्वा ।)

नोत्थानेन भिन्नः निवर्तितः । अर्वाक् इतस्सन्निकृष्टे एते च हरिणशिशवः नष्टा-
: व्यपगतसाध्वसाः सन्तः छिन्नदर्भाकुरायां ऋषिनिर्दूननवकुशायां उपवनं वनस्थ
पे या भूः तस्यां मन्दमन्दं चरन्ति । अतश्च तपोवनमिति ज्ञायत इतिभावः ।
द्राक्रांता वृत्तम् ॥ उपरोधः मार्गनिरोधाद्युपद्रवः । मा भूत् 'माङि लुङ्' ।
ाङ्योगे' इत्यडागमप्रतिषेधः । एतावत्येव प्रदेशे । यावदवतरामि अवतरिष्यामि
वत्पुरानिपातयो' रिति लट् । विनीतः शान्तः विश्वसनीय इत्यर्थः । वेषः रूपं
ानन् कर्मणि तद्यथा तथा प्रवेश्यानि प्रवेष्टुं योग्यानि । आयुधाभरणादिधारणं नोचि-
यर्थः । यावदुपावर्ते तावत् क्रियन्तामित्यन्वयः । व्रजन्ति गच्छन्त्यवश्यमिति
जनः 'आवश्यकाधमर्ण्ययोः' इति णिनिः । वाजाः पक्षाः एषां बभूवुरिति वा-
ाः अश्वाः । आर्द्रपृष्ठाः जलसिक्तशरीरोपरिभागाः । स्वेदस्य रजः प्रसरस्य चापनो-
ये पनर्यानीतसाहार्थं पञ्चसेकः संस्कारः । निमित्तं शुभसूचकं बाहुस्पन्दादिक-

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य? ।
(अथ वा भवितव्यानां द्वाराणि भवन्ति सर्वत्र)॥ १५ ॥

नेपथ्ये ।

[1]**इदो इदो सहीओ ।**

राजा— (कर्णदत्वा) **अये दक्षिणेन वृक्षवाटिकामालाप इवश्रूयते। यावदत्र गच्छामि ।** (परिक्रम्यावलोक्य च ।) **अये एतास्तपस्विकन्याः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमितएवाभिवर्तन्ते** (निपुणं निरूप्य ।) **अहो मधुरमासां दर्शनम् ।**

---

[1]**इत इतः सख्यौ ।**

शान्तमिति । इदं पुरो वर्ति स्थानं । शान्तं उपरतविषयं पश्यत इति पदं आश्रमएव पदं, आश्रमिगतं शान्तत्वमुपचारादाश्रमे प्रयुक्तं। बाहुः अर्थाद्दक्षिणभुजः । स्फुरति स्पन्दते च । इह आश्रमपदे अस्य बाहुस्फुरणस्य फलं कुतः । राज्ञो नार्थ इह सम्भवतीत्यर्थः । नियतिगतेरचिन्त्यहेतुतामभिसन्धायाह—अथवेति । भवितव्यानां अवश्यभाविनां, बहुलग्रहणात् कर्तरि तव्यप्रयोगः । भूप्राप्तावितिधातुग्रहणे प्राप्तव्यानामित्यर्थः । द्वाराणि मार्गाः सर्वत्र भवन्ति आक्षेपालंकारः । 'आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्' इति तल्लक्षणं । **आर्यावृत्तम् ॥** नेपथ्य इति । आश्रमपदमत्र यवनिकान्तरितं नेपथ्यं भवति । इदो इति सख्यौ प्रति शकुन्तलावचनं । सेचनीयवृक्षभेदात् इदो इदो इति द्विरुक्तं । दक्षिणेनेत्येनबन्तमव्ययं 'एनपा द्वितीया' इत्येनबन्तयोगाद् वृक्षवाटिकामिति पाक्षिकी द्वितीया । 'वट वेष्टने' इति धातोर्ण्वुलि वाटिकाशब्दो निष्पन्नः वृक्षवीथ्या दक्षिणत इत्यर्थः । 'अमात्यगणिकागेहो पवने वृक्षवाटिके'ति कोशेऽपि केवलयोगोऽत्र ग्राह्यः । आलाप इवेति । विप्रकर्षतः श्लोकगठस्य काकलीत्वाच्चास्फुटश्रवणमिवशब्देन प्रतीयते । स्वप्रमाणानुरूपैः बालिकाऽऽस कारसदृशैः तनुभिरित्यर्थः । सेचनघटैः जलसेक्यैर्थैः कलशैः । अश्वघासादिवत्तादर्थ्यषष्ठ समासः । बालपादपेभ्यः अचिरप्ररूढेभ्यः वृक्षेभ्यः । पादैः पिबन्तीति पादपाः 'सुपि स्थः' इत्यत्र सुपीतियोगविभागात्

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥ १६॥

यावदिमां तरुच्छायामाश्रित्य प्रतिपालयामि। (इति विलोक्यावस्थितः।)

ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला।

शकुन्तला—[1]इदो इदो सहीओ।

[1]इत इतः सख्यौ।

आतोधातोः कप्रत्ययः। महावृक्षाणां हि सेचनमनपेक्षितं कन्यानामसुकरं च। अतोऽल्पदं। अभिवर्तन्ते अभ्यागच्छन्ति। निरूप्य दृष्ट्वा। रूपयतेर्दर्शनार्थस्चुरादिषु पठितः मधु माधुर्यमस्यास्तीति मधुरं प्रियं। 'ऊषसुषिमुष्कमधोरः' 'मधुरं रसवत् स्वादुप्रियेषु मधुरोन्यवत्' इति विश्वः।

शुद्धान्तेति। शुद्धः विविक्तः अन्तः प्रदेशो यस्य सः अथवा शुद्धाः उपदाशुद्धाः रक्षिणः अन्ते समीपे यस्यसः शुद्धान्तः अन्तःपुरं। अत्रान्तःपुरस्त्रीजन उपचर्यते। शुद्धान्तस्य दुर्लभमिदमीदृशं वपुः आश्रमवासिनः वर्षवातातपत्रतोपवासादिक्लिष्टस्येत्यर्थः। जनस्य यदि भवति। उद्यानलताः प्रयत्नसंवर्धिता इत्यर्थः। वनलताभिः यदृच्छारूढाभिः कर्त्रीभिः गुणैः रूपगन्धादिभिर्हेतुभिः दूरीकृताः पराजिताः खलु। केचित्तु आश्रमवासिनो जनस्येदं वपुः शुद्धान्तदुर्लभं यदि शुद्धान्तदुर्लभमेव। अव्ययानामनेकार्थत्वा दत्र यदिरवधारणार्थः। अत एव 'अधिवास्य यदि स्वकैर्यशोभिश्चिरमेनामुपभुंजते नरेन्द्राः' इत्यादयः प्रयोगाः। तद्यथा, वनलताभिरुद्यानलताः गुणैर्दूरीकृताः खलु इति व्याचक्षते। नचैतदुपपद्यते वनलतानां उद्यानलतातिशायित्वस्य अप्रसिद्धत्वादविवक्षितत्वाच्च। अन्यथा हि सर्वत्र निसर्गस्यैव प्रकृष्टत्वेन यत्न एव वृथा स्यात्। न किंचिदपि शिल्पं शोभेत। नचोद्यानलतासु निसर्गरम्यत्वस्य काचिदस्ति क्षतिः। नह्येताः कृत्रिमाः। यत्नस्तु दोषापोहेन गुणमेव प्रगुणयति। सहि संस्कारो यद्गुणमेवति गुणान्तराधानं। किंच 'सर्वथा अप्सरस्सम्भवैषा' इति राज्ञो निगमनवचनेन रूपस्यासामान्यत्वं दर्शयता विरुध्यते। 'मधुरमासां दर्शन'मिति सामान्यतः प्रकृतस्तु शकुन्तलायामेव चक्षुःप्रीत्यादरे च वयोवेषसाम्यमात्रदर्शनात्। अत्र चेदं वपुरित्ये-

अनसूया—[1]हला सउन्दले तुवत्तो वि तादकस्सवस्स अस्समरुक्खआ पिअदरत्ति तक्केमि । जं णोमालिआकुसुमपेसला तुमं वि ए दाणं आलवालसेअणे णिउत्ता ।

शकुन्तला—[2]ण केवलं तादणिओओ । अत्थि मम विसोदरसिणेहो एदेसु । (वृक्षसेचनं रूपयति)

[1]हला शकुन्तले त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षाः प्रियतरा इति तर्कयामि । यन्नवमालिकाकुसुमपेशला त्वमप्येतेषामालवालसेचने नियुक्ता ।

[2]न केवलं तातनियोगः । अस्ति ममापि सोदरस्नेह एतेषु ।

कवचनं । अत्रैव वक्ष्यति 'इदं किलाव्याजमनोहरं वपुरिति । यद्यर्थोक्तौ च कल्पनमिति लक्षणातिशयोक्तिः खल्वियं 'धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि' इत्यादिवत् सिद्धेऽप्यर्थे यदि प्रयोगः साध्यस्यापि सिद्धकल्पतां व्यंजयति । आर्यावृत्तम् ।

यावत् प्रतिपालयामि प्रतीक्षिष्ये । झटिति प्रवेशे तासां विस्रब्धभाषणं व्याहन्येतेति भावः । यथाभूतः उक्तः यथोक्तः सुप्सुपेति समासः । उक्तप्रकार इत्यर्थः । व्यापारः सेकरूपो यस्यास्सा । हलविलेखन इति धातोः बहुलमहणादप्रत्यये सति हलेतिरूपं । 'हञ्जे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति' इत्यमरः । त्वत्तोऽपीत्यापिशब्देन शकुन्तलाया अत्यर्थप्रियत्वं व्यज्यते : 'ध्रुवमपायेऽपादान' मिति सूत्रे अपायशब्दो वैज्ञानिकं विभागमभिप्रैति । इदमेव चाभिसन्धाय 'माथुराः पाटलिपुत्रेभ्य आढ्यतराः' इत्यादौ पञ्चमी भाष्ये समर्थिता । नवमालिकाकुसुमपेशलेति । कुसुमकोमलाया लतासेकनियोगोऽपि श्रमायेति भावः । किमुत पादपसेक इत्यर्थापत्तिर्व्यज्यते । ममापीति । तातस्यापत्यस्नेह इव ममैतेषु सोदर्यस्नेहो येन न श्रम इत्यर्थः । समानोदरे शयित इत्यर्थे 'विभाषोदरे' इति समानशब्दस्य सभावविकल्पात् 'सोदराद्यः' इति सिद्धं सोदर्येति, च सोदरेति पाठे सह उदरेण वर्तत इति व्युत्पत्त्यातुल्ययोगार्थेन सहशब्देन समासः 'वोपसर्जनस्य' इति सहशब्दस्य पक्षे सः । रूपयति अभिनयति । कथमिति विस्मये

राजा—कथमियं सा कण्वदुहिता । असाधुदर्शी खलु तत्र-भवान्काश्यपः य इमामाश्रमधर्मे नियुङ्क्ते ।

इदं किलाव्याजमनोहरं वपु-
स्तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
समिद्धतां छेत्तुमृषिर्व्यवस्यति ॥ १७ ॥

भवतु । पादपान्तरित एव विश्रब्धं तावदेनां पश्यामि । (तथा करोति ।)

सा 'दुहितरं शकुन्तलामतिथिसत्कारायेति वैखानसवचनावगता। मुनिपुत्र्या एवं-रूपत्वसम्भावितमिति भावः । असाधुदर्शी सम्यग्ज्ञानरहितः ।

इदमिति । यः अव्याजमनोहरं कृत्रिमभूषणविभ्रमादिनिमित्तमन्तरेणापिचित्ता-कर्षकं । 'व्याजश्शाठ्येऽपदेशे च' इति विश्वः, 'अपदेशः पुमान् लक्ष्ये निमित्तव्याजयो-रपि' इत्यभिधानादत्र निमित्तपर्यायत्वं । इदं किल एतादृशमपि वपुः तपसः बहुतरा-यासासाध्यस्य धर्मस्य क्षमं सहनं साधयितुं कर्तुं इच्छति । सः ऋषिः नीलोत्पलपत्रस्य अत्यर्थसुकुमारस्येत्यर्थः । धारया अग्रेण समिद्धतां समिद्यष्टिं छेतुं लवितुं व्यवस्यति आरभते । सुकुमारस्य परुषे कर्मणि नियोजनमसम्यग्दर्शनफलमिति भावः । अत्र शकु-न्तलायास्तपःप्रवर्तनस्य नीलोत्पलपत्रधारया समिच्छेदनस्य च सदृशयोर्वाक्यार्थयोः, य इच्छति स व्यवस्यतीत्यैक्यारोपाद्वाक्यार्थवृत्तिनिदर्शनालङ्कारः । ध्रुवमिति सम्भावनायां ऋषिरित्यनेनाज्ञानभिज्ञत्वं सहजमिति व्यज्यते । एवं साभिप्राय विशेषणत्वात् परिक-रालङ्कारः । विशेष्यसाभिप्रायत्वमते अयं परिकरांकुरः निदर्शनया चास्य संसृष्टिः । **वंशस्थं वृत्तम् ॥**

विस्रब्धं तिरोधानादविदितं । अदयं दृढं पिनद्धेन बद्धेन । अपिपूर्वान्नह्यतेर्बन्धना-र्थात् क्तप्रत्यये, 'वष्टि भागुरि' रित्यादिना अपेरकारलोपे च पिनद्धेति रूपं । कंचुकवल्कलस्य पश्चाद्ग्रन्थिबन्धाभिप्रायेण शिथिलयेति सखीप्रार्थनोपदर्शनं । अत्र वल्कलग्रन्थिदार्ढ्यं । धरत इति धरौ 'पचाद्यच्' पयसः क्षीरस्य धरौ स्तनौ तयोः

शकुन्तला—[1]सहि अणसूए अदअपिणद्धेण थणवक्कलेण पिअंवदाए दिढं णिअंदिदम्हि। सिढिलेहि दाव णं।

अनसूया—[2]तह। (इति शिथिलयति।)

प्रियंवदा—(सस्मितं) [3]एत्थ दाव पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालंह।

राजा—काममननुरूपमस्या वपुषो वल्कलं। न पुनरलङ्कारश्रियं न पुष्णाति। कुतः।

---

[1]सखि अनसूये अदयपिनद्धेन स्तनवल्कलेन प्रियंवदया दृढं नियन्त्रितास्मि। शिथिलय तावदेतत्।

[2]तथा।

[3]अत्र तावत् पयोधरविस्तारयितृ आत्मनो यौवनमुपालभस्व।

विस्तारयितृ प्रतिक्षणविजृम्भणनिमित्तं। यूनो भावः यौवनं 'हायनान्तयुवादिभ्योऽण्' उपालभस्वेति उपालंभो द्वेधा निन्दापूर्वः स्तुतिपूर्वश्च। यथा 'अविवेकि कुचद्वन्द्वं हन्तु नाम जगत्त्रयं। श्रुतिप्रणायिनोरक्ष्णोरयुक्तं जनमारणं।' इति। अत्र पूर्वार्धे निन्दापूर्व उपालम्भः उत्तरार्धे स्तुतिपूर्व इति विवेकः। प्रकृते च स्तुतिपूर्वः। नवयौवनेन पयोधरयोः प्रतिक्षणविजृम्भणात् वल्कलबन्धो दृढीभवतीति स्तुतिपर्यवसानात्। अतश्च अज्ञातयौवना नाम मुग्धाभेद इति व्यज्यते। अस्याः शकुन्तलायाः वपुषश्शरीरस्य। अस्य वपुष इति तु युक्तः पाठः। महार्हवसनाभरणयोग्यस्येत्यर्थः। अननुरूपं विसदृशं। कामामित्यर्थाङ्गीकारे यद्यपीत्यर्थः। "अकामानुमतौ कामं" इत्यभिधानात्। अलङ्कारश्रियं पुनः अलङ्कारशोभां तु। न पुष्णातीति न पुष्णात्येवेत्यर्थः। अननुरूपस्याप्यलङ्कारशोभावहत्वमलङ्कार्यगुणातिशयादित्याह।

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥ १८॥

सरसिजमिति। सरसि जायतइति सरसिजं 'सप्तम्यां जनेर्डः' 'ड्यापोस्संज्ञाच्छन्दसोर्बहुल' मिति पाक्षिको ह्रस्वश्च। अथवा सप्तम्यन्तसरश्शब्दादेव जायतेरिदं रूपं। 'तत्पुरुषे कृति बहुलं' इत्यलुक्समासः। कमलं शैवलेन जलनील्यापि गर्हायामपिः। 'गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि' रित्यमरः। अनुविद्धं अनुषक्तं 'व्यधेर्यजादित्वात्संप्रसारणं' रम्यं। मलिनमपि लक्ष्म कलंकः हिमांशोः चन्द्रस्य लक्ष्मीं तनोति परभागतया शोभान्तरमादधातीत्यर्थः। न केवलमविरोधिनैव गुणोत्तरस्य शोभापरिपोषः। अपि तर्हि विरुद्धेनापीति निदर्शयितुं तेजस्तमसोरिव विरुद्धयोर्लक्ष्मचन्द्रयोर्ग्रहणं। अतएव मलिनमपीति विशेषणं। निसर्गशोभिनि प्रत्यनीकरूपमपि परभागाय भवतीति भावः। तथा इयं तन्वी वल्कलेनाप्यधिकमनोज्ञा। अत्रोपपादकमर्थान्तरं न्यस्यति किमिवेति। मधुराणां रम्याणामाकृतीनां किमिव हि न मंडनं सर्वमेव मण्डनमित्यर्थः। आश्रयगुणादगुणमपि गुणवद्भवति, योजयितुरेव तु विसदृशयोजनं दूषणमिति भावः। अत्र केचित् प्रश्नार्थमपिमादाय शैवलेनानुविद्धं सरसिजमपि रम्यं न रम्यमित्यर्थः। लक्ष्महिमांशोर्लक्ष्मीमपि तनोति। न तनोतीत्यर्थः। इयं तन्वी वल्कलेन अप्यधिकमनोज्ञा। न मनोज्ञेत्यर्थः। मधुराणामाकृतीनां किं कुत्सितं वस्तु मण्डनं न भवतीति व्याचक्षते। तत्र न पुनरलंकारश्रियं न पुष्णातीति प्रकृमवैरूप्यं तावत्। वर्ण्यवस्तुनि च न कश्चिदतिशयः प्रतिपादितः स्यात्। प्रश्नार्थस्यापेः प्रतिक्षेपार्थयोजनानौचित्यं प्रथममेवोक्तं। अपिशब्दस्य व्युत्क्रमेणान्वयास्वरसश्च। यदपि, सरसिजमपि रम्यं हिमांशोरपि लक्ष्म लक्ष्मीं तनोति गर्हायामपिः न्यूनगुणयोरपि शोभा दृश्यतइत्यर्थः। इयमधिकगुणा वल्कलेनाप्यधिकमनोज्ञेति किमुवक्तव्यमित्यर्थः। शिष्टं स्पष्टमिति। तदप्यपास्तप्रायं सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः। रम्यं, लक्ष्मीं तनोति, अधिकमनोज्ञेति शब्दभेदेनैकस्यैव सामान्यस्य ग्रहणात् प्रतिवस्तूपमालङ्कारः 'वाक्ययोरेकसामान्ये प्रतिवस्तूपमामता' इति तल्लक्षणं। मालिनी वृत्तम्॥

(कठिनमपि मृगाक्ष्या वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति ।
विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिव कमलिन्याः कर्कशं वृन्तजालम् ॥)

शकुन्तला—(अग्रतोऽवलोक्य ।) [1]एसो वादेरिदपल्लवंगुलीहिं तुवरावेदि विअ मं केसररुक्खो। जाव णंसंभावेमि । (इति परिक्रामति ।)

प्रियंवदा—[2]हला सउन्दले एत्थ एव्व दाव मुहुत्तं चिट्ठ ।

शकुन्तला—[3]किं णिमित्तं ।

[1]एष वातेरितपल्लवांगुलीभिस्त्वरयतीव मां केसरवृक्षः । यावदेनं संभावयामि ।

[2]हला शकुन्तले अत्रैव तावन्मुहूर्तं तिष्ठ ।

[3]किं निमित्तम् ।

कठिनमिति । कठिनं परुषस्पर्शमपि मृगाक्ष्याः शकुन्तलायास्सम्बन्धि-वल्कलं कान्तरूपं मनोज्ञाकारमेव । अतः मनसि मच्चित्ते स्वल्पमपि रुचिभङ्गं रसहानिं नादधाति न करोति । यथा विकचानि सरसिजानि यस्यां तस्या इति कान्तरूपत्वस्थाने विशेषणं । कमलिन्याः स्तोकमीषन्निर्मुक्तः निर्गतः कण्ठः पाटलो वृन्तोपरिभागो यस्य तत् । कर्कशं कठिनं वृन्तजालं प्रसवबन्धनस्यावयवसमूहइव । तदपि कठिनं तथापि कमलिन्याः शोभावहमित्यर्थः ।

त्वरयतीव सेकार्थं शिघ्रमाह्वयतीवेत्युत्प्रेक्षा । सा च आह्वानक्रियोपयोगितया पल्लवानामंगुल्यात्मना परिणामात् परिणामालंकारानुप्राणिता । यावत्संभावयामि सेचनेनानुग्रहीष्यामि । मुहूर्तं कञ्चित्कालं । अत्यन्तसंयोगे द्वितीया । लतासनाथइवेति तव लतासादृश्यादित्यर्थः । यावत् प्रतिभाति प्रतिभास्यतीत्यर्थः । प्रियमपीति ' हितं मनो-

प्रियंवदा—[1]जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खो पडिभादि ।

शकुन्तला—[2]अदो क्खु तुमं पिअंवदा ।

राजा—प्रियंवदा प्रियमपि तथ्यमाह । अस्याः खलु ।

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥ १९ ॥

अनसूया—[3]हला सउन्दले इअं सअंवरवहू बालसहआरस्स तुएकिदणामहेआ वणजोसिणित्ति णोमालिआ। विसुमरिदासि णं ।

---

[1]यावत्त्वयोपगतया लतासनाथ इवायं केसरवृक्षः प्रतिभाति ।

[2]अतः खलु त्वं प्रियंवदा ।

[3]हला शकुन्तले इयं स्वयं वरवधूर्बालसहकारस्य त्वया कृतनामधेया वनज्योत्स्नीति नवमालिका । विस्मृतास्येनां ।

हारिच दुर्लभं वच ' इतिन्यायेन प्रियत्वसत्यत्वयोस्सद्भावस्थानविरोधोऽपिना दर्शितः । न पुनः प्रियंवदेति पाठे केवलप्रियवादिनी न भवतीत्यर्थः ॥

अधरइति । अधरः किसलयस्य पल्लवस्येव रागो यस्य सः । बाहू कोमलविटपानुकारिणौ ललितलताशाखासदृशौ । अङ्गेषु अवयवेषु सन्नद्धं सम्बद्धं यौवनमिति यौवनकालिको लावण्यविशेष उपचर्यते । कुसुममिव लोभनीयं स्पृहणीयं । अत्र किसलयादिरूपलताधर्मसदृशाधरादिधर्मसंबन्धेन लतासादृश्यप्रतिपादनात् वाक्यार्थोपमा । **आर्यावृत्तम् ॥**

सह मिलित्वा करोति फलं निष्पादयतीति सहकारः । स्वयमात्मनैव वृणोति इति स्वयंवरा ' संज्ञायां भृतृवृजिधारिसहितपिदमः ' इति खच् । ' अरुर्द्विषदजंतस्य मुम् ' इति मुमागमः । स्वयंवरा च सा वधूश्च । स्वयमेव शाखाभिरासादनादिति भावः । ज्योत्स्ना अस्याः अस्तीति ज्योत्स्नी । ज्योत्स्नादिभ्य उपसंख्यानादण् । ' टिड्ढाणञ् '

शकुन्तला—[1]जइ अत्ताणं विसुमरिस्सं । (लतामुपेत्यावलोक्य च ।) हला रमणीए काले इमस्स लदापाअवमिहुणस्स वइअरो संवुत्तो - जं णवकुसुमजोव्वणा वनजोसिणी बद्धपल्लवदाए उवभो अक्खमो बालसहआरो । (पश्यन्ती तिष्ठति ।)

प्रियंवदा—[2]अणसूए जाणासि किं णिमित्तं सउन्दला वणजोसिणिं अदिमत्तं पेक्खदिति ।

---

[1]यद्यात्मानं विस्मरिष्यामि । हला रमणीये काल एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः । यन्नवकुसुमयौवना वनज्योत्स्नी बद्धपल्लवतयोपभोगक्षमो बालसहकारः ।

[2]अनसूये जानासि किं निमित्तं शकुन्तला वनज्योत्स्नीमतिमात्रं पश्यतीति ।]

इत्यादिना ङीप् ' संज्ञापूर्वो विधिरनित्य ' इत्युक्त्या वृद्धयभावः । वनज्योत्स्नी वनस्य प्रकाशिकेत्यर्थः । नामैव नामधेयं ' भागरूपनाम्नो धेयः ' विस्मृताऽसि विस्मृतवत्यसि ' गत्यर्थाकर्मकश्लिषशीङ् स्थासवसजनरुहजीर्यतिभ्यश्च ' इति सूत्रे चकाराद्धवसितप्रतिपन्नादिष्वपि कर्तरि क्त इति वामनोक्त्या विस्मृतेति कर्तरि क्तः । जइ इति । यद्यात्मानं विस्मरिष्यामि तदानीमेनामपि विस्मृता स्यामिति विपरिणामेनान्वयः । ' तह जइ ' इति पाठे तथा यदि एनां विस्मृता स्यां चेत् तर्ह्यात्मानमपि विस्मरिष्यामीत्यर्थः । उभयमप्यसम्भवीति भावः । नवं कुसुममेव यौवनं यस्याः सा नवकुसुमा लता नवयौवना वधूरिव प्रथमसङ्गमोचितेत्यर्थः । बद्धपल्लवतया आरब्धकिसलयतया उपभोगे लतासंश्लेषरूपे क्षमशक्तः । समानयौवनयोर्विधूवरयोरिव सदृशः समागम इत्यर्थः । अत्र कुसुमशब्देन स्त्रीरजसः पल्लवशब्देन च शृङ्गारस्यावगमान्नवयौवनयोः विलासिनोर्व्यतिकरः प्रदर्शितः । ' कुसुमं स्त्रीरजोनेत्रौषधयोः फलपुष्पयोः ' इति, ' पल्लवः किसले बले । विटपे विस्तरेऽलक्तरागे शृङ्गारविक्रयो ' रिति चाभिधानात् । अत्र विशेषणसाम्यादप्रस्तुतवधूवरवृत्तान्तप्रतीतेस्समासोक्तिरलङ्कारः ।

अनसूया—[1]ण क्खु विभावेमि । कहेहि ।

प्रियंवदा—[2]जहवणजोसिणी अणुरूपेण पाअवेण सङ्गदा एव्वं णामअहं वि अत्तणो अणुरूवं वरं लहेअंत्ति ।

शकुन्तला—[3]एसो णूणं तुह अत्तगदो मणोरहो । (इति कलशमावर्जयति ।)

राजा—अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात् ?। अथ वा कृतं संदेहेन ।

---

[1]न खलु विभावयामि । कथय ।

[2]यथा वनज्योत्स्ना अनुरूपेण पादपेन संगता एवं नामाहमप्यात्मनोऽनुरूपं वरं लभेयेति ।

[3]एष नूनंतवात्मगतो मनोरथः ।

किं निमित्तं किमर्थमित्यर्थः । 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनं ' इत्युक्त्या प्रथमाप्रयोगः । विभावयामि जानामि । खल्विति जिज्ञासाव्यञ्जकं । 'खलु स्यद्वाक्यभूषायां जिज्ञासायां च,सान्त्वने । वीप्सामाननिषेधेषु पूरणे पादवाक्ययोः ' इति मेदिनी । अपि नामेति सम्भावनायां । अपि नाम लभेय किं प्राप्तिस्सम्भवेदित्यर्थः । आत्मगतः मनसि स्थितः । स्वविषय इति वा । स्वमनोरथ एव मदपदेशेन प्रकाश्यत इत्यर्थः । आवर्जयति अधोमुखीकरोति इदं क्रियाच्छलेनाकारगोपनार्थं । एष मनोरथः अनुरूपवराभिलाषः । दुःखेन लभ्यत इति दुर्लभः 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ' अस्यास्तुल्यरूपो वरो न सम्भवतीत्यर्थः । समानः वर्णः ब्राह्मणत्वादिजातिः यस्य तत् सवर्णं । 'समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु ' इत्यत्र समानस्येति योगविभागात् सपक्षसधर्मादिवत्सिद्धिः । सदृशार्थस्य सहशब्दस्य वा सदृशो वर्णोयस्येत्यस्वपदविग्रहे 'सहस्य सस्संज्ञाया ' मिति सभावः । सवर्णं न भवतीत्यसवर्णं क्षेत्रं पत्नी 'क्षेत्रं पत्नीशरीरयो ' रित्यमरः । तत्र सम्भवो जन्म यस्यास्सा । येन परिग्रहयोग्यौ स्यादिति भावः । कृतं साध्यं नास्तीत्यर्थः । 'गम्यमानापि क्रिया कारकविभक्तेः प्रयोजिका ' इति गम्यमानसाधनक्रियापेक्षया करणत्वात्संदेहेनेति तृतीया ।

असंशयं क्षत्त्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तः करणप्रवृत्तयः ॥ २० ॥

तथापि तत्त्वत एनामुपलप्स्ये ।

असंशयमिति । असंशयं निःसन्देहं यथा तथा । क्षतात् त्रायत इति क्षत्रः । पृषोदरादित्वात् साधुः । तस्य कर्तुः परिग्रहक्षमा विवाहयोग्या भवति । यद्यस्मात् कारणात् आर्यं पापपराङ्मुखं 'कर्तव्यमाचरन् काममकर्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स तु आर्य इति स्मृतः' इति हि वसिष्ठः । मे मनः अस्यां शकुन्तलायां अभिलाषि सानुरागं । नन्वकृत्यवर्जनादार्यत्वं न पुनरार्यकृतत्वात् कर्मणां कृत्यत्वं अत आह—सतामिति । सतां साधूनां सन्देहपदेषु हानोपादानसंशयविषयेषु । वस्तुषु अर्थेषु अन्तः करणप्रवृत्तयः मनसः स्वरसगतयः । प्रमीयते अनेनेति प्रमाणम् निश्चयसाधनं हि । 'प्रत्यक्षानुमानशब्दाः प्रमाणम्' 'जात्याकृतिव्यक्तयः पदार्थः' इत्यादिवत् संख्याविशेषस्याविवक्षणाद्वौत्सर्गिकमेकवचनं । अयमात्मतुष्टिर्नाम प्रमाणालङ्कारः । अस्यालङ्कारस्यायमेव च श्लोकः कुवलयानन्देऽप्युदाहृतः । केचिदत्रात्मप्रशंसादोषमसहमाना व्याचक्षते । यदार्यमित्यत्र यदा आर्यमिति पदच्छेदः । यदा असंशयं क्षत्रपरिग्रहक्षमा शकुन्तला भवति । यत्तदोर्नित्यसम्बन्धात्तदेत्याक्षिप्यते । तदानीमेव अस्यामभिलाषि मे मनः आर्यं स्यात् । अन्यथा अनार्यमेव स्यादित्यर्थः । नन्वास्ति मनः प्रवृत्तिः प्रमाणमिति चेदाह—सतामिति । सन्देहपदेषु वस्तुष्वन्तः करणप्रवृत्तयः सतां हि प्रमाणम् । न तु मादृशानामित्यर्थ इति । अत्र यदा आर्यमिति क्लिष्टः पदच्छेदः । अथवा कृतं सन्देहेनेति प्रक्रमविरोधश्च । न च व्यतिरेकनिश्चयार्थमयमारम्भ इति स्वारसिकं । कुवलयानन्दविरोधश्च । नचात्मनैवात्मरूपावधारणमात्मस्तुतिर्भवतीति न किंचिदेतत् । **वंशस्थं वृत्तम्** ॥

तत्त्वतः कथमियं कण्वदुहितेति परमार्थतः । ससम्भ्रमं ससाध्वसं । 'सम्भ्रमस्साध्वसेऽपि स्यात् संवेगादरयोरपि' इति हैमः । मधुकरोतीति मधुकरः । 'कृञो हेतुताच्छील्यानुलोम्येषु' इति ताच्छील्येटः । अभिवर्तते अभिमुखमागच्छति ।

शकुन्तला— (ससंभ्रमम् ।) [1]अम्हो । सलिलसेअणसंभंतो णोमालिअं उज्झिआ वअणं मे महुआरो अहिवट्टइ । (भ्रमरबाधां निरूपयति ।)

राजा—(विलोक्य-सस्पृहम्) । (साधुबाधनमप्यस्याः ।

यतो यतः षट्चरणोऽभिवर्तते
ततस्ततः प्रेरितलोललोचना ।
विनर्तीतभ्रूरियमद्य शिक्षते
भयादकामापि हि दृष्टिविभ्रमम् ॥ सासूयमिव ।)

---

[1]अहो । सलिलसेचनसंभ्रान्तो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते ।

'लक्षणेनाभिप्रती आभिमुख्ये' इत्यभेः कर्मप्रवचनीयत्वा द्वदनमिति द्वितीया । साधु बाधनमित्यादि सासूयमित्यन्तं प्रश्निसमपिण्याख्यायते । बाधनं भ्रमरपीडनमपि साधु मनोज्ञम् ।

यत इति । षट्चरणः भ्रमरः यतो यतः अभिवर्तते ततस्ततः तत्र तत्र प्रेरितलोललोचना व्यापारितचञ्चलनयना विनर्तितभ्रूः इयमकामापि आरण्यकत्वादजानत्यपि भयादेवोपदेष्टुः सकाशात् । 'आख्यातोपदेशे' इत्यपादानत्वात् पञ्चमी । भयाद्धेतोर्वा दृष्टिविभ्रमं शिक्षते परिचिनोति नैसर्गिकी चेष्टैव विलासा दप्यतिरिच्यत इति भावः । सासूयमिव भ्रमरे शकुन्तलासङ्गिनि सेर्ष्यमिव । अत्र त्वं खलु कृतीत्यनेन स्पृहाया एव व्यञ्जनात् सस्पृहमिति पूर्ववाक्यस्यैव सम्बन्धो युज्यते न तु सासूयमित्यस्य । किंच यतो यत इत्यादिश्लोके स्पृहा व्यञ्जनं न दृश्यते । येन सस्पृहमित्यस्य तत्र सम्बन्धो भवेत् ततश्च ज्ञायते प्रश्निसमेतावदिति । वंशस्थं वृत्तम् ।

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।

चलापाङ्गामिति । हे मधुकर चलापांगां कातरतरललोचनान्तां अतएव वेपथुमतीं सकम्पां दृष्टिं बहुशः अनेकवारं स्पृशसि परामृशसि । रहसि भवं रहस्यं दिगादित्वाद्यत् तदाख्यातुं शीलं अस्येति रहस्याख्यायीव 'सुप्यजातौ णिनिस्ताच्छील्ये' कर्णान्तिकचरः श्रवणसमीपचारी सन् मृदु स्वनसि । कर्णविवरान्तःस्वनस्य बहिःप्रसरान्मृदुत्वं । कथं व्याधून्वत्याः त्वदपनोदनार्थं विक्षिपन्त्यास्तत्याः, रतेः सर्वस्वभूतं अधरं पिबसि । अधरदानं हि स्त्रीणां विस्रंभातिशयलक्षणं येन रतिर्महती भूमिमारोहतीत्युक्तं रतिसर्वस्वमिति । अतएवोक्तमन्यत्रापि कविना 'अपरिक्षतकोमलस्य यावत् कुसुमस्येव नवस्य षट्पदेन । अधरस्य पिपासता मया ते सदयं सुन्दरि गृह्यते रसोऽस्य' इति । इहापि वक्ष्यते 'मुहुरंगुलिसंवृताधरोष्ठं' मित्यादि । 'सीत्कारं शिक्षयति क्षणत्यधरं तनोति रोमाञ्चं । नागरिकः किं मिलितो नहि सखि हैमनः पवनः' 'सन्दष्टाधरपल्लवा सचकितं हस्ताम्रमाधून्वती मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता । सीत्काराञ्चितलोचना सपुलकं यैरंचिता मानिनी प्राप्तैस्तैरमृतं श्रमाय मथितैः मृदैस्सुरैः सागरः' इत्यादितो नागरिकतेरधरपानप्राणत्वं स्फुटं । वयं तत्त्वान्वेषात् क्षत्रपरिग्रहयोग्यकुलविशेषादिपरमार्थान्वेषणाद्धेतोः हताः नष्टस्वार्था अभूम । त्वं खलु अविचार्य स्वैरप्रवृत्तस्त्वमेव कृती धन्यः । कृत्याकृत्यविचारः कार्यहानये वरमविमृश्यकारित्वमिति भावः । अत्र दृष्टिं स्पृशसीत्यनेन मधुकरस्य कुवलयभ्रमः, चलपाङ्गामिति विशेषणेन कर्णान्तविश्रान्ततया कर्णावतंसतावुद्धिश्च भ्रमदार्ढ्यहेतुः प्रतीयते । येन तत्रैव स्वनसि । अधरं पिबसीत्यनेन अरविन्दजपाकुसुमादिभ्रमोऽभिव्यज्यते इति वस्तुना भ्रान्तिमदलंकारध्वनिः । ग्राम्यमिसमाधित्र विवक्षितः । स खलु प्रथमानुरागे साध्वसाद्दिक्षु विक्षिप्तां सात्त्विकवेपथुमतीं च दृष्टिं पश्चादुपलभ्याच्छादयितुं स्पृशति । तथा 'अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनं । वीक्षितेन परिगृह्य पार्वती मूर्धकम्पमयमुत्तरं ददौ' इत्युक्तरीत्या रहस्यमवेक्षितमपि व्याजीकृत्य कपोलमूलस्पर्शलोभाद्यत्किंचिदेव कर्णान्तिके रणति । ससीत्काव्याधूतहस्तायाश्चाधरमपि रतिसर्वस्वभूतमन्तः पिबति । तथा त्वमपि सर्वमेव नागरिकग्रामिभोगं भुक्तवानसि केवलं शास्त्रविचारपरतन्त्रतया वयं विप्रलब्धाः स्म इति । अत्र भ्रमरस्वनस्य रहस्याख्यानत्वेनाध्यवसानात् उत्प्रेक्षा । प्रस्तुतभ्रमरवृत्तान्तेन विशेषणसामा-

करौ व्याधून्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥ २१ ॥

शकुन्तला—[1]हला परित्ताअह परित्ताअह इमिणा दुव्विणीदेण महुअरेण अहिहूअमानं मं ।

---

[1]हला परित्रायेथां परित्रायेथामनेनदुर्विनीतेन मधुकरेण अभिभूयमानां माम् ।

न्यादप्रस्तुतकामिचरितप्रतीतेश्च समासोक्तिः । तत्त्वान्वेषस्य गुणस्य दोषत्वकल्पनाश्लेशालङ्कारश्च 'लेशस्तु दोषगुणयोर्गुणदोषत्वकल्पनमि'ति हि तल्लक्षणम् । ते चात्र संसृज्यन्ते । तदुपस्कृतया च भ्रमरस्वभावोक्त्या परिपुष्यमाणो रसोऽङ्गी ध्वन्यते । ध्वनिकृद्भिः 'रसवन्मेष्वत्यादृतमनाः कविर्यमलङ्कारं तदङ्गतया विवक्षति' इत्यारभ्य इममेव श्लोकमुदाहृत्य 'अत्र हि भ्रमरस्वभावोक्तिरलङ्कारो रसानुगुण' इत्युपन्यस्तं । अयं श्लोकः भट्टाभिनवगुप्तपादैर्व्याख्यातः । यथा 'हे मधुकर वयमेव विधाभिलाषबद्धश्रवणा अपि तत्त्वान्वेषाद्वस्तुवृत्तेऽन्विष्यमाणे हताः अत्यासन्नपात्रीभूता जाताः । त्वं खलिति निपातनायत्नसिद्धं तवैव चरितार्थत्वमिति शकुन्तलां प्रत्यभिलाषिणो दुष्यन्तस्येयमुक्तिः । तथाहि कथमेतदीयकटाक्षगोचरा भूयास्म, कथमेतास्मदभिप्रायव्यञ्जकं रहोवचनमाकर्ण्यात् । कथं नु हठादनिच्छन्त्या अपि परिचुम्बनं विधेयास्मिति यदस्मकं मनोराज्यपदवीमधिशेते तत्तवायत्नसिद्धं । भ्रमरोहि नीलोत्पलधिया तदाशङ्काकातरां दृष्टिं पुनः पुनः स्पृशति । श्रवणावकाशपर्यन्तत्वाच्च नेत्रयोरुत्पलशङ्कानपगमात्तत्रैव ध्वन्यमान आस्ते । सहजसौकुमार्यत्रासकातरायाश्च रतिनिधानभूतं विकसितारविन्दकुवलयामोदमधुरमधरं पिबति' इति । चलापाङ्गं दृष्टइति पाठे चलापाङ्गं यथा तथा दृष्टःसन् वेपथुमतीं शकुन्तलां स्पृशसीति व्याख्येयम् । शिखरिणी वृत्तम् ॥

सस्मितं कथं हस्तापनोद्याद्भ्रमरात् परित्राणान्वेषणमिति नर्मगर्भमित्यर्थः । के न केचिदपीति प्रतिषेधे किंशब्दः । उभे मिलित्वापि परित्रातुमसमर्थे इत्यर्थः । दुष्यन्तं राजानं आक्रन्द आह्वय । क्रदि आह्वाने रोदने चे ति धातुः । अत्र हि सेनाशस्त्रादिमता-

उभे— (सस्मितम्) [1]का वा परित्रातुं। दुष्यन्तमाक्रन्द। राजरक्षितानि तपोवनानि नाम।

राजा—अवसरोऽयमात्मानं दर्शयितुम्। कः कोत्र भोः (इत्यर्धोक्ते विचार्य) राजभावत्वभिज्ञातो भवेत्। भवतु। एवमभिधास्ये।

शकुन्तला—[2]ण एसो दुट्ठो विरमदि ण्हा अण्णदो गमिस्सं। (उपदान्तं स्थित्वा। सदृष्टिक्षेपम्।) अकहं इदो वि मं कणुसरदि।

राजा—(सत्वरमुपसृत्य।)।

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥ २२ ॥

---

[1]के आवां परित्रातुम्। दुष्यन्तमाक्रन्द। राजरक्षितानि तपोवनानि नाम।

[2]नैष दुष्टो विरमति। तस्मादन्यतो गमिष्यामि। कथमितोऽपि मामनुसरति'

राज्ञा भवितव्यमिति भावः। तपोवनानि राजरक्षितानि नामेति प्रसिद्धौ। आत्मानं दर्शयितुमप्रता भवितुमित्यर्थः। कः क इति त्वरातिशयात् द्विर्वचनम्। विचार्य विचिन्त्य। विरमतीति। 'व्याङ्परिभ्यो रम' इति परस्मैपदं। अपदान्तर इति। न विद्यते पदस्यान्यस्य अन्तरमवकाशो यस्मिन् तस्मिन् पूर्वपदन्यासाव्यवहितपदन्यास इत्यर्थः। 'संसक्तं त्वव्यवहितमपदान्तरमित्यपि' इत्यमरः। पदान्तर इति पाठे अन्यस्मिन् पदन्यासे इत्यर्थः। सदृष्टिक्षेपं भ्रमरमार्गे दृष्टिं प्रसार्य। पदन्यासमात्रेण मधुकरनिवृत्तिसम्भावनं मौग्ध्यात्।

क इति। दुष्टं विनीताः शिक्षिताः दुर्विनीतास्तेषां अपथप्रवृत्तानां शासितरि शमयितरि पौरवे दुष्यन्ते वसुमती शासति रक्षति सति, कोऽयं मुग्धासु बालिकासु तपस्विकन्यासु प्रशान्तास्त्वित्यर्थः। अविनयं बलादास्कन्दनरूपं दुराचरितं आचरति।

सर्वा राजानं दृष्ट्वा किंचिदिव संभ्रान्ताः ।

अनसूया—[1]अज्ज ण किं विं अच्चाहिदं । इअं णो पिअसही महुअरेण आउलीकिअमाणा कादरीभूदा । (इति शकुन्तलां दर्शयति ।)

राजा—(शकुन्तलामभिमुखो भूत्वा) **भवति अपि तपो वर्धते ?** ।

(शकुन्तला साध्वसावनतमुखी तिष्ठति ।

अनसूया—[2]दाणिं अदिहिविसेसलाहेण । साअदं अज्जस्स । हलासउन्दले गच्छ उडअं । फलमिस्सं अग्घं उवहर । इदं दाव पादोदअं भविस्सदि ।

राजा—भवतीनां सूनृतयैव गिरा कृतमातिथ्यम् ।

---

[1]आर्ये न किमप्यत्याहितम् । इयं नौ प्रियसखी मधुकरेणा कुलीक्रियमाणा कातरीभूता ।

[2]इदानीमतिथिविशेषलाभेन । स्वागतमार्यस्य ? हला शकुन्तले गच्छोटजम् । फलमिश्रमर्घमुपहर । इदं तावत् पादोदकं भविष्यति।

तपस्विकन्यास्त्वित्यनेन 'तपःप्रभावभयसूचकं ददात्यारण्यको जनः' इति वक्ष्यमाणं सविशेषपालनीयत्वं व्यज्यते। अत्र पौरव इति परोक्षनिर्देशनं राजभावगोपनार्थं। **आर्या वृत्तम् ॥**

सम्भ्रान्ताः महापुरुषदर्शनादनिभृताः । सौम्यदर्शनत्वात्किंचिदिवेति । अत्याहित महती भीतिः । 'अत्याहितं महाभीतिः कर्म जीवानपेक्षि च' इत्यमरः । इयमिति शकुन्तलानिर्देशः । दर्शयति अंगुल्या निर्दिशति । अपीति प्रश्ने । तपोधनत्वात्तपसि कुशलानुयोगः । साध्वसेन त्रासापरनाम्ना व्यभिचारिभावेन 'गर्जितादेर्भनः श्वोभस्त्रास' इति दशरूपके । अवनतं मुखं यस्यास्सा । प्रथमदर्शन एव चक्षुःप्रीत्युदयो गम्यते । साध्वसादवचनेति पाठान्तरं । अतिथिविशेषस्य विशिष्टातिथेः लाभेन । तपो वर्धत इति प्रश्नस्थेन सम्बन्धः । अतिथिनामाराधनं प्रथमं तपः तच्चेदृशप्रकृष्टातिथिलाभेनाभिवृद्धमित्यर्थः । राजभावपरिज्ञानादार्यव्यपदेशः शोभनमागतं आगमनं स्वागतं । अर्घायेद-

प्रियंवदा—[1]तेण हि इमस्सि पच्छाअसीअलाए सत्तवण्णवेदि-एआवविसिअ परिस्समविणोदं करेदु अज्जो ।

राजा—ननु यूयमप्यनेन कर्मणा परिश्रान्ताः ।

अनसूया—[2]हला सउन्दले उइदं णो पज्जुवासणं अदिहीणं । ता एत्थ उवविसम्ह । (सर्वे यथोचितमुपविशन्ति ।)

शकुन्तला—(सविमर्शमात्मगतम्) [3]किं णु क्खु इमं पेक्खिअ अनवो वणविरोहिणो विआरस्स गमणीअम्हि संवुत्ता ।

राजा—(सर्वा विलोक्य ।) अहो समवयोरूपरमणीयं सौहार्दं भवतीनाम् ।

[1]तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायामुपविश्य परिश्रमविनोदं करोत्वार्यः ।

[2]हला शकुन्तले उचितं नः पर्युपासनमतिथीनाम् । तदत्रोपविशामः ।

[3]किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता ।

दमर्घ्यं 'पादावर्घ्यौ चेति यत्' । इदं तावत् सेचनकल्पशस्यं तु । अर्घ्यायेयान्यमित्यर्थः । गुरुनियोगात् प्राधान्याच्च शकुन्तलानियोजनं । सधु नृत्यन्त्यनयेति सूनृता 'हलश्च' इति घञ् । संज्ञापूर्वस्य विधेरनित्यत्वादगुणः । 'अन्येषामपि दृश्यत' इति दीर्घश्च । तया सत्यप्रियया 'वाक् चक्षुर्मनश्च सूनृता' इति मनुः । अतिथय इदं आतिथ्यं 'अतिथेर्ण्यः' 'क्रमादतिथ्यातिथेये अतिथ्यर्थेत्र साधुनि' इत्यमरः । प्रभूता छाया यस्यां तस्यां अत एव शीतलायां 'खञ्जकुञ्जादिवत् समासः' । सप्तपर्णस्य वेदिकायां अधस्तान्निर्मितभूमौ परिश्रमस्य विनोदनमपनयनं । यूयमपि । न केवलमहमित्यर्थः । अनेन वृक्षसेचनरूपेण । परिश्रान्ताः अत उपविशतेत्यर्थः । पर्युपासनं सेवनं । तपोवनविरोधिनो

प्रियंवदा—जनान्तिकम्।) [1]अणसूए को णु क्खु एसो चदुरग-म्भीराकिदी महुरं पिअं आलवन्तो पहवस्तो विअ दीसइ।

अनसूया—(जनान्तिकं।) [2]सहि मम वि अत्थि कोदूहलं। पुच्छिस्सं दाव णं (प्रकाशम्।) अज्जास्स महुरालावजणिदो वीसासो मं मन्तावेदि। कदमो अज्जेण राएसिवंसो अलंकरीअदि। कदमो वाविरहपज्जूसुअजणो किदो देसो। किं णिमित्तं वा सुउमारो वि तवोवणपरिस्समस्स अत्ता पत्तदं उवणीदो।

---

[1]अनसूये कोनु खल्वेष चतुरगम्भीराकृतिर्मधुरं प्रियमालपन्प्रभवन्निव दृश्यते?।

[2]सखि ममाप्यस्ति कौतूहलम्। प्रक्ष्यामि तावदेनम्। आर्यस्य मधुरालापजनितो विश्वासो मां मन्त्रयते। कतम आर्येण राजर्षिवंशोऽलंक्रियते। कतमो वा विरहपर्युत्सुकजनः कृतो देशः। किं निमित्तं वा सुकुमारोऽपि तपोवनपरिश्रमस्यात्मा पात्रतामुपनीतः।

विकारस्य मन्मथविकारस्य। गमनीया प्राप्या। अत्र दर्शनमात्रेण निर्विकारस्यापि विकारोदयाद्राज्ञो रम्यताविशेषो व्यज्यते। सुहृदां भावस्सौहार्दं 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धिः। समाभ्यां परस्परसदृशाभ्यां वयोरूपाभ्यां रमणीयं वयोरूपग्रहणादनुरागो व्यज्यते। रूपसाम्यं चात्र वयवन्यूनातिरेकाभावरूपं सामान्याकारग्रमणीयकं। तेन शकुन्तलाया विलक्षणसौन्दर्यत्वाविरोधः। **जनान्तिकमिति**। 'त्रिपताकाकारेणान्यानपवार्यान्तरा कथां। अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्' इति दशरूपके। जनानामन्ते समीपे भवमिति व्युत्पत्तिः। चतुरा गंभीरा च आकृतिराकारः अभिप्राय इत्यर्थः यस्य सः, अवसरोचितवेदित्वाच्चतुरत्वं, गूढाकारतया गांभीर्यं च। मधुरं सुशब्दतया श्रोत्रहृद्यं, प्रियं रुचिरार्थतया चित्ताकर्षकं च आलपन् भाषमाणः। प्रभवन् प्रभुरिव राजेवेत्यर्थः। अन्यस्यैवं गांभीर्यं माधुर्यंच नोपपद्यत इतिभावः, कौतूहलं जिज्ञासा। मधुरालापेन सरसवचनेन जनितः विश्वासः विस्रम्भः मां मन्त्रयते

शकुन्तला— (आत्मगतम्।) [1]हिअह मा उत्तम्म। एसा तुए चिन्तिदं अनसूया मन्तेदि।

राजा— (आत्मगतम्। कथमिदानीमात्मानं निवेदयामि कथं वात्मापहारं करोमि भवतु। एवं तावदेनां वक्ष्ये। (प्रकाशम्) भवति यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमाश्रमिणामविघ्नक्रियोपलम्भाय धर्मारण्यमायातः।

अनसूया—[2]सणाहा दाणिं धम्मआरिणो।

(शकुन्तला भ्रूभङ्गलज्जां नाटयति।)

---

[1]हृदय मोत्ताम्य। एषा त्वया चिन्तितमनसूया मन्त्रयते।

[2]सनाथा इदानीं धर्मचारिणः।

आलापयति चुरादेर्हेतुमण्णिच्। अन्यथाऽस्मादृशजनस्य वागवसरो न भवतीत्यर्थः। कतमः बहूनां मध्ये कः, 'वा बहूनां जातिपरिप्रश्न' इति डतमच् 'जातिपरिप्रश्न' इति च प्रत्याख्यातमाकरे। अलंकृत इति—कुलालङ्करणं च निर्दिष्टासीति भावः। विग्रहेण प्रोषितस्य तव वियोगेन पर्युत्सुकाः दर्शनोत्कण्ठिताः जनाः यस्मिन् सः। कृत इति 'तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गं। नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनां' इति न्यायेन सकृत्पश्यतामपि चित्तहरस्य चिरविरहे पादोपजीविनां किमुत इति भावः। किं निमित्तं वेति वाक्यार्थे। आत्मा शरीरं तपोवनपरिश्रमस्य फलमूलाशनपादचारादेः पात्रतां विषयतां नीतः प्रापितः एवमन्वयो देशस्तपोवनप्रवेशप्रयोजनं चेति त्रितयं पृष्टं। **मा उत्ताम्येति**। नञर्थे मेत्यव्ययं, ननु माङ् अतो न लुङ्। चिन्तितं जिज्ञासितं। मन्त्रयते पृच्छति। इदानीं प्रश्नानन्तरं। कथमित्यादि-आत्मनिवेदने सम्भ्रमाद्विस्रब्धालापविच्छेदः - अन्यथाकरणे चात्मापहारो दोष इत्यर्थः। धर्माधिकारे वर्णाश्रमधर्मप्रत्यवेक्षणव्यापारे नियुक्तः नियमितः राजपुरुषत्वप्रतीत्या न विस्रम्भविच्छेदः। पौरवेण राज्ञा स्वपितृधर्माधिकारे नियुक्तः अभिषिक्त इति च वस्तुवृत्त्या नात्मा बोध्यं। पुरुवंश उक्तः, देशोपि तत एवोक्तकल्पः, तृतीयमुत्तरयति। **सोहमिति।**

सख्यौ— (उभयोरपकारं विदित्वा । जनान्तिकम् ।) [1]हला सउन्दले जइ अज तादो हवे ।

शकुन्तला—(सरोषम् ।) [2]तदो किं भवे ? ।

सख्यौ—[3]इमं जीविदसव्वस्सेण वि अदिहिविसेसं किदत्थीकरिस्सदि ।

शकुन्तला—[4]हला अवेमि । किं वि हिअए करिअ मंतेध । ण वो वअणं सुणिस्सं ।

राजा—वयमपि तावद्भवत्योः सखीगतं किंचित्पृच्छामः ।

---

[1]हला शकुन्तले यद्यद्यतातः संनिहितो भवेत् ? ।

[2]ततः किं भवेत् ।

[3]इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थीकरिष्यति ।

[4]हला अवैमि । किमपि हृदये कृत्वा मन्त्रयेथे । न वां वचनं श्रोष्यामि ।

अविज्ञानां क्रियाणां यज्ञादिकर्मणामुपलम्भाय साक्षात्करणार्थं । धर्मस्यारण्यमिति तादर्थ्यषष्ठीसमासः तपोवनमित्यर्थः । इदानीं आगते त्वयि, धर्मचारिणि इति-स्वयम्प्राप्ते परतन्त्रा इति भावः । **सनाथा इति** । अन्यथा प्रतिकूलमनाश्वगः प्रत्यूहप्रतिहता अनाथाः स्युरिति भावः । शृङ्गारलज्जां रतिस्वभावदृश्यानुरागस्य सम्बन्धिनीं व्यभिचारिभावरूपां लज्जां । अभिनयति मुखनमनाश्लिष्टिलिखनादिभिर्दर्शयति । आकारं इङ्गितं 'आकाराविङ्गिताकृती' इत्यमरः । ततः तातसन्निधानं । किं भवेत् किमपराद्धं मया यत्तातो न मृष्येदिति भावः । अतिथिविशेषं विशिष्टमतिथिं । जीवितसर्वस्वेन स्वजीवनार्थेन सर्वेणापि द्रव्येण कृतः अर्थः आतिथ्यरूपं प्रयोजनं यस्य तं करिष्यति, विशिष्टातिथिदर्शने जीवितमपि नगणयन्ति शिष्टा इति भावः । जीवितभूतेन सर्वस्वेन त्वयैव दत्तया कृतार्थीकरिष्यतीत्यपि व्यज्यते । तदिदमभिसन्धायाह - किमपीति । **वयमपीति** । यथा यूयमस्मद्विषयं पृष्टवत्यस्तथेत्यपिशब्दार्थः । सखीं गतं प्राप्तं सखी-

सख्यौ—[1]अणुग्गहो खु अब्भत्थणा ।

राजा—भगवान्काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयं च वां सखी तदात्मजेति कथमेतत् ? ।

अनसूया—[2]सुणादु अज्जो । अत्थि कोसिओत्ति किदगोत्तणामहेओ अहप्पहावो राएसी ।

राजा—अस्ति श्रूयते ।

अनसूया—[3]तं णो पिअसहीए पहवं अवगच्छ । तेण उज्झिआए सरीरसंवड्ढणादिहिं तादकस्सवो से पिदा ।

राजा—उज्झितशब्देन जनितं मे कौतूहलम् । आ मूलाच्छ्रोतुमिच्छामि ।

---

[1]अनुग्रहः खल्वभ्यर्थना ।

[2]शृणोत्वार्यः । अस्ति कौशिक इति कृतगोत्रनामधेयो महाप्रभावो राजर्षिः ।

[3]तं नौ प्रियसख्याः प्रभवमवगच्छ । तेन उज्झितायाः शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता ।

विषयमिति यावत् । अभ्यर्थना प्रश्नः अनुग्रहः खलु अतः प्रष्टव्यमित्यर्थः । अथ वा अभ्यर्थनं इत्यभ्यर्थना । कुशलप्रश्नाद्यनुग्रहः प्रार्थनीयः खल्वित्यर्थः । राज्ञः शकुन्तलाविषया प्रार्थनानुग्रहरूपेत्यपि प्रतीयते । भगवान् असंकुचितज्ञानः "उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिं । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति" इत्युक्तलक्षणः । शाश्वते नित्ये । ब्रह्मणि ब्रह्मचर्ये ब्रह्मशब्द उपचाराद्वेदग्रहणार्थे व्रते ब्रह्मचर्यरूपे वर्तते । प्रकाशः प्रसिद्धः । तदात्मनाकाश्यपतनयेत्येतत् कथं । कृतं गोत्रप्रयुक्तं नामधेयं यस्य सः । कुशगोत्रेत्यर्थः । महान् प्रभावः स्वर्गोत्सर्गादिरूपो यस्यसः । अस्ति श्रूयते 'प्रकाशं श्रूयते 'असदीक्षा' इति भौवादिकात् क्तिचि आस्तीति तिङ-

अनसूया—[1]सुणादु अज्जो । पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किं वि जादसङ्केहिं देवेहिं मेणआ णाम अच्छरा णिअमविग्घकारिणी पेसिदा ।

राजा—अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् । ततस्ततः ।

अनसूया—[2]तदो वसंदोदारसमए ताए उम्मादइत्तअं रूपं पेक्खिअ (इत्यर्धोक्ते लज्जया विरमति)

राजा—परस्तादवगम्यत एव । सर्वथाप्सरः संभवैषा ।

अनसूया—[3]अह इं ।

राजा—उपपद्यते ।

---

[1]शृणोत्वार्यः । पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जात शङ्कैर्देवैर्मेनका नामाप्सरा नियमविघ्नकारिणी प्रेषिता ।

[2]ततो वसन्तावतारसमये तस्या उन्मादयितृ रूपं प्रेक्ष्य ।

[3]अथ किम् ।

न्तप्रतिरूपकमव्ययं 'अस्त्याह कालसामान्ये तिङन्तप्रतिरूपकौ' इति विकाण्डशेषः। प्रभवत्यस्मादिति प्रभवस्तं पितरमित्यर्थः। तेन कौशिकेन उज्झितायास्त्यक्तायास्तस्याः। कौतूहलं जिज्ञासा अपत्यत्यागकारणं जिज्ञास्यत इत्यर्थः। काश्यपसंवर्धनोक्त्या माता-पितृभ्यामुभाभ्यामप्युज्झितत्वं व्यज्यते तत्र च बलवता हेतुना भाव्यमिति भावः। **किलेत्यैतिह्ये** । किमपि कृतो वा हेतोः जातशङ्कैरुत्पन्नभयैः । किमपीत्यनेन तस्य देवपदानिच्छया शङ्कानिमित्ताभावस्सूचितः । **अप्सरा इति** । 'स्त्रियां बहुष्वप्सरस' इत्यमरः प्रायोवादेन 'अनचि चे' ति सूत्रे 'अप्सरा' इति भाष्यप्रयोगात्। अत एव 'स्त्रियां बहुष्वप्सरा अपि' इति शब्दार्णवः। अन्यसमाधिभीरुत्वमिति अन्तरेणापि निमित्तमिति भावः । वसन्तावतारसमये वसन्तप्रादुर्भावकाले उन्मादयितृ चित्तविभ्रमकरं। अवगम्यते अनुक्तमपि ज्ञायत एव । मेनकासङ्कः,

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥२३॥

शकुन्तलाधोमुखी तिष्ठति ।

राजा—(आत्मगतम् ।) लब्धावकाशो मे मनोरथः । किं तु सख्या परिहासोदाहृतां वरप्रार्थनामस्याः श्रुत्वा धृतद्वैधीभावकातरं मे मनः ।

प्रियंवदा—(सस्मितम् । शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा ।) [1]पुणो वि वत्तुकामो विअ अज्जो ।

(शकुन्तला सखीमङ्गुल्या तर्जयति ।)

---

[1]पुनरपि वक्तुकाम इवार्यः ।

अपत्यजन्म, तपोव्ययनिर्विण्णेन पित्रा, शापभीतया च मात्रा परित्यागः, आनृशंस्याच्च काश्यपेन संवर्धनमित्येतावदभ्यूह्यत इत्यर्थः । सर्वथा नियतं अप्सरास्सम्भवो यस्यास्सा राजर्षिसम्भवत्वात्परिग्रहार्हत्वं हृदयस्थितं ।

मानुषीष्विति । कथं वा मानुषीषु अस्य लोकोत्तरस्येत्यर्थः । रूपस्य 'आवेष्यारोप्यविज्ञेयसन्धनीयैरभूषितं । यद्भूषितवदाभाति तद्रूपमिति कथ्यते' इत्युक्तलक्षणस्य, सम्भवस्सम्भावना स्यात् । अमानुषं रूपं न मानुषीषु सम्भवतीति भावः । प्रभया तरलं ज्योतिर्विद्युत् तेजः वसुधातलान्नोदेति 'जातेरस्त्रीविषयादयोपधा' दिति ङीषि 'योपधप्रतिषेधे हयगवयमकयमनुष्यमत्स्यानामप्रतिषेध' इति वाच्याच्च मनुष्यशब्दग्रहणे 'हलस्तद्धितस्ये'ति च यकारलोपे मानुषीशब्दसिद्धिः ॥ **वसन्ततिलकम्** वृत्तम् ।

मनोरथः शकुन्तलाभिलाषः । लब्धावकाशः प्राप्तावसरः क्षत्रपरिग्रहयोग्यत्वादिति भावः । परिहासेनोदाहृतामुक्तां 'जह वणजोसिणी अत्तणो अणुरूवेण पाअवेण संगदा एव्वेणाम अहंवि अत्तणो अणुरूवं वरं लहेअहंति' इत्युक्तरूपामित्यर्थः । द्वैधमित्यव्ययं द्विधेत्यर्थे 'द्वित्र्योश्च धमुञ्' द्वैधमेव द्वैधं । 'धमुञन्तात्स्वार्थे उदर्शन'

राजा—सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरित्रश्रवणलोभादन्यदपि प्रष्टव्यम्।

प्रियंवदा—[1]अलं विआरिअ। अणिअन्तणाणुओओ तवस्सिणओ णाम।

राजा—सखीं ते ज्ञातुमिच्छामि।

वैखानसं किमनया व्रतमा प्रदाना-
द्व्यापाररोधि मदनस्य निषेवितव्यम्?।
अत्यन्तमेव मदिरेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः? ॥२४॥

---

[1]अलं विचार्य। अनियन्त्रणानुयोगस्तपस्विजनो नाम।

मिति डप्रत्यये नपुंसको द्वैधशब्दः ततश्च द्वैधस्य द्वैधस्य भावो द्वैधीभावः संशयः। धृतद्वैधीभावं कातरमलाभभीतं चेत्यर्थः। श्रुत्वा स्थितस्येति शेषः, तेन न समानकर्तृकत्वविरोधः। वैरप्रार्थनामात्रस्य मनोरथानुकूलत्वेपि परिहासोक्त्या विसंवादशंकयत इति भावः। सस्मितमिति। शकुन्तलाभावज्ञानादिति भावः। तर्जयतीति-स्वविषयप्रस्तावकोपादिति भावः। शृङ्गारचेष्टाप्युक्ता भवति। सच्चरित्रश्रवणलोभादिति अनुरागाकारगोपनार्थं। अलं विचार्य न चिन्तयितव्यमित्यर्थः 'अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा' 'समासेऽनञ् पूर्वे क्त्वो ल्यप्' अविद्यमाना नियन्त्रणा प्रतिबन्धो यस्य तथाविधोऽनुयोगो यस्य सः, तपस्विनां गोपनीयाभावात् प्रष्टुं न विचारणीयमित्यर्थः।

वैखानसमिति। अनया शकुन्तलया वैखानसं व्रतं वानप्रस्थधर्मः फलमूलाशनतपश्चरणादिः किमाप्रदानादा विवाहान्निषेवितव्यं। आहो अथ वा अत्यन्तं यावज्जीवमेव मदिरासदृशानीक्षणानीति विबाधरादिवन्मध्यमपदलोपी समासः, मदावहानीत्यर्थः। तैरेव हेतुभिर्वल्लभाभिः स्निग्धाभिः हरिणाङ्गनाभिस्समं निवत्स्यति। वैखानसव्रतस्य किं प्रदानमवधिरुत जीवितमेवेत्यर्थः। किं मुनिपुत्रायैव दातव्येति नियमः उत यथासंभवमिति विकल्पाभिप्रायः। द्वैधीभावविवरणमेतत्। अन्ये तु अत्यन्तमेवेत्यनन्तरं

प्रियंवदा—[1]अज्ज धम्माचरणे वि परवसो अअं जणो। गुरुणो उण से अणुरूववरप्पदाणे संकप्पो।

राजा—(आत्मगतम्।) न खलु दुरवापेयं प्रार्थना।

भव हृदय साभिलाषं संप्रति सन्देहनिर्णयो जातः।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥२५॥

शकुन्तला—(सरोषमिव।) [2]अणसूए अहं गमिस्सं।

---

[1]आर्य धर्माचरणेऽपि परवशोऽयं जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः।

[2]अनसूये अहं गमिष्यामि।

निषेवितव्यमित्यनुपज्यते, तेन परिणयतदभावयोर्विकल्पः। आहो मदिरेक्षणवल्लभा इयं आभिर्हरिणाङ्कनामिस्समं निवत्स्यति आरण्यकपरिगृहीता भविष्यतीत्यर्थः। किं प्रदास्यते, उत न, प्रदीयमानापि किमारण्यकायैव तापसाय प्रदास्यत उतान्यस्मा इति विकल्पान् कल्पयन्ति। अत्यन्तमात्मसदृशेक्षणवल्लभामिरिति पाठान्तरम्। **वसन्ततिलकं वृत्तम्।**

अयं जनः वयं। धर्माचरणे विहितानुष्ठानेपि किं पुनः कामाचारेऽभिते भावः। परवशः पितृपरतन्त्रः। गुरोः पुनः तातस्य तु, अस्याश्शकुन्तलाया अनुरूपवरप्रदाने अमानुषरूपत्वाद्विशिष्टवरार्पणे सङ्कल्पः निश्चयः। इयं प्रार्थना शकुन्तलाविषयिण्याशंसा दुःखेनावाप्यत इति दुरवापा दुर्लभा नभवति अनुरूपग्रहणादस्माकं सुलभेति भावः। दुरवापेति पाठे एवंरूपो वरो न लभ्येतेति भावः।

भवेति। हृदय संप्रति साभिलाषं भव। सन्दिह्यत इति सन्देहस्सन्दिह्यमानविषयः शकुन्तलाविवाहरूपस्तस्य निर्णयो निश्चयो जातः। आसरसम्भवत्वात् प्रदेयत्वाच्चेति भावः। यद्वस्तु अभिलाषङ्कसे रूपसाम्याद्ग्राह्यमसि। तदिदं वस्तु स्पर्शक्षममदाहकत्वात् स्पर्शयोग्यं रत्नं। न केवलं नाभिः प्रत्युतधार्यं भूषणमपीत्यर्थः। ललितालङ्कारः। 'ललितं वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णन' मिति लक्षणात्। **आर्यावृत्तम्।**

अनसूया—[1]किं णिमित्तं ।

शकुन्तला—[2]इमं असम्बद्धप्पलाविणिं पिअंवदं अज्जाए गोदमिए णिवेदेदुं ।

अनसूया—[3]सहि ण जुत्तं अकिदसक्कारं अदिहिविसेसं उज्झिअ आस्समवासिणो जणस्स सच्छन्ददो गन्दुं ।

शकुन्तला न किंचिदुक्त्वा प्रस्थिता ।

राजा—(आत्मगतम्) आः कथं गच्छति । (गृहीतुमिच्छन्निगृह्यात्मानम्) अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः । अहं हि ।

अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥२६॥

---

[1]किं निमित्तम् ? ।

[2]इमामसम्बद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयितुम् ।

[3]सखि न युक्तमकृतसत्कारमतिथिविशेषं उज्झित्वाश्रमवासिनो जनस्य स्वच्छन्दतो गन्तुम् ।

सरोषमिव कृतकोपमभिनीयेत्यर्थः । असम्बद्धप्रलापिनीं अयुक्तवादिनीं । अकृतसत्कारं अर्घ्यादिभिरसत्कृतं । स्वच्छन्दतो गन्तुं स्वेच्छया गमनं 'सर्वे चान्ययकृतो भावार्थ' इति भावार्थे तुमुन्, गमनमिति च पाठान्तरं । अयुक्तं अयं ह्याश्रमिणां धर्मः यदतिथिपर्युपासनमित्यर्थः । ग्रहीतुं गच्छन्तीं हस्तावलम्बेन निवारयितुमिच्छन् न तु तथा कुर्वन्नित्यर्थः । आत्मानं मनः निगृह्य नियम्य विवेकेन निवर्त्तेति यावत् । कामिजनस्य चित्तवृत्तिः मनःप्रवृत्तिः चेष्टाप्रतिरूपिका क्रियासदृशी विषयैषणैकीभूते मनसि शरीरिणाकृतमपि कृतवद्भातीत्यर्थः ।

अनुयास्यन्निति । मुनितनयां शकुन्तलामनुयास्यन् अनुगमिष्यन्नेव सहसा तत्क्षणं विनयेन विवेचनेन वारितप्रसरः निषिद्धप्रवृत्तिः अत एव स्थानादासना-

प्रियंवदा—[1]अज्ज धम्माचरणे वि परवसो अअं जणो। गुरुणो उण से अणुरूववरप्पदाणे संकप्पो।

राजा—(आत्मगतम्।) न खलु दुरवापेयं प्रार्थना।

भव हृदय साभिलाषं संप्रति सन्देहनिर्णयो जातः।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥२५॥

शकुन्तला—(सरोषमिव।) [2]अणसूए अहं गमिस्सं।

---

[1]आर्य धर्माचरणेऽपि परवशोऽयं जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः।

[2]अनसूये अहं गमिष्यामि।

निषेवितव्यमित्यनुषज्यते, तेन परिणयतदभावयोर्विकल्पः। आहो मदिरेक्षणवल्लभा इयं आभिर्हरिणाङ्कनामिस्समं निवत्स्यति आरण्यकपरिग्रहीता भविष्यतीत्यर्थः। किं प्रदास्यते, उत न, प्रदीयमानापि किमारण्यकायैव तापसाय प्रदास्यत उतान्यस्मा इति विकल्पान् कल्पयन्ति। अत्यन्तमात्मसदृशेक्षणवल्लभामिरिति पाठान्तरम्। **वसन्ततिलकं वृत्तम्।**

अयं जनः वयं। धर्माचरणे विहितानुष्ठानेपि किं पुनः कामाचारेष्विति भावः। परवशः पितृपरतन्त्रः। गुरोः पुनः तातस्य तु, अस्याश्शकुन्तलाया अनुरूपवरप्रदाने अमानुषरूपत्वाद्विशिष्टवरार्पणे सङ्कल्पः निश्चयः। इयं प्रार्थना शकुन्तलाविषयिण्याशंसा दुःखेनावाप्यत इति दुरवापा दुर्लभा नभवति अनुरूपमहणादस्माकं सुलभेति भावः। दुरवापेति पाठे एवंरूपो वरो न लभ्येतेति भावः।

भवेति। हृदय संप्रति साभिलाषं भव। सन्दिह्यत इति सन्देहस्सन्दिह्यमानविषयः शकुन्तलाविवाहरूपस्तस्य निर्णयो निश्चयो जातः। अप्सरस्सम्भवत्वात् प्रदेयत्वाच्चेति भावः। यद्वस्तु अभिलाषङ्कसे रूपसाम्याद्ग्रहीष्यसि। तदिदं वस्तु स्पर्शक्षममदाहकत्वात् स्पर्शयोग्यं रत्नं। न केवलं नाभिः प्रत्युतार्यं भूषणमपीत्यर्थः। ललितालङ्कारः। 'ललितं वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णन' मिति लक्षणात्। **आर्यावृत्तम्।**

अनसूया—[1]किं णिमित्तं ।

शकुन्तला—[2]इमं असम्बद्धप्पलाविणिं पिअंवदं अज्जाए गोदमिए णिवेदेदुं ।

अनसूया—[3]सहि ण जुत्तं अकिदसक्कारं अदिहिविसेसं उज्झिअ आस्समवासिणो जणस्स सच्छन्ददो गन्दुं ।

शकुन्तला न किंचिदुक्त्वा प्रस्थिता ।

राजा—(आत्मगतम्) आः कथं गच्छति । (गृहीतुमिच्छन्निगृह्यात्मानम्) अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः । अहं हि ।

अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥२६॥

---

[1]किं निमित्तम्? ।

[2]इमामसम्बद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयितुम् ।

[3]सखि न युक्तमकृतसत्कारमतिथिविशेषं उज्झित्वाश्रमवासिनं जनस्य स्वच्छन्दतो गन्तुम् ।

सरोषमिव कृतक्कोपमभिनीयेत्यर्थः । असम्बद्धप्रलापिनीं अयुक्तवादिनीं । अकृतसत्कारं अर्घ्यादिभिरसत्कृतं । स्वच्छन्दतो गन्तुं स्वेच्छया गमनं 'सर्वे चाव्ययकृभावार्थाः' इति भावार्थे तुमुन्, गमनमिति च पाठान्तरं । अयुक्तं अयं ह्याश्रमिणां यदतिथिपर्युपासनमित्यर्थः । ग्रहीतुं गच्छन्तीं हस्तावलम्बेन निवारयितुमिच्छन् न तु तत्कुर्वन्नित्यर्थः । आत्मानं मनः निगृह्य नियम्य विवेकेन निवर्त्येति यावत् । कामिजनचित्तवृत्तिः मनःप्रवृत्तिः चेष्टाप्रतिरूपिका क्रियासदृशी विषयैणैकीभूते मनसि शरीरेण कृतमपि कृतवद्भातीत्यर्थः ।

अनुयास्यन्निति । मुनितनयां शकुन्तलामनुयास्यन् अनुगमिष्यन् सहसा तत्क्षणं विनयेन विवेचनेन वारितप्रसरः निषिद्धप्रवृत्तिः अत एव स्थानादासन

प्रियंवदा—(शकुन्तलां निरूप्य।) [1]हला ण दे जुत्तं गन्दुं।

शकुन्तला—(सभ्रूभङ्गम्) [2]किं णिमित्तं?।

प्रियंवदा—[3]रुक्खसेअणाइ दुवे मे धारेसि। एहि दाव अत्ताणं मोइअ गमिस्सासि। (इति बल्कलेनां निवर्तयति।)

राजा—भद्रे वृक्षसेचनादेव परिश्रान्तामलभवतीं लक्षये तथा ह्यस्याः

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
द्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।

---

[1]हला न ते युक्तं गन्तुम्।

[2]किं निमित्तम्?

[3]वृक्षसेचने द्वे धारयसि एहि तावत्। आत्मानं मोचयित्वा गमिष्यसि।

दनुच्चलन्नतुंतष्टवपि। का कथा गतप्रत्यागतयोरिति भावः। गत्वातामनुगम्य पुनः प्रतिनिवृत्त इव। मनः प्रवृत्तिर्गतिरिव निवृत्तिश्च प्रत्यावृत्तिरिव प्रतिभातीत्यर्थः। शरीरवृत्तेश्चित्तवृत्तिपरतन्त्रत्वादिति भावः। **आर्यावृत्तम्**॥

द्वे वृक्षसेचने वृक्षद्वयसेचनमित्यर्थः। मे मह्यं धारयसि ऋणं वहसि "धारुत्तमर्णे" इति संप्रदानत्वान्म इति चतुर्थी। शकुन्तलाभागं वृक्षद्वयं स्नेहात्तस्याः क्लेशं वारयितुं स्वयं सखी सिक्तवती पूर्वमिति व्यक्तं भवति। मोचयित्वात्मानमपकृत्य। लक्षये चिह्नैर्जानामि॥

स्रस्तेति। अस्याः बाहू घटोत्क्षेपणात् सेचनकलशोद्वहनाद्धेतोः, स्रस्तांसौ श्रमशिथिलस्कन्धौ। अतिमात्रलोहिततलौ च। प्रमाणाधिकः अतिमात्रदीर्घ इत्यर्थः। श्वासः अद्यापि चिरत्यक्तेऽपि सेचनकर्मणि स्तनयोर्वेपथुं कंपं जनयति, यथा स्तनवेपथुर्न विरमति तथा प्रवर्ततइत्यर्थः। कर्णशिरीषं अवतंसभृतं रुणद्धवावृणोतीति कर्णशिरीषरोधि

बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे संसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः ॥२७॥

तदहमेनामनृनां करोमि । (इत्यंगुलीयं दातुमिच्छति ।)

(उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः ।)

राजा—अलमन्यथा सम्भाव्य । राज्ञः परिग्रहोऽयम् ।

प्रियंवदा—[1]तेण हि णारुहदि एदं अङ्गुलीअअं अंगुलीविओअं अज्जस्स । तुह वअणेणेव्व अणिणा णाम एसा (किंचिद्धसन्ती ।) हलासउन्दले मोइदा सि अणुअम्पिणा अज्जेण अह वा महाराएण । गच्छदाणिं ।

---

[1]तेन हि नार्हत्येतदंगुलीयकमंगुलीवियोगमार्यस्य । तव

कर्णावतंसव्यापीत्यर्थः । कर्णशिरीषेण रोधवत्प्रतिबद्धमिति वा । घर्माम्भसां जालकं कोरकाकारा बिन्दवः वदने बद्धं रचितमिवेत्यर्थः । बन्धे संसिनि व्यायमक्षये सति मूर्धजाः केशाः एकेन हस्तेन यमिताः बद्धाः हस्तान्तरस्य कलशव्यापृतत्वादिति भावः । अत एव पर्याकुलाः विपमनिवेशाः । पर्याकुलत्वादेकहस्तयमितत्वमवसीयत इत्यर्थः । सेकश्रमोऽपि शोभां नातिक्रामतीति विशेषणैर्व्यज्यते । इदमत्रहस्यं । घटा योषित् " घटा घटनगोष्ठीमघटनासु च योषिति " इति मेदिनी । तस्या उत्क्षेपणादिति पुरुषायितं व्यज्यते । तत्र भूतले भुजावष्टंभेन योषितः स्रस्तांसत्वं, करतलयोरतिमात्रलोहितत्वं, अधोमुखतया श्वासातिरेकः, स्तनचांचल्यं, स्वेदोद्गमः, केशविस्रंसनं, हस्तान्तरस्याबलंबनार्थत्वादेकहस्तेन केशपाशबन्धश्च संभवतीति । शार्दूलविक्रीडितं वृत्तम् ।

अनृणां करोमि प्रतिनिधिद्रव्यदानादित्यादिः । अंगुलौ भवमंगुलीयं ' जिह्वामूलांगुलेश्छः ' अंगुलीयमेवांगुलीयकं । नाममुद्रायाः राजनामन्यासस्याक्षराणि अवलोकयतः प्रभवन्निव दृश्यत इति चिन्तितमवितथमित्यभिप्रायेणेति भावः । अलमन्यथा संभाव्य मदीयत्वेनांगुलीयकं न संभावनीयमित्यर्थः । किं तर्हि राज्ञः परिग्रहः त्वं । अहं तु राजपुरुष इत्युक्तमिति भावः । परमार्थतस्तु राजकीयत्वोपन्यासेन राजत्वमात्मनो

शकुन्तला— (आत्मगतम् ।) [1]जइ उत्तणो पहाविस्सं । (प्रकाशम् ।) का तुमं विसज्जिदव्वस्स वा

राजा—(शकुन्तलां विलोक्य । आत्मगतम् ।) किं नु खलु यथा वयम स्यामेवमियमस्मान्प्रति स्यात् । अथवा लब्धावकाशा मे प्रार्थना । कुतः

बाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यभिमुखं मयि भाषमाणे ।

वचनेनैवानृणा नामैषा । हला शकुन्तले मोचितास्यनुकम्पिनार्येण अथवा महाराजेन गच्छेदानीम् ।

[1]यद्यात्मनः प्रभविष्यामि । का त्वं विसर्जयितव्यस्य वा रोद्धव्यस्य वा ।

दर्शितं भवति । राजपरिग्रहोयमिति शकुन्तलायाः स्वपरिणेयत्वमपि सूचयति । विधेयप्राधान्यादयमिति पुंलिंगनिर्देशः । आर्यस्यानुरोधिवियोगं नार्हतीति वचनेन राजभावो विहित इति व्यक्तिं । **वचनेनैवेति** । न खल्वप्रमाणं महद्वचनमितिभावः । अनुकम्पिना दयाशीलेन । अथवा महाराजेनेत्याकारज्ञतां प्रकाशयितुं । तस्मै संप्रति ऋणं धारयसीत्यपि विवक्षितं । आत्मनश्शरीरस्य यदि प्रभविष्यामि नियन्त्री भविष्यामि । अन्यतोमुखे मनसि न शक्यं स्वेच्छया स्पन्दितुमपीत्यर्थः । विसर्जयितव्यस्य गच्छेति विसर्जनस्य । रोद्धव्यस्य 'ण देज्जत्तं गंदु' मिति निरोधस्य 'कृत्यल्युटो बहुल' मिति बहुलग्रहणाद्भावे तव्यप्रत्ययः । यथा वयमस्यां शकुन्तलायां विषये स्म इति विपरिणमनीयं तथा इयमस्मान् प्रति अस्मद्विषये "लक्षणेनाभिप्रती आभिमुख्ये" इति कर्मप्रवचनीयत्वाद्द्वितीया । किं नु खलु स्यात् । लब्धः अवकाशः अङ्गीकरणरूपं स्थानं यस्यास्सा ।

वाचमिति । सा शकुन्तला यद्यपि मद्वचोभिस्सह स्वां वाचं न मिश्रयति न सङ्गमयति । तथापि मयि भाषमाणे सत्यभिमुखं श्रवणाभिलाषेणेत्यर्थः ।

कामं न तिष्ठति मदाननसंमुखी सा
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ २९ ॥

नेपथ्ये ।

भो भोस्तपस्विनः । संनिहितास्तपोवनसत्त्वरक्षायै भवत। प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः ।

तुरगखुरहतस्तथा हि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु ॥३०॥

अपि च ।

तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः
पादाक्रुष्टव्रततिवलयासङ्गसञ्जातवासः ।

कर्णं ददाति अवधत्ते । मदाननसंमुखी कामं यद्यपि न तिष्ठति तथाप्यस्या दृष्टिर्भूयिष्ठमत्यर्थं अन्यविषया न तु नैव भवति । श्रवणदर्शनयोर्मिथस्तरत्वेन प्रार्थनावकाशो भवत्येवेत्यर्थः । वसन्ततिलकं वृत्तम् ।

भो भो इत्यादि कस्यचिदारण्यकस्य वाक्यं । तपोवनसत्त्वानां हरिणादीनां रक्षणार्थं । सन्निहिताः आश्रमस्थिताः । मृग्यन्ते अन्विष्यन्ते मृगादयोऽत्रेति मृगया 'परिचर्यापरिसर्यामृगयाटाट्यानामुपसङ्ख्यानं' तदर्थं विहर्तुं सञ्चरितुं शीलमस्येति तथोक्तः ।

तुरगेति । तथा हि राज्ञि प्रत्यासन्ने सति हीत्यर्थः । तुरगाणां सेनाश्वानां खुरैः हतः क्षुण्णः परिणतस्य अन्तोन्मुखस्य अरुणस्य सूर्यस्येव प्रकाशो यस्य सः अथवा प्रौढसन्ध्यारागसवर्णः 'अरुणोऽप्यरुणागेऽर्के सन्ध्यारागेऽर्कसारथौ' इति मेदिनी । रेणुः विटपविषक्तानि वृक्षशाखालग्नानि जलार्द्रवल्कलानि विशोषणाय निक्षिप्तानि येषां तेषु आश्रमद्रुमेषु शलभसमूहः खद्योतसंघ इव पतति । पुष्पिताग्रा वृत्तम्

तीव्रेति । तीव्राघातेन गाढप्रहारेण प्रतिहते भग्ने तरुस्कन्धे वृक्षशाखायां लग्नः वेधादन्तः प्रविष्टः एको दन्तो यस्य सः दन्तस्यूतशाखाकर्षीत्यर्थः । पादाक्रुष्टानां उन्मार्ग-

पूर्वो विघ्नस्तप इव नो भिन्नसारङ्गयूथो
धर्मारण्यं वृणति च गजः स्यन्दनालोकभीतः ॥३१॥

(सर्वाः कर्णौ दत्त्वा किंचिदिव सम्भ्रान्ताः।)

राजा—(आत्मगतम्।) अहो धिक्। सैनिका मदन्वेषिणस्तपोवनमुपरुन्धन्ति। भवतु। गमिष्यामि तावत्।

अनसूया—[1]अज्ज इमिणा आरण्णगअउत्तन्देण पज्जाउलह्म। अणुजाणाहि णो उडअगमणस्स।

राजा—गच्छन्तु भवत्यः। वयमप्याश्रमपीडा यथा न भविष्यति तथा प्रयतिष्यामहे।

(सर्वा उत्तिष्ठन्ति।)

---

[1]आर्य अनेनारण्यगजवृत्तान्तेन पर्याकुलाः स्मः। अनुजानीहि नः उटजगमनाय।

गामिनया पादवेष्टनादुन्मूल्यमानानां व्रततिवलयानां लतामण्डलानामभिलग्न सञ्जातपाशः उदितशृङ्खलाबन्धः भिन्नानि ध्वंसितानि सारङ्गाणां मृगाणां यूथानि येन सः। अथवा त्यक्तगजयूथः। 'सारङ्गः पुंसि हरिणे चातके च मधुव्रते' इति मेदिनी। स्यन्दनालोकेन रथदर्शनेन भीतः गजः वन्यः नस्तपसो मूर्तः मूर्तिमान् विघ्न इव धर्मारण्यं तपोवनं व्रजति गच्छति च। पूर्वश्लोकार्थसमुच्चयार्थश्चकारः। के चित्तु तीव्राघातप्रतिहततरुरिति पदच्छेदमिच्छन्ति, स्कन्धं निजांसदेशे लग्नैकदन्तः परिवृत्य दर्शनादिति व्याचक्षते च। परिवृत्य दर्शने गजानां स्कन्धदेशे दन्तसंक्रान्तिर्न भवत्येव। नाह वृषमहिषादि शृङ्गवद्रजदन्त उपरि स्थितः। स्वभावोक्तिरलङ्कारः। सा च मूर्तो विघ्नस्तपस इवेत्युत्प्रेक्षया संसृज्यते। मन्दाक्रान्ता वृत्तम्।

किंचिदिवेति गणितुस्सन्निहितत्वाद्धैर्याच्च नातिभीता इति भावः। उपरुन्धन्ति पीडयन्ति। पर्याकुलाः भीताः उटजगमनाय उटजं गन्तुं 'तुमर्थाच्च भाववचना'दिति

सख्यौ—[1]अज्ज असंभाविदसक्कारं भूओ वि पेक्खणणिमित्तं लज्जेमो अज्ज विण्णविदुं।

राजा—मा मैवम्। दर्शनेनैव भवतीनां सत्कृतोऽस्मि।

(शकुन्तला—[2]अणसूए अहिणवकुससूइपरिक्खदं मे चलणं कुरवअसाहापरिलग्गं च वक्कलं। दाव पडिपालेध मं जाव णं मोआवेमि।)

(राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता।)

राजा—मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयात्रिकान्प्रत्यवेक्ष्य नातिदूरे तपोवनस्य निवेशयामि। न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम्। मम हि

---

[1]आर्य असंभावितसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जामहे आर्यं विज्ञापयितुम्।

([2]अनसूये अभिनवकुशसूचिपरिक्षतं मे चरणं कुरवकशाखापरिलग्नं च वल्कलम्। तावत्प्रतिपालयतं मां यावदेतन्मोचयामि।)

चतुर्थी। असंपादितसत्कारं अकृतातिथ्यं। लज्जामहे. सत्कारार्थं पुनर्दर्शनमिच्छाम इत्यभिधातुं न शक्नुम इत्यर्थः। सख्यानं दर्भाकुशादिव्यानमुपाध्येयर्थः। क्वित् 'शकुन्तला। अणसूए अहिणवकुससूइपरिक्खदं मे चलणं कुरवअसाहापरिलग्गं च वक्कलं। दाव पडिवालेहि जावणं मिएमि'। इत्याधिकपाठो दृश्यते। विलम्बहेतुद्वयमुपन्यस्य मोएमीत्येकस्य परिहारोक्तिर्विरोधात्सम्या चाप्रतिवचनादयं प्रक्षिप्तः। मन्दमौत्सुक्यं यस्य सः। मन्दौत्सुकोऽस्मीति पाठे मन्दमुत्सुकत्वं यस्य स इति व्याख्येयं। उक्तार्थानाभप्रयोगात् त्वप्रत्ययस्याप्रयोगः।

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ ३२ ॥

इतिनिष्क्रान्तास्सर्वे ।

॥ इति अभिज्ञानशाकुन्तले प्रथमोऽङ्कः ॥

गच्छतीति । शरीरं पुरः सैनिकस्थानाभिमुखं गच्छति । चेतः असंस्तुतं शरीरेणापरिचितं असङ्गतं सदित्यर्थः । पश्चात् शकुन्तलादिशि धावति वेगेन प्रवर्तते । तद्यथा प्रतिवातं वायोः प्रतिमुखं नीयमानस्य केतोर्ध्वजस्य सम्बन्धि चीनांशुकं सूक्ष्मं वस्त्रमिव । ध्वजदण्डमात्रं वायोः प्रतिमुखं गच्छति । अंशुकं तु पश्चाद्वायुमनुगतमाकर्षतीत्यर्थः । आर्यावृत्तम् ।

॥ इति शाकुन्तलव्याख्याने सहृदयसमाख्याने प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

(ततः प्रविशति विषण्णो विदूषकः ।)

विदूषकः—(निश्वस्य ।) [1]हा हदोह्मि एदस्स मिअआसीलस्स रण्णो वअस्सभावेण । अअं मिओ अअं वराहो अअं सद्दूलो त्ति मज्झंदिणे वि गिह्मविरलपाअवच्छाआसु वणराईसु आहिण्डीअदि । पत्तसंकरकसाआइ कदुण्हाइ गिरिणईजलाइ पिज्जन्दि । अणिअदवेलं

---

[1]हा हतोऽस्मि एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन । अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्यन्दिनेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यते । पत्रसङ्करकषायाणि कदुष्णानि गिरिनदी-

---

॥ अथ द्वितीयाङ्कस्य यात्रयात्रारम्भः ॥

अथ शकुन्तलासक्तचित्तस्य राज्ञस्तापसक्रियापालनव्यानमाश्रमावस्थानहेतुमुक्षेषुं मृगयानिवर्तनन सेनाप्रतिप्रेषणार्थं विदूषकप्रवेशः प्रस्तूयते—तत इत्यादिना । 'हास्यप्रायो विदूषक' इति विदूषकलक्षणं । विषण्णः अनुभावनिर्भरः । हा इति खेदे मृगयाशीलस्य अविरतमृगयातत्परस्य । वयसा तुल्यो वयस्यः । 'जीवयोर्धर्मविषमूलमूलसीतातुलाभ्यस्तार्थतुल्यप्राप्यवच्यानाभ्यसमसमिसम्मिते'ष्विति तुल्यार्थे यत्प्रत्ययः । तस्य भावेन सख्यित्वेन हतोस्मि दुःखायैव राजसख्यमिति भावः । तदेव विशदयति अयमिति—प्रतिवाक्यमावृत्तेनेदं शब्देन नानादिक्षु विपरिधावतां दृश्यादृश्यानामनुसरणेन क्लेशबाहुल्यं व्यज्यते । मज्झंदिणे वीति—प्रभाते हि मृगेतिथिना एकत्र मृगा लभ्येरन् न तु मध्यन्दिन इति विरोधोऽपिना द्योतितः । ग्रीष्मेण सन्तापेन विरलाः असंश्लिष्टाः पत्राणां पल्लवानां छाया यासु तासु । आहिण्ड्यते परिभ्रम्यते । वनेषु परिभ्रमणं ग्रीष्मसमयः मध्यन्दिनं वराहाद्यनुधावनं चेति महतीयं दुःखसम्पदेति भावः । पत्राणां तद्दुपनिपतितानां मङ्करेण मग्नानां व्यामिश्रतया कषायाणि तुवराणि 'तुवरस्तु कषायोऽस्त्री'त्यमरः । ईषदु-

सुलभमंसभूइट्ठं आहारो जणवीअदि। तुरआणुधावणसंखुहिदसंधिणो मे रत्तिं वि णिआमं सइदव्वं णत्थि। तदो महन्ते एव्व पच्चूसे दासीएउत्तेहिं सगणलुद्धएहिं वणग्गहणकोलाहलेण पडिवोधिदो म्हि। एदावन्देण वि पीडा ण णिक्कमदि। तदो गण्डस्स उवरि पिडआ संउत्ता।

जलानि पीयन्ते। अनियतवेलं शूल्यमांसभूयिष्ठमाहारोऽश्यते। तुरगानुधावनसंक्षुभितसन्धेर्मे रात्रिमपि निकामं शयितव्यं नास्ति। ततो महत्येव प्रत्यूषे दास्याः पुत्रैः स्वगणलुब्धैर्वनग्रहणकोलाहलेन प्रतिबोधितोस्मि। एतावत्यपि पीडा न निष्क्रामति। ततो गण्डस्योपरि

ण्णानि बहुण्णानि 'कवं चोण्ण' इति सूत्रे चकारेण 'कोः कत्तत्पुरुषेचीं'ति कदादेशः समुच्चीयते। गिम्हिनदीजलानि ग्रीष्मकालीनानीत्यर्थः। तस्य च पिपासोः पानीयमपि विरसमित्यर्थः। 'गिम्हिनद्यादीनां वे'ति णत्वविकल्पः। पीयन्ते न पुनस्त्यज्यन्त इत्यर्थः। पिपासा हि न शक्यते सोढुमिति भावः। अनियतवेलं अनिश्चितकालं मृगयाविरामे सत्येव भोजनावसरादिति भावः। शूल्यैः शूले संस्कृतैः 'शूलोखाद्यत्' पात्रसंस्कारानवकाशात् शूलेन गृहीत्वाग्नौ तप्तैर्धृतादिविरहादस्निग्धैरित्यर्थः। मांसैर्भूयिष्ठं प्रचुरं यथा तथा। एवं अकालिकेन संस्कारविकलेन भोजनेनापि न सुखमिति भावः। तुरगानुधावनेन स्वयमश्वारोहाश्रमत्वादेवाकिंचनश्च पश्चादवस्थाने कातरादिति भावः। संक्षुभिताश्रिशिथिलिताः सन्धयः जानुकूर्पराकन्धरादिसन्धानानि यस्य तस्य मे रात्रिमपि न तु दिवैव केवलमित्यर्थः। 'अकर्मकधातुभिर्योगे देशः कालो गन्तव्योध्वा च कर्मसंज्ञ' इति परिभाषणाद्द्वितीया। 'कालाध्वनोरत्यन्तसंयोगे' इति वा। तदा कृत्स्नां रात्रिमित्यर्थः। शयितव्यं शयनं शयनविश्रमोपि दुर्लभ इत्युक्तं। ततः रात्रावतीतायां महत्येव प्रत्यूषे प्रत्युषप्रारम्भ एवेत्यर्थः। दास्याःपुत्रैरिति निन्दायां 'पुत्रेन्यतरस्या'मिति षष्ठ्या आक्रोशे पाश्चिकलुग्विधानात्। श्वगणलुब्धैः श्वगणग्राहिभिः किरातैः। शाकपार्थिवादिः। मनुष्यश्रमानवेक्षिभिराटविकैरित्यर्थः। शकुनिलुब्धकैरिति पाठे पक्षिवेधिभिरित्यर्थः। प्रतिबोधितः उन्निद्रः कृतोस्मि। न निष्क्रामति नापैति। गण्डस्य व्रणविशेषस्य। पिटका व्रणान्तरं, मृगयादुःखरूपं प्रथममेव व्रणमसहमानस्य व्रणान्त-

हिओ किल अह्मेसु ओहीणेसु तत्तहोदो मिआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्दला णाम मह अधण्णदाए दंसिदा। संपदं णअरगमणस्स कहं वि ण करेदि। अज्ज तं एव्व सविसेसं चिंतअंतस्स मे अच्छीणं पहादं आसी। का गई। जाव इमं किदाचारपडिकम्माणं वअस्सं पेक्खामि। (परिक्रम्यावलोक्य च।) एसो बाणासणहत्थाहिं वणपुप्फमालाधारिणीहिं जवणीहिं पडिउदो इदो एव्व

पिटका संवृत्ता। ह्यः किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला नाम ममाधन्यतया दर्शिता। सांप्रतं नगरगमनस्य कथामपि न करोति। अद्य तमेव सविशेषं चिन्तयतो मे अक्ष्णोः प्रभातमासीत्। का गतिः यावदिमं कृताचारपरिकर्माणं वयस्यं पश्यामि। एष बाणासनहस्ताभिः वन-

रमपि जातमित्यर्थः। 'गण्डःस्यात् पुंसि खड्गिनि। ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेऽपि च।' विद्वर्वारकपोलेषु हयभूषणबुद्बुदे' इति मेदिनी। 'विस्फोटः पिटकस्त्रिषु' इत्यमरश्च। तदेव पिटकास्थानापन्नं दुःखान्तरमाह—हियो किलेति किलशब्दः स्वयमननुभूतत्वार्थः। अस्मास्विति बहुवचनं सैनिकसंग्रहार्थं। अवहीनेषु अनुधावनाक्षमतया विरहितेषु। मम अधन्यतया कन्यां दर्शिता राज्ञो विषयीकृता। का नाम तत्राधन्यतेत्याह—संपदमिति। कहं वीति—पूर्वमपि नगरगमनकथामत्रैवासीदिति भावः। तमेव राजानमेव सविशेषं सातिशयं। अक्ष्णोः प्रभातमिति अनिमीलिताक्षस्यैव सतो मे प्रभातमासीदित्यर्थः। कृतं परिजनरचितं आचारपरिकर्म आचारप्राप्तो मृगयुवेषो यस्य तं। बाणाः अस्यन्ते अनेनेति बाणासनं 'करणाधिकरणयोश्चे'ति ल्युट्। राजधनुः तत् हस्तेषु यासां ताभिः यवनीभिः राज्ञां शस्त्रग्राहिण्यो यवन्यः, चामरग्राहिण्यश्च किराट्यो भवन्ति। 'किराती चामरधरा यवनी शस्त्रधारिणी' इति शब्दार्णवे। यवनकिरातौ म्लेच्छजातिविशेषौ। यवनशब्दाज्जातिलक्षणो ङीष्। परिवृतः आटविकबलान्तर्भावात्परिवेष्टितः इत एवागच्छतीति सएव मृगयाखेदः पुनरुपस्थित इति भावः।

आअच्छदि वअस्सो। होदु। अङ्गभङ्गविअलो विअ भविअ चिट्ठिस्सं। जइ एव्वं वि णाम विस्समं लहेअं। (इति दण्डकाष्ठमवलम्ब्य स्थितः।)

ततः प्रविशति यथोद्दिष्टपरिवारो राजा।

राजा—

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥१॥

पुष्पमालाधारिणीभिः यवनीभिः परिवृत इत एवागच्छति वयस्यः। भवतु अङ्गभङ्गविकल इव भूत्वा स्थास्यामि यद्येवमपि नाम विश्रमं लभेय।

अङ्गभङ्गे। अवयवोपघातेन विकलः दुःस्थ इव। एवमपि वैकल्याभिनयेनापि। जइ णामेति सम्भावनायां। अपि नाम विश्रमं प्राप्नुयामित्यर्थः। दण्डकाष्ठं दण्डरूपं काष्ठं शिंशुपावृक्षवत्समानविशेषणोऽसमासः। अवलम्ब्य अवष्टभ्य। प्रवेशकः 'तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः। प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः' इत्युक्तलक्षणः। तत इति। यथोद्दिष्टः निर्दिष्टप्रकारः प्रकारार्थस्य यथाशब्दस्य सुप्सुपेति समासः। परिवारः यवन्यादिः परिजनो यस्य सः॥

काममिति। प्रिया कामं न सुलभा पितृपरतन्त्रत्वाद्यद्यपि दुर्लभा मनस्तु दुर्लभतद्भावदर्शनायासि तु तदर्थं। तस्याः भावदर्शने आयसति प्रयतत इति तथाभूतं, न विश्रमीति भावः। किं दुर्लभाया भावदर्शनेनेत्यत आह। अकृतेति'। मनसि जायत इति मनसिजः 'सप्तम्यां जनेर्डः' 'तत्पुरुषे कृति बहुल'मिति बहुलग्रहणादलुक्। तस्मिन् अकृतार्थे अकृतकृत्ये सत्यपि असमाप्तमनोरथे इति भावः। उभयोः कामिनोः प्रार्थना परस्परमभिलाषः। उभयशब्द इतिवत् वृत्तिविषये उभशब्दस्थाने उभयशब्दप्रयोगः। 'कपीलकोलोभयकलपञ्च,' इति च स्मृतेर्जे। कामनामात्रमपीत्यर्थः। रतिं प्रीतिं कुरुते। अकृतार्थेऽपि हि मदन इति पाठान्तरे तथाहीति शेषः। 'परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानरागयोः' इति न्यायेनैतत्तयोरनुरागज्ञानभावं कामिनां

(स्मितं कृत्वा ।) एवमात्माभिप्रायसंभावितेष्टजनचित्तवृत्तिः प्रार्थयिता जनो विडम्ब्यते ।

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति ॥ २

सुखायेति भावः । तद्भावदर्शनाश्वासीति पाठे तु तस्याः भावदर्शनेन प्रेम्णोऽवगतत्वेन आश्वासि तुस इत्यर्थः । 'अकामां कामयानस्य शरीरमुपतप्यते । इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना' । इति च रामायणम् । आर्या वृत्तम् ॥

स्मितमिति आत्मे पहासरूपमित्यर्थः । स्मितजन्यो हाससामान्यपरः । एवमिति आत्माभिप्रायेण स्वबुद्ध्या संभावितो अध्यवसितो इष्टजनस्य प्रार्थितजनस्य चित्तवृत्तिः उत्कण्ठादिरूपो भावः येन सः प्रार्थयिता जनः कामी विडम्ब्यत इति स्वाभिप्रायानुरोधेन परचित्तोत्प्रेक्षणं कामिनां न केवलं नितम्बार्थं प्रत्युत विडम्बनास्थानमपीत्यर्थः । तदाह—

स्निग्धमिति । अन्यतः अन्यत्र विषयान्तरेऽपि नयने प्रेरयन्त्या व्यापारयन्त्या सत्या तया प्रियया स्निग्धं स्नेहयुक्तं यथा तथा वीक्षितं दृष्टमिति यत् एवं नितम्बयोर्गुरुतया भरेण हेतुना विलासात् 'तालव्यादिको विशेषस्तु विलासोऽङ्गक्रियादिषु' इत्युक्तलक्षणादङ्गक्रियाविशेषादिव । मन्दं यथा तथा यातं गतं इति यत्, मा गा इति 'हला ण जुत्तं दे एदं सक्खसमअइणाइ दुवे धारेसि' इति सखीनिषेधोऽयमर्थतोनूदितः 'इणो गालुडी' ति गादेशः । 'न माङ्योगे' इत्यडागमप्रतिषेधः । 'माङि लुङ्' इति च विध्यादौ लुङ् । उपरुद्धया प्रतिषिद्धया सत्या सा उपरुद्धवती-सखी सासूयं सकोपमुक्ता 'का तुमं विसज्जिदव्वस्स वा रोहिदव्वस्स वा' इति प्रत्युक्तेति यदपि, तत्सर्वं स्निग्धदर्शनमन्दगमनासखी प्रतिवचनरूपं त्रितयमपि चेष्टितं अहमेव मन्मथः परायणं विषयो यस्य तत् किल मदेकविषयमेव, मद्गत इति भावः । 'आश्रये तत्प रीष्टि परायणपदं विदुः' इति आश्वतः । 'पूर्वपदात् संज्ञायामग' इति णत्वं ।

विदूषकः—तथा स्थित एव।) [1]भो वहस्स ण मे हत्थपादा पसरन्दि। वाआमत्तेण विअई होहि।

राजा—(सस्मितम्।) कुतोऽयं गात्रोपघातः?।

विदूषकः—[2]कुदो किल सअं अच्छी आउलीकरिअ अस्सुकारणं पुच्छासि?।

राजा—न खल्ववगछामि।

विदूषकः—[3]भो वअस्स जं वेदमो कुज्जलीलं विडम्वेदि। तं किं अत्तणो पहावेण उद णईवेअस्स।

---

[1]भो वयस्य न मे हस्तपादौ प्रसरतः। वाङ्मात्रेण विजयी भव।

[2]कुतः किल स्वयमक्षि आकुलीकृत्याश्रुकारणं पृच्छासि?।

[3]भो वयस्य यद्वेनसः कुब्जलीलां विडम्बयति। तत्किमात्मनः प्रभावेण? उत नदीवेगस्य?।

वस्तुतोऽन्यपरमपि सर्वमात्मजनचेष्टितं स्वाभिप्रायानुरोधेन स्वपरं मया लोकतन्त्रनिष्णातेनापि व्यवसीयते किमुत परैरिति भावः। अहो जानतोऽपि व्यामोह इत्याश्चर्यमित्यर्थः। उक्तार्थसमर्थनं सामान्यमर्थान्तरं न्यस्यति। कामी स्वतां स्वीयतां पश्यति स्वाभिप्रायेण जानाति। अर्थान्तरन्यासालङ्कारः। अन्यतोऽपीत्यपिना किमुत स्वविषये सतीत्यर्थापत्तिरलङ्कारो व्यज्यते। शार्दूलविक्रीडितं वृत्तम्॥

तथा स्थित एव दण्डकाष्ठमवलम्ब्य स्थित एव। हस्तपादौ हस्तसहितौ पादाविति मध्यमपदलोपी समासः शाकपार्थिवादेराकृतिगणत्वात्। अतो नैकवद्भावः। न प्रसरतः न व्याप्रियेते। वाङ्मात्रेण उपचर्यस इति शेषः। वाङ्मात्रमनाश्रमत्वादिति भावः। गात्रोपघातः अवयवानां कुण्ठत्वं। स्वयं आत्मना। आकुलीकृत्य कलुषीकृत्य। नखल्ववगछामीत्येतदनन्तरं भिन्नार्थमभिधीयतामिति क्वचित्पाठो दृश्यते तत्र भिन्नार्थामत्यस्य स्पष्टार्थमित्यर्थः। कुब्जस्य गडुलस्य लीलां क्रियां गतिरूप 'लीलाविलासक्रिययो' रित्यमरः। विडम्बयति अनुकरोतीति यत्। तत्र वेतसस्य

राजा—नदीवेगस्तत्र कारणम् ।

विदूषकः—[1]मह वि भवं

राजा—कथमिव ? ।

विदूषकः—[2]एव्वं णामतुए राअकज्जाइ उज्झिअ एआरिसेसु आउलप्पदेसेसु वणअरउत्तिणा होदव्वं । अहं उण सच्चं पच्चहं सावदसमुस्सारणेहिं संखुहिदसन्धिबन्धाणं गताणं अणीसोम्हि संवृत्तो । ता पसीददु भवं विसज्जेदु मं एक्काहं वि दाव विस्समिदुं ।

राजा—(आत्मगतम्) वयस्यश्चैवमाह । ममापि काश्यपसुतामनुस्मृत्य मृगयाविछ्रवं चेतः ।

कुतः ।

---

[1]ममापि भवान् ।

[2]एवं नाम त्वया राजकार्याण्युज्झित्वा एतादृशेष्वाकुलप्रदेशेषु वनचरवृत्तिना भवितव्यं । अहं पुनस्सत्यं प्रत्यहं श्वापदसमुत्सारणैः संक्षुभितसन्धिबन्धानां गात्राणामनीशोऽस्मि संवृत्तः । तस्मात् प्रसीदतु भवान् । विसर्जयतु मामेकाहमपि तावद्विश्रमितुम् ।

कुञ्जलीलाविडम्बने नदीवेगः कारणं नद्यां वहन्त्यामेव तदुत्पत्तेरिति भावः । मह विभवं इति । कुञ्जलीलाविडम्बने कारणमिति शेषः । आकुलप्रदेशेषु विषमप्रदेशेषु वनचरस्येव वृत्तिर्यस्य तेन । भवितव्यमवश्यं भाव्यं । अहं पुनः अहं तु अज्ञातमृगयागन्धो ब्राह्मण इति पुनश्शब्दार्थः । सत्यं परमार्थमेव न तु मृषा विडम्बनमित्यर्थः । शुनामिव पदानि येषां तेषां श्वापदानां समुत्सारणैः संक्षुभिताः शिथिलीकृताः सन्धिबन्धाः अवयवसन्धानप्रदेशा येषां तेषां गात्राणां शरीरावयवानां विषये 'गात्रं गजाग्रजंघादिभागे स्वाङ्गकलेवरे' इति विश्वः । अनीशः आकुञ्चनप्रसारणाद्यशक्तः सैनिकाकृतेपि श्वापदसमुत्सारणे कातरस्य पृथग्जनस्यातुमसमर्थस्य अनुधावनसाम्यादवयवसंक्षोभः । एकाहमपि तावत् 'उत्तमैकाभ्यां च' इत्यह्नादेशप्रतिषेधात् 'राजाहस्सखिभ्य' इति टच् । विश्रमितुं क्वचिदवस्थातुं । काश्यपसुतां शकुन्तलां । मृगयायां विछ्रवं निरुत्साहम् ।

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु।
सहवसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलोकितोपदेशः॥

विदूषकः—(राज्ञो मुखमवलोक्य।) [1]अत्त भवं किं वि हिअए करिअ मन्देदि। अरण्णे खु मए रुदिदं।

राजा—(सस्मितम्।) किमन्यत्। अननिक्रमणीयं सुहृद्वचनमिति स्थितोऽस्मि।

विदूषकः—[2]चिरं जीव। (इति गन्तुमिच्छति।)

---

[1]अत्र भवान् किमपि हृदये कृत्वा मन्त्रयते। अरण्ये खलु मया रुदितम्।

[2]चिरं जीव।

नेति। अधिज्यं आरोपितमौर्वीकं आहितसायकं संहितबाणमपि इदं धनुः मृगेषु हरिणेषु लक्ष्यभूतेषु विषये नमयितुं न शक्तोऽस्मि। का कथा बाणमोक्षे इति भावः। धनुर्नमनं हि शरप्रयोगारम्भः। यैः मृगैः प्रियायाः सहवसतिं सहवासमुपेत्य मुग्धविलोकितस्य सुन्दरावलोकनस्य उपदेशः कृतइव आरण्यकत्वात् भ्रूविलासानभिज्ञायाः शकुन्तलायाः ईदृशे मन्मनोहारिणि विलोकिते विषये मृगैरेवाचार्यकमनुष्ठितमिवेत्युत्प्रेक्षा। प्रियायाः गुरुभूतेषु कथं धनुर्नमनमिति भावः। केचित्तु प्रियायास्सकाशात् आख्यातोपदेश इति पञ्चमी। कृतः लब्ध इत्यर्थः। ततश्च मृगाणां शिष्यत्वमवसीयत इति मन्यन्ते। "प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या। तया गृहीतं नु मृगाङ्गनाभ्यस्तो गृहीतं नु मृगाङ्गनाभिः" इति कुमारसंभवादुभयमप्युपपन्नं अत्र "तस्याप-रेष्वपि मृगेषु शरन्मुखोः कर्णान्तमेत्य विभिदे निबिडोपि मुष्टिः। त्रासातिमात्रचटुलैः स्मरयद्भिरुच्चैः पौढप्रियानयनविभ्रमचेष्टितानि" इति रघुवंशोक्तप्रकारेण मृगाङ्गनादर्शनेन सादृश्यात् शकुन्तलास्मरणमेव धनुर्नमनप्रयत्नं विहन्तीति स्मृतिमदलङ्कारध्वनिः। **पुष्पिताग्रा वृत्तम्॥**

अत्त भवमिति। अन्यपरस्य सतो मयास्वदुःखनिवेदनं अरण्यरुदितप्रायमित्यर्थः। अनतिक्रमणीयं सुहृदो वचनमिति चिन्तयन्नेव तूष्णीं स्थित इत्यर्थः। चिरमिति आत्म-

राजा—वयस्य तिष्ठ। सावशेषं मम वचः ।

विदूषकः—[1]आणवेदु भवं ।

राजा—विश्रान्तेन भवता ममान्यस्मिन्ननायासे कर्मणि सहायेन भवितव्यम् ।

विदूषकः—[2]किं मोदअखाअणे ? ।

राजा—यत्र वक्ष्यामि ।

विदूषकः—[3]गहीदो खणो ।

राजा—कः कोऽत्र भोः ? ।

प्रविश्य दौवारिकः ।

दौवारिकः—(प्रणम्य ।) [4]आणवेदु भट्टा ।

राजा—रैवतक । सेनापतिस्तावदाह्वयताम् ।

---

[1]आज्ञापयतु भवान् ।

[2]किं मोदकखादने ? ।

[3]गृहीतः क्षणः ।

[4]आज्ञापयतु भर्ता ।

श्रमापनोदनस्य प्रत्युपकारो ब्राह्मणसुलभोयमाशीर्वाद इति भावः । सविशेषं वक्तव्यान्तरवत् न तु समानमित्यर्थः । अन्यस्मिन् मृगयातिरिक्ते । अनायासे न तु मृगयावत् सायासे । कर्मणि शकुन्तलासंग्रह इति भावः । सह अयते प्रवर्तत इति सहायस्तेन सहकारिणा । यत्र यस्मिन् कर्मणि वक्ष्यामि नियोक्ष्ये तत्र सहायेन भवितव्यमित्यनुकूल्यते । क्षणः उत्सवः उद्यम इत्यर्थः । गृहीतः अङ्गीकृतः साहायकं कर्तुमुद्युक्तोस्मीत्यर्थः । 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण' इत्यमरः । द्वारि नियुक्तः दौवारिकः 'तत्र नियुक्त' इति प्राग्वहतीयः ठक् । 'द्वारादीना'मित्यैच् । प्रविश्येति कार्यस्याल्पत्वात् प्रविशतीत्यनुक्तिः । रैवतकेति प्रतीहारनामग्रहणं । आह्वयतामिति । 'वचिस्वपियजा-

दौवारिकः—[1]तह। (इति निष्क्रम्य सेनापतिना सह प्रविश्य।) एसो अण्णावअणुक्कण्ठो भट्ठा इदो दिण्णदिट्ठी चिट्ठइ। उवसप्पदु अज्जो।

सेनापतिः—(राजानमवलोक्य।) अदृष्टदोषे स्वामिनि मृगया केवलं गुणायैव संवृत्ता। तथा हि देवः।

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं
रविकिरणसहिष्णु स्वेदलेशैरभिन्नम्।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति॥ ४॥

---

[1]तथा एष आज्ञापनोत्कण्ठो भर्ता इतो दत्तदृष्टिस्तिष्ठति। उपसर्पत्वार्यः।

दौवारिकेति। दौवारिकस्य संप्रधारणं। आज्ञावचनाय आज्ञां वक्तुमित्यर्थः। 'तुमर्थाच्च भाववचनात्' इति चतुर्थी। उत्कण्ठः उन्नतकन्धरः। इतः अत्र। अदृष्टाः दोषाः राजर्षेर्मृग्यादयः यस्मिन् तस्मिन् स्वामिनि राजनि विषये मृगया व्यसनमप्यघणितापीत्यर्थः। केचित्तु अदृष्टाः दोषाः कदर्थादयो यस्य तस्मिंश्चिति व्याचक्षते। केवलमेकान्तं गुणायैव अनवसादरूपन्यायामगुणायैव संवृत्ता संपद्यमानार्थत्वाच्चतुर्थी। दृष्टदोषीति पाठे दृष्टाः शास्त्रावगताः दोषाः यस्यास्तथाभूतापीति मृगयाविशेषणं। गुणानेवाह—तथा हीति।

अनवरतेति। अनवरतमविश्रान्तं धनुर्ज्यायाः धनुरारूढाया मौर्व्याः 'धनुर्ज्यात्वनौ धनुः श्रुतिरारूढेः प्रतिपत्त्या' इति वामनः। आस्फालनेन आकर्षणेन व्यायामेन क्रूरपूर्वं मेदस्संक्षयात् कठोरवक्षः स्कन्धादिभागमित्यर्थः। रविकिरणानां सहिष्णु सहनशीलं ऊर्जस्वित्वादिति भावः। 'अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचरेष्णुच्' इति सहिष्णुशब्दस्साधुः। अत एव स्वेदलेशैः स्वेदकणैः अभिन्नमसंसृष्टं महापुरुषस्यातिस्वेदो नास्त्येवेत्यत उक्तं लेशैरिति 'अपचितमपि श्रमेण कृशमपि व्यायतत्वात् कृतव्यायामत्वात् कृताभ्यासत्वेन दृढत्वादिति यावत् अलक्ष्यं

(उपेत्य) जयतु स्वामी । निगृहीतश्वापदप्रचारमरण्यं । किमद्यापि स्थीयते ? ।

राजा—सेनापते भग्नोत्साहःकृतोऽस्मि मृगयापवादिना माढव्येन।

सेनापतिः— (जनान्तिकम् ।) सखे स्थिरप्रतिज्ञो भव । अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये । (प्रकाशम् ।) प्रलपत्वेष वैधेयः । ननु प्रभुरेवात्र निदर्शनम् ।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।

कृशमित्यनवरम्यं अव्यायतस्य हि महदुपचयापचयतात्पर्यं स्यात् न तु व्यायतस्येति भावः । अतः प्राणः बलमेव सारः स्थिरांगो यस्य तत् गात्रं शरीरं गिरिचरोनागो गजइव बिभर्ति । उपमाऽलङ्कारः । **मालिनीवृत्तम्** ॥

निगृहीतः निरुद्धः शुनामिव पदानि पादाः येषां तेषां श्वापदानां व्याघ्रवराहादीनां 'शुनो दन्तदंष्ट्यकर्णकन्दवराहपुच्छपदेषु दीर्घो वाच्य' इति श्वापद शब्दसिद्धिः । प्रचारः वनान्तःभ्रमणं यस्मिन् तथाभूतं प्रत्यूषे प्रचारात् प्रागेव परितो ।निरुद्धामित्यर्थः । किं कुतः अद्यापि एतावत्स्वामपि वेलायां स्थीयते मृगया नारभ्यते । किमितीति पाठे इतिर्हेत्वर्थे कस्य हेतोरित्यर्थः । मृगयां अपवदति निन्दतीति मृगयापवादी तेन 'अपवादस्तु निन्दायामाज्ञाविघ्नभयोरपी' ति विश्वः । भग्नोत्साहः कुण्ठितोद्योगः स्थिरा प्रतिज्ञा मृगयापवादविषयिणी यस्य सः स्वामिनः राज्ञः । चित्तवृत्तिं मृगयासक्तिरूपमभिप्रायं अनुवर्तिष्ये चिरपरिश्रान्तस्य विरामभिच्छतोऽपि स्वेनैव प्रतिषेधान्युपगमो मे स्वाधिकारविरुद्ध इति भावः । वैधेयः विधेये विधानं तदधीनः 'तस्येद' मित्यण् । विधिपरतन्त्र इत्यर्थः । 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशा' इत्यमरः । निदर्शनं प्रमाणं निर्णायकः अथवा स्वामिनः शरीरमेवात्र मृगयागुणानां निदर्शनं किमस्यमूर्खस्य निन्दयेति भावः । तदाह—

मेद इति । वपुः मेदसः वसायाः 'मेदस्तु वपा वसे' त्यमरः । छेदेन अपनयेन कृशोदरं तनुमध्यमत एवोत्थान उद्योग योग्यं समर्थं भवति । येनालस्यां-

उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्या हि व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥ ५ ॥

विदूषकः—[1]अत्त भवं पकिदिं आवण्णो। तुमं दाव अडवीदो अडविं आहिण्डन्दो णासिआमिसलोलुवस्स कस्स वि जिण्णरुक्खस्स मुहे णिपडिस्ससि।

राजा—भद्र सेनापते किं बहुना। आश्रमसन्निकृष्टे स्थिताः स्मः। अतस्त्वद्वचनं नाभिनन्दामि। अद्य तावत्।

---

[1]अत्र भवान् प्रकृतिमापन्नस्त्वन्तावदटवीतोऽटवीमाहिण्डन्नासिकामिषलोलुपस्य कस्यापि जीर्णऋक्षस्य मुखे निपतिष्यसि।

गमेर्जयत्वादिरुत्थानपरिपन्थी दोषस्तस्य मेदसो विगमो नाम प्रथमो गुण इति भावः। किञ्च भयक्रोधयोस्सत्त्वोः विकृतिमत् प्राप्तान्यथाभावं सत्त्वानां मृगव्यालादीनां प्राणिनामपि चित्तं लक्ष्यते। मुखनयनादिविकाराणां भयक्रोधलक्षणानामनुदर्शनादयं भीरयं क्रोधन इति सत्त्वेष्वपि व्युत्पत्तिर्जायत इत्यर्थः। गुणान्तरञ्चेदं यदभिनवानेकप्राणिचित्तपरिज्ञानमिति भावः। आप च चले अस्थिरेऽपि लक्ष्ये शल्ये इषवः बाणाः सिद्ध्यन्ति आवितथा भवन्तीति यत् सच धन्विनां धनुरेषामस्तीति धन्विनस्तेषामुत्कर्षातिशयः। चललक्ष्यवेधित्वं चविशेषान्तरमित्यर्थः। मिथ्या वृथैव हि मृगयां व्यसनं वदन्ति नीतिविद इतिशेषः। ईदृक् मृगयासदृशः विनोदः दुःखापनोदनं वस्तु कुतः क्वान्यदस्ति। आश्रयदोष एवारोपितो मृगयायां नीतिविद्भिर्यैर्दुःखापनोदसाधनं दुःखसाधनं गण्यत इति भावः। 'मृगयाक्षा दिवास्वप्नः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गण' इति मनुः। मृगयारूपस्य दोषस्य गुणत्वकल्पनाद्विशालङ्कारः 'लेशस्तु दोषगुणयोर्गुणदोषत्वकल्पन' मिति लक्षणम्। शार्दूलविक्रीडितं वृत्तम्॥

अत्रभवान् राजा। प्रकृतिमापन्नः निवृत्तमृगयापिशाचावेश इत्यर्थः। त्वं तावत् त्वमेव केवलं। नासिकामिषे लोलुपस्य गृध्नोः जीर्णऋक्षस्येति उत्थानाश्रमतया चिरोपोषितस्य यदृच्छोपनतपारणाकाङ्क्षिण इत्यर्थः। मुखे वक्त्रबिले। आश्रमस्य सन्निकृष्टे समीपदेशे। नाभिनन्दामि आश्रमोपरोधप्रसङ्गान्नाङ्गीकरोमि।

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदं च शिथिलज्यावन्धनं सद्धनुः ॥ ६॥

सेनापतिः—यत् प्रभविष्णवे रोचते ।

राजा—तेन हि निवर्तय पूर्वगतान्वनग्राहिणः । यथा च मे सैनिकास्तपोवनं दूरात्परिहरिष्यन्ति तथा निषेद्धव्याः । पश्य ।

गाहन्तामिति । महिषाः शृङ्गैर्विषाणैर्मुहुः पुनः पुनस्ताडितं आमस्तकनिमज्जनादुन्नमितमुखानां तिरश्चीनैः शृङ्गैश्चलद्भिराहतमित्यर्थः । निपीयतेऽस्मिन्निति निपानं सरः तस्य सलिलं गाहन्तां विलोडयन्तु । मृगकुलं हरिणयूथं च छायासु बद्धकदम्बकमारचितमण्डलं मण्डलीभूय निषण्णं सदित्यर्थः । रोमन्थं चर्वितचर्वणं अभ्यस्यतु परिचिनोतु । विस्रम्भादकातरं भवत्विति भावः । वराहाणां ततिभिः समूहैः पल्वले वेशन्तेषु जात्येकवचनं विस्रब्धं यथेच्छं मुस्तानां क्षतिर्ध्वंसः क्रियतां । किं चेदमस्माकं धनुः शिथिलज्याबन्धं विमुक्तगुणबन्धनं सद्विश्रान्तिं निर्व्यापारत्वं लभतां प्राप्नोतु । चिरपरित्यक्तं स्वं स्वं विस्रब्धव्यापारं चापव्यापारोपरमादारभन्तां सत्त्वा इति भावः ॥ धनुषो विश्रमविधिना स्वस्य महत्यपि कर्मण्यश्रमो व्यज्यते । अयं श्लोकः 'अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता । विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते,' इति लक्षयता वामनेनोदाहृतः । 'विस्रब्धं तनुतां वराहवितर्तिर्मुस्ताक्षतिं पल्वले' इति च पाठान्तरम् । **शार्दूलविक्रीडितं वृत्तम्** ॥

प्रभवतीति प्रभविष्णुः 'कर्तरि भुवः खिष्णुचुकञौ' 'रुग्यर्थानां प्रीयमाण' इति चतुर्थी । पूर्वगतान् सत्त्वप्रचारात्पर्वमेव निरोधाय प्रस्थितान् वनग्राहिणः वनरोधकानाटविकान् निवर्तय मृगयाविरामाद्धनग्रहणं मा भूदिति भावः । यथा येन प्रकारेण । सेनां समवयन्तीति सैनिकाः 'समवायान् समवैती'ति ठक् । निषेद्धव्याः । निवर्तयितव्याः कुतः? तदाह—

शमप्रधानेषु तपोधनेषु
गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्यकान्ता-
स्तदन्यतेजोऽभिभवाद्वमन्ति ॥ ७ ॥

सेनापतिः—यदाज्ञापयति स्वामी ।

विदूषकः—[1]धंसिदो दे उसाहउत्तन्दो । गच्छ दासीएउत्त ।

इति निष्क्रान्तः सेनापतिः ।

राजा— (परिजनं विलोक्य ।) अपनयन्तु भवत्यो मृगयावेषं । **रैवतक! त्वमपि नियोगमशून्यं कुरु ।**

परिजनः—[2]जं देवो आणवेदि ।

इति निष्क्रान्तः ।

---

[1]ध्वंसितस्ते उत्साहवृत्तान्तः । गच्छ दास्याः पुत्र ।

[2]यद्देव आज्ञापयति ।

शमेति । शमश्चित्तोपरम एव प्रधानो येषां तेषु तपोधनेषु गूढं बहिरनाविष्कृतं दाहो भस्मीकरणमात्मा स्वभावो यस्य तत् तेजः शक्तिविशेषः अस्ति व्ययाभावादेव पुञ्जितं निवसतीत्यर्थः । तदन्तर्हितं तेजः स्पर्शानुकूलाः स्पर्शयोग्याः सुखस्पर्शा इत्यर्थः । सूर्यकान्ता नाम मणय इव अन्येन क्षात्रादिना तेजसाभिभवादतिलंघनाद्धेतोर्वमन्ति युगपदुत्सृजन्ति । यथा सुखस्पर्शा एव सन्तस्सूर्यकान्तमणयस्सूर्यतेजसाभिभूताः प्रज्वलन्ति तथा मृदवः सन्तो मुनयः परतेजसा परिभवं न मृष्यन्तीत्यर्थः । तेजः पदश्लेषोत्थापितेयमुपमा । **उपजातिवृत्तम्** ।

ध्वंसितः नाशितः, उत्साहवृत्तान्तः मृगयोद्यमवार्ता । परिजनं परिवारं यव नीरूपं । मृगयावेषं बाणासनग्रहणवनपुष्पमालाधारणादिरूपं । नियोगं स्वाधिकारं ।

" Bhagavan Kasyapa is well known as one who always remains in God. Then, how can it be that this your friend is his daughter? ". Anasuya answers that Sakuntala is considered as the sage's daughter merely because he brought her up from her infancy. This fact that the sage is only a foster-father is skilfully utilised for heightening the impression created at Sakuntala' s parting from the hermitage; for Kanva says: "...When such is the grief experienced, even by me a dweller in the wood, because of my affection towards her, how much indeed must householders be afflicted by the fresh pangs of separation from their daughters ?". Even at this moment of mental agitation he easily gains control over himself, for immediately after Sakuntala's departure he attains equanimity and says : "A daughter is surely the property of another ; and having this day sent her to her owner. my heart is free from anxiety and is at ease as if after restoring a deposit (to its owner)". His message to Dushyanta has got the tone of independence which characterises the speeches of the Hindu sages. His power of introspection even while he is overpowered by emotion at the time of his separation from Sakuntala clearly shows his greatness as a sage. Kanva, on the whole, is a delightful figure and is a brilliant contrast to the fierce pride and anger of Durvasa who curses Sakuntala for what is no more than a girlish fault,

Kasyapa : Kasyapa is more of a celestial sage than Kanva, although Kanva is not described in the play as capable of exercising the powers of looking both into the past and into the future. It is a voice in the air that

विदूषकः— (स्वगतम्।) [1]होदु ण से अवसरं दाइस्सं। (प्रकाशम्) भो वअस्स अज्ज तावसकाण्णआ वि अब्भत्थणीआ दीसइ।

राजा—सर्वं न परिहार्यं वस्तुनि पौरवाणां मनः प्रवर्तते।

विदूषकः—[2]ता कहं एदं?

राजा—(निवारितानिमेषाभिर्नेत्रपङ्क्तिभिरुन्मुखः।
नवामिन्दुकलां लोकः केन भावेन पश्यति॥)

[1]भवतु। नास्मै अवसरं दास्यामि। भो वयस्याद्य तापसकन्यकाप्यभ्यर्थनीया दृश्यते।

[2]तत् कथमेतत्?।

आश्रमस्य ललामभूषणमिव तामेव हृदि स्थितामिव। अधिकृत्य विषयीकृत्य तदर्थदृष्टेरप्यार्थकं यत्तदेव हि वस्तु तं गुणीत्तमिति भावः शकुन्तलावृत्तान्तः प्रथममेव विदूषकाय राज्ञा निवेदित इति ज्ञायते अत एवोक्तमत्र तामेवेति। पूर्वं च विदूषक वाक्यं 'तावसकण्णआ सउन्दला णाम मह अवण्णदाए दंसिदा' इति। होदु दर्शनीया स्यादपि नाम। अस्य राज्ञः। अवसरं शकुन्तलागुणवर्णनावकाशं। अद्य अन्तःपुरावरोहे सति नेतः पूर्वमेवमिति भावः। तापसकन्यकापि आरण्यकत्वान्मृगकल्पापीत्यर्थः। अभ्यर्थनीया प्रयत्नप्रार्थनीया। परिहार्यं हेयं वस्तुनि गुणहीने विषय इत्यर्थः। पौरवाणामिति नागरिकाणां जितेन्द्रियाणामित्यभिप्रायगर्भं यज्जितेन्द्रियाणां राज्ञामपि चित्तहारि कथमनादुणोत्तरं न भवतीति भावः। तत् कथमेतत् यदि न परिहार्यं मनः प्रवृत्तिः तर्हि शकुन्तलायां तवायं मनः सङ्गः कथं स्यात्? न हि तपस्विकन्या राजस्पृहणीया भवितुमर्हतीत्यर्थः। राजा समाधत्ते।

निवारितेति। लोकः जनः नवामिन्दुकलामुन्मुख उद्गतवदनो दर्शनोत्कण्ठितो वा सन् निवारितो निषिद्धो निमेषः पक्ष्मपातो यासु ताभिरनिमेषाभिरिति यावत् नेत्रपङ्क्तिभिः केन भावेन पश्यति दर्शनीयं स्वत एव दृष्टिं हरति तत्र किं स्थानकुलाद्यन्वेषणेनेति भावः॥ **अनुष्टुप् वृत्तम्।**

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम् ।
अर्कस्योपरि पतितं च्युतमिव नवमालिकाकुसुमम् ॥ ८ ॥

विदूषकः—(विहस्य) [1]भो वअस्स जह कस्स वि पिण्डखज्जूरेहिं उव्वेजिदस्स तिंतिणीए पहिलासो भवे । तह इत्थिआरयणअणपरिभाविणो भवदो इअं अब्भत्थणा ।

राजा—न तावदेनां पश्यसि । येन त्वमेवमवादीः ।

विदूषकः—[2]तं खु रमणिज्जं एव्व । जं भवदो वि विम्हअं उप्पादेदि ।

[1]भो वयस्य यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्त्रिण्यामभिलाषो भवेत् । तथा स्त्रीरत्नपरिभाविनो भवत इयमभ्यर्थना ।

[2]तत्खलु रमणीयमेव । यद्भवतोऽपि विस्मयमुत्पादयति ।

सुरयुवतीति । सुरयुवतौ मेनकायां सम्भव उत्पत्तिर्यस्य तत् तया सुरयुवत्या उज्झितं त्यक्तं सदधिगतं लब्धं मुनेः काश्यपस्यापत्यं सन्ततिः । यथाच्युतं नवमालिकातो विश्लिष्टं सदर्कस्यार्कवृक्षस्योपरि पतितं नवमालिकाकुसुममिव अतस्संसर्गमात्रेण न तापसकन्यका भवति, दिव्याङ्गना च कथं न प्रार्थनीयेति भावः । वाक्यार्थोपमालङ्कारः ॥ आर्यावृत्तम् ॥

पिण्डखर्जूरैः संघातभूतैः खर्जूरफलैः स्वादुनेतीति भावः । उद्वेजितस्य एकरसासङ्गाज्जडीकृतरसनेन्द्रियस्य तिन्त्रिण्यां पिण्डखर्जूरसदृशे तिन्त्रिणीफले अभिलाषो भवेत् । रसान्तरत्वमत्रादित इति भावः । स्त्रीरत्नपरिभाविनः । उत्तमाङ्गनातिरस्कारिणः दर्शनीयं न दृष्टमिति ह्यवरोधवधूतिरस्कार इति भावः । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते' इत्युक्तं । इयमभ्यर्थना तापसकन्यकाप्रार्थना । विदग्धवनितैकदर्शनस्तवेदं विच्छित्तिविशेषमात्रं, न तु तापसकन्यकायां गुणान्तरं स्यादिति भावः । तावदत्यर्थं एनां शकुन्तलां न पश्यसि न दृष्टवानसि । येनादर्शनेन एवं तिन्त्रिणीसदृशत्वेन । सकृत्पश्यन्नपि नैवं वदेदिति भावः । विदूषकः परमार्थेनाह—तं इति । भवतोपि नागरिकतमस्योपीत्यर्थः । यद्वस्तु विस्मयं अदृष्टपूर्वत्वादाश्चर्यं उत्पादयति जनयति । तत् खलु

राजा—वयस्य किं बहुना ? ।

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन विधिना मनसा कृता नु ?।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ ९ ॥

विदूषकः—[1]जह एव्वं पच्चादेसो दाणिं रूववदीणं ।

राजा—इदं च मे मनसि वर्तते ।

---

[1]यद्येवं प्रत्यादेश इदानीं रूपवतीनाम् ।

रमणीयं तदेव हि दर्शनीयं वस्तु किं मादृशेन द्रष्टव्यतेत्यर्थः । किं बहुना अङ्गप्रत्यङ्गादिवर्णनेन प्रयोजनं नास्तीत्यर्थः । अशक्यवर्णनत्वादितिभावः । संक्षेपेणाह—

चित्र इति । विधिना ब्रह्मणैव कर्त्रा रूपोच्चयेन सौन्दर्यसारोद्बृहणेन वर्णद्रव्योद्बृहणेन च उद्बृंहितेन रूपेण करणेनेति यावत् । चित्रे आलेख्ये निवेश्य संस्थानमाधाय परिकल्पितसत्त्वयोगा विहितप्राणयोजना किं । करस्पृष्टं हि नैवमाविष्टं रूपं भवतीति भावः । चित्रातिशायित्वाभिसन्धानाद्ह । मनसेति । मनसा कृता नु मानसी सृष्टिर्नेत्यर्थः । विधिना रूपोच्चयेनेतीहापि सम्बध्यते । मनस्सङ्कल्पितेन रूपसारसमुच्चयेसृष्टा किमित्यर्थः । कुत इदमवगतं इ तदाह । स्त्रीरत्नेति । धातुर्ब्रह्मणो विभुत्वं सर्वथापि निर्माणकौशलं तस्याः शकुन्तलाया वपुरालेक्यसदृशं शरीरञ्च अनुचिन्त्य आलोच्य सा स्त्रीरत्नसृष्टिः शकुन्तलानिर्मितिरपरा विलक्षणा मे प्रतिभाति ॥ चित्र इत्यनेन नयनाधरकपोलकुन्तलाधवयवेषु प्रत्यग्रच्छायत्वं मनसेत्यनेन च मनोहरत्वं व्यज्यते । चित्रसृष्टित्वमानससृष्टित्वोत्प्रेक्षाद्वयेत्थापिता भेदकातिशयोक्तिः । अपरेत्यनेन तस्याएव सृष्टेरन्यत्वप्रतिपादनात् 'भेदकातिशयोक्तिः स्यात्सैवान्यत्ववर्णनमि'ति लक्षणात् ॥ **वसन्ततिलकं वृत्तम्** ।

रूपवतीनामवरोधवधूनां प्रत्यादिश्यतेनेनेति प्रत्यादेशः । अपकर्षहेतुः । इदं च वक्ष्यमाणं च मे मनसि वर्तते हृदयान्नापैति ॥ किं तादित्याह—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ? ॥१०॥

अनाघ्रातमिति । अनघं अपेताशयदोषं अन्यत्सर्वं 'भेकं हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्क' इति न्यायेन स्तोकतया दोषाणामस्तोकतया च गुणानां प्रशस्यते, इदं पुनरन्यदेवेति भावः । तस्याः शकुन्तलायारूपं अन्यानादरणीयः आकृतिविशेषः अनाघ्रातं केनचिदप्यननुभवनीयगन्धं पुष्पं कुसुममिव यथा हि 'पुष्पं सौरभमयमेवं गुणमयमिति भावः । अनाघ्रातपदेन वनकुसुमवदगृहीतत्वादविदितं बहिः, यत्स्वयं वराणामपि न सुलभं नरेन्द्रकन्यानामिति व्यज्यते । तथा, कररुहैरिव लूनमच्छिन्नं किसलयं अभिनवरागोदयात् नागरिकपरिग्रहे महार्हवेषभूषणविलासादीनां पुष्पभूतानां सम्भवाच्च पल्लवभूतमिति भावः । कररुहैरलूनं किसलयं यथा कार्पण्यादिनासृष्टं प्रयत्नदर्शनीयमेव मार्ग्यकर्मण्यगतं तच्च कस्यापि विदितमिति व्यज्यते । तथा च, अनाविद्धमनुल्लिखितं रत्नं रत्नशब्देन लावण्यरूपकान्तिविशेषशालित्वं राज्ञामपि श्लाघ्यायमाणत्वमक्लिष्टकान्तित्वं चाभिव्यज्यते । आकरस्थं हि रत्नमविदितगुणं न आदृष्टानां दृष्टिपथं यातीत्युक्तमनाविद्धमिति । एवं अनास्वादितः कैश्चिदप्यसितो रसो यस्य तत् इदमेवं रसमित्येतावदप्यननुभूतपूर्वमित्यर्थः । नवं मधु मधु वत इदं ह्यात्मात्मानं विस्मार्यत्यतोऽपूर्वं मधु तदप्यज्ञातगुणत्वादनुपभुक्तपूर्वमिति भावः । एकरसं नानारसमित्यादिवदत्र गुणमात्रपरो रसशब्दः । अपि च, पुण्यानां भोक्तुमुकृतानां समुदितानां अखण्डं एकं फलमिवेत्युत्प्रेक्षा । एकैकगुणं पुण्यादिह, इदं तु समग्रगुणमिति व्यतिरेकादन्यदेवेदं किमपि प्रत्येकलवदत्तफलानां विगलितानां महाभाग्यस्य भोक्तुर्भागधेयानां समवेतानां स्वर्गादिवदेकं फलमिति भावः । कस्तर्हि भोक्तेत्याह — कमिति । कं पुनः पुरुषमिह रूपे विषये भोक्तारमनुभवितारं अनुभवितृत्वेनेत्यर्थः । विधिर्नियतिः समुपस्थास्यति आनुकूल्येन प्राप्स्यतीति न जाने । यां विना सदपि माध्याद्यादिकं वितथमिव, तां लब्धैव कृतार्थोऽन्मलाभ इति भावः । मनुष्यलोक एव स्वर्गोयं यदेवंविधस्य दिव्यरूपस्यावासरिति च व्यञ्जितं । मालारूपकोत्प्रेक्षयोरसंसृष्टिः । **शिखरिणी वृत्तम् ।**

विदूषकः—[1]तेण हि लहु परित्ताअदु णं भवं । मा कस्स वि इंगुदीतेल्लचिक्कणसीसस्स आरण्णअस्स हत्थे पडिस्सदि ।

राजा—परवती खलु तत्रभवती । न चं सन्निहितो गुरुजनः ।

विदूषकः—[2]अह अत्तभवन्दं अन्दरेण कीरिसो से दिट्ठिराओ ?।

राजा—निसर्गादप्रगल्भस्तपस्विकन्याजनः । तथापि तु ।

---

[1]तेन हि लघु परित्रायतामेनां भवान् । मा कस्यापि इंगुदीतैलचिक्कणशीर्षस्यारण्यकस्य हस्ते पतिष्यति ।

[2]अथात्रभवन्तमन्तरेण कीदृशोऽस्या दृष्टिरागः ? ।

तेन हि तथारूपत्वेन हि । लघु क्षिप्रमेनां शकुन्तलां परित्रायतां रक्षतु । किमत्राहितं यतस्त्रायेतेत्याह, मा खु इति । इंगुदीतैलेन चिक्कणशीर्षस्य संसृष्टशिरोरुहस्य अमनोरमस्येत्यर्थः । अरण्ये भव आरण्यकः 'अरण्यान्मनुष्या' इति वुञ् । मा खलु पतिष्यति न पतेदित्यर्थः । नन्वर्थ मेत्यव्ययं 'लृट् शेषे चे'ति चकारादनुक्तसमुच्चयाद्विध्यादिष्वपि लृट् । परवती गुरुपराधीना अतो स्वेच्छया प्रवर्तितुं प्रभवति येन लघु परित्राणावसर इति भावः । गुरुर्वा सदृशवरलाभे किमित्युदासीत, अतः प्रार्थतामित्यत आह । न चेति, गुरुरेव जनः, पितेत्यर्थः । अथेति प्रश्नद्योतकं । अत्र भवन्तमन्तरेण त्वामुद्दिश्येत्यर्थः 'अन्तरान्तरेण युक्त' इति द्वितीया । अत्र च 'अन्तरान्तरेण शब्दौ निपातौ साहचर्याद्दृश्येते । आभ्यां योगे द्वितीयाविभक्तिर्भवति । तत्रान्तराशब्दो मध्यमाधेयप्रधानमाचष्टे । अन्तरेणशब्दस्तु तच्च विनार्थं च । अन्तरा त्वां च मां च कमण्डलुः, अन्तरेण त्वां च मां च कमण्डलुः । अन्तरेण पुरुषकारं न किञ्चिल्लभ्यत' इति काशिकातोऽन्तरेणत्यस्यायमर्थो यद्यपि न लभ्यते । तथापि रागस्यामूर्तस्य विषयिणो विषयाधेयतया तस्य च प्राधान्यमेव मन्यत्वमित्यभिप्रायादन्ययानामनेकार्थत्वाद्वा न दोषः । अस्याः शकुन्तलायाः दृष्टिरागश्चक्षुःप्रीतिः । स हि निदानं प्रणयस्येति भावः । निसर्गेण स्वभावत एव शालीनः अधृष्टः । शालाप्रवेशमर्हतीति शालीनः 'शालीनकौपीनेऽधृष्टाकार्ययो'रिति निपातनात् खन् । तपस्विकन्याजन इति, न हि राजकन्याजन इव प्रगल्भस्तपस्विकन्याजनः येन भावाविष्कार इति भावः । तथापि अधृष्टत्वे सत्यपि तु ।

अभिमुखे मयि संहृतमाशिनं हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः ॥

विदूषकः—[1]किं णु खु सा दिट्ठमत्तस्स तुह अङ्कं आरोहदि ?।

राजा—मिथस्सखीभ्यां प्रस्थाने शालीनतयापि भूयिष्ठमाविष्कृतो भावः । तथा हि—

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ १२ ॥

[1]किं नु खलु सा दृष्टमात्रस्य तवाङ्कमारोहति ?।

अभिमुख इति । मय्यभिमुखे अवलोक्यति सति ईक्षितं तया प्रथमप्रहितं दर्शनं संहृतमाक्षिप्तं । अतः प्रथमदृष्टिपातो रागलक्षणमिति भावः । हसितमन्येन निमित्तेन कृतोदयं अवज्ञात्यवृत्त एव हसिते निमित्तान्तरं व्याजीक्रियत इत्यर्थः । हसितोदयश्च रागलिङ्गमिति भावः । अतः उक्तहेतुभ्यां विनयेन लज्जानिबन्धनेनात्मसंयमनेन वारितवृत्तिर्निषिद्धप्रसरः पुनः पुनः प्रक्रान्तप्रसर एव निरुद्ध इत्यर्थः । मदनो न विवृतः निवारणादनाविष्कृतः । न च संवृतः अवज्ञप्रवृत्ततया च न निश्शेषं गृहितः । लक्ष्यत एवास्या रागो न तु निश्चीयतइति भावः । द्रुतविलम्बितं वृत्तम् ।

दिट्ठमत्तस्सेति । प्रथमानुरागे स्वल्पतावदेव बहुनां सर्वासामेव स्त्रीणामिति भावः । मिथ इति मिथः पृथक् मां विहायेत्यर्थः । सखीभ्यां सह प्रस्थाने आश्रमप्रतिगमनविषये शालीनतया अभूष्णुतया प्रस्थानाक्षमतयैवेत्यर्थः । भूयिष्ठमित्यर्थं भाव आविष्कृतः प्रकटीकृतः । प्रस्थानाक्षमतैवानुरागपिशुना संवृतेत्यर्थः ।

दर्भेति । तन्वी शकुन्तला कति चिदेव पदानि गत्वा अकाण्डे अनिमित्त एव चरणो दर्भाङ्कुरेण कुशसूच्या क्षतो विद्ध इति स्थिता पदान्तरमगता । द्रुमाणां पश्चादतिक्रान्ततरूणां शाखासु विटपेष्वसक्तं वस्तुतोऽनुपलक्षमपि वल्कलमुत्तरीयचीरं

विदूषकः—[1]जइ एव्वं गहीदपाहेओ होहि। किदं तुए दाणिं तवोवणं उववणं ति पेक्खामि।

राजा—सखे तपस्विभिः कैश्चिदिहस्थैः परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन सकृदप्याश्रमपदं प्रविशामः।

विदूषकः—[2]को अवरो अवदेसो। णं भवं राआ।

राजा—ततः किं?।

विदूषकः—[3]णीवारसट्ठाभाअं अरण्णआ अम्हाणं उवहरंदु त्ति।

राजा—अन्यद्भागधेयमेतेषां रक्षणे निपतति। यद्रत्नराशिनपि विहायाभिनन्द्यम्। पश्य।

([1]यद्येवं गृहीतपाथेयो भव। कृतं त्वयेदानीं तपोवनमुपवनमिति पश्यामि।

[2]कोऽपरोऽपदेशः। ननु भवान् राजा।

[3]नीवारषष्ठभागमारण्यका अस्माकमुपहरन्त्विति।

विमोचयन्ती विमुच्यमानमभिनयन्ती सती विवृतवदना मदभिमुखीभूतमुखी आसीच्च। अतश्च स्पष्टमाविष्कृतो भाव इति तात्पर्यम्। **वसन्ततिलकं वृत्तम्।**

यद्येवं त्वयि चेद्भद्रमाशा। गृहीतं पथि साधु पाथेयं 'तत्र साधु'रित्यधिकारे 'पथ्यतिथिवसतिस्वपतेर्ढञ्' येन सः। भवेति एकाकिनः शकुन्तलानुरोधेन चिरावस्थानार्थमिति भावः। उपवनं मदनकोलस्थानमित्यर्थः। पश्यामि जानामि। कैश्चित् मृगवधनिषेधप्रवृत्तैस्तापसैरभिस्तेनागमादिभीतैश्च कतिपयैरित्यर्थः। इहस्थः आश्रमस्थितः। चिन्तय तावत् प्रथममालोचय। किं तच्चिन्तनीयं? आह—केनेति। अपदेशेन व्याजेन सकृत् पुनरेकवारमपि। अभिमतं हि पुनःप्रवेशः सन्देहाय स्यात् इहस्थताज्ञानं च तस्यैव दार्ढ्यायेति भावः। राजेति, राज्ञः पाल्येषु किमपदेशान्तरेणेति भावः। ततः किं राज्ञोऽपि पाल्येषु नानासावसरं दर्शनं युक्तमिति भावः। नीवाराणां षष्ठं भागं राजग्राह्यं बलिं आरण्यका मुनयः उपहरन्तु ददत्वित्येवास्त्यपदेश इत्यर्थः। एतेषामारण्यकानां रक्षणे अन्यत् नीवारषष्ठांशादतिरिक्तं भागधेयं भागः ग्राह्यांश इति यावत्। अत्र भाग-

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम् ।
तपःषड्भागमक्षय्यं ददात्यारण्यको जनः ॥ १३ ॥

नेपथ्ये ।

हन्त सिद्धार्थौ स्वः ।

राजा—(कर्णदत्वा ।) **अये धीरप्रशान्तः स्वरः तपस्विभिर्भवितव्यम् ।**

प्रविश्य दौवारिकः ।

धेयमिति नपुंसकलिङ्गप्रयोगाद्बलिरित्यर्थो न भवति 'भागधेयः करो बलि'रिति तस्य सुकृतविशेषस्य भूयांसोऽपि रत्नराशयो न तुलामधिरोहन्ति किं प्रजानिवारषड्भाग इत्यर्थः । 'भागरूपनाम्नो धेयः' ।

यदिति । नृपाणां सम्बन्धि यत्फलं करूपं वर्णेभ्यः वृत्तिक्षेत्रेभ्यः 'वर्णवर्णक्रियाविस्तारगुणवचने'ष्विति धातुपाठात् 'सुवर्णं वर्णयती'त्युदाहरणाच्च वस्तुनि गुणाधानरूपवर्णक्रियालक्षितं क्रियामात्रमाश्रित्य प्रवृत्तो वर्णशब्दो वृत्तिकारानाचष्टे धर्मो हि द्विविधो वृत्तिनियतः केवलश्च, आद्यो वर्णः अथापर आश्रमः तदाशयेनोक्तं रघुवंशेऽपि 'तपो हि मूलं स विघ्नैभ्यस्तस्करेभ्यश्च संपदः । यथाश्रमाश्रमैरेके वर्णैरपि षडंशभाक्' इति । उत्तिष्ठत्युद्गच्छति अत्रोद्धारूपस्य कस्य तत्तद्व्यवहारस्य ऊर्ध्वक्रियारूप एवाभिमतः ततश्च 'दोनूर्ध्वकर्मणी'ति नात्मनेपदं । तत्र ह्यनूर्ध्वकर्मणोऽस्य विवक्षणे 'प्रीहायामेवे'ति कृतं वार्तिके । ईहा च कृतिरूप आत्मगुणः । अत्रोदाहरणं 'मुक्त्वा तिष्ठत'इति । 'आमाच्छतमुत्तिष्ठती'ति च प्रत्युदाहरणं । तत् वर्णेत्थितं फलं द्रविणादिरूपं क्षयि क्षयशीलं । आरण्यकस्तु जनः मुनिजनः अक्षय्यं क्षेतुमशक्यं तपसः षष्ठभागं षष्ठमंशं । वृत्तिविषये संख्यायाः पूरणार्थत्वमनुमतं । ददाति । स्वेन पोषेण वा क्षेतुमशक्यं महाफलं विहाय क्षयिष्णु फलमल्पं प्रेक्षावतः कथमेषपीयं स्यात् अतो नायमपदेशः प्रकाशयितुं युक्तमिति भावः ॥ **अनुष्टुप् वृत्तम् ॥**

सिद्धार्थाविति । राजसन्निकर्षान्निर्विघ्नेष्टिरूपप्रयोजनाविति यर्थः । राज्ञश्चिन्तासमकालं वचनं कांक्षितसिद्धिदर्शनार्थं । धीरप्रशान्त इति स्वरस्य धीरत्वं नामाक्षिप्ताशयत्वाद-

दौवारिकः—[1]जेदु भट्टा । एदे दुवे इसिकुमारा पडिहारभूमिं उवट्ठिदा ।

राजा—तेन ह्याविलम्बितं प्रवेशय तौ ।

दौवारिकः—[2]अअं पवेसेमि

(इति निष्क्रम्य ऋषिकुमाराभ्यां सह प्रविश्य ।)

[3]इदो इदो भअवंदौ ।

उभौ राजानं विलोकयतः ।

प्रथमः—अहो दीप्तिमतोऽपि विश्वसनीयता वपुषः । अथ वाऽपपन्नमेतदृषिभ्यो नातिभिन्ने राजनि । कुतः ।

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।

---

[1]जयतु भर्ता । एतौ द्वौ ऋषिकुमारौ प्रतिहारभूमिमुपस्थितौ ।

[2]अयं प्रवेशयामि ।

[3]इत इतो भगवन्तौ ।

संवृतत्वं दुःश्रवत्वरूपं । प्रशान्तत्वं च रागरोषायुपहितकालुष्यवर्जितत्वं । प्रतिहारभूमिं द्वारदेशं । 'अहो' इत्यर्थे । दीप्तिमतोऽपि प्रशस्ततेजसोऽपि वपुषः शरीरस्य विश्वसनीयता विस्रम्भार्हता अनुद्वेजनीयतेति यावत् । सूर्यादिवद्दीप्तिमान् दुर्दर्शो भवति. सौम्यदर्शनश्च पाषाणादिवद्भिन्नेता एवेति विरुद्धधर्मसमावेशोयमाश्चर्यं इत्यर्थः । उपपन्नमिति । अविवेकिनामैश्वर्यमदादविश्वसनीयत्वं न तु विवेकिनामिति भावः । नातिभिन्न इति असक्तस्सन्नेव राज्यसुखं विहितमित्ययमनुभवति अविहितमिति मुनयस्त्यजन्तीत्यावदन्तरमिति भावः साम्यमुपपादयति—

अध्याक्रान्तेति । अमुना राज्ञापि मुनिनेवेत्यपेरर्थः । सर्वेषां भोग्ये अनुभाव्ये ऋषीणां सर्वत्र ममकारविरहादिति भावः । आश्रमे तपोवने राजपक्षे तु गृहस्थाश्रम इत्यर्थः । सोऽपि ह्याश्रमान्तराणामुपजीव्यः । यतउक्तं 'कालोह्ययं संक्रमितुं द्वितीयं

अस्यापि द्यां स्पृशति वशिनश्चारणद्वंद्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥१४॥

द्वितीयः—गौतम अयं स बलभित्सखः पार्थिवो दुष्यन्तः ।

प्रथमः—अथ किम् ।

द्वितीयः—तेन हि ।

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।

सर्वोपकारक्षममाश्रम ते' इति । अयमपि (मुनिरिव) स्वा वर्णाश्रमधर्मपरिपालनमेव योग उपायः (मुनीनां समाधरिव) तस्माद्धेतोः प्रत्यहं तपः संविनोति संपादयति । अस्यापि (मुनेरिव) चारणानां देवयोनिविशेषाणां द्वन्द्वैः स्त्रीपुंसरूपैर्मिथुनैर्गीतः पुण्यः पावनो मुनिरिति शब्दः द्यां स्पृशति । केवलं राजपूर्वः (राजशब्दपूर्वकः मुनिशब्दः राजर्षिरिति शब्द इत्यर्थः । राजर्षिरयं वयमृषय इत्येतावता विशेषः मुख्यायनमिषङ्गेण धर्मपरतया च नान्यदुभयोरन्तरं, यतो दीक्षितोऽपि विश्वशनीयत्वं नाश्नर्यमिति भावः । व्यतिरेकालङ्कारः 'व्यतिरेको विशेषश्चेदुपमानोपमेययोः' इति लक्षणम् । स च अथ वेति पूर्वोक्ताश्चर्यत्वनिषेधादाक्षेपालङ्कारेण संसृज्यते 'आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणा' इति च तल्लक्षणम् ॥ **मन्दाक्रान्ता वृत्तम्** ।

सः श्रुतपूर्वः बलभिद् इन्द्रस्य सखा बलभित्सखः 'राजाहः सखिभ्यष्टच्' पृथिव्या ईश्वरः पार्थिवः । दुष्यन्तः किमित्यर्थः काकुः । अथ किमित्यङ्गीकारे । तेन हि दुष्यन्तत्वेनैव नैतच्चित्रमित्यभिप्रेणान्वयः ।

नैतदिति । नगरपरिघवत्पुरगोपुरार्गलवत्प्रांशुबाहुर्दीर्घबाहुरयं राजा एकः अद्वितीयस्सन् निस्सपत्न इति यावत् उदधिना श्यामा सीमा अन्तो यस्यास्तां कृत्स्नां धरित्रीं महीं भुनक्ति पालयति । 'भुजपालनाभ्यवहारयोः' इति धातोः 'भुजोऽनवने' इत्यात्मनेपदविधानादवनार्थात्परस्मैपदं । यदेतदेकस्य सतः कृत्स्नधरित्रीपालनं तच्च चित्रं नापूर्वं । कुतः हि यस्मात् दैत्यैः सत्तवैराः संवद्ध विरोधाः वैरशब्दो वैरकार्ये वर्तते ततश्च बन्दीकृता इत्यर्थः । सुरयुवतयः अधिज्ये अस्य राज्ञो धनुषि पौरुहूते इन्द्रसं

आशंसन्ते सुरयुवतयः सक्तवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥ १५ ॥

उभौ—(उपगम्य।) **विजयस्व राजन्।**

राजा—(आसनादुत्थाय।) **अभिवादये भगवन्तौ।**

उभौ—**स्वस्ति भवते।** (इति फलान्युपहरतः।)

राजा—(सप्रणामं प्रतिगृह्य।) **आज्ञापयितुमिच्छामि।**

उभौ—**विदितो भवानाश्रमवासिनामिहस्थः। तेन भवन्तं प्रार्थयन्ते।**

राजा—**किमाज्ञापयन्ति?**।

बन्धिनि वज्रे च विजयमाशंसन्ते निश्चयेनाभिकाङ्क्षन्ति। स्त्रीणामपद्यष्याशंसनाद्विजयस्याव्यभिचारो दर्शितः। धनुर्वज्रयोः समुच्चयेन धनुषो वज्रसादृश्यं प्रतीयते, धनुषः प्रथमनिवेशादाशंसनस्य धनुष्येव प्राधान्यं, ततश्च वज्रातिशायित्वं व्यज्यते। धनुर्ग्रहणात् 'सेना परिच्छदस्तस्य द्वयमेवार्थसाधनं। शास्त्रेष्वव्याहता बुद्धिर्मौर्वी धनुषि चा तता' इत्युक्तं सहायान्तरनिरपेक्षं विजयित्वं स्फुटीकृतं। 'आशंसन्ते समितिषु सुरा' इति पाठे समितिषु युद्धेषु सुरा देवा इत्यर्थः। तुल्ययोगितालङ्कारः 'गुणोत्कृष्टैः समीकृत्य वचोन्या तुल्ययोगिते' त्युद्भटलक्षणः। अनेन नैतच्चित्रमित्यस्य समर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्ग' मिति लक्षणम्। **मन्दा क्रान्तावृत्तम्** ॥

स्वस्ति भवते 'नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्चे' ति चतुर्थी। उपहरतः उपदीकुरुतः 'रिक्तहस्तेन नोपेयाद्राजानं देवतां गुरु' मिति शासनानुरोधादिति भावः। सप्रणामं मुनिगौरवादिति भावः। आज्ञापयितुं आज्ञापनमित्यर्थः। अव्ययकृतां भावार्थत्वात्। इच्छामीति 'तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे'। इतिवदाज्ञां निर्वर्त्यैव महदर्शनफलं निर्वृत्तमात्मनो भवेदिति भावः। तेन इहस्थ इति विदितत्वेन। नगरस्थस्य तु नोपरोधं चिकीर्षेयुरित्यर्थः। प्रार्थयन्ते न त्वाज्ञापयन्तीत्यर्थः। किमाज्ञापयन्तीति। आज्ञा हि नाम श्रेयसां स्वविधेयेषु कनीयः प्रवर्तनं, प्रार्थनञ्च कनी-

उभौ—तत्र भवनः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि न इष्टिविघ्नमुत्पादयन्ति । तत्कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति ।

राजा—अनुगृहीतोऽस्मि ।

विदूषकः—(अपवार्य ।) [1]इअं दाणिं अणुऊला अब्भत्थणा ।

राजा—(स्मितं कृत्वा ।) रैवतक मद्वचनादुच्यतां सारथिः । सबाणक मुक्तं रथमुपस्थापयेति ।

दौवारिकः—[2]जेदु भट्टा । जं देवो आणवेदि ।

इति निष्क्रान्तः ।

उभौ—(सहर्षम् ।)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि ।
आर्तानामभयस्त्रेषु दीक्षिताः खलु पौरवाः ॥ १६ ॥

---

[1]इयमिदानीमनुकूला अभ्यर्थना ।

[2]जयतु भर्ता । यदेव आज्ञापयति ।

यस्तं स्वार्थे व्यापारः प्रवर्तनं अतश्च तपस्विनां विघ्नेयभूतस्य मंयमाज्ञेव मदिच्छेयति भावः । असन्निधानात् मोमनीयमतस्तामन्निकर्षात् । सन्निहिते तु तस्मिन्न रक्षांसि प्रभविष्यन्तीति भावः । कतिपयरात्रं काश्चिद्रात्रीः । अत्यन्तसंयोगे द्वितीया । सारथिः द्वितीयः सहायो यस्य तेन । आयुधसहचित्यधिकपाठे आयुधं सहायवतीति अयवक् सहकारि यस्य तेन चेत्यर्थः 'सहस्य साध्र' इति सध्रयादेशः । सनाथीक्रियता मिति एकवीरस्यैवातैव पर्याप्तमिति भावः । अनुगृहीतः आज्ञालाभात् कृतार्थः । इयं तपस्विसंबन्धिनी अभ्यर्थना आश्रमावस्थानप्रार्थना इदानीं आश्रमप्रवेशापदेशान्वेषणसमये । स्मितं शृङ्गारानुकूलव्यञ्जनं । उभौ तापसौ ।

अनुकारिणीति । पूर्वेषां ययातिप्रभृतीनां पूर्वपुरुषाणामनुकारिणि सदृशे त्वयि इदं रक्षाभ्युपगमनं युक्तरूपं प्रशस्तं युक्तं । आपन्नानां शरणागतानामभयेष्वेव

राजा—(सप्रणामम्।) गच्छतां पुरो भवन्तौ। अहमप्यनुपद मागत एव।

उभौ—विजयस्व। इति निष्क्रान्तौ।

राजा—माढव्य अप्यास्ति शकुन्तलादर्शने कुतूहलम्?।

विदूषकः—[1]पढमं सपरिवाहं आसी। दाणिं रक्खसउत्तन्देण विन्दू वि णावसेसिदो।

राजा—मा भैषीः। ननु मत्समीपे वर्तिष्यसे।

विदूषकः—[2]एसो रक्खसादो रक्खिदोम्हि।

प्रविश्य दौवारिकः।

---

[1]प्रथमं सपरिवाहमासीत्। इदानीं राक्षसवृत्तान्तेन बिन्दुरपि नावशेषितः।

[2]एष राक्षसाद्रक्षितोऽस्मि।

सत्रेषु यज्ञेषु पौरवा राजानो दीक्षिताः खलु अग्न्यागतरक्षणं यज्ञदीक्षावदायासेनाप्यवर्जनीयः कुलधर्मो युष्माकमिति भावः। काव्यलिङ्गमलंकारः 'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थन' मिति लक्षणम्। अनुष्टुप् वृत्तम्।

पदस्य पश्चादनुपदमिति पश्चादर्थेऽव्ययीभावः। अनन्तरमेवेत्यर्थः। आगत एवेति 'आशंसायां भूतवच्चे' ति सिद्धं। कुतूहलमौत्सुक्यं। अप्यास्त किमस्ति। प्रथमं राक्षसवृत्तान्तात्पूर्वं सपरिवाहमभितमित्यर्थः। राक्षसवृत्तान्तेन इष्टविघ्नक रप्रस्तावेन हेतुना बिन्दुः कणोऽपि। नावशेषितः यथा पूर्णं सपरिवाहं सरः कुतश्चिद्विभवतटं जलबिन्दुमात्रेणापि रहितं शुष्यति तथास्मि संवृत्त इति भावः। मम रक्षितुस्समीपे पार्श्वतः अतो मा भैषीरिति संबन्धः। एषः त्वत्समीपवर्ती सन्नित्यर्थः।

दौवारिकः—[1]जेदु भट्टा । सज्जो रण्णो भट्टिणो विअअपत्थाणं अवेक्खदि । एसो उग्ग णअरादो देवीणं आणत्तिहरो करभओ उवट्ठिदो ।

राजा—(सादरम्) किमस्माभिः प्रेषितः ? ।

दौवारिकः—[2]अह इं ।

राजा—ननु प्रवेश्यताम् ।

दौवारिकः—[3]तह । इति निष्क्रम्य करभकेण सह प्रविश्य । एसो भट्टा उवसप्प ।

करभकः—(उपसृत्य) [4]जेदु भट्टा । देवीओ आणवेन्ति । आआमिणि चउत्थे दिअहे णिव्वुत्तपालणो उववासो वह भविस्सदि ।

---

[1]जयतु भर्ता । सज्जो रण्णो भर्तुर्विजयप्रस्थानमपेक्षते । एष पुनः नगरादेवीनामाज्ञप्तिहरः करभक उपस्थितः ।

[2]अथ किम् ।

[3]तथा एष भर्ता । उपसर्प ।

[4]जयतु भर्ता । देव्य आज्ञापयन्ति । आगामिनि चतुर्थे

राक्षसादित 'भीत्यर्थानां भयहेतु'रित्यपादानत्वात् ल्यप् । विजयप्रस्थानं राक्षसनयार्था यात्रा । अपेक्षते प्रतिपालयति । देवीनां मातुः । करभको नाम । देवीशब्दस्यावरोधसाधारण्यादाज्ञप्तिपदसूचितमादाय पृच्छति किमस्माभिरिति । पूजायां बहुवचनं अत एव मामेत्येकवचनं देवीलेखे । ननु प्रवेश्यतां प्रवेश्यतामेवेत्यर्थः । किमिति विवार्यैव इत्यादरातिशयं दर्शयति ननुशब्दः । आगामिनि भविष्यति चतुर्थे लेखादिनादाय त्रीणि दिनान्यतीत्येत्यर्थः । निर्वृत्ता समाप्ता पारणा व्रतान्तभोजनं यस्य सः उपवासो व्रतं ।

तहिं दिअहे दीहाउणा अवस्सं संणिहिदेण होदव्वं त्ति ।

राजा—इतस्तपस्विकार्यम् इतो गुरुजनाज्ञा । द्वयमप्यनतिक्रमणीयम् । किमत्र प्रतिविधातव्यम् ।

विदूषकः—[1]तिसंकू विअ अंतराले चिट्ठ ।

राजा—अलं परिहासेन । सत्यमाकुलीभूतोस्मि ।

कृत्ययोर्मिथः देशत्वाद्द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ॥ १७॥

दिवसे निर्वृत्तपारण उपवासो मम भविष्यति । तस्मिन् दिवसे दीर्घायुषावश्यं सन्निहितेन भवितव्यमिति ।

[1]त्रिशङ्कुरिवान्तराले तिष्ठ ।

भविष्यतीति 'धातुसम्बन्धे प्रत्ययाः' इति भविष्यदर्थधातुयोगान्निर्वृत्तेति भूतार्थोपि क्त प्रत्ययो भविष्यदर्थः । दीर्घायुषा त्वया । सन्निहितेन समीपस्थितेन । इतः एकतः । तपस्विकार्यं इष्टविघ्ननिवारणरूपं अप्रत्याख्येयमित्यर्थः । इतः अन्यतः गुरुजनस्याज्ञा, सापि गरीयसीत्यर्थः । किमित्यव्ययं केन प्रकारेणेत्यर्थः । 'किं प्रश्नाक्षेपकुत्सासु तत्रैव च किमव्ययं' इति नानार्थरत्नमाला । अत्र कृत्यद्वयसङ्कटे प्रतिविधातुं शक्यं । उभयमप्याविरोधेन समाधेयमित्यर्थः । अथ वा किमत्र प्रतिविधानमित्यर्थः । 'बहुलग्रहणाद्भावार्थे तव्यप्रत्ययः । तिसंकू विअ इति । स हि दिवः पतितो भुवमगतश्च, तथेत्यर्थः । अन्तराले नगरतपोवनयोर्मध्ये उभयचिन्तया क्वचिदप्यनवस्थानादिति भावः । सत्यमिति, नेदं शकुन्तलां चिन्तयतः कार्यद्वयासक्तिविडम्बनं येन परिहासावसर इति भावः । आकुलीभूतः सन्दिग्धबुद्धिः ।

कृत्ययोरिति । कृत्ययोरवश्यकर्तव्ययोस्तपस्विकार्यगुरुजनशासनयोः भिन्नदेशत्वाद्विप्रकृष्टस्थानगतत्वाद्वेतोर्मे मनः द्वैधीभवति सन्दिग्धं भवति । तद्यथा, पुरः अग्रतः गन्तव्यस्थान इत्यर्थः । शैले प्रतिहतं प्रतिबद्धप्रसरं स्रोतावहो नद्याः सम्बन्धि

(विचिन्त्य ।) सखे त्वमम्बाभिः पुत्र इति परिगृहीतः । स भवानितः प्रति निवृत्य तपस्विकार्यव्यग्रतां निवेद्य तत्र भवतीनां पुत्रकृत्यमनुष्ठातुमर्हति ।

विदूषकः—[1]मा खु मं रक्खोभीरुअं गणेसि ।

राजा—(सस्मितम्) भो महाब्राह्मण कथमेतत् भवति संभाव्यते।

विदूषकः—[2]तेण हि जह राआणुएण गंदव्वं तह गमिस्सं ।

राजा—तपोवनोपरोधः परिहरणीय इति सर्वाननुयात्रिकान् त्वया सह प्रस्थापयामि ।

---

[1]मा खलु मां रक्षोभीरुं गणयसि ।

[2]ते न हि यथा राज्ञानुजेन गन्तव्यं तथा गमिष्यामि ।

स्रोतः प्रवाह इव । तदपि प्रतिबन्धजलाग्रतः प्रवर्तते उपरि च जलवेणी वेगोपनिपातान्न पश्चात्प्रतिनिवर्तत इत्यर्थः । अत्र 'कि 'त्रितियोगविभागादन्यदपि क्रियन्तमनुपतं अतश्च स्रोतोवह इति रूपसिद्धिः । अन्यथा हि वाह ऊठि स्रोतौह इति स्यात् । के चित्तु स्रोतोवहाशब्दादणमभिसन्धाय स्रोतोवहमिति पठन्ति । तत्र शब्दालङ्कारवैरस्यं । रामायणे 'यदतीतं पुनर्नैति स्रोतः स्रोतोवहो यथे 'त्युक्तमिह प्रकृतानुगुणमुपात्तामिति यथोक्त एव युक्तः पाठः । अनुष्टुप् वृत्तम् ।

पुत्र इति परिगृहीतः मद्वयस्यत्वात्पुत्रभावेनाभिमतः । इतो वनात् प्रतिनिवृत्य राजधानीं प्रतिप्रस्थाय । तपस्विकार्ये क्रतुरक्षणरूपे व्यग्रतां व्यापृतां निवेद्य मदप्रतिनिवृत्तिहेतुं ज्ञापयित्वा तत्रभवतीनामम्बानां पुत्रकृत्यं पुत्रेण कर्तव्यं सहावस्थानेन व्रतनिर्वर्तनरूपं । मा खु इति । मां रक्षोभीरुं न गणयसि खल्वित्यर्थः । भवतः प्रतिनिधिर्गमिष्यामि । न तु भयादिति गमनस्य केवलराजकार्यार्थत्वमाविष्कर्तुं । महाब्राह्मणेति, ब्रह्मतेजसि दीप्यमाने कुतो रक्षोभयस्यावसर इति नर्मोक्तिः । तेन हि पुत्रकृत्यार्थमेव गन्तव्यत्वेन हि यथा राजानुजेन गन्तव्यं तथा गमिष्यामि सवाहनपरिच्छदो गमिष्या-

विदूषकः—[1]तेण हि जुवराओम्हि दाणिं संवुत्तो ।

राजा—(आत्मगतम् ।) चपलोऽयं वटुः । कदाचिदस्मत्प्रार्थनामन्तः पुरेभ्यः कथयेत् । भवतु । एवमेनं वक्ष्ये । (विदूषकं हस्ते गृहीत्वा । प्रकाशम् ।) वयस्य महर्षिगौरवान्नाश्रमं गच्छामि । न खलु सत्यमेव तापसकन्यकायां शकुन्तलायां समभिलषः । पश्य ।

क्व वयं क्व परोक्षमन्मथो
मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं सखे
परमार्थेन न गृह्यतां वचः ॥१८॥

[1]तेन हि युवराजोस्मीदानीं संवृत्तः ।

मीत्यर्थः । सर्वानुयात्रिकान् सैनिकान् न तु वाहनपरिच्छदमात्रमित्यर्थः । तेन सेनासमेतत्वेन हि युवा यासौ राजा च युवराजः न केवलं राजानुजमात्रं समग्रसेनापुरस्सरत्वादधिकारस्थो युवराज एव संवृत्तोस्मीत्यर्थः । वटुर्बालिशः चपलः अनवस्थितचित्तः स्वैरजल्पीति यावत् । अस्मत्प्रार्थनां शकुन्तलाभिलाषं । कथयेत् जातोत्साहो ब्रूयात् नत्वात्मानं नियच्छेदित्यर्थः । एवं वक्ष्यमाणप्रकारेण वक्ष्ये एवंविधानां प्रतारणमेवोपायः यतः स्त्रीषु हि सर्वकल्पेषु लोभनं न दोषं इति हृदयं । हस्ते गृहीत्वेति प्रत्ययार्थं । महर्षिगौरवात् न तु शकुन्तलां द्रष्टुमित्यर्थः । न खलु सत्यमेवेति, त्वदभिप्रायज्ञानाय मृषोक्तमित्यर्थः । तर्हि परस्परविरुद्धयोः पूर्वोत्तरवाक्ययोः कतरत्प्रमाणं गृह्यतामित्याह—

क्वेति । वयमत्यर्थनागरिकवृत्तयः क्व । परोक्षमन्मथः अविदितस्मरकथः कुतः? मृगशावैस्समभेधितोभिवृद्धो जन आरण्यकः क्व? मृगमानुषाणामिवारण्यक नागरिकाणां का कथानुरागस्येत्यर्थः । विरूपघटनारूपो विषमालङ्कारभेदः । तर्हि किमिति भवता वितथमुक्तं? तदाह—परिहासेति, सखे इति परिहासस्यानौचित्यपरिहारार्थं । परिहासार्थं

विदूषकः—[1]अह इं ।

इति निष्क्रान्ताः सर्वे ।

॥ इति अभिज्ञानशाकुन्तले द्वितीयोऽङ्कः ॥

---

[1]अथ किम् ।

विलपितं निरर्थमेवोक्तं वचः मद्वाक्यं परमार्थेन यथार्थत्वेन 'मुद्रादीनां धर्मपरत्वमनुमन्यत' इति भट्टाभिनवगुप्तपादाः । न मृष्यतां गोपादीयतां । अनुपपन्नार्थं पूर्ववाक्यमुपपन्नार्थेनानेन वाक्येन बाधितमिति भावः । पञ्चमाङ्के शाकुन्तलप्रत्याख्याने राज्ञो विदूषकेणाप्रतिबोधनं समर्थयितुमिद मुपन्यस्तम् ॥ वियोगिनी वृत्तम् ॥

॥ इति शाकुन्तलव्याख्याने सहृदयसमाख्याने द्वितीयोऽङ्कः ॥

॥ अथ तृतीयोऽङ्कः ॥

ततः प्रविशति यथानिर्दिष्टशिष्यः कुशानादाय ।

शिष्यः—अहो महानुभावः पार्थिवो दुष्यन्तः । यत्प्रविष्टमात्र एवाश्रमपदं तत्रभवति निरुपप्लवानि नः कर्माणि संवृत्तानि ।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः ।
हुङ्कारेणेव धनुषः स हि विघ्नानपोहति ॥१॥

यावदिमान्वेदिसंस्तरणार्थान् दर्भानृत्विग्भ्य उपहरामि । (परिक्रम्यावलोक्य च । आकाशे ।) प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवन्ति च

॥ अथ तृतीयाङ्कस्याऽऽरम्भः ॥

राज्ञः शकुन्तलासमागमेहनुभावं वासं प्रसङ्गयिष्यन् वृत्तवर्त्तिष्यमाणार्थं संग्रहरूपं विष्कम्भमाचष्टे. तत इति । महान् अनुभावो महिमा यस्य सः । प्रविष्ट मात्रे सत्येव मात्रपदेन युद्धव्यावृत्तिः । निरुपप्लवानि निर्विघ्नानि ।

केति । बाणसन्धाने धनुषि गुणसंयोजने का कथा का प्रसक्तिः । हि यतः स राजा धनुषो हुं कारेणैव स्थितेन ज्याशब्देनैव गुणध्वनिमात्रेण विघ्नान्नक्षःप्रभृतीन् दूरतः अपोहति असन्निकृष्टानेव निरस्यति 'उपसर्गादस्त्यूह्योः' इतिविभाषितं परस्मैपदं । अर्थापत्तिरलङ्कारः । हुंकारौपम्यं तपोमहिमप्रदर्शनार्थं । अयं हि तपसो महिमा यत्पुनर्हुङ्कारमात्रेण प्रतिपक्षनिरसनं । यथा रघुवंशे 'तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः । प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः' इति । न केवलं प्रभावादनुभावादपि महानिति भावः । **अनुष्टुप् वृत्तम् ॥**

वेद्यास्संस्तरणायच्छादनायेमे वेदिसंस्तरणार्थास्तान् । क्रतुमृतौ वा यजन्तीति ऋत्विजस्तेभ्यः । 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां' च इति रूपं । उपहरामि **यच्छामि** । आकाश इति । आकाशलक्षणमुक्तं 'किं ब्रवीयेवमित्यादि विनापात्रं ब्रवीति

नलिनीपत्राणि नीयन्ते । (श्रुतिमभिनीय । किं ब्रवीषि ? ।) आतपलङ्घनाद्बल-वदस्वस्था शकुन्तला । तस्याः शरीरसन्तापनिर्वापणायेति । तर्हि यत्नादुपक्रम्यताम् । सा हि कुलपतेरुच्छ्वसितं । अहमपि वैतानिकं शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि ।

(इति निष्क्रान्तः ।)

॥ शुद्धविष्कम्भः ॥

ततः प्रविशति कामयमानावस्थो राजा ।

राजा—

जाने तपसो वीर्यं मा बाला परवतीति मे विदितम् ।
अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम् ॥२॥

यत् । श्रुत्वेवानुत्कण्ठ्यैकस्तत्स्यादाकाशभाषित' मिति । उशीरसहितमनुलेपनं अङ्गरागः इति मध्यमपदलोपी समासः समाहारो वा । मृणालवन्ति समूलोत्खातानीत्यर्थः । मृणालानां वलयादिरूपेणोपयोगाद्विशेषणं । आतपस्य लंघनात् आक्रमणात् । बलवत् दृढं । अस्वस्था व्याकुला । शरीरसंतापस्य निर्वापणाय प्रशमनाय इति किं ब्रवीषीति सम्बन्धः । यत्नात् अनुपेक्षणात् उपक्रम्यतां, प्रतिक्रियतां, उपक्रमशब्दः चिकित्सायां प्रयुज्यते । उच्छ्वसितं जीवितं । वितानं भवं वैतानिकं 'क्रतुयज्ञेभ्यश्चे' ति ठञ् । शान्त्युदकं शान्त्याख्यस्य शुद्धिकर्मणस्तीर्थोदकं । अस्यै इति 'कर्मणा यमभिप्रैती' ति संप्रदानतया चतुर्थी । विसर्जयिष्यामि प्रेषयिष्यामि । शुद्धविष्कम्भ इति 'वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः' इति विष्कम्भलक्षणं । प्राकृतासङ्कीर्णं शुद्धविष्कम्भः । कामयमानस्येव अवस्था अरतिचिन्तानिश्वासादिः यस्य सः । प्रविष्टमात्र एवेत्यादिना सूचितो राज्ञः प्रवेशः । कामयमानत्वं च शकुन्तलादर्शनात् प्रभृत्येव विदितं । तमेवावस्थां व्यनक्ति ।

जान इति । तपसः वीर्यं तेजोन्तरमभिभवसहत्वं जाने सा बाला परवती पितृपरतन्त्रेति च मे विदितं ज्ञातं । न मया प्रवर्तितव्यं तपसो महाप्रभावत्वात् । नच

(मदनबाधां निरूपयन्।) भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः। p. v. 5.

कुतः।

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान्वज्रसारीकरोषि ॥३॥

तयापि प्रवर्तितव्यं पितृपरतन्त्रत्वात् इत्यसम्भावनीयायां मनोरथ इति ज्ञातमित्यर्थः। ननु तर्हि निराशा परमं सुखं तत्राह—अलमिति। तथापि एवं विदितेऽपि ततश्शकुन्तलातः इदं एवमासक्तं हृदयं निवर्तयितुं नालमस्मि न समर्थोस्मि। विदितेष्वपायानवसरे परस्परानुरागो वस्तुनश्च स्पृहणीयता चित्तस्याशाबन्धनमिति भावः। चिन्ता नाम व्यभिचरी भावः। तल्लक्षणमुक्तं 'ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत्' इति। सत्यपि निवर्तने हेतौ निवर्तनरूपकार्यानुत्पत्त्या विशेषोक्तिरलङ्कारः॥ आर्या वृत्तम्।

निरूपयन् अभिनयन्। भगवन्निति सर्वातिशायिमहिमव्यञ्जनं। कुसुमायुधेति विश्वसनीयतादिहेतुव्यञ्जनं 'क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे' इति च व्यञ्जितमनेन। 'क्व नु खलु हृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधं। मृदुतीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि' इति खलूक्तं मालविकाभिमित्रे। चन्द्रमसा चेति, आह्लादकेनापीति भावः। चन्दि आह्लादन इति धातुनिष्पन्नो हि चन्द्रमशब्दः। विश्वसनीयाभ्यां उक्तहेतुतो विस्रम्भार्हाभ्यामेव सद्भ्यां। कामिजनानां सार्थः समूहः अतिसन्धीयते प्रतार्यते गूढशत्रुर्हि सुतरां दुस्साध इति भावः। तदेव विशदयति।

तवेति। तव सम्बन्धि कुसुमशरत्वं इन्दोश्शीतरश्मित्वं चेति द्वयमिदं धर्मद्वयं ममेव विधा प्रकारो येषां तेषु मादृशेषु विरहिषु विषये यथाभूतः अर्थो यस्य तत् यथार्थं तन्नभवतीत्ययथार्थं रूढिमत्रं दृश्यते। तथा हि। इन्दुः हिमगर्भे येषां तैः मयूखैः अग्निं विसृजति आपातप्रतीतेन शैत्येन विश्वसनीयैरेव किरणैः फलानुमेयं तापं जनयति, इति विरूपकार्योत्पत्तिरूपो विषमालङ्कारः। त्वमपि कुसुमबाणान् अवज्रसारानपि वज्रसारान्

[भगवन् कामदेव न ते मय्यनुकोशः । मदनबाधां निरूप्य। कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत् ? । आः ज्ञातम् ।

अद्यापि नूनं हरकोपवह्नि-
स्त्वयि ज्वलत्यौर्व इवाम्बुराशौ ।
त्वमन्यथा मन्मथ मद्विधानां
भस्मावशेषः कथमित्थमुष्णः ? ।।]

सारो येषां तथा संपद्यमानान् करोषि । अत्र विरोधालङ्कारः । अग्निविसर्जनवज्रसारीकरणयोरसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिश्च । सम्बोधनीयेऽर्थे वाक्यार्थपर्यवसानस्य चारुत्वातिशयात् प्रथमप्रक्रान्तस्यापि मन्मथस्य त्वमपीत्यादिना चरमं निगमनं यथा च मेघसन्देशे 'हस्ते लीलाकमलमलके बालकुन्दानुविद्धं नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः । चूडापाशे नवकुरवकं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनां' इति सम्बोध्य मेघे वाक्यार्थपर्यवसानं शरदृतुप्रक्रमेण कृतम् ॥ **मालिनी वृत्तम् ।**

भगवन् कामदेवेत्यारभ्य भस्मावशेषः कथमित्थमुष्ण इत्यन्तं प्रश्निसमपि व्याख्यायते । कुसुमायुधस्य सतः न तु पुनरद्याप्यायुधान्तरं गृहीतवत इत्यर्थः । तैक्ष्ण्यं उग्रत्वं । आ इति ज्ञाततया हर्षः । ज्ञातमिति तैक्ष्ण्यनिमित्तमिति शेषः । तदाह—

अद्येति । हरस्य कोपवह्निः अम्बुराशौ और्वः बडबाग्निरिव त्वय्यद्यापि ज्वलति । नूनमिति सम्भावनायां । नह्यनिःशेषितदाह्यो दहनश्शाम्यति । दाह्यश्च त्वं समुद्र इव चीयसे । अतोऽद्यापि ज्वलतीत्युत्प्रेक्षा । इयं च हरकोपाग्नित्वेन आत्मसन्तापरूपस्य वस्तुनोऽध्यवसानात् स्वरूपोत्प्रेक्षा । नूनं पदप्रयोगाच्च वाच्या । हे मन्मथ अन्यथा ज्वलनाभावे भस्मावशेषः भस्ममात्रशेषः । शान्तप्रज्वलन इति यावत् त्वं मद्विधानां विरहिणां एवं अनेन प्रकारेण कथमुष्णः । न हि भस्मनो दाहशक्तिरस्ति दाहान्यथानुपपत्त्या च ज्वलनमवसीयत इत्यर्थापत्तेः प्रमाणालङ्कारः । स चोत्प्रेक्षाङ्गं, अतस्तयोरङ्गाङ्गिभावेन सङ्करः । **उपजातिः वृत्तम्** । दुःखस्यापि सुखरूपत्वं विषयवशादुपपादयति ।

अथ वा ।

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे ।
यदि मदिरायितनयनां तामधिकृत्य प्रहरतीति ॥

[भगवान् कन्दर्प एवमुपलब्धस्य ते न मां प्रत्यनुक्रोशः ।
वृथैव सङ्कल्पशतैरजस्रमनङ्ग नीतोसि मया विवृद्धिम् ।
आकृष्य चापं श्रवणोपकण्ठे मय्येव मुक्तं तव बाणमोक्षः ॥]

अनिशमिति । अनिशमजस्रं मनसो रुजं पीडां आवहन्नपि अपिर्विरोधे ।

मकरकेतुः मन्मथः मे मम अभिमतः प्रिय एव । कुतस्तदाह—मदिरेति । मदिरेव आयत्त इति मदिरायितौ मदकरौ नयनौ यस्यास्तयाभूतां तां शकुन्तलामधिकृत्य विपरीतीकृत्य प्रहरति इति यदि इत्येतत् स्याच्चेत् शकुन्तलाधिकारः प्रहरोपि यदि भवेत् प्रिय एव स्यादिति भावः । मदिरायतनयनामिति पाठस्तु ग्राम्यादिकः । 'उपमानानि सामान्यवचनै'रिति समासस्यात्र सम्भवात्, मदिरानयनयोः मदकरत्वमेव हि सामान्यं, न त्वायत्तत्वं, तस्य मदिरधर्मत्वाभावात् । के चित्तु मदिरे मदकरे आयते च नयनौ यस्यास्तामिति मन्यन्ते । अत्र मदिरशब्दस्य विशेष्यानघस्य सद्भावादित्यः । परे तु मदिरौ मत्तस्त्रज्ञाविव आयते नयने यस्याः सा 'मदिरो मत्तस्त्रज्ञा' इति शब्दस्त्रावजीति वदन्ति । अन्ये तु यदि शब्दमवधारणार्थं मन्यमानाः तामधिकृत्य प्रहरतीत्येव अनेन हेतुनैव अभिमत इत्यर्थः इति च मन्यन्ते ।

आर्या वृत्तम् ।

भगवन्नित्यादि बाणमोक्षइत्यन्तं प्राक्षिप्तं । उपालब्धस्य निन्दितस्य ते मां प्रत्यनुक्रोशो दया न भवति यस्त्वयुपालब्धोपि निरनुक्रोशः स किं पुनरुपालब्ध इति भावः ।

वृथैवेत्यादि । अनङ्ग मया सङ्कल्पशतैः बहुभिर्मनोरथैः अजस्रमविरतं वृथैव निष्फलमेव विवृद्धिमुपचयं नीतः प्रापितोसि । अङ्गवतो हि पोषणे महानायासः किमुतानङ्गस्य केवलैर्मनोरथैरेव पोषणायेति भावः । न केवलं वैफल्यमात्रं प्रत्युत विपरीतफलमपीत्याह । आकृष्येति श्रवणोपकण्ठे चापमाकृष्य मय्येवा वृद्धिहेतावेव तव बाण-

(सखेदं परिक्रम्य) क नु खलु संस्थिते सवनकर्मणि सदस्यैरनुज्ञातः क्लान्तमात्मानं विनोदयामि । (निश्वस्य) किं नु खलु मे प्रियदर्शनादृते शरणमन्यत् । यावदेनामन्विच्छामि । (सूर्यमवलोक्य ।) इमामुग्रातपां वेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति । तत्रैव तावद्गच्छामि ।

[(परिक्रम्यावलोक्य च ।) अनया बालपादपवीथ्या सुतनुरचिरं गतेति तर्कयामि । कुतः ।

संमीलन्ति न तावद्बन्धनकोपास्तयावचितपुष्पाः ।
धौरस्निग्धाश्चामी दृश्यन्ते किसलयच्छेदाः ॥]

मोक्षः युक्तं न्याय्यः युक्तमित्यव्ययम् । सामान्ये नपुंसकं वा । विनोदयिष्यामीत्यर्थायां नौ युक्तमित्यर्थः । उपजातिः वृत्तम् ।

संस्थिते समाप्ते सति । सदसि साधवः सदस्याः ऋत्विजः तैरनुज्ञातः गन्तुमनुमतोऽहं क्लान्तं विरहक्षिन्नं आत्मानं मनः । विनोदयिष्यामि विश्रामयिष्यामि । प्रियादर्शनादृते शकुन्तलादर्शनं विहाय 'अन्यारादितरर्ते' इति पञ्चमी । अन्यत् शरणं रक्षकं 'शरणं गृहरक्षित्रोः' इत्यमरः । शरण्यमिति पाठान्तरं शरणे साधिवित्यर्थः । यावदन्विच्छामि अन्वेषिष्यामि । उग्रं आतपो यस्यां तां वेलां गमयतीत्यन्वयः । लतावलयवत्सु लतामण्डपसनाथेषु मालिनीतीरेषु तापापहेत्यर्थः । तत्रैव तावद्गच्छामीत्यनन्तरं प्रश्लिष्टं । बालपादपानां वीथ्याश्रेणीमार्गेण सुतनुः शकुन्तला अचिरं इदानीमेव । तर्कयामि अभ्यूहामि ।

संमीलन्तीति । तया शकुन्तलयावचितानि पुष्पाणि येभ्यस्ते बन्धनकोशाः वृन्तद्वेष्यः तावत् समग्रे न संमीलन्ति संकुचन्ति । अमी किसलयानांछेदाः भङ्गाश्च भूमिपतिता इति भावः । धौरेण स्निग्धाः आर्द्राः दृश्यन्ते । अश्रमचिरगतेति भावः । एतावत्प्रश्लिष्टम् । स्पर्शसुखं पवनजनितं त्वगिन्द्रियनिर्वाणं । अहो इति हर्षे । प्रवातेन प्रभूतेन वायुना सुभगः सुखः । उद्देशः प्रदेशः ।

(परिक्रम्य स्पर्शमभिनीय स्थित्वा।) अहो प्रकृतिसुभगोऽयमुद्देशः।

शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्।
अङ्गैरनङ्गतपैरविरलमालिङ्गितुं पवनः॥ ४॥

(परिक्रम्यावलोक्य।) सत्यमस्मिन्वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया शकुन्तलया भवितव्यम्। तथा हि।

अभ्युन्नता पुरस्ताद्वगाढा जघनगौरवात्पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥ ५॥

यावदिदमन्तरित एवावलोकयामि (परिक्रम्य तथा कृत्वा।) अये लब्धं नेत्रनिर्वाणं। एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधि

शक्यमिति। अरविन्देः मालिनीह्रदप्रभेदैः सुरभिर्घ्राणतर्पणः, मालिनीतरङ्गाणां कणान् पृषतान् वहतीति तथोक्तः। पवनः अनङ्गतप्तैः अङ्गैः अवयवैः कणैः अविरलं गाढं आलिङ्गितुं प्राप्तुं शक्यं शक्यत इत्यर्थः 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतं' इत्यादिवत्। शक्यमिति भावे यत्। साधनं वा। 'शक्यमञ्जलिभिः पातुं वाताः कैतकगन्धिनः' इति च रामायणे। आर्या वृत्तम्॥

वेतसैः परिक्षिप्ते परिवृते। सन्निहितया अवस्थितया भवितव्यम्।

अभ्युन्नतेति। पुरस्तादग्रभागे अभ्युन्नता भारविरहादुत्तानाः पश्चात् गुल्फप्रदेशे जघनयोः गौरवात् दुर्वहत्वाद्धेतोः अवगाढा निम्ना अभिनवा सद्यः कृता पदानां पङ्क्तिः परंपरा पाण्डुसिकते श्वेतरसंशालनेन विमलधूलिने अस्य लतामण्डपस्य द्वारे दृश्यते। अत्रैव सन्निहितया भवितव्यमिति सम्बन्धः। अनुमानालङ्कारः॥ आर्या वृत्तम्॥

विधात्रैवान्तिकः निर्वृतिः। अये इति हर्षे। नेत्रयोर्निर्वाणं सुखं। मनोरथेन प्रियतमा न पुनर्विरहः अपत्रिहणात्। सकुसुमास्तरणं कुसुमसमयाच्छादनसहितं, शिलापट्टं शिलातलं। अधिशायिता 'अधिशीङ्स्थासां' इति कर्मत्वाद् द्वितीया। सखीभ्यामन्वा-

शयाना सखीभ्यामन्वास्यते । भवतु । श्रोष्यामि तावदासां विस्रम्भकथितानि । (विलोकयन् स्थितः ।)

ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला ।

सख्यौ—(उपवीज्य ।) [1]हला सउन्दले अवि सुहाअंदे णलिणीपत्तवादा ? ।

शकुन्तला—[2]किं मं वीजअंदि सहीओ ।

सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः ।

राजा—बलवदस्वस्था तत्र भवती शकुन्तला दृश्यते । तत्किमातपदोषः स्यात् ? उत यथा मे मनसि वर्तते ? । अथवा कृतं सन्देहेन ।

[1]हला शकुन्तले अपि सुखायन्ते नलिनीपत्रवाताः ? ।

[2]किं मां वीजयतस्सख्यौ ।

स्यते अन्वासनेन सेव्यते । आसेरूपूर्वस्य सकर्मकत्वाभिसन्धानात् कर्मणि लकारः । अत एवोक्तं भवदेवेऽपि 'अन्वासितमन्धत्या स्वाहयेव हविर्भुजे' इति । विस्रम्भेण कथितानि रहस्यजल्पितानि । यथ निर्दिष्टो व्यापारः शिरःपद्मिनीपत्रव्यजनसलिलसेचनादिर्यस्याः सा । उपवीज्य नलिनीपत्रैर्वीजयित्वा । अपि सुखायन्ते अपि सुखं भवन्तीत्यर्थः । अपि सुखाय ते नलिनीपत्रवाता इति पाठे भवन्तीति शेषः । सुखायेति सेव्यमानत्वाच्चतुर्थी । वात इति पाठे सुखायत इत्येकं पदं । किं ममेति । तापातिरेकादनुपलम्भः । विषादं सखीसन्तापात् खेदं । नाटयित्वा मुखवैवर्ण्यादिनाभिनीय । परस्परमवलोकयत इति अन्तस्सन्तापेन भवितव्यं येन बहिरुपचाराणां वितथीभाव इत्यवलोकनाभिप्रायः । तदस्वास्थ्यं किमातपस्य सम्बन्धी दोषः बाधा । आतपजन्यो दोष इत्यर्थः । उत अथ वा यथा मे मनसि वर्तते स्वाभिप्रायेण चिन्त्यते तथा स्यात् । मदनदोषो वेत्यर्थः । 'मदनदोषो वा स्यात् । उभयथापि मे मनसि वर्तत' इति क्वचित्पाठः ।

7. स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायाः सावाधं तदपि कमनीयं वपुरिदम् ।
सखे तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥६॥

प्रियंवदा—(जनान्तिकम् ।) [1]अणसूए तस्स राएसिणो पढमदंसणादो आरहिअ पज्जुसिआ विअ सउंदला । किं णु खु तण्णिमित्तो अअं आतङ्को भवे? ।

अनसूया—[2]सहि मह वि ईरिसी आसङ्का हिअअस्स । होदु पुच्छिस्सं दाव णं ।

---

[1]अनसूये तस्य राजर्षेः प्रथमदर्शनादारभ्यपर्युत्सुकेव शकुन्तला । किं नु खलु तन्निमित्तोयमातङ्को भवेत्? ।

[2]सखि ममापि ईदृशी आशङ्का हृदयस्य । भवतु प्रक्ष्यामि तावदेनाम् ।

स्तनेति । स्तनयोर्न्यस्तमर्पितं उशीरं नलदं यस्य तत् प्रशिथिलं प्रतिक्षणं प्रकोष्ठकार्श्यच्छरीरसन्तापग्लानतया च विस्रस्तबन्धं मृणालरूपमेकमेव वलयं यस्य तत् प्रियायाः इदं वपुः आबाधया सह वर्तत इति सावाधं सव्यथं । तदपि तथापि कमनीयं मनोरमं । मनसिजश्च निदाघश्च तयोः प्रसरयोः व्यापनयोस्ततोः तापः कामं यद्यपि समः तुल्यरूपः । अतिभूमिं गतः कामो निदाघो वा निर्विशेषं दुनुत इत्यर्थः । युवतिषु विषये ग्रीष्मस्य पराद्धं राध्यतेर्हिंसार्थात् सिद्धभावे क्तः अपराधस्तु, तु शब्दो मनसिजापराधं व्यावर्तयति, नैवं सुभगस्सुन्दरः । यथात्यर्थपीडितमपि शरीरं न मनागपि सौभाग्यं मुञ्चति, तथा मदनबाधैवेयं न ग्रीष्मताप इति निश्चीयत इति भावः । अनुमानं नाम सन्ध्यङ्गमिदं 'अङ्गैरूहोनुमानं' स्यादिति लक्षणात् । अनुमानालङ्कारश्च । शिखरिणी वृत्तम् ।

प्रथमदर्शनादारभ्य आश्रमप्रविष्टस्य प्राथमिकदर्शनात् प्रभृति । पर्युत्सुका अत्यर्थमुत्कण्ठितेव । शृङ्गारलज्जासाध्वसासूयादिभिर्लक्षितेति भावः । तन्निमित्तः औत्सुक्यहेतुकः अयमातङ्को रोगः । किं नु खलु इति सम्भावनायां ।

प्रियंवदा—(प्रकाशम्।) [1]सहि किं वि पुच्छिदव्वासि। बलिअं खु दे सन्दावो।

शकुन्तला—(पूर्वार्धेन पुष्पशयनादुत्थाय।) [2]हला किं वत्तुकामासि?।

अनसूया—[3]हला सउंदले अणब्भन्तरा खु वअं मअणगदस्स उत्तंदस्स। किं दु जारिसी इदिहासणिबन्धणेसु कामआमाणाणं समवत्था सुणिअदि। तारिसिं दे पेक्खामि। कहेहि। किंणिमित्तो एसो दे आआसो?। विआरं खु परमत्थदो अजाणिअ अणारम्भो पडिआरस्स।

---

[1]सखि किमपि प्रष्टव्यासि। बलवान् खलु ते सन्तापः।

[2]हला किं वक्तुकामासि?।

[3]सखि शकुन्तले अनभ्यन्तराः खलु वयं मदनगतस्य वृत्तान्तस्य। किन्तु यादृशी इतिहासनिबन्धनेषु कामयमानानां समवस्था श्रूयते। तादृशीं ते पश्यामि। कथय। किन्निमित्तं एष ते आयासः?।(विकारंखलु परमार्थतोऽज्ञात्वा अनारम्भः प्रतिकारस्य) ।२

किमपि प्रष्टव्यासीति। दुहादित्वादप्रधाने कर्मणि तव्यप्रत्ययः। ते सन्तापः संज्वरः बलवान् प्रतीकारातीत इत्यर्थः। अतो रहस्यमपि प्रष्टव्यासीति भावः। पूर्वार्धेन शरीरपूर्वभागेन। शयनादुत्थायेति शयनमवष्टभ्यार्धेनोत्थायेत्यर्थः। शरीरसादादसमग्रमुत्थानं। सखीवचनश्रवणादरेण चार्धोत्थानं। मदनं गतः प्राप्तः मन्मथविषयः, तस्य वृत्तान्तस्य कामयमानचेष्टितस्य मनोवृत्तिविशेषस्य। वयं तापसकन्यकाः। अनभ्यन्तराः बाह्याः अविषयीभूता इत्यर्थः। इतिहासनिबन्धनेषु पुरावृत्तप्रबन्धेषु। कामयमानानां उत्कण्ठितानां समवस्था दशा। तादृशीं श्रुतसदृशीं पश्यामि साक्षादनुभवामि। विकारं रोगं परमार्थतः याथातथ्येन। प्रतीकारस्य चिकित्सायाः अनारम्भः अप्रयत्नः आरम्भो न युज्यत इत्यर्थः। तर्कः मदनबाधेत्येवंरूप ऊहः।

राजा—अनसूयामप्यनुगतो मदीयस्तर्कः। (न हि स्वाभिप्रायेण मे दर्शनम्।)

शकुन्तला—(आत्मगतम्।) [1]बलिअं खु मे अहिणिवेसो। एदाणं वि सहसा ण सक्कुणोमि णिवेदेदुम्।

प्रियंवदा—[2]सहि सुट्ठु एसा भणादि। किं अत्तणो आदङ्कं उवेक्खसि। अणुदिअहं खु परिहीअसि। अङ्गेहिं। केवलं लावण्णमईछाआ तुमं ण मुंचइ।

राजा—अवितथमाह प्रियंवदा। तथा हि।

---

[1]बलवान् खलु मे अभिनिवेशः। एतयोरपि सहसा न शक्नोमि निवेदयितुम्।

[2]सखी सुष्ठु एषा भणति। किमात्मन आतङ्कमुपेक्षसे। अनुदिवसं खलु परिहीयसे अङ्गैः। केवलं लावण्यमयी छाया त्वां न मुञ्चति।

अनसूयामप्यनुगतः प्राप्तः। उभयोरप्यत्र संवादात् तथ्यमिदं भवितुमर्हतीति भावः। (स्वाभिप्रायेण सम्भोगाभिलाषेण दर्शनं कल्पनं।) इदञ्च वाक्यं प्रक्षिप्तं। अभिनिवेशः अनुरागः बलवान् दृढः। एतयोरपि विस्रम्भस्थानभूतयोस्तव्ययोरपिसहसा झटिति निवेदयितुं न शक्नोमि लज्जातिरेकाच्च समर्थोस्मि। सहेत्यनेन निवेदनमगत्या प्राप्तमिति व्यज्यते। आतङ्कं मानसं आधिं। किमुपेक्षसे प्रतिकर्तुं न यतसे। अनुदिवसं दिने दिने अङ्गैः परिहीयसे मुच्यसे क्षीयमाणा भवसीत्यर्थः। केवलं लावण्यमयी लावण्यरूपा छायाकान्तिरेव त्वां न मुञ्चति 'मुक्ताफलेषूच्छ्वायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते' इत्युक्तलक्षणायाश्छायाया अनपोहान्मदन बाधेति व्यज्यते। अवितथं परमार्थम्।

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा ।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥१०॥

शकुन्तला— (सलज्जम् ।) [1]सहि कस्स वा अण्णस्स कहइस्सं । किंदु आआसइत्तआ दाणिं वो भविस्सं ।

---

[1]सखि ! कस्य वा अन्यस्य कथयिष्यामि । किन्तु आयासयित्रिका इदानीं वां भविष्यामि ।

क्षामेति । आननं मुखं क्षामक्षामौ म्लानप्रकारौ प्रकारे द्विर्वचनं । अत्यन्तदुर्बलाविति यावत् । कपोलौ यस्य तत् । उरो वक्षः काठिन्येन मुक्तौ शरीरकार्श्येनामांसलत्वान्मृदुलौ स्तनौ यस्य तत् । मध्यः क्लान्ततरः निसर्गकृशोपि कृशतरः । अंसौ प्रकामविनतौ स्वभावसस्तावेव शरीरसादात् सातिशयावनतौ । च्छविर्देहकान्तिः पाण्डुराधवला । अपरिपोषाच्छिथिलसानचन्द्रिकेव पाण्डिमासादितेत्यर्थः । तदेवं शोच्या च अस्वस्थतया शोचनीया च । प्रियदर्शना च । तनिम्नापि शोभाहेतुनादर्शनीया च, इयं शकुन्तला पत्राणां पुराणपर्णानां शोषणेन परिणामहेतुना मरुता वासन्तिकसमीरेण स्पृष्टा सम्बद्धा माधवी लतेव स्थिता अत एव मदनक्लिष्टा आलक्ष्यते । माधवीलतापि हि पत्रशोषेण शोच्या च नवकिसलयोद्गमहेतुना शोभाविशेषेण प्रियदर्शना च भवतीति भावः ॥ शार्दूलविक्रीडितं वृत्तम् ॥

कस्स केति । न हि सखीव्यतिरेकेण विस्रम्भस्थानमस्तीत्यर्थः । आयासयित्री खेदकारिणी । समसुखदुःखयोः सख्योः खेदायैव ममातङ्कहेतुनिवेदनमित्यर्थः । मनोरथ-

उभे—[1]अदो एव्व णिब्बन्धो । सिणिद्धिजणसंविभत्तं खु दुक्खं सज्झवेअणं होदि ।

राजा—

पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम् ।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥११॥

---

[1]अत एव निर्बन्धः । स्निग्धजनसंविभक्तं खलु दुःखं सह्यवेदनं भवति ।

स्तु दुर्लभ एवेति भावः । अत एव आयासहेतुत्वादेव । निर्बन्धः अवश्यवक्तव्यत्वानुयोगः दुःखसंविभाग एव हि सुहृदां कियानाश्वास इति भावः । तवापि कलमन्तीत्याह । सिणिद्धअणेति । स्निग्धजनैः । संविभक्तं उपात्तैकदेशं । सह्यवेदनं 'न दुःखं परिभिस्सहे'ति न्यायादिति भावः ।

पृष्टेति । समे सदृशे दुःखसुखे यस्य तेन जनेन प्रियसखीभ्यामित्यर्थः । पृष्टा आधिहेतुमनुयुक्ता दुहादित्वादप्रयोगे कर्मणि क्तः । इयं बाला । वक्तुमसमर्थापीति व्यञ्जयितुं बालेत्युक्तं । मनोगतं हृदयस्थितं आधिहेतुं सन्तापनिमित्तं न वक्ष्यतीति न किं तु वक्ष्यत्येव लज्जया स्वतो वक्तुमसमर्थापि सुहृदनुयुक्ता हृदयस्थितं न गोपयिष्यतीत्यर्थः । अनया विवृत्य परावृत्य प्रयत्नेनेत्यर्थः । बहुशः अनेकवारमित्यनन्यथासिद्धिद्योतनाय । सतृष्णं सानुरागं । न त्वपूर्ववस्तुदिदृक्षासामान्यादिति भावः । दृष्टोपि 'दर्भाङ्कुरेण चरणः क्षत' इत्यादियुक्तरीत्या प्रेक्षितोपि अत्रान्तरे प्रश्नप्रतिवचनसमये श्रवणे तद्वचनाकर्णनविषये कातरतां भीरुतां गतोस्मि हेत्वन्तरकथनभयादिति भावः ॥

वसन्ततिलकं वृत्तम् ।

शकुन्तला—[1]सहि जदो पहुदि मह दंसणपहं गदो तवोवणरक्खिदा राएसी । तदो आरहिअ तग्गदेण अहिलासेण एतदवत्थम्हि संवुत्ता ।

राजा—(सहर्षम् ।) श्रुतं श्रोतव्यम् ।

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः ।
दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य ॥१२॥

शकुन्तला—[2]तंजइ वो अणुमदं तह वट्टेह । जह तस्स राएसिणो अणुअंपणिज्जा होमि । अण्णहा सिञ्चह मे उदअं ।

[1]सखि यतः प्रभृति मम दर्शनपथं गतः तपोवनरक्षिता राजर्षिः तत आरभ्य तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता ।

[2]तद्यदि वामनुमतं तथा वर्तेथां । यथा तस्य राजर्षेरनुकंपनीया भवामि । अन्यथा सिञ्चतं मे उदकम् ।

यतः प्रभृति यत आरभ्य । प्रभृतीत्यव्ययं । दर्शनपथं चक्षुर्विषयं । तद्गतेन राजर्षिविषयेण । एषा अवस्था सन्तापदशा यस्यास्तथाभूता संवृत्तास्मि । श्रोतव्यं अनुरागस्याधिहेतुत्वं श्रुतमाकर्णितम् ।

स्मर इति । स्मर एव मे तापस्य शकुन्तलाविरहसन्तापस्य हेतुः । स एव निर्वापयिता प्रियायामपि तापोपधानात्सन्तापशमनश्च जातः । तद्यथा तपात्यये ग्रीष्मापाये वर्षागम इत्यर्थः । अभ्रैर्मेघैः श्यामः दिवसो जीवलोकस्येव यत्तपागमे जीवलोकस्य सन्तापहेतुस्तएव दिवसस्तपात्यये सति मेघरुद्भातपस्तापापहो भवतीत्यर्थः । आर्या वृत्तम् ।

तत् तस्माद्वां युवयोरनुमतमभ्युपगमो यदि भावे कृतः । यथा येन प्रकारेण तस्य राजर्षेः अनुकम्पनीया दयनीया । दैन्यमत्रव्यभिचारिभावः । तथा वर्तेथां प्रयतेथां । वर्तयतमित्यपिच्छायोपपद्यते आचरतमित्यर्थः । अन्यथा तथा प्रवृत्तेरननुमतत्वे उदकं सिञ्चतं निवापोदकं विसृजतं । अत्र सिञ्चतेः श्वरणार्थत्वात् द्रवद्रव्यस्य कर्मत्वं । अयं

राजा—विमर्शच्छेदि वचनम् ।

प्रियंवदा—(जनान्तिकम् ।) [1]अणसूए दूरगअमम्महा अक्खमा इअं कालहरणस्स । जस्सिं बद्धहावा एसा सो ललामहूदो पोरवाणं । ता जुत्तं अहिलासो अहिणंदिदुं ।

अनसूया—(जनान्तिकम् ।) [2]सहि जह भणासि । (प्रकाशम् ।) सहि दिट्ठिआ दे अणुरूवो अहिणिवेसो । सागरं उज्झिअ कहिं वामहाणई ओदरइ ।

प्रियंवदा—[3]को वा दाणिं सहआरं अंदरेण अदिमुत्तलदं पल्लविदं करुहदि ।

---

[1]अनसूये दूरगतमन्मथाक्षमेयं कालहरणस्य । यस्मिन् बद्धभावैषा स ललामभूतः पौरवाणां । तद्युक्तमस्या अभिलाषोऽभिनन्दितुम् ।

[2]सखि यथा भणसि । सखि दिष्ट्या ते अनुरूपोऽभिनिवेशः । सागरमुज्झित्वा कुत्र वा महानद्यवतरति ।

[3]को वेदानीं सहकारमन्तरेणातिमुक्तलतां पल्लवितामर्हति ?।

विकल्पालङ्कारः । 'विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता' इति लक्षणम् । विमर्शच्छेदि संशयापहं न तु स्वाभिप्रायसंभावनीयार्थमिति भावः । दूरगतः अत्यन्तारूढः प्राणत्यागपर्यन्त इति यावत् । मन्मथः यस्यासा । कालहरणस्य कालक्षेपस्य अक्षमा असहा । जस्सिं इति । यस्मिन् पुरुषे बद्धभावा सानुरागा सः पौरवाणां ललामेव ललामभूतः । तत् मदनातिलंघनाद्विषयगुणातिशयाच्च अभिलाषः अनुरागः अभिनन्दितुं अनुमन्तुं । युक्तमित्यव्ययं । सामान्ये नपुंसकं वा रागस्यात्यारूढत्वादनुरूपविषयत्वाच्चानुमन्तुमुचित इत्यर्थः । अनुरूपः सदृशविषयत्वादिति भावः । अभिनिवेशोऽनुरागः । महानदी गङ्गादिका । क्षुद्रनद्यस्तु नद्यन्तरादिष्वपि निपतन्तीत्युक्तं महानदीति । 'जलनिधिमनुरूपं जह्नुकन्यावतीर्णा' इति रघुवंशेपि । सहकारमन्तरेण अतिसौरभं चूतविशेषं विना । सह करोति फलादिकमिति सहकारः 'सहकारोतिसौरभ' इत्यमरः । पल्लवितां संजातपल्लवां । अतिमुक्तलतां माधवीलतां प्रथमोपमानेनाभिजातत्वं द्वितीयेन चाभिरूपत्वं

राजा—किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते।

अनसूया—[1]को उण उवाओ भवे। जेण अविलम्बिअं णिहुअं असहीमणोरहं संपादेह्म।

प्रियंवदा—[2]णिहुअं ति चिंदनिज्जं हवे। सिग्घं ति सुअरं।

अनसूया—[3]कहं विअ।

प्रियंवदा—[4]णं एसो राएसी इमस्सिं सिणिद्धदिट्ठीए सूइदाहिलासो इमाइ दिअहाइ पआअरकिसो लक्खिअदि।

---

[1]कः पुनरुपायो भवेत्? येनाविलम्बितं निभृतं च सखीमनोरथं संपादयेम।

[2]निभृतमिति चिन्तनीयं भवेत्। शीघ्रमिति सुकरम्।

[3]कथमिव?।

[4]ननु एष राजर्षिरस्यां स्निग्धदृष्ट्या सूचिताभिलाष इमानि दिवसानिप्रजागरकृशो लक्ष्यते।

व्यज्यते। विशाखे नक्षत्रविशेषौ। 'विशाखयोश्चि' तिद्वित्वं। शशाङ्कलेखां यद्यनुवर्तेते यद्यनुसरतः। लेखाशब्दो विरहकार्श्यं व्यञ्जयति। किमत्रानुवर्तने चित्रमपूर्वं। सहजो हि हृदयसंवादः सख्यस्थितिभावः। येनउपायेन। अविलम्बितां शीघ्रं। निभृतं गूढञ्च प्रथममनुद्विग्नसखीहृदयमित्यर्थः। सख्याः शकुन्तलाया मनोरथमभिलाषं संपादयेम साधयेम चिन्तणिज्जं इति, इतरेतरहृदयं हि कामिनोरितरेतरहृदयेनैव निर्भाव्यमिति निभृतत्वमवगम्यते इति भावः। सुकरमिति शीघ्रत्वमीषत्करमित्यर्थः। कथमिव शीघ्रमिति वा कथं सुकरमित्यर्थः। अस्यां शकुन्तलायां स्निग्धदृष्ट्या वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये' इत्यादिसूचितेन सस्नेहदर्शनेन सूचिताभिलाषः दर्शितस्वानुरागः। इमानि दिवसानि दर्शनादर्वाचीनानि दिनानि। 'कालाध्वनोरत्यन्तसंयोग' इति द्वितीया। प्रजागरे चास्यान्वयः। प्रजागरेण चतुर्थेन मदनावस्थाविशेषेण कृशः पञ्चमीदशामारूढः। स्निग्धदर्शनादेव चक्षुः प्रीतिर्मनः संगश्च विदितः प्रजागरलक्षणैश्च

राजा—सत्यमित्थंभूतोऽस्मि । तथा हि ।

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्गप्रसर्पिभिरश्रुभिः ।
अनतिललितज्याघाताङ्कं मुहुर्मणिबन्धना
त्स्कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥ १३ ॥

प्रियंवदा—(विचिन्य ।) [1]हला मअणलेहो से करीअदु । तं सुमणोविदं करिअ देवदापसादव्वदेसेण तस्स रण्णो हत्थं पावइस्सं ।

---

[1]सखि मदनलेखोऽस्य क्रियतां । तं सुमनोगोपितं कृत्वा देवताप्रसादव्यपदेशेन तस्य राज्ञो हस्तं प्रापयिष्यामि ।

प्रजागरस्तद्धेतुः सङ्कल्पश्चानुमीयते । कार्श्यञ्च प्रत्यक्षमेवेति पञ्च मदनदशाः समतीताः अतस्तुल्यानुरागत्वादविलम्बेन सुकरः परिग्रह इति भावः । 'दृङ्मनः सङ्गसङ्कल्पौ जागरः कृशतातिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश' इत्युक्तं । इत्थंभूतः प्रजागरकृशः ।

इदमिति । अन्तस्तापात् मनस्संज्वरवशात् अशिशिरैः ऊष्मलैः निशि निशि प्रतिनिशं भुजन्यस्तात् शयनीयादिवैरस्याद्भुजोपधाननिक्षिप्तात् अपाङ्गात् प्रसर्पिभिः प्रवहद्भिः अश्रुनिर्गमार्थमेकपार्श्वेन शयनाद्विपरिवर्त्तनप्रवृत्तैरित्यर्थः । अश्रुभिर्वाष्पहेतुभिः विवर्णाः निष्प्रभाः मणयो यस्य तद्विवर्णमणि अतादृशं तादृशं संपद्यमानं कृतं इदं कनकवलयं मणिबन्धनात् प्रकोष्ठात् स्रस्तं स्रस्तं तनिम्ना पुनः पुनर्गलितं सत्, अनतिललितः शैथिल्याच्चार्थानिपृष्टः ज्याघातस्याङ्कः किणो यस्मिन् कर्मणि तद्यथातथा मुहुः प्रतिक्षणं प्रतिसार्यते स्वस्थानं प्रत्यानीयते । हरिणी वृत्तम् ॥

मदनलेखः रागलेखनं अस्य राज्ञो विषये क्रियतां त्वया कर्तव्यः । तं लेखं सुमनोभिः पुष्पैः गोपितं संवृतं गुपेरूदित्वाच्चिछायामिड्विभाषितः । देवताप्रसादस्य देवतो-

अनसूया—[1]रोअदि मे सुउमारो पओओ। किं वा सउंदला भणादि।

शकुन्तला—[2]किं णिओओ वो विअप्पिअदि।

प्रियंवदा—[3]तेण हि अत्तणो उवण्णासपुव्वं चिंतेहि किं विललिदपदबंधणं।

शकुन्तला—[4]हला चिंदेमि। किं दु अवहीरणाभीरुअं उण वेवइमे हि अअं।

राजा—

अयं स ते तिष्ठति सङ्गमोत्सुको
विशङ्कसे भीरु यतोऽवधीरणाम्।

---

[1]रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति?।

[2]किं नियोगो वां विकल्प्यते।

[3]तेन ह्यात्मन उपन्यासपूर्वं चिन्तय किमपि ललितपदबन्धनम्।

[4]सखि चिन्तयामि। किं त्ववधीरणाभीरुकं पुनर्वेपते मे हृदयम्।

पयुक्तोऽपस्य व्यपदेशेन व्याजेन। सुकुमारः गृहत्वादेव ललितः प्रयुज्यते अनेनेति प्रयोगः उपायः मे मह्यं रोचते "रुच्यर्थानां प्रीयमाण" इतिसंप्रदानत्वाच्चतुर्थी। वां युवयोः नियोगः आदेशः किं विकल्प्यते न कदाचिदाक्षिप्यत इत्यर्थः। आत्मन उपन्यासपूर्वं सदेष्टृनिवेदनोपक्रमं लज्जयास्वानिवेदने हि लिखितमपि वृथा स्यात्संदेष्टुरज्ञानादिति भावः। स्वानुरागावेदनपूर्वं वा ललितपदबन्धनं सुकुमारशब्दरचनं 'निर्दयोसि प्राणा मे यास्यन्ती'त्यादि परुषाक्षरं हि विरसमिति भावः। अवधीरणाभीरु प्रत्याख्यानकातरं वेपते चलति सन्दिग्ध इत्यर्थः।

अयमिति। हे भीरु भयशीले यतः यत्सकाशात् अवधीरणां प्रत्याख्यानंविशङ्कसे। सोयं ते तव संगमे उत्कण्ठितस्तिष्ठति। सेयमस्थाने शङ्कते भावः। प्रार्थ-

लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो जनः ॥ ॥ १४ ॥

प्रियंवदा—[1]अयि अत्तगुणावमाणिणि को वा दाणिं सरीरणिव्वावइत्तिअं सारदिं जोसिणिं पडंदेण णिवारइस्सादि ।

शकुन्तला—(सस्मितम् ।) [2]णिओइदा दाणिं म्हि ।

(उपविश्य चिन्तयति ।)

राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि । तथा हि ।

[1]अयि आत्मगुणावमानिनि को वेदानीं शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन निवारयिष्यति ? ।

[2]नियोजितेदानीमस्मि ।

यिता श्रियं प्राप्तुकामः पुरुषः श्रियं लभेत वा नवा । भाग्यतद्विपर्ययौहि निमित्तान्तरमंत्रेति भावः । श्रिया लक्ष्म्या ईप्सितः आत्मनैव प्राप्तुमभिलषितोजनः कथं दुरापः न कथंचिदपि । न हि विपर्यस्तभाग्यं श्रीर्वृणीत इति भावः । **वंशस्थं वृत्तम् ।**

अमुमेवार्थं प्रियंवदा भङ्ग्यन्तरेणाह, अत्तगुणेति आत्मगुणावमानिनि प्रियगुणपक्षपातेन स्वगुणपरिभाविनि । शरीरस्य निर्वापयित्रीं आह्लादजननीं शारदीं शरत्सम्बन्धिनीं वर्षासु मेघावरुद्धत्वाच्चिरप्रतीक्षितामित्यर्थः । पटान्तेनेति कस्यात्मनि निरोध इत्यर्थः । सुखोपनतं स्वसुखं को वा परिहरिष्यति, प्रजागरकृशत्वादिना राज्ञस्तापदर्शनात् तन्निर्वापणमन्वेषणीयं हि तस्यापीति भावः । उपविष्टेति बुद्धिसमाधानार्थं । विस्मृतनिमेषेण परित्यक्तपक्ष्मपातेन । स्थाने युक्तं । यदीदानीमपि निमेषो भवेत् का नाम द्रष्टृतति भावः ।

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥ १५ ॥

शकुन्तला—[1]हला चिंदिदा मए गीदी। ण खु संणिहिदाइ लेहणासाहणाइ।

प्रियंवदा—[2]एदस्सिं सुओदरसुउमारे णलिणीपत्ते णहेहिं णिक्खित्तवण्णं करेहि।

शकुन्तला—(यथोद्दिष्टं रूपयित्वा।) [3]हला सुणुह दाणिं संगदत्था ण वेत्ति।

उभे—[4]अवहिद ह्म।

शकुन्तला—(वाचयति।)

---

[1]हला चिन्तिता मया गीतिः। न खलु सन्निहितानि लेखनसाधनानि।

[2]एतस्मिन् शुकोदरसुकुमारे नलिनीपत्रे नखैर्निक्षिप्तवर्णां कुरु।

[3]हला शृणुतमिदानीं सङ्गतार्था न वेति।

[4]अवहिते स्वः।

उन्नमितेति। उन्नमिता उत्क्षिप्ता एका भ्रूलता यस्य तत् पदानि मदनलेखन्यासोचितानि रचयन्त्याः ग्रथनत्या अस्यास्संबन्धि आननं कण्टकितेन पुलकितेन कपोलेन मय्यनुरागं प्रथयति व्यनक्ति। शब्दस्मरणमात्रेणापि कपोलपुलकोद्गमो निर्भरानुरागव्यञ्जनमिति भावः॥ **आर्यावृत्तम्**।

गीतिः 'आर्यापूर्वार्धसमं चरमार्धं भवति यत्र हंसगते' इत्युक्तलक्षणा। लेखनसाधनानि मषीपत्रलेखिन्यादीनि। शुकोदरसुकुमार इति हरितत्वातिशयोपि विवक्षितः। नखैः निक्षिप्ताः वर्णाः अक्षराणि यस्यास्तां नखविलिखिताक्षरामित्यर्थः। पत्रच्छेद्यं हि कलाविशेषः। गीतिमिति विशेष्यं विपरिणम्यते। रूपयित्वा वर्णविन्यासमभिनीय। सङ्गतार्था सम्बद्धविषया नवेति शृणुतं अवधारयतं। आत्मन्यप्रत्ययादिदमुक्तं।

तुज्झ ण आणे हि अअं मह उण मअणो दिवा वि रत्तिं वि ।
णिग्घिणो तवइ वालिअं तुइ जुत्तमणोरहाइ अङ्गाइ ॥१६॥

राजा— (सहसोपसृत्य ।)

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥१७॥

---

[1]**तव न जाने हृदयं मम पुनर्मदनो दिवापि रात्रिमपि ।**
निर्घृणस्तपति बलवत्त्वयि युक्तमनोरथान्यङ्गानि ॥

तुज्झेति । तव हृदयं न जाने सानुरागं न वेति नावगच्छामि । मम पुनः मम तु त्वयि युक्तमनोरथानि संसक्ताभिलाषाणि अङ्गानि दिवापि रात्रिमपि अविश्रान्तं निर्घृणो मदनो बलवत्तपति । मनोरथकार्यस्य कार्श्यादेरङ्गेषु प्रत्यक्षतामाविष्कर्तुं युक्तमनोरथानीत्यङ्गविशेषणं । आश्लेषादिविशेषाभिलाषित्वं च अनेन दर्शितं । प्रथममज्ञातहृदयस्यापि जनस्य विषये मधुकरबाधामात्रमप्यसोढवति त्वयि रक्षितरि त्वच्चिमित्त एव मदनतापो निवेद्यत इत्यर्थः । अभिरूपमानी मदनस्त्वदभिकामामार्ष्येयेव मां तपतीत्यपि व्यज्यते । वैचित्त्येन तापोपि न प्रतिभाति अङ्गान्येव तु केवलं सीदन्तीत्यपि ध्वन्यते युक्तमनोरथानीत्यङ्गविशेषणेन ॥ **गीति वृत्तम्** ।

तपतीति । हे तनुगात्रि मदनः त्वामनिशं तपति न तु दहति । मां पुनः मां तु दहत्येव । भस्मीकरोत्येव । अनुरागवृत्तेस्साधारण्यादेकत्र तापोऽन्यत्र च दाह इति किं निमित्तमिति निदर्शयन्नाह । ग्लपयतीति । दिवसः शशाङ्कं चन्द्रं यथा ग्लपयति तथा कुमुदान्यस्यास्सन्तीति 'कुमुदनडवेतसेभ्य' इति ड्मतुप् । तां न हि ग्लपयति । दिवसे शशाङ्को भस्मखण्डवद्विच्छायो भवतीति दाह उपपद्यते । कुमुदिनी तु निर्मीलत्येव न पुनस्सौभाग्यमज्झतीति न दृश्यते । तेनावसीयते विरहः कामिनं यथा हि दुनोति न तथा कामिनीमिर्तीति भावः

उभे—(विलोक्य सहर्षम् ।) [1]साअदं अविलम्बिणो मनोरहस्स ।

(शकुन्तलाभ्युत्थातुमिच्छति ।)

राजा—अलमलमायासेन ।

संदष्टकुसुमशयनान्याशुक्रान्तबिसभङ्गसुरभीणि ।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति ॥ १८ ॥

अनसूया—[2]इदो सिलातलेक्कदेसं अणुगेण्हादु वअस्सो ।

(राजा उपविष्टः । शकुन्तला सलज्जा तिष्ठति ।)

प्रियंवदा—[3]वअस्स दुवेण वो अण्णोण्णाणुराओ पच्चक्खो । तह वि सहीसिणोहो मं पुणरुत्तवाइणिं करेदि ।

---

[1]स्वागतमविलम्बिनो मनोरथस्य ।

[2]इतः शिलातलैकदेशमनुगृह्णातु वयस्यः ।

[3]वयस्य द्वयोर्वामन्योन्यानुरागः प्रत्यक्षः । तथापि सखीस्नेहो मां पुनरुक्तवादिनीं करोति ।

अविलम्बिनः सन्देशप्रेषणमात्रव्यवधानेनापि वर्जितस्य । मनोरथायेति विषये मनोरथाभेदोपचारः । अलमलमायासेन उत्थानश्रमो मा भूदित्यर्थः । आयासेन साध्यं नास्ति इत्यर्थाद्गम्यमानसाधनक्रियापेक्षया कर्मत्वात् तृतीया ।

सन्दष्टेति । सन्दष्टं तापम्लानतया संश्लिष्टं कुसुमशयनं येषु तानि आशुक्रान्तैः तापातिरेकात् तत्क्षणाक्लिष्टैः बिसभङ्गैः मृणालच्छेदैः । अन्तरार्द्रतयाशीतोपचारार्थनिहितैः खण्डितमृणालैरित्यर्थः । सुरभीणि आत्तसारतया गन्धवन्ति गुरुः दुस्सहः परितापो येषां तानि ते गात्राण्यवयवाः उपचारं अभ्युत्थानादिरूपं नार्हन्ति न सहन्ते । **आर्या वृत्तम् ।**

इतः अस्मिन् भाग इति निर्देशः । शिलातलस्यैकदेशं शकुन्तलापार्श्वभागं । वयस्य इति, वयस्यायाः प्रियो हि वयस्यो भवति । द्वयोरपि वां शकुन्तलायास्तव च । अन्योन्यस्मिन्ननुरागः समानुराग इत्यर्थः । प्रत्यक्षः साक्षादावाभ्यामनुभूतः । यतस्सखीमधिकृत्य नास्ति वक्तव्यमिति भावः । पुनरुक्तं वदतीति पुनरुक्तवादिनी तां करोति

राजा—भद्रे नैतत्परिहार्यम् । विवक्षितं ह्यनुक्तमनुतापं जनयति।

प्रियंवदा—[1]आवण्णस्स विसअवासिणो जणस्स अत्तिहरेण रण्णाहोदव्वं त्ति णं एसो वो धम्मो ।

राजा—नास्मात्परम् ।

प्रियंवदा—[2]तेण हि इअं णो पिअसही तुमं एव्व उद्दिसिअ इमं अवत्थंदरं भअवदा कअणेण आरोविदा । ता अरुहसि अब्भुववत्तारं जीविदं से आलंबिदुं ।

राजा—भद्रे साधारणोऽयं प्रणयः । सर्वथानुगृहीतोऽस्मि ।

---

[1]आपन्नस्य विषयवासिनो जनस्यार्तिहरेण राज्ञा भवितव्यमिति नन्वेष वो धर्मः ।

[2]तेन हि इयं नौ प्रियसखी त्वामेवोद्दिश्य इदमवस्थान्तरं भगवता मदनेनारोपिता । तस्मादर्हस्यभ्युपपत्त्या जीवितमस्या अवलम्बितुम् ।

उक्तस्येव सिद्धस्यापि पुनः कथनमसांप्रतमपि स्नेहादुच्यत इत्यर्थः । न परिहार्यं सिद्धमिति नोपेक्ष्यं । हि यस्मात् विवक्षितं वक्तुमिष्टं वस्तु अनुक्तं सत् अनुतापं पश्चात्तापं जनयति तस्मान्मनः प्रसादेनार्थवस्तुनरुक्तमपि दोषायेत्यर्थः । यस्मादस्या विषये न किञ्चिदपिसमीहितुं कर्तुं नेच्छामि तस्माद्विसम्बध्यमुच्यतामिति भावः । आपन्नस्य दुःखितस्य विषयवासिनो निजदेशस्थितस्य जनस्य पाल्यस्येत्यर्थः । आर्तिहरेण दुःखापहेन । अस्मात् आपन्नरक्षणात् परं अन्यद्राजकृत्यं नास्ति । उद्दिश्य विषयीकृत्य । एतत् अवस्थान्तरं अन्यामवस्थां स्वभावच्युतिमिति यावत् । आरोपिता प्रापिता । अन्यनिमित्तामप्यार्तिं हरतः किं वक्तव्यं स्वनिमित्तबाधानिवारणमिति भावः । अभ्युपपत्त्या अनुग्रहेण । अवलम्बितुं धारयितुं । अयं प्रणयः अभ्युपपत्तिप्रार्थनं साधारणः सामान्यस्ते सख्या मम च । अनयापि हि मदभ्युपपत्तिः प्रार्थ्या ममेत्यर्थः । सख्या विवक्षितमुत्था-

शकुन्तला—(प्रियंवदामवलोक्य।) [1]हला अलं अंदेउरविरहपज्जूसुअस्स राएसिणो उवरोहेण ।

राजा—इदमनन्यपरायणमन्यथा हृदयसन्निहितेहृदयं मम ।
यदि समर्थयसे मदिरेक्षणे मदनबाणहतोऽस्मि हतःपुनः ॥

अनसूया—[2]वअस्स बहुवल्लहा राआणो सुणीअंदि । जह णो पिअसही बंधुजणसो अणीआ ण होदि तह णिव्वहेहि ।

---

[1]सखि अलमन्तः पुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन ।

[2]वयस्य बहुवल्लभा राजानः श्रूयन्ते । यथा नौ प्रियसखी बन्धुजनशोचनीया नभवति तथा निर्वहस्व ।

पयितुं व्याजेन शकुन्तला प्रियंवदामाह । हलेति । अन्तः पुरविरहेण पर्युत्सुकस्य कालाश्रमस्य । राजर्षेः स्त्रीषु जितात्मन इति भावः । उपरोधेन गतिप्रतिबन्धेन अलं उपरुद्धो त्वयापिदक्षिणतया न यास्यति तथापि तथोचितमित्यर्थः । राज्ञो विरहकार्श्यस्यान्तःपुरविरहनिमित्तत्वेन स्वविषयौत्सुक्यशङ्कावो गमपरिश्रार्थं प्रथमप्रार्थनालाघवपरिहारार्थं च ।

इदमिति । हे हृदयसन्निहितेति मन्मानसास्थेति । हृदयस्थितापि हृदयं न जानासीति चित्रमिति भावः । मदकरत्वेन मदिरासदृशे ईक्षणे यस्यास्सा, मदिरो मत्तस्त्रीनाविव ईक्षणे यस्यास्सेति वा तस्यास्संबुद्धिः मदिरेक्षणे त्वदीक्षणबाणविद्धस्य मनसः कथमन्यत्र गतिरिति भावः । अविद्यमानमन्यत्परायणं आश्रयो यस्य तत् अनन्यासक्तं 'साकल्यासङ्गवचने पारायणपरायणे' इत्यमरः । इदं मम हृदयं अन्यथा अन्तः पुरविरहपर्युत्सुकत्वेन यदि समर्थयसे तदा मदनबाणेन हतः प्रथममेव विद्धोपि पुनर्हतोस्मि । त्वदीक्षणमात्रेण मदनबाणहते पुनरन्यासङ्गहेतूद्भावनरूपबाणमोक्षणं क्षते क्षारसेचनमिव सुतरां दुखायेति भावः । हतस्य पुनर्हननमनुचितमित्यपि व्यज्यते । द्रुतविलम्बितंवृत्तम् ॥

अन्तः पुरविरहेति शकुन्तलावचनस्मारितं विवक्षितमादायाह । वयस्येति । बहवोवल्लभाः प्रणयिन्यो येषां ते । बन्धुजनेन शोचनीया भर्तुरसम्भावनयेति भावः निर्वहस्व समाधत्स्व । नवं हि सर्वमेव हृद्यं भवति । अतः पूर्वावरोधदशामियं नारोपणीयेति भावः ।

राजा—भद्रे किं बहुना ?।

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।
समुद्ररशना चोर्वी सखी च युवयोरियम् ॥ २० ॥ [४]

उभे—[1]णिव्वुद म्ह।

प्रियंवदा—(सदृष्टिक्षेपम्।) [2]अणसूए एसो इदो तदो दिण्णदिट्ठी पज्जुसुओ मिअपोदओ मादरं अण्णेसदि। एहि संजोएम णं।

(उभे प्रस्थिते।)

शकुन्तला—[3]हला असरण म्हि। अण्णदरा वो आअच्छदु।

उभे—[4]जो पुडवीए सरणं सो तुह समीवे वट्टइ।

इति निष्क्रान्ते।

शकुन्तला—[5]कहं गदा एत्तव।

---

[1]निर्वृत्ते स्वः।

[2]अनसूये एष इतस्ततो दत्तदृष्टिः पर्युत्सुको मृगपोतको मातरमन्वेषते। एहि। संयोजयेव एनम्।

[3]हला अशरणास्मि। अन्यतरा वामागच्छतु।

[4]यः पृथिव्याः शरणं स तव समीपे वर्तते।

[5]कथं गते एव ?।

परिग्रहेति। परिग्रहबहुत्वे बहुवल्लभत्वे सत्यपि नः कुलस्य द्वे प्रतिष्ठे द्वितयमेव स्थितिसाधनं। समुद्रो रशना यस्याः सा उर्वी भूमिश्च। महिषी समाधिर्व्यजनाय समुद्ररशनेति विशेषणं। युवयोरियं सखी शकुन्तला च अत्र भूमिपक्षे प्रतिष्ठाशब्दः कीर्तिस्थानवचनः शकुन्तलापक्षे च अविच्छेद साधनार्थः ततश्च आत्मनोसन्तानत्वं शकुन्तलापत्यस्यैव च राज्यभागित्वं च सूचितं भवति। **अनुष्टुप् वृत्तम्** ॥

निर्वृत्ते सुखिते। सदृष्टिक्षेपं भूक्षेपेण परस्परमपगमसंज्ञां विधायेत्यर्थः। पर्युत्सुकः मातृदर्शनोत्कण्ठितः। संयोजयेव माता सह संगमयेव। अशरणा असहाया। अन्यतरा एका आगच्छतु कृतमेकया मृगपोतसंयोजनाय गतयेत्यर्थः। यः पृथिव्याश्शरणं रक्षिता

राजा—अलमलमावेगेन । नन्वाराधयिता जनस्तव समीपे वर्तते ।

किं शीतलैः क्रमविनोदिभिरार्द्रवाता-
न्संचारयामि नलिनीदलतालवृन्तैः ? ।
अङ्के निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ? ॥२१॥ । ९

शकुन्तला—[1]ण माणणीएसु अत्ताणं अवराहइस्सं । (इत्युत्थाय प्रस्थिता ।)

---

[1]न माननीयेष्वात्मानमपराधयिष्यामि ।

स तव समीपे वर्तते । अतो नाशरणासीति भावः । आवेगेन भयेन । आराधयिता उपचारैः सेविता । यदर्थं सखीसन्निधिरिष्यत इत्यर्थः । सेवाप्रकारमेव पृच्छति ।

किमिति । शीतलैः अचिरोत्खातत्वाज्जलशीकरशिशिरैः अत एव क्रमविनोदिभिः श्रमापहैः नलिनीदलैः कमलिनीपत्रैरेव तालवृन्तैः आर्द्रवातान् किं सञ्चारयामि सञ्चारयेयमित्यर्थः । अप्रत्याख्यानादेतावदनुमतमभिसन्धायाह । अङ्क इति । उत अथवा करभः करोपान्तभाग इवोरुर्यस्यास्तस्याः सम्बुद्धिः करभोरु 'मणिबन्धादाकनिष्ठं करस्य करभो बहि'रित्यमरः । मूले चोन्नतत्वादनुपूर्वं चावनतत्वादूरोः करभौपम्यं । पद्मवत्ताम्रौ रक्ततलौ मृदुत्वमप्यत्र विवक्षितं । ते तव चरणौ अङ्के मदुत्सङ्गे निधाय मृदुत्वं ह्यन्यत्र निधानासहमिति भावः । यथासुखं नातिगाढं नचातिशिथिलमित्यर्थः । किं संवाहयामि मृद्नीयां । उद्दीपनत्वात्संवाहनमुक्तं । उक्तं च मेघसन्देशे । 'सभोगान्ते मम समुचितो हस्तसंवाहनानां यास्यत्यूरुः सरसकदलीस्तंभगौरश्चलत्व'मिति । बाह्योपचारानुयोगे प्रत्याख्यानविरहमेवानुमतिकल्पमालक्षयतो नागरिकस्य नायकस्याभ्यन्तरेष्युपचारे प्रश्रावतार इति रहस्यं । **वसन्ततिलकं वृत्तम् ।**

माननीयेषु पूज्येषु विषये । नापराधयिष्यामि चरणार्पणेनापराधवन्तं न करिष्यामि । इच्छन्त्यप्यपराधाद्भीतास्मीति हृदयं । अपरिनिर्वाणः असंहृत सन्तापः । दिवसः मध्यन्दिनमित्यर्थः । इयं ईदृशी दुस्सहेत्यर्थः । समवस्था बाधा । कृतमत्रैकैकेनापि किं पुनर्मिलितेनेति भावः ।

राजा—सुन्दरि अपरिनिर्वाणोऽयं दिवसः । इयं च ते समवस्था ।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम् ।
कथमातपे गमिष्यसि परिवाधापेशलैरङ्गैः ॥२२॥

इति बलादेतां निवर्तयति ।

शकुन्तला—[1]पौरव रक्ख विणअं । मअणहत्थगदा वि अत्तणो णपहवामि ।

राजा—अलं भीरु गुरुजनभयेन । श्रुत्वापि ते विदितधर्मा तत्र भवानत्र दोषं न ग्रहीष्यति कुलपतिः । पश्य ।

[1]पौरव रक्ष विनयम् । मदनहस्तगताप्यात्मनो न प्रभवामि ।

उत्सृज्येति । नलिनीदलैः कल्पितं स्तनयोरावरणं शीतोपचारार्थं प्रच्छादनं यस्मिंस्तत् कुसुमशयनमुत्सृज्य त्यक्त्वा परिवाधया संश्लेषेण पेशलैर्दुर्बलैरङ्गैः आतपे कथं गमिष्यसि । या कुसुमशयनादिषु सत्स्वेव शीतोपचारेषु सन्तापेन पीडिता तस्या न केवलं तत्परित्यागः प्रत्यूतातपेपि गमनं नितरामसदृशमित्यर्थः ॥ नलिनीदलकल्पितमिति व्यस्तपाठे स्तनावरणं चोत्सृज्येत्यन्वयः । आर्या वृत्तम् ।

बलादिति । वचनस्यार्किंचित्करत्वादालिङ्गनादिना निवारयितुमारभत इत्यर्थः । नायमविनयस्ते कुलोचित इति व्यञ्जयितुं पौरवेति सम्बोधनं । आर्यादिपदानुपादानाच्च रागो दर्शितः । विनयं अस्खैरित्वरूपं शीलं रक्ष न परित्यज । ननु कथमात्मनैव निवेदितात्मनि त्वयि स्वैरमविनयः ? तत्राह । मअणेति । मदनहस्तगता मन्मथपरतन्त्रापि आत्मनः शरीरस्य न प्रभवामि । गुरुजनादि परतन्त्रं शरीरं मम एष तु केवलं त्वय्यर्पितं यस्याहं प्रभवामीति भावः । विदितो धर्मो येन स विदितधर्मा 'धर्मादनिच् केवलात्' । अत्र स्वेनैव स्वात्मार्पणे । दोषमधर्मं । न ग्रहीष्यति न मंस्यते । कुतः ? तदाह—

गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः ॥ २३ ॥

शकुन्तला—[1]अज्ज दाव मुंच मं । भूओ वि सहीअणं अणुमाण इस्सं ।

राजा—भवतु मोक्ष्यामि ।

शकुन्तला—कदा ? ।

राजा—अपरिक्षतकोमलस्य याव- २२
त्कुसुमस्येव नवस्य षट्पदेन ।

---

[1]अद्य तावन्मुञ्च माम् । भूयोऽपि सखीजनमनुमानयिष्यामि ।

गान्धर्वेणेति । बह्व्योऽनेकाः राजर्षिकन्यकाः धर्मादस्खलिता एवेति भावः गान्धर्वेण गान्धर्वाख्येन विवाहेन परिणीताः परिगृहीताः धान्येन धनवानित्यादिवदभेदे तृतीया । ताः पितृभिः राजर्षिभिरेव अभिनन्दिताः अनुमताश्च श्रूयन्ते । अतो नार्य क्षमचारः क्षत्रियाणां स्वधर्म एव त्विति भावः । तथा च मनुः ' चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् । अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत । ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः । गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः । षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसा ' निति । ' गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृता ' विति च । गान्धर्वलक्षणं चोक्तं ' इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च । गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ' । इति अनुष्टुप् वृत्तम् ।

अद्य तावदिदानीं परं मुञ्च तिष्ठतु धर्मविचार इति भावः । भूयोऽपि पूर्वमेव दत्तानुमतिमपि सखीजनत्वात्पुनरपि अनुमानयिष्यामि अनुमतं करिष्यामि ।

अपरिक्षतेति । हे सुन्दरि अपरिक्षतकोमलस्य इदंप्रथमत्वात्पूर्वमसंक्रान्तदशनक्षतस्यात एव कोमलस्य सुकुमारस्य च परिक्षते हि किणग्रन्थिभिर्मनाक्काठिन्यं भवेदिति भावः । ते तव अस्य अधरस्य रसः नवस्य अचिरोन्मीलितस्य कुसुमस्य रसः षट्पदेनेव

अधरस्य पिपासता मया ते
सदयं सुन्दरि गृह्यते रसोऽस्य ॥ २४ ॥

(इति मुखमस्यास्समुन्नमयितुमिच्छति ।)

शकुन्तला—नाट्येन परिहरति।

नेपथ्ये ।

[1]**चक्कवाअवहुए आमंदेहि सहअरं । उपाठ्ठिदा रअणी ।**

शकुन्तला—(कर्णं दत्त्वा ससम्भ्रमम् ।) [2]**पोरव असंसअं सअं मह सरीरवुत्तंदोवलंभाअ अज्जा गोदमी इदो एव्व आअच्छइ। ता वंदरिदो होहि ।**

राजा—तथेत्यात्मानमावृत्य स्थितः ।

ततः प्रविशति पात्रहस्ता तापसी सरुयौच ।

---

[1]**चक्रवाकवधुके आमन्त्रयस्व सहचरं । उपस्थिता रजनी ।**

[2]**पौरव असंशयं स्वयं मम शरीरवृत्तान्तोपलम्भाय आर्या गौतमी इत एवागच्छति । तस्माद्विटपान्तरितो भव ।**

पिपासता चिरतृषितेन मया सदयं ललितं यावद्यदा गृह्यते तदा मोक्ष्यामीति सम्बन्धः यथा षट्पदः कुसुममपीड्यन् रसमादाय मुञ्चति तथेति भावः । 'अपरिक्षतकोमलस्य-तावत्' इति पाठे तावत् साकल्येनेत्यर्थः । **वसन्तमालिका वृत्तम् ।**

परिहरति । चुम्बनं त्याजयति । चक्रवाअवहुए इति सहचरं पुमांसं आमन्त्रयस्व । आपृच्छस्व । उपस्थिता रजनी विरहकालस्संप्राप्त इत्यर्थः । गौतम्यागमनेन दुष्यन्ता-मन्त्रणं विहितं भवति । सारूप्यनिबन्धनेयमप्रस्तुतप्रशंसा । शरीरवृत्तान्तस्य सन्तापरू-पस्य उपलम्भाय विशेषज्ञानाय । सखीवचनादयमर्थ स्सम्भाव्यत इति दर्शयितुमसं-शयामिति । विटपेन तरुशाखया अन्तरितः तिरोहितः । आत्मानं शरीरं आवृत्य आच्छाद्य । पात्रं वैतानिकशान्त्युदकभाजनं हस्ते यस्यास्सा "वैतानिकं शान्त्युदकमस्ये गौतमीहस्ते-

[1]इदो इदो।

गौतमी—(शकुन्तलामुपेत्य।) [2]जादे अवि लहुसंदावाइ दे अंगाइं?।

शकुन्तला—[3]अत्थि मे विसेसो।

गौतमी—[4]इमिणा दब्भोदएण णिराबाधं एव्व दे सरीरं भविस्सदि। (शिरसि शकुन्तलामभ्युक्ष्य।) बच्छे परिणदो दिअहो। एहि उडअं एव्व गच्छम्ह।

(इति प्रस्थिता।)

शकुन्तला—(आत्मगतम्।) [5]हिअअ पढमं एव्व सुहोवणदे मणो रहे कादरभावं ण मुंचेसि। साणुसअं विहडिअस्स कहं णु दे

---

[1]इतः इतः।

[2]जाते अपि लघुसन्तापानि ते अङ्गानि?।

[3]अस्ति मे विशेषः।

[4]अनेन दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति। वत्से परिणतो दिवसः। एहि उटजमेव गच्छामः।

[5]हृदय प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि। सानु-

विसर्जयिष्यामि" इति हि मुनिशिष्यवचनेन सूचितं। जाते पुत्रि! ते अङ्गानि अपि लघुसन्तापानि कश्चित् सह्यबाधानि? अस्ति मे विशेषः सन्तापशान्तिरस्तीत्यर्थः। अनेन कुम्भोद्धृतेन दर्भोदकेन कूर्चाभ्युक्षितेन जलेन निराबाधं निश्शेषितरोगमेव। परिणतः जीर्णः परिसमाप्त इति यावत्। उटजं आश्रममेव गच्छामः नात्र पृथगवस्थातुं युक्तमिति भावः। प्रथममेव मदनलेखाविसर्जनात्पूर्वमेव सुखेन अयत्नेन उपनते प्राप्ते मनोरथे प्रियसमागमरूपे अभिलाषवस्तुनि कातरभावं भीरुतां। सानुशयं उपस्थितश्रेयःपरित्यागात्सानुतापं यथा तथा विघटितस्य विरहितस्य ते कथं प्रतीकारः तापापनोदनं

संपदं। (पदान्तरे स्थित्वा। प्रकाशम्।) लदावलअ संदावहर आमंदेमि भूओ वि परिभोआअ।

इति दुःखदुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः।

राजा—(पूर्वस्थानमुपेत्य सनिश्वासम्।) अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः। मया हि।

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु॥

शयं विघटितस्य कथं नु ते सांप्रतं। लतावलय सन्तापहर आमंत्रयामि भूयोऽपि परिभोगाय।

सन्निकर्षे कातरभावो विप्रकर्षे च अनुशय इति दुःखमात्रफलमिति भावः। लतावलय लतामण्डप सन्तापहर शैत्यादनातपत्वाच्च तापापनोदेन भूयः पुनरपि परिभोगाय शयनासनादिभिरनुभवाय आमन्त्रये त्वामुपपृच्छे। अत्र गूढोक्त्या राजा सम्बोध्यते तस्य मदनतापहरत्वात् भूयोऽपि संश्लेषायनुभवाय दर्शनाभ्यर्थनं। दुःखदुःखेन गन्तुमनिच्छया कथञ्चिदित्यर्थः। पूर्वस्थानं शकुन्तलया अध्यासितपूर्वं लतामण्डपं। प्रार्थितानामभिलषितानां अर्थानां प्रयोजनानां सिद्धयः प्राप्तयः विघ्नवत्यः 'श्रेयांसि बहुविघ्नानि' इति न्यायादिति भावः।

मुहुरिति। मुहुः पुनः पुनः अंगुलिभिः संवृतः आच्छादितः अधरोष्ठः अधस्तादधरः यस्य तत् प्रतिषेधाक्षरेषु 'पोरव रक्खविणयं' 'मुञ्च मं' इत्यादिषु विक्लवं स्खलितोच्चारणं तत एवाभिरामं मनोहारि अंसविवर्ति चुम्बनाक्षेपाय स्कन्धपरावृत्तं तत्क्षणं तिर्यगाश्लिष्टमित्यर्थः। पक्ष्मले सान्द्रपक्ष्मणी अक्षिणी यस्यास्तस्याः शकुन्तलायाः मुखं कथमपि कृच्छ्रादुन्नमितं करतलालम्बितकपोलमूर्ध्वीकृतं। तथोन्नमितमपि तु न चुम्बितं। लब्धमप्यननुभूतं विधिना विघटितमित्यर्थः। अत्र मुहुरित्यनेन संवरणमोचनयोः विक्लवशब्देन प्रतिषेधानिच्छायाः अंसविवर्तीत्यनेन अवैमुख्यस्य च अवगमात् लज्जान्तरितो मदनावतारो व्यञ्जितः। ये तावदिह "तु" शब्दस्य पुनरित्यर्थं चुम्बितपदस्य सम्भो-

क्व न खलु गच्छामि ? अथ वा इहैव प्रियापरिभुक्तमुक्ते लतामण्टपे मुहूर्तं स्थास्यामि ।

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्रान्ते मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्तस्रस्तमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि ॥ २६ ॥

गोपलक्षणत्वं चास्थाय सकृदेव सम्भोगस्संवृत इति व्याचक्षते। तेषामास्तां तावत्कष्टकल्पना। "हि अअ मुहोवणदे मणोरहे कादरभावं ण मुंचेसि" विघ्नवत्यः प्रार्थितार्थसिद्धयः" इति शकुन्तलादुष्यन्तवचनविरोधः कथं परिहर्तव्यः? सम्भोगो वा कथमभिनयमर्हति? । अथ कथमन्यथा चतुर्थाङ्के "गंधव्वेण विवाहविहिणा णिव्वुत्तकज्जाणा सउंदला" इति सखीवचनं? उच्यते "लदावलय संदावहर आमंदेमि भूयो वि परिभोआअ" इति निवेदितसङ्केतस्य राज्ञस्तत्रैवान्येद्युः शकुन्तलासमागमस्य वृत्तत्वौचित्यानुवाद उपपद्यते । तथा हि समुद्रगृहे सङ्गतयोरेव मालविकाग्निमित्रयोरिरावतीदर्शनाद्विघटितयोः परिणयप्रस्तावः । उर्वशीं पुरूरवसोरपि प्रासादे सङ्गतयोरन्तर्भवन प्रवेशादनन्तरमेव वृत्तयाध्यवसितः सम्भोगः पश्चात्सूचित इति सांप्रदायिकः पन्थाः ॥ **वसन्तमालिकावृत्तम् ।**

प्रियया शकुन्तलया आदौ परिभुक्ते पश्चान्मुक्ते 'वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश' इति रीत्या साक्षात्सम्बन्धासम्भवे परंपरासम्बन्धेऽपि मनाक्प्रिय इति भावः ।

तस्या इति । शिलायामियं तस्याश्शरीरेण अनङ्गतप्तेन गात्रेण लुलिता परिवर्तनैर्विपर्यासितरचना पुष्पमयी शय्या । एषः अन्यतो दृश्यमानः क्रान्ते शकुन्तलाहस्ततापनिस्सारे नलिनीपत्रे नखैः अर्पितो न्यस्तः मन्मथलेखः अनुरागसन्देशलिपिः । इदञ्चान्यत्र दृश्यमानं हस्तस्रस्तं उत्थाय गतायाः करात्पतितं बिसाभरणं बिसरूपं वलयं शीतोपचारायार्पितमिति भावः । इति अनेन प्रकारेण आसज्यमानेक्षणः अनुबध्यमानदृष्टिरहं शून्यात् प्रियारहितादपि वेतसगृहात् निकुञ्जभवनात् सहसा निर्गन्तुं

नेपथ्ये ।

सायंतने सवनकर्मणि संप्रवृत्ते
वेदीं हुताशनवतीं परितः प्रकीर्णाः ।
छायाश्चरन्ति बहुधा भयमादधानाः
संध्यापयोदकपिशाः पिशिताशनानाम् ॥ २७ ॥

राजा—श्रुत्वा । अयमहमागच्छामीति ।

(निष्क्रान्तः ।)

॥ इति तृतीयोऽङ्कः ॥

न शक्नोमि । तस्याश्चादर्शने युक्तं तदनुबन्धिदर्शनमपीति भावः । **शार्दूलविक्रीडितं वृत्तम् ।**

सायमिति । सायन्तने सायम्भवे सवनकर्मणि होमक्रियायां संप्रवृत्ते समारब्धे सति हुताशनवतीं वेताग्नियुक्तां वेदीं परितः निबद्धभूमेस्सर्वतः भयं द्रष्टॄणां भीतिं आदधानाः विकृतरूपतया कुर्वाणाः सन्ध्यापयोदवत् कपिशा बभ्रवः पिशिताशनानां रक्षसां छायाः प्रतिबिम्बाः बहुधा नाना प्रकारं रक्षसां कामरूपत्वादिति भावः । प्रकीर्णाः व्याप्ताः चरन्ति उदकुम्भादिषु नानारूपा रक्षः प्रतिबिम्बा दृश्यन्त इति भावः । के चिच्छायाशब्दस्य अनातपात्मकं रूपमिति व्याख्यानमिच्छन्ति । तन्न युज्यते । तादृशस्य रूपस्य सायमसम्भवात् कपिशत्वानन्वयाच्च ॥ **वसन्ततिलकं वृत्तम् ।**

॥ इति **शाकुन्तलव्याख्याने सहृदयसमाख्याने** तृतीयोऽङ्कः ॥

॥ अथ चतुर्थोऽङ्कः ॥

ततः प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ ।

अनसूया—[1]हला पिअंवदे गंधव्वेण विवाहविहिणा णिव्वुत्तकल्लाणा सउंदला अणुरूवभत्तुगामिणी संवुत्तेत्ति णिव्वुदं मे हिअअं । तहवि एदं चिन्तणिज्जं ।

प्रियंवदा—[2]कहं विअ ? ।

[1]सखि प्रियंवदे गान्धर्वेण विवाहविधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयं । तथाप्येतच्चिन्तनीयम् ।

[2]कथमिव ? ।

॥ अथ चतुर्थाङ्कव्याख्याप्रारम्भः ॥

एवं शकुन्तलादुष्यंतयोः कृतसङ्केतयोरन्योन्युर्मिथः संगममनूद्याभिज्ञानवृत्तान्तमुपक्षेप्तुं विष्कम्भमारचयति । तत इति । कुसुमानां देवतार्चनार्थानामवचयं ग्रहणं । सख्यौ शकुन्तलासहचर्यौ प्रियंवदा चानसूया च । सख्योश्च पूर्वमेव प्रस्तुतत्वेन प्रसिद्धत्वात्प्रथमा द्वितीयेत्यनुक्त्वा प्रथममेव नाममग्रहणं अनसूया इति । गान्धर्वेण नाम । विवाह एव विधिर्विहितं कर्म तेन निर्वृत्तं कल्याणं कौतुकमङ्गलं यस्याः सा सती । अनुरूपमात्मसदृशं भर्तारं गामिनी प्राप्ता गम्यादीनामुपसंख्यानात्समासः । संवृत्ता सञ्जातेति निर्वृतं कृतार्थत्वात्सुखितं । आरण्यकहस्तगताया दिव्यरूपायाः सदृशवरलाभः कथंकारं भवेदिति सन्ततचिन्तनादनिर्वृतं पूर्वमासीत् येन प्रतिकूलदैवप्रशमनार्थं कुलपतिः सोमतीर्थं गत इति भावः । तथापि । सदृशभर्तृलाभे सत्यपि एतद्वक्ष्यमाणं चिन्तनीयं शकुन्तलाया यावदन्तः पुरप्रवेशनमेषा चिन्ता भवतीत्यर्थः । बहुलोक्तेश्च भावेऽनीयर् । कथ-

अनसूया—[1]अज्ज सो राएसी इट्ठिं परिसमाविअ इसिहिं विसज्जिदो अत्तणो णअरं पविसिअ अंदेउरसमाअदो इदोगदं उत्तंतं सुमरेदि वा ण वेत्ति ।

प्रियंवदा—[2]विस्सद्धा होहि । ण तारिसी गुणविरोहिणी आकिदी । तादो दाणिं इमं उत्तन्दं सुणिअ ण आणे किं पडिवज्जिस्सदित्ति ।

अनसूया—[3]जह पेक्खामि तह तस्स अणुमदं ।

---

[1]अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसर्जित आत्मनो नगरं प्रविश्यान्तःपुरसमागत इतोगतं वृत्तान्तं स्मरति वा न वेति ।

[2]विस्रब्धा भव । न तादृशी गुणविरोधिनी आकृतिः । तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति ।

[3]यथाहं पश्यामि तथा तस्यानुमतम् ।

मिव केनप्रकारेण चिन्तनमित्यर्थः । इष्टिं परिसमाप्य निरस्तप्रत्यूहं निर्वर्त्य ऋषिभिर्विसृष्टः अनुज्ञातस्सराजर्षिर्दुष्यन्तः अन्तः पुरैः शुद्धान्तवधूभिः सह समागतो मिलितः सन् इतो गतमार्ग्ये वृत्तं वृत्तान्तं शकुन्तलासमागमविषयं । स्मरति वा नवेति चिन्तनीयमित्यनुषङ्गः । यथेह स्थितो नान्तःपुरस्य स्मृतवान् एवं तत्र गतोप्यत्रत्यं वृत्तं किं विस्मरेदिति भावः । विस्रब्धा त्यक्तशङ्का । आकृतिर्मूर्तिः गुणविरोधिनी गुणप्रतिकूला न भवति न तथा प्रसन्नं रूपमगुणसहमित्यर्थः । 'रूपमेवास्यैतन्महिमानं व्याचष्ट' इति श्रुतेः । तथा च कुमारसम्भवे 'यदुच्यते पार्वति पापवृत्तये नरूपमित्यव्यभिचारि तद्वचः । तथा हि ते रूपमुदारदर्शने तपस्विनामप्युपदेशतां गत' इति । अन्यदेव तु चिन्त्यमित्याह तादो इति तातः काश्यपः इमं वृत्तान्तं शकुन्तलाया दुष्यन्तपरिग्रहरूपं । प्रतिपत्स्यते ज्ञास्यति । अनुरूपवरलाभमनुमोदिष्यते, उत वा स्वच्छन्दवृत्तं न मर्षिष्यत इति भावः । यया येन प्रकारेण पश्यामि तर्कयामि तथा तेन प्रकारेण तातस्यानुमतं

प्रियंवदा—[1]कहं वि अ ?।

अनसूया—[2]गुणवदे कण्णआ पडिवाअणिज्जेति अअं दाव पढमो संकप्पो तादस्स। तं जह देव्वं एव्व संवादेदि। णं अप्पाआसेण किदत्थो गुरुअणो।

प्रियंवदा—(पुष्पभाजनं विलोक्य।) [3]सहि अवइदाइ खु बलिकम्मज्जत्ताइ कुसुमाइ।

अनसूया—[4]णं सउंदलाए सोहग्गदेवदा अच्चणिज्जा।

प्रियंवदा—[5]जुज्जइ।

(तदेव कर्मारभते।)

---

[1]कथमिव ?।

[2]गुणवते कन्यका प्रतिपादनीयेत्ययं तावत्प्रथमः संकल्पस्तातस्य तं यदि दैवमेव संपादयति नन्वल्पायासेन कृतार्थो गुरुजनः।

[3]सखि अवचिताति खलु बलिकर्मपर्याप्तानि कुसुमानि।

[4]ननु शकुन्तलायाः सौभाग्यदेवताऽर्चनीया।

[5]युज्यते।

अङ्गीकृतप्रायमित्यर्थः। कथमिव केनप्रकारेण पश्यसीत्यर्थः। गुणवते प्रशस्तगुणाय कन्या शकुन्तला प्रतिपादनीया दातव्या 'विश्राणनं वितरणं स्पर्शनं प्रतिपादन'मित्यमरः। इत्ययं तावत् एवंरूप एव प्रथमः प्रधानः सङ्कल्पो निश्चयः। न तु दातृप्रतिग्रहीतृविशेषाभिसन्धिरिति भावः। तं अनभिसंहितविशेषं सङ्कल्पं दैवं नियतिरेव यदि संपादयति साधयति तर्हि गुरुजनः पिता अल्पायासेन चिन्ताश्रममात्रेण कृतार्थः स्वायासमन्तरेणैव कृतकृत्य इत्यर्थः। अप्पयासेण इति साधीयान् पाठः। सुखोपनते मनोरथे को वा न प्रमोदेतेति भावः। बलिकर्मणः पूजाक्रियायाः पर्याप्तानि समग्राणि। ननु तथाऽपि। सौभाग्यदेवता मङ्गलेदेवता लक्ष्म्यादिः। तदेव कर्म पुष्पावचयमेव। सुमेरेदि वा ष वेति सूचितं राज्ञो विस्मरणमुदात्तगुणस्यानुपपद्यमानमुपपादयितुं दुर्वासःप्रवेशमुपक्षिपति

नेपथ्ये ।

अयमहं भोः ।

अनसूया—(आकर्ण्य) [1]अदिहीणं विअ णिवेदिदं ।

प्रियंवदा—[2]णं उडअसण्णिहिदा सउंदला ।

अनसूया—[3]ण उण हिअएण सण्णिहिदा ।

प्रियंवदा—[4]होदु अलं एत्तिएहिं कुसुमेहिं ।

इति प्रस्थिते ।

नेपथ्ये ।

आः अतिथिपरिभाविनि !

---

[1]अतिथिनामिव निवेदितम् ।

[2]ननूटजसन्निहिता शकुन्तला ।

[3]न पुनर्हृदयेन सन्निहिता ।

[4]भवतु अलमेतावद्भिः कुसुमैः ।

—नेपथ्य इति । अयमहं भो इति आश्रमे हि शकुन्तलैवैका सन्निहिता । सा च विचित्ततया न किं चिद्वेद । अतः क्रोधोद्गारोयं दुर्वाससः । अयमिति दर्शनादेव वेद्यत्वं दर्शयति । भो इति चानवधानवारणार्थं । निवेदितमात्मनिवेदनं । ऊहार्थ इवशब्दः । उटजसन्निहिता आश्रमस्थितैव अतो नावाभ्यां गन्तव्यमिति भावः । पुनः किन्तु हृदयेन न सन्निहिता शरीरमात्रेण स्थिता भर्तृगतमानसत्वार्थः । अकिञ्चित्करस्सन्निधिरिदानीं तस्या इति भावः । एतावद्भिरवचितमात्रैः । अलं पर्याप्तं गम्यमानपर्याप्तिक्रियापेक्षया करणत्वात् कुसुमैरिति तृतीया । प्रस्थिते आश्रमं प्रतिनिवृत्ते । आः इति क्रोधे अतिथीन् परिभवत्यसत्कारेणोपेक्षत इति तस्याः सम्बुद्धिः अतिथिपरिभाविनि ।

विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि स-
न्कथां प्रमत्तः प्रथमं कृतामिव ॥ १ ॥

अनसूया—[1]हद्धि हद्धि तं एव्व संवुत्तं। जस्सिं कस्सिं वि पूआरुहे अवरद्धा सुण्णहिअआ सउंदला।

---

[1]हा धिक् हा धिक् तदेव संवृत्तम्। यस्मिन् कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला।

विचिन्तयन्तीति। अविद्यमानमन्यस्मिन् वस्तुनि मानसं यस्यास्तथाभूता सती यं प्रियं विचिन्तयन्ती ध्यायन्ती त्वमुपस्थितं संप्राप्तं उपस्थेयमपि स्वयमुपस्थितमित्यर्थः। तपोनिधिमित्युपस्थेयत्वहेतुः। मां तवापि दुर्वाससं न तु यंकञ्चिदितिभावः। न वेत्सि न जानास्यपि का कथा सत्क्रियाया इति भावः। स चिन्त्यमानः बोधितः स्मारितोऽपि सन् त्वां न स्मरिष्यति परिग्रह इति नाभिज्ञायते। कथमिव? प्रमत्तः अनवहितचित्तः पानाद्यन्तरितस्मृतिरिति यावत्। प्रथमं स्मृतिविभ्रमात्पूर्वं कृतां कथां वृत्तान्तमिव। 'प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रम' इति भावः। साभिप्रायविशेषणत्वात्परिकरालंकारः। मामित्यस्यापि तपोधनान्तरवैलक्षण्याभिप्रायत्वात्परिकराङ्कुरः। कथां प्रमत्तः प्रथमं कृतामिवेति चोपमा एते चालङ्कारास्संसृज्यन्ते। **वंशस्थं वृत्तम्।**

तदेव चिन्तितमेव। किं तत् आह-जस्सिं इति दूरतया विशिष्यामहणादुक्तं यस्मिन् कस्मिंश्चेदिति। पूजार्महीति पूजार्हः पूज्यस्तस्मिन्विषये अपराद्धा पूजाव्यतिक्रमात्कृतापराधा। अकर्मकत्वात् कर्मोक्तिः। तत्र च शून्यहृदयेति हेतुगर्भं विशेषणं। शून्यं भर्तृगतत्वादसन्निहितं, चिन्ताजाड्यान्निर्विषयं वा हृदयं यस्याः। सा। विलोक्य व्यक्तिविशेषमवधार्य। ण खु इति। अपराद्धेत्यनुपज्यते। यस्मिन् कस्मिंश्चित् सुलभ-

(पुनर्विलोक्य।) ण खु जस्सिं कस्सिं वि। एसो दुव्वासा सुलहकोवो महेसी। तह सविअ चडुलदुव्वाराए गहीए णिउत्तो। को अण्णो हुदवहादो दहिदुं पहविस्सदि। गच्छ पादेसु पणमिअ णिव ट्टेहि णं। जाव अहं अग्घोदअं गेण्हिअ अवसप्पामि।

प्रियंवदा—[1]तह।

इति निष्क्रान्ता।

न खलु यस्मिन् कस्मिन्नपि एष दुर्वासाः सुलभकोपो महर्षिः। तथा शप्त्वा चटुलदुर्वारया गत्या निवृत्तः। कोऽन्यो हुतवहादग्धुं प्रभविष्यति। गच्छ पादयोः प्रणम्य निवर्तयैनं। यावदहमर्घ्योदकं गृहीत्वोपसर्पामि।

[1]तथा।

प्रसाद इत्यर्थः। सुलभः अयत्नलभ्यः कोपो यस्य सः निर्निमित्तकोपन इत्यर्थः। निमित्ते तु सति किमुतेति भावः। दुर्वासा इति नामग्रहणं क्रोधनत्वप्रतीतिव्यञ्जनार्थं। यथा तस्यैव वचनं विष्णुपुराणे 'अशान्तिसारसर्वस्वं दुर्वाससमवेहि मा' मिति। तथा तेन प्रकारेण अत्यर्थपरुषत्वादवचनीयेनेत्यर्थः। चटुलया क्रोधसम्भ्रान्तया दुर्वारया अनुनयेनाप्यप्रतिनिवर्त्यया च गत्या शीघ्रगमनेन निवृत्तः आश्रममात्रप्रतिप्रयातः। हुतवहादग्नेरन्यः को वा दग्धुं भस्मीकर्तुं प्रभविष्यति शक्ष्यति। भस्मीकरणकल्पमीदृशं शापमेतस्मादन्यो न कश्चिन्मोक्तुमर्हतीत्यर्थः। गच्छ शीघ्रं याहि यावन्नात्येतीत्यर्थः। पादयोः प्रणम्य पादपतनपूर्वं नमस्कृत्यदुर्वाससः कर्मत्वात्पादयोरित्यधिकरणे सप्तमी। एनं दुर्वाससं निवर्तय प्रत्यानय। अर्घोदमर्घ्यं 'पादार्घाभ्यां चे' ति यत्प्रत्ययः। यावदुपस-

अनसूया—(पदान्तरे स्खलितं निरूप्य ।) [1]अह्मो आवेअक्खलिआए मह पब्भट्ठं अग्गहत्थादो पुप्फभाअणं ।

इति पुष्पोच्चयं निरूपयति ।

प्रियंवदा—[2]सहि पकिदिवक्को कस्स वा सो अणुणअं पडिगेण्हदि । किं चि उण माणुक्कोसो किदो ? ।

अनसूया—(सस्मितम् ।) [3]तस्सिं बहु एदं वि । कहेहि कहेहि ।

प्रियंवदा—[4]जदा अणुणीदो वि णिवत्तिदुं ण इच्छदि तदा विण्णाविदो मए ।

---

[1]अहो आवेगस्खलिताया मम प्रभ्रष्टमग्रहस्तात्पुष्पभाजनम् ।

[2]सखि प्रकृतिवक्रः कस्य वा सोऽनुनयं प्रतिगृह्णाति ? किञ्चित्पुनः सानुक्रोशः कृतः ।

[3]तस्मिन् बह्वेतदपि । कथय कथय ।

[4]यदानुनीतोऽपि निवर्तितुं नेच्छति तदा विज्ञापितो मया ।

र्पामि समीपं गमिष्यामि । स्खलितं गतिप्रतिरोधं निरूप्याभिनीय । अहो इति विषादे । आवेगेन सम्भ्रमेण स्खलितायाः प्रतिहतगतेः । अग्रं चासौ हस्तश्चाग्रहस्तस्तस्मात्पुष्पभाजनं नारिकेलसमुद्भवरूपं प्रभ्रष्टं गलितं स्खलनमत्राशुभनिमित्तं । पुष्पोच्चयं भाजनस्थं निरुपयति अनपविद्धं पश्यंति । पुष्पोच्चयस्यानपविद्धत्वं शुभोदर्कताया निमित्तं । अत्र पुष्पभाजनस्य भूमौ निपतनं पुष्पाणां वा विशरणं न विवक्षितं । 'एहि देवकज्जं दाव से णिव्वट्टेगो' इत्यग्रिमग्रन्थविरोधात् । प्रकृत्या वक्रः कुटिलः दोषैकदर्शीति यावत् स दुर्वासाः कस्य पुनः कस्य वा न केवलं ममेत्यर्थः । अनुनयं सान्त्वनं प्रतिगृह्णाति अङ्गीकरोति प्रकृतिर्हि दुरपोहा यत्रानुनेतृशक्तिरकिंचित्करीति भावः । किं चित्पुनःस्वल्पं तु सानुक्रोशः सदयकृतः पादपतनेन विहितः । सस्मितमिति दुर्वाससोऽपि प्रसादग्रहणं स्मितहेतुः । तस्मिन् प्रकृतिनिरनुक्रोशे एतत् किं चित् सानुक्रोशत्वमपि बहु अग्वापि महद्यत्रासम्भवीत्यर्थः । कथयेति शुश्रूषातिशयाद्द्विरुक्तिः । अनुनीतोपि आतिथ्यग्रहणं प्रार्थितोऽपि

अनसूया—[1]कहं विअ ? ।

प्रियंवदा—[2]भअवं पढमभत्तिं अवेक्खिअ अविण्णादप्पहावस्स दुहिदुअणस्स भअवदा एक्को अवराहो मरिसिदव्वोत्ति ।

अनसूया—[3]तदो तदो ।

प्रियंवदा—[4]सो तदो ण मे वअणं अण्णहा होदुं अरुहदि । किं दु अहिण्णाणाहरणदंसणेण साबो णिवत्तिस्सदित्ति मन्दअन्दो एव्व अंदरिहिदो ।

---

[1]कथमिव ? ।

[2]भगवन् प्रथमभक्तिमवेक्ष्य अविज्ञातप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षितव्य इति ।

[3]ततस्ततः ।

[4]स ततो न मे वचनमन्यथा भवितुमर्हति किं त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयन्नेवान्तर्हितः ।

विज्ञापितः गच्छन्नेव निवेदितः । भगवन् 'उत्पत्तिं च विनाशं च भूतानामागतिं गतिं । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिती'त्युक्तलक्षणज्ञानसंपन्न, हृदयज्ञस्यायमबुद्धिपूर्वोऽपराध इति विदितमेवेति भावः । प्रथमभक्तिं पूर्वकृतां भक्तिं प्रेक्ष्यालोच्य अविज्ञातप्रभावस्य शिशुत्वादविदितभवन्महिम्नः दुहितृजनस्य अपत्यनिर्विशेषस्य जनस्य एकः अपराधः नेदृशोभूतपूर्वो न वा भावीत्यर्थः । मर्षितव्यः क्षन्तव्यः पूर्वभक्तिः प्रभावापरिज्ञानं दुहितृनिर्विशेषत्वं सकृत्कृतापराधत्वं च क्षमाहेतुरित्यर्थः । स दुर्वासास्ततो मद्विज्ञापनानन्तरं मन्त्रयन्नेवान्तर्हित इति सम्बन्धः । अन्यथा भवितुं नार्हति न योग्यं भवति । तस्मादनुभवितव्यमेवेत्यर्थः । अभिज्ञायतेऽनेनेत्यभिज्ञानं नाममुद्राङ्कितत्वादवगमहेतुभूतं यदाभरणं अंगुलीयकरूपमुभयविदितं तस्य कर्मणो दर्शनेन भर्तृविषयीकरणेन निवर्तिष्यते प्रतिबन्धके निवृत्ते स स्मरिष्यतीत्यर्थः । अन्तर्हितः चक्षुर्विषय-

अनसूया—[1]सक्कं दाणिं अस्ससिदुं। अत्थि देण राएसिणा संपत्थिदेण सणामहेअंकिदं अंगुलीअअं सुमरणिज्जंत्ति सअं पिणद्धं। तेण साहीणोवाआ सउंदला भविस्सदि।

प्रियंवदा—[2]एहि देवकज्जं दाव से णिव्वट्टेमो। (इति परिक्रामतः।) (प्रियंवदा विलोक्य।) [3]अणसूए पेक्ख दाव णं वामहत्थोवहिदवअणं आलिहिदं विअ पिअसहिं। भत्तुगदाए चिंदाए अत्ताणं वि एसा ण विभावेदि। किं उण आमंदुअं।

[1]शक्यमिदानीमाश्वसितुं। अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितमंगुलीयकं स्मरणीयमिति स्वयं पिनद्धं। तेन स्वाधीनोपाया शकुन्तला भविष्यति।

[2]एहि देवकार्यं तावदस्या निर्वर्तयावः।

[3]अनसूये पश्य तावदेनां वामहस्तोपहितवदनामालिखितामिव प्रियसखीं। भर्तृगतया चिन्तया आत्मानमप्येषा न विभावयति किं पुनरागन्तुकम्।

मतिक्रन्तः। येन प्रार्थनान्तरानवकाश इति भावः। इदानीमेवंरूपे सति शापमोक्षे आश्वसितुमनिर्वेदेन स्थातुं शक्यं शक्नुम इत्यर्थः। शक्नोतेर्भावे यत्प्रत्ययः। कथं शक्यमित्याह—अर्थीति संप्रस्थितेन नगरं प्रतिप्रयातुमारब्धेन। स्मरणीयमिति स्मर्तव्यमित्युक्त्वा अंगुलीयकदर्शनादात्मनः स्मरणेन शकुन्तलाया भवितव्यमित्यभिप्रायेणेत्यर्थः। स्वयमात्मनैव पिनद्धं शकुन्तलांगुलौ निवेशितं। तेनाभिज्ञानाभरणसत्त्वेन स्वाधीनः अयत्नसिद्धः उपायो यस्याः सा भविष्यति विस्मरणकाल इति शेषः। अस्याः शकुन्तलायाः सम्बन्धि देवकार्यं तावद्देवतार्चनमेव, तद्धि दोषशान्तिकरमिति भावः। वामहस्तोपहितवदनां उत्क्षिप्ते वामकरे निक्षिप्तमुखीं आलिखितां चित्रार्पितामिव चिन्तानिष्पन्दावस्थानामित्यर्थः। भर्तृगतया भर्तारं प्रासया आत्मन्यनवस्थितयेति यावत्। चिन्तया ध्यानेन 'ध्यानं चिन्तेहितानाक्षेः शून्यताश्वासतापकृ'दिति लक्षणं। आत्मानं स्वशरीरमपि न विभावयति न जानाति। आगन्तुकं अतिथिं किं पुनः न विभावयतीति किं

अनसूया—[1]पिअंवदे दुवेण्ण वि मुहे एसो उत्तंदो चिट्ठदु। रक्खणिआ खु पकिदिपेसला सही।

प्रियंवदा—[2]को दाणिं उण्होदएण णोमालिअं सिञ्चइ?

इति निष्क्रान्ते

॥ विष्कम्भः ॥

(ततः प्रविशति सुस्थितः शिष्यः।)

शिष्यः—वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन काश्यपेन। तत्प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति (परिक्रम्यावलोक्य।) हन्त प्रभातम्।

---

[1]प्रियंवदे द्वयोरेव नौ मुखे एष वृत्तान्तस्तिष्ठतु रक्षणीया खलु प्रकृतिपेशला सखी।

[2]क इदानीमुष्णोदकेन नवमालिकां सिञ्चति?

वक्तव्यं। मुखे मुखान्तः एष वृत्तान्तः दुर्वासःशापरूपो विषयः तिष्ठतु। मुखाद्बहिर्न निर्गच्छत्वित्यर्थः। तत्र हेतुः रक्खणीआ खु इत्यादि—प्रकृत्या पेशला सरलहृदया दुःखासहेति यावत्। रक्षणीया खलु अनन्यचेताश्शापकथाश्रवणाद्विपद्येतेति भावः। नवमालिकां पेशलप्रकृतिमित्यर्थः। शकुन्तलायाश्शापवृत्तान्तज्ञानं संविधानप्रपञ्चानुरोधादुपश्लिष्टं अन्यथा ह्यभिज्ञानं रक्षितं सत् स्मरणव्यवधानं न चिरस्यानुवर्तयेत् शापस्यायं महिमा यत्सख्योरनिवेदनसङ्कल्पः यच्चाभिज्ञानभ्रंश इति रहस्यम्।

विष्कम्भ इति। नेपथ्यगतस्य दुर्वाससः संस्कृतवचनानुविधानान्मिश्रविष्कम्भ इत्यर्थः। यद्वा मध्यपात्रप्रयोजितत्वमात्रस्य विष्कम्भलक्षणत्वादनसूयाप्रियंवदयोः सख्योरनीचपात्रत्वेन प्राकृतसंस्कृतभेदतिरस्कारेण शुद्धविष्कम्भत्वमेवोचितम्।

अथ शकुन्तलायाः पतिगृहप्रेषणमङ्कार्थमवतारयितुं सोमतीर्थात्प्रत्यागतस्य काश्यपस्य शिष्यः प्रविशति आदौ सुप्तः पश्चादुत्थितः उषसि प्रबुद्ध इति यावत्। वेलायाः कालस्योपलक्षणार्थं ज्योतिर्दर्शनेन परिज्ञानार्थं। प्रवासात् सोमतीर्थगमनरूपं प्रवासं समाप्य स्यब्लोपे पञ्चमी। उपावृत्तेन प्रत्यागतेन। प्रकाशं निर्गतः उटजाद्बहिरनावृतं

तथा हि ।

यात्येकतोऽस्तशिखरं पतिरोषधीना-
मा विष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥२॥

अपि च ।

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।

देशं प्राप्तः तावत् स्फुटं अवलोकयामि पश्यामि । रजन्याः कियदवशिष्टं कियानवशेष इति । हन्तेति संभ्रमे प्रभाते हि कर्तव्यभूयस्त्वाद्भवति संभ्रमः ।

यातीति । एकतः एकस्यां दिशि प्रतीच्यामिति यावत् । ओषधीनां पतिश्चन्द्रः अस्तस्य चरमाचलस्य शिखरमग्रं याति प्राप्नोति । एकतः अन्यतः पूर्वस्यां दिशीति यावत् । अरुणः पुरस्सरो यस्य सोऽनूरुसारथिरर्कः सूर्यः आविष्कृतः प्रकटीकृतः । कालेनेति शेषः । एवं तेजोद्वयस्य सूर्यचन्द्रमसोर्द्वयोरपि तेजसोरेव सतोः युगपत् समकालमेव व्यसनोदयाभ्यां अपचयोपचयाभ्यां लोको जनः आत्मनो दशान्तरेषु सुखदुःखावस्थाभेदेषु नियम्यते निबध्यत इव । कालगतिमनुपतन् सुखदुःखपरिवर्तो महतामपि दुस्तरइति निदर्श्यत इवेत्यर्थः । "कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण" इति च मेघसंदेशे । क्रियया सदसदर्थबोधनरूपो निदर्शनालङ्कारः । **वसन्ततिलका वृत्तम्** ॥

अन्तर्हित इति । शशिनि अन्तर्हिते अस्तङ्गतमात्रएव सति सैव कुमुद्वती सति शशिनि प्रियदर्शना भूतपूर्वैव कुमुदिनी संस्मरणीयशोभा विच्छाया मे दृष्टिं न नन्दयति न प्रीणयति । उक्तविशेषसमर्थनं सामान्यमर्थान्तरं न्यस्यति । इष्टेति । इष्टस्य कान्तस्य प्रवासेन देशान्तरगमनेन जनितान्यबलाजनस्य दुःखानि अतिमात्रमतिप्रमाणं

इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि ॥ ३ ॥

प्रविश्य पटाक्षेपेण ।

अनसूया—[1]एवं णाम विसअपरम्मुहस्स वि जणस्स ण एदं ण विदिदं । जं तहाविहेण रण्णा सउंदलाए अणज्जं आअरिदम् ।

शिष्यः—यावदुपस्थितां होमवेलां गुरवे निवेदयामि ।

इति निष्क्रान्तः ।

अनसूया—[2]अह वा पडिबुद्धा वि किं करिस्सं । ण मे उइदेसु वि करणिज्जेसु इत्थपादा पसरंदि । सकामो दाणिं कामो होदु ।

---

[1]एवं नाम विषयपराङ्मुखस्यापि जनस्य नैतन्न विदितं । यत्तथा विधेन राज्ञा शकुन्तलायामनार्यमाचरितम् ।

[2]अथ वा प्रतिबुद्धापि किं करिष्यामि । न मे उचितेष्वपि कर-

सुतनोः [illegible] लोकप्रसादकयोगि । किं पुनर्लोकानन्दनस्य चन्द्रमसो विरहदुःखमित्यर्थः [illegible] पद्यते । नूनमिति संभावनायां संभाव्यत एतत्कुमुदिनीशेभाविषयदर्शनादिति भावः । इतिहासाद विदितमेव हि केवलमिदमारण्यकस्य, तदेतत् कुमुदिनीदयया [illegible] मिति नूनमित्युक्तं । वसन्ततिलकावृत्तम् ॥

अनन्तरं शकुन्तलायां इष्टप्रवासदुःखावगमनुस्मारिता रभसादनसूया प्रविशति । पटस्य यवनिकायाः अङ्गेपणाकर्षणेन आक्षेपेण स्वयमुत्सारणेन वा सम्भ्रमादिति भावः । एवं नाम इष्टप्रवासजनितानीत्याद्युक्तप्रकारेण विषयेषु शब्दादिषु पराङ्मुखस्य अनारण्यस्यापि जनस्यारण्यकस्य नैतन्न विदितं स्त्रीणां विरहमहत्त्वं सुविदितमेव । तथाविधेन विदग्धेन । यत् अनार्यं अनुचितं आचरितं कृतं नैतन्नावेदितमिति सम्बन्धः । उपस्थितां संप्राप्तां होमवेलां अग्निहोत्रसमयं गुरवे कण्वाय यावन्निवेदयामि निवेदयिष्यामि यदर्थमादिष्टोऽस्मीति भावः । प्रतिबुद्धापि राज्ञा शकुन्तलायामनार्यमाचरितमिति संप्रति जानत्यपि किं करिष्यामि

जेण असच्चसंधे जणे सुद्धहिअआ सही पदं कारिदा । अह वा दु-
व्वासकोवो एदं णिअरेदि । अण्णहा कहं सो राएसी तारिसइ-
मंदिअ एत्तिअस्स आलस्स लेहमत्तं विण विसज्जेदि । ता इदो

णीयेषु हस्तपादाः प्रसरन्ति । सकाम इदानीं कामो भवतु येनासत्य-
संधे जने शुद्धहृदया सखी पदं कारिता । अथ वा दुर्वासः कोपएवं
विकारयति । अन्यथा कथं स राजर्षिस्तादृश नि मन्त्रयित्वा एतावतः

अतीते प्रतिबोधः किंप्रयोजन इत्यर्थः । हस्तपादाः हस्तौ च पादौ च प्राकृतत्वादेक-
वद्भावानियमः । हस्तपादाविति वा छाया हस्तसहितौ पादाविति मध्यमपदलोपी
समासः । उचितेषु अन्यस्तेष्वपि अवधानविशेषमुपपादनीयेष्वपीत्यर्थः । करणीयेषु
बलिविधानादिषु कार्येषु । प्रसरन्ति व्याप्नुवन्ति । प्रसरत इति द्विवचनं वा । कामो
मन्मथः सकामः सफलोरथः सिद्धमनोरथ इति यावत् । भवतु सन्तापाधानं हि तस्य
चिकीर्षितं तच्च सिद्धमिति भावः । येन कामेन असत्यसन्धे वितथप्रतिज्ञे जने राजनि
शुद्धहृदया तपोवनसंवर्धिततया कैतवानाभिज्ञासखी शकुन्तला पदं कारिता प्रवेशमा-
पादिता । दुःखायैव हि तथाविधमनु रागमाहितवान् कामः स इदानीं सकामो भव-
त्विति भावः । न खलु राजर्षिरसत्यसन्धो भवितुमर्हतीत्याह—अथवेति । दुर्वासः-
कोपः 'स्मरिष्यति त्वां न सबोधितोऽपि सन्' इत्येवं शापरूपः एवमनेन प्रकारेण विकार-
यति अन्यथयति । अन्यथा शापाभावे सः तथा प्रणयवान् राजर्षिः धार्मिक इत्यर्थः ।
तादृशानि मन्त्रयित्वा 'मां पुनर्दहेत्येव' 'द्वे प्रतिष्ठे कुलस्य मे' इत्यादिकमुक्त्वा एता-
वतः कालस्य महत्यपि काले गते लेखमात्रं सकृदपि सन्देशलेखनमित्यर्थः । 'कृत्वोर्थ-
प्रयोगे कालेऽधिकरणे' इति षष्ठी । अथवा लेखमात्रं केवलं लेखमपि । मा भूदनाय
सेनादिप्रेषणवरोधीति भावः । कालस्येति सम्बन्धसामान्ये षष्ठी । तत् यस्मात्
शापान्तरितस्मृतिस्मरणात् । अभिज्ञानं मुद्रासनाथत्वात्प्रत्यभिज्ञाहेतुभूत-
मंगुलीयकं अस्य राज्ञो विसर्जयिष्यामि प्रेषयिष्यामि । अभिज्ञानाभरणदर्शनाच्छापमो-

अहिण्णाणं अंगुलीअअं से विसज्जेमि । दुक्खसीले तवस्सिजणे कोवा अब्भत्थिअदि । णं सहीगमी दोसो त्ति ववसिदा वि ण पारेमि पवासपडिणिउत्तस्स तादकस्सवस्स दुस्संदपरिणीदं आवण्णसत्तं सउंदलं णिवेदेदुं । इत्थं गदे किं णु खु अम्हेहिं करणिज्जं ? ।

(प्रविश्य ।)

प्रियंवदा—(सहर्षम् ।) [1]हला तुवर तुवर सउंदलाए पत्थाणकोदुअं णिव्वत्तेदुम् ।

कालस्य लेखमात्रमपि न विसर्जयति । तस्मादितः अभिज्ञानमंगुलीयकमस्य विसर्जयामि । दुःखशीले तपस्विजने कोवाभ्यर्थ्यते । ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम् । इत्थं गते किन्नु खल्वस्माभिः करणीयम् ? ।

[1]सखि त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थान कौतुकं निर्वर्तयितुम् ।

श्यस्य तेनैव मानना विधानादिति भावः । अभिज्ञानविसर्जनस्यापि नेह सम्भव इत्याह-दुःखेति । दुःखं कायक्लेशः शीलं स्वभावो यस्य तस्मिन् तपस्विजने को वा अभ्यर्थ्यते अङ्गुलीयकं नेतुं प्रार्थनीयः । वीतरागो हि न रागिणां दुःखमवैति येनापनेतुं त्वरेतेति-भावः । तातनिवेदनमेवोपायः तत्राह—णमिति । ननु सखीगामि । दोषः शकुलन्तां हि प्राप्योत्पयमपराधः यत्तातमनपेक्ष्य प्रवृत्तमिति हेतोः, व्यवसितापि वक्तुमुद्युक्तापि प्रवासात्प्रतिनिवृत्तस्य सद्यः प्रत्यागतस्य तातकाश्यपस्य दुष्यन्तेन परिणीतां परिगृहीतां आपन्नसत्त्वां प्राप्तगर्भां शकुन्तलां निवेदयितुं न पारयामि न समर्थोस्मि । कालेन तु स्वयं विदितं न दोषाय स्यादिति भावः । इत्थं गते एवं संवृत्ते सति सर्वथाप्युपायानामगतौ सत्यामित्यर्थः । अस्माभिः स्त्रीभिः परवतीभिः किं नु खलु करणीयं न किञ्चित् कर्तुं शक्यत इत्यर्थः । शकुन्तलायाः प्रस्थानकौतुकं यात्रामङ्गलं निर्वर्तयितुं त्वरस्व

अनसूया—[1]सहि कहं एदं ? ।

प्रियंवदा—[2]सुणाहि दाणिं सुहसइदपुच्छिआ सउंदलाए सआसंगतास्मि ।

अनसूया—[3]तदो तदो ।

प्रियंवदा—[4]दाव णं लज्जावणदवअणं परिस्सइअ तादकस्सवेणएव्वं अहिणंदिदं दिट्ठिआ धूमावरुत्थदिट्ठिणो वि जअमाणस्स पावए एव्व आहुदी पडिदा । वच्छे सुसिस्सपरिदिण्णा विअ विज्जा

---

[1]सखि कथमेतत् ? ।

[2]शृणु इदानीं सुखशयितपृच्छिका शकुन्तलायास्सकाशं गतास्मि ।

[3]ततस्ततः ।

[4]तावदेनां लज्जावनतवदनां परिष्वज्य तातकाश्यपेनैवमभिनन्दितं । दिष्ट्या धूमावरुद्धदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता ।

प्रस्थानस्याचिरभावित्वात्त्वरितं कौतुकं सम्पादनीयमित्यर्थः । एतत् शकुन्तलाप्रस्थानं कथं केन प्रकारेण । भर्तुः शासनात्तातस्य प्रेषणाद्वा भवेत् । शापादावाभ्यामनिवेदनाच्चोभयमपि न युज्यत इति भावः । इदानीं प्रभाते सुखशयितुं सुखेन शयनं पृच्छिका प्रष्टुं 'तुनन्ष्वुलौ क्रियायां क्रियार्थायां'मिति ष्वुल् शकुन्तलायाः सकाशं समीपं तदो इति । शुश्रूषातिशयन्यग्भ्ये प्रश्नः पुनरुक्तिश्च । तावत्तदा मद्गमनावसर इति यावत् । लज्जया दौहृदलक्षणं तातस्य विदितं भविष्यतीत्येवंरूपयावनतसुखीं परिष्वज्य सदृशभर्तृलाभ परितोषेणालिङ्गय अभिनन्दनप्रकारमाह । दिट्ठिआ इति । धूमेनावरुद्धदृष्टेरपश्यतदर्शनस्यापि यजमानस्य कर्तुराहुतिर्होमकर्मद्रव्यं पावके होमस्थान एव पतिता संक्रान्ता आहूयत इत्याहुतिर्हविः । सदृशवरमजानतोपि मम त्वं सदृश एव सङ्गतेति भावः । सुशिष्ये गुणवति शिष्ये परिदत्ता न्यस्ता विद्या ज्ञानमिव मे अशो-

असोअणिज्जासि मे संउत्ता । अज्ज एव्व राएसिपरिगहीदं तुमं भत्तुणो सआसं विसज्जेमि त्ति ।

अनसूया—[1]अह केण सूइदो अअं तादस्स उत्तंदो ।

प्रियंवदा—[2]अग्गिसरणं पविट्ठस्स सरीरं विणा छादोमइए वा आए।

अनसूया—(सास्मितम् ।) [3]कहेहि कहेहि ।

प्रियंवदा—(संस्कृतमाश्रित्य ।)

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ ४ ॥

वत्से सुशिष्यपरिदत्तेव विद्याऽशोचनीयासि मे संवृत्ता। अद्यैव राजर्षिपरिगृहीतां त्वां भर्तुः सकाशं विसर्जयामीति ।

[1]**अथ केन सूचितोऽयं तातस्य वृत्तान्तः ।**

[2]**अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाचा ।**

[3]**कथय कथय ।**

चनीया शोकानर्हा संवृत्ता सञ्जातासि । 'नत्वेनामिरिणे वप' इति मनूक्तरीत्या पात्र प्रतिपादनमेव हि विद्यासंस्कार इति भावः । उपमाद्वयं महर्षेः सदृशमुपात्तं । राजर्षिणा विभवाभिजनवृत्तादिभिरात्मसदृशेन परिगृहीतां त्वामद्यैव तत्क्षणमेवेत्युत्साहप्रदर्शनं । सकाशं सन्निधिं विसर्जयामि प्रहिणोमि । इत्यभिनन्दितमिति पूर्वेण सम्बन्धः । अयं राजर्षिपरिग्रहरूपः वृत्तान्तः विषयः केन सूचितो निवेदितः । अग्निशरणं अग्निगृहं प्रविष्टस्य सतः शरीरं विना अशरीरया छन्दोमय्या अनुष्टुप्छन्दोरूपया वाचा सूचित इति सम्बन्धः । संस्कृतामिति । 'कार्यंतश्चोत्तमादीनां कार्यो भाषाविपर्ययः' इति ह्युच्यते ।

दुष्यन्तेनेति । हे ब्रह्मन् दुष्यन्तेन राज्ञा नाममात्रग्रहणाद्विदितानुभावत्वं स्फुटीकृतं । आहितं निषिक्तं तेजो वीर्यं भुवो भूतये ऐश्वर्यसे दधानां धारयन्तीमत एवाग्निर्गर्भे यस्यास्तां शमीमिव तनयां शकुन्तलामवेहि जानीहि । अग्निगर्भा शमीमिवेत्युपमया क्षत्रबीजयोः पवित्रत्वं गर्भस्य च तेजस्वित्वं, भूतये भुव इति च साम्राज्यभाजनत्वं

अनसूया—(प्रियंवदामाश्लिष्य ।) [1]सहि पिअं मे। किंदु अज्जएव्व सउंदला णीअदित्ति उक्कण्ठासाहारणं परिदोसं अणुहोमि ।

प्रियंवदा—[2]सहि वअं दाव उक्कण्ठं विणोदइस्सहो । सा तवस्सिणी णिव्वुदा होदु ।

अनसूया—[3]तेण हि एदस्सिं चूदसाहावलंबिदे णालिएरसमुग्गए तण्णिमित्तं एव्व कालान्दरक्खमा णिक्खित्ता मए केसरमालिआ। तं

---

[1]सखिप्रियं मे । किंत्वद्यैव शकुन्तला नीयत इत्युत्कंठासाधारणं परितोषमनुभवामि ।

[2]सखि आवां तावदुत्कण्ठां विनोदयिष्यावः । सा तपस्विनी निर्वृता भवतु ।

[3]तेन ह्येतस्मिन् चूतशाखावलम्बिते नालिकेरसमुद्गके तन्निमित्त-

कुमारस्याभिव्यज्यते । उक्तं च रघुवंशे ' निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकां । नदीमिवान्तस्सलिलां सरस्वतीं नृपस्ससत्त्वां महिषीममन्यत ' इति ॥

आश्लिष्यति । प्रियवचने हि पारितोषिकमेतत् सुहृदां यत्परिष्वङ्गः । प्रियश्च शकुन्तलायाः पतिसमागमः । अद्यैव इदानीमेव नीयते अन्यत्र गम्यत इति हेतोरुत्कण्ठया विरहौत्सुक्येन साधारणं समानमेव परितोषमनुभवामि उपलभे । शकुन्तलायाः पतिसङ्गप्रीतिरस्माकं च तद्धि हः सङ्गीत इत्यर्थः । कालान्तरे तु यदि नीयेत तर्हि मनाक् चेतः समाधानान्नैवमुत्कण्ठातिरेकः स्यादिति व्यञ्जनायैवेत्यनेन । आवां तावदावां तु उत्कण्ठां सख विरहे तुकतां विनोदयिष्यावः तद्विषयभिः कथाभिस्तस्याश्चान्युदन्तवार्ताभिस्तथाविधैश्चोपायान्तरैर्व्युत्करिष्यावः तपस्विनी प्रियविरहानुपच्छेदनीया सा शकुन्तलैव केवलं निर्वृता अविप्रलम्भात्सुखिता भवतु । अभिन्नसुखदुःखतया सा स्वयं सुखितैव नौ मुक्तपेक्षत्वीत्यर्थः । चूतशाखायामवलम्बिते निबद्धे नालिकेरसमुद्गके नालिकेरपर्णमुष्टिनिर्मिते भाजनविशेषे । तन्निमित्तं शकुन्तलाया हेतोः कालान्तरक्षमा कालव्यवधानसहा चिरादपि सौरभमनुज्झन्तीत्यर्थः । केसरमालिकावकुलावलिः ' विम-

तुमं हत्थसंणिहिदं करेहि । जाव अहं वि से गोरोअणं तित्थमित्तिअं दुव्वाकिसलआइत्ति मंगलसमालंभणाइ विरएमि ।

प्रियंवदा—[1]तह करीअदु ।

अनसूया निष्क्रान्ता । प्रियंवदा नाट्येन सुमनोभाजनं गृह्णाति ।

नेपथ्ये ।

गौतमि—आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय ।

प्रियंवदा—(कर्णं दत्त्वा ।) [2]अणसूए तुवर । एदे खु हत्थिणणअरआमिणो इसिणो सद्दाअंति ।

मेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका । तां त्वं हस्तसन्निहितां कुरु । यावदहमप्यस्याः गोरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानीति मङ्गलसमालम्भनानि विरचयामि ।

[1]तथा क्रियताम् ।

[2]अनसूये त्वरस्व । एते खलु हस्तिननगरगामिनः ऋषयश्शब्दायन्ते ।

दसुरही वउलावलिआ खु अहं ' इति मालविकाग्निमित्रे । निक्षिप्ता रक्षितेत्यर्थः । कुसुमान्तराणि मार्गे गच्छन्त्या वातपाय्यां क्लिष्टानि प्रियमुपगच्छन्त्या न शोभायै स्युरिति भावः । हस्तसन्निहितां शकुन्तलाप्रसाधनार्थं स्वहस्तस्थितां । तदृहणार्थं गतागौतेन प्रस्थानविलम्बो मा भूदिति भावः । तीर्थमृत्तिकां पुण्यां मृदं । समालभ्यते स्पृश्यते एभिरिति समालम्भनानि मङ्गलानि समालम्भनानि शरीरसङ्कोचितानि मङ्गलद्रव्याणि यावद्विरचयामि अङ्गन्यसिष्यामि । दूर्वाकिसलयानां समालम्भनत्वं स्पर्शमात्रत्वात् । त्वं तु केसरमालया प्रसाधयिष्यसीति भावः । सुमनोभाजनं नारिकेलसमुद्गकरूपं नाट्येन गृह्णाति चूतशरस्तातो गृह्यमाणमभिनयति । नेपथ्य इति कण्वशिष्यवचनमिदं । शार्ङ्गरवेण मिश्रास्सहिताः शार्ङ्गरवादय इत्यर्थः । शकुन्तलाया नयनाय पतिगृहप्रापणाय । त्वरस्व मङ्गलसमालम्भनविरचने त्वरिता भव । हास्तिननगरं गामिनः गम्यादीनामुपसङ्ख्यानात्

प्रविश्य समालम्भनहस्ता ।

अनसूया—[1]सहि एहि । गच्छम्ह ।

इति परिक्रामतः ।

प्रियंवदा—(विलोक्य) [2]एसा सुज्जोदए सिहामज्जिदा णीवारक्खदहत्थाहि सोत्थिवाअणिआहिं तावसीहिं अहिणंदिज्जमाणा सउंदला चिट्ठइ उवसप्पाम णं । (इत्युपसर्पतः ।)

ततः प्रविशति तथोद्दिष्टव्यापारा आसनस्था शकुन्तला ।

तापसीनामन्यतमा—(शकुन्तलां प्रति ।) [3]जादे भत्तुणो बहुमाणसूअअं महादेवीसद्दं अहिअच्छ ।

---

[1]सखि एहि गच्छावः ।

[2]एषा सूर्योदये शिखामज्जिता नीवाराक्षतहस्ताभिस्स्वस्तिवाचनिकाभिस्तापसीभिरभिनंद्यमाना शकुन्तला तिष्ठति । उपसर्पावैनाम् ।

[3]जाते भर्तुर्बहुमानसूचकं महादेवीशब्दमधिगच्छ ।

द्वितीयातत्पुरुषः ऋषयः शब्दायन्ते । 'शब्दवैरकलहाभ्रकव्वमेघेभ्यः-करणे' इति 'तत्करोती' ति क्यङि सिद्धस्य शब्दायतेः कर्मणि रूपं । शिखायां शिरसि मज्जिता स्नापिता स्त्रीणां शिरोमज्जनं न सर्वकालिकमिति दर्शितमेतेन । शिखामार्जितेति च्छायापाठे मार्जिता कङ्कतादिभिर्मृष्टीकृतेत्यर्थः । अग्रे सख्या सुखमज्जनस्यैव पश्चात्पूर्वोक्त एव पाठः साधुः । नीवारगणं तपोवनसुलभानां तृणधान्यानां ये अक्षतास्ते हस्तेषु यासां ताभिः । स्वस्ति मङ्गलं मङ्गल्यमाशीर्वचनमिति यावत् । वाचयन्ति पठन्तीति स्वस्तिवाचन्यः । स्वार्थिकश्च कः । तासिः स्वस्तिवाचनिकाभिः । अभिनन्द्यमाना अनुगृह्यमाणा । यथोद्दिष्टो निर्दिष्टसदृशः व्यापारस्तापसीभिनन्दनादिरूपो यस्यास्सा । जाते पुत्रि भर्तुर्महादेवभूतस्यमहाराजस्येति भावः । बहुमानसूचकं गौरवचिह्नभूतं अनुरूपमित्यर्थः ।

अपरा—[1]वच्छे वीरप्पसविणी होहि ।

अन्या—[2]जादे भत्तुणो बहुमदा होहि ।

इत्याशिषो दत्वा गौतमीवर्जं निष्क्रान्ताः ।

सख्यौ—(उपसृत्य ।) [3]सहि सुहमज्जणं दे जादम् ? ।

शकुन्तला—[4]साअदं मे पि असहीणं ? । इदो णिसीदह ।

उभे—(मङ्गलपात्राण्यादाय उपविश्य ।) [5]हला शकुन्तले सज्जा होहि। जाव दे वअं मङ्गलसमालंभणं विरएमो ।

शकुन्तला—[6]इदं खु बहुमंतव्वं । दुल्लहं दाव मे सहीमंडणं भविस्सदि । (इति वाष्पं विकिरति ।)

---

[1]वत्से वीरप्रसविनी भव ।

[2]जाते भर्तुर्बहुमता भव ।

[3]सखि सुखमज्जनं ते जातम् ? ।

[4]स्वागतं मे प्रियसखीभ्यां ? । इतो निषीदतम् ।

[5]हला शकुन्तले सज्जाभव । यावत्ते आवां मङ्गलसमालंभनं विरचयावः ।

[6]इदं खलु बहुमन्तव्यं । दुर्लभं तावन्मे सखीमण्डनं भविष्यति ।

महादेवशब्दं महामहिषीति व्यपदेशः । वीरं प्रसूत इति वीरप्रसविनी वीरमातेति पुत्रादपि विशेषमनुभवेत्यर्थः । भर्तुर्बहुमता पूजिता नातः परं स्त्रीणां श्रेय इति भावः । गौतमीवर्जं गौतमीं विना । सज्जा प्रसाधनग्रहणोद्युक्ता । इदं मङ्गलसमालम्भनं बहुमन्तव्यमादरादङ्गीकरणीयं । कुतः । सखीमंडनं सखीकर्तृकमलङ्करणं दुर्लभं भर्तृगृहं गतायां न लभ्यमित्यर्थः । बाष्पं सखीविरहस्मरणजनितं विकिरति अंगुल्यग्रेण विक्षिपति नय-

सख्यौ—[1]सहि ण दे उइदं मंगलकाले रोइदुम् । (इत्यश्रूणिप्रमृज्य नाट्येन प्रसाधयतः ।)

प्रियंवदा—[2]सहि आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं विआरिअदि ।

ततः प्रविष्टावुपायनहस्तावृषिकुमारौ ।

ऋषिकुमारौ—इदमलङ्करणम् । अलंक्रियतामत्रभवती ।

सर्वा विलोक्य विस्मिताः ।

गौतमी—[3]वच्छ णारद कुदो एदं ? ।

प्रथमः—तातकाश्यपप्रभावात् ।

गौतमी—[4]किं माणसी सिट्ठी ? ।

द्वितीयः—न खलु, श्रूयतां । तत्रभवता काश्यपेन वयमाज्ञापिताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति । तत इदानीं ।

---

[1]सखि न ते उचितं मंगलकाले रोदितुम् ।

[2]सखि आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विकार्यते ।

[3]वत्स नारद कुत एतत् ? ।

[4]किं मानसी सृष्टिः ? ।

नाभ्यां विसृजतीति वा । रोदितुं रोदनं अव्ययकृत्वाद्भावार्थता । प्रमृज्य पर्यन्तेनापनुद्य । आभरणानां महार्हनागकिभूषणानां उचितं योग्यं रूपमङ्गं आश्रमे सुलभैः प्रसाधनैर्दूर्वामृत्तिकादिभिः विकार्यते दूष्यते । न केवलमयं नालङ्कारः प्रत्युत दूषणमपि तथापि तु मङ्गलार्थमगत्या क्रियत इत्यर्थः । उपायनं वसनाभरणाद्युपहारो हस्ते ययोस्तौ इदं हस्तस्थितं अलङ्करणमलङ्करसाधनं जातावेकवचनं । अलंक्रियतां अनेन शकुन्तला प्रसाध्यतां । विस्मिताः तपोवने रत्नाभरणादीनामलाभादाश्चर्यस्तिमिताः । कुतः कस्य हेतोः । मानसी मनःसम्बन्धिनी महाप्रभावत्वादिति भावः । खलु मानसी सृष्टिरित्यनुषज्यते । श्रूयतां वक्ष्यमाणमिति शेषः । वनस्पतिभ्यः वृक्षेभ्यः पारस्करादिः । शकुन्तलाहेतोः शकुन्तलार्थं कुसुमान्याहरतेत्येतावद्वयमाज्ञापिताः । ततः आज्ञानन्तरमिदानीं कुसुमाहरणावसरे ।

क्षौमं केन चिदिन्दुपाण्डु तरुणा मङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुभगो लाक्षारसः केन चित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥५॥

क्षौममिति । केन चित्तरुणा इन्दुश्चन्द्र इव पाण्डु धवलं मङ्गले साधु-मङ्गल्यं क्षौमं दुकूलमाविष्कृतं स्वयमेव दर्शितं । केन चिदन्येन तरुणा चरणयोरुपभोगे रञ्जनरूपेऽनुभवे सुभगस्सुन्दरः चरणालङ्कारयोग्य इत्यर्थः । लाक्षारसः यावकद्रवः निष्ठ्यूतः उद्गीर्णः ष्ठिवुनिरसन इत्युदित्वेन 'उदितो वा' इति इट्टो विभाषणाच्च 'यस्य विभाषा' इति निष्ठायामिडभावः । 'च्छ्वोः शूडनुनासिके च' इति वकारस्यांठि चादेशे सति निष्ठ्यूत इति रूपं । चरणोपभोगसुलभइति पाठे चरणोपभोगे सुलभः सुप्रापः किसलयमृदोश्चरणस्यानुद्वेजकस्पर्श इत्यर्थः । अथ वा चरणोपभोगः वराङ्गनाचरणानुभवः सुलभः अयत्नलभ्यो यस्य सः । आहिताग्न्यादेराकृतिगणत्वात् । अत्र गौणत्वादाम्यो निष्ठ्यूतपदप्रयोगः । उक्तं च दण्डिना । 'निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रये । अतिसुन्दरमन्यत्र आम्यकक्ष्यां विगाहते' इति । वस्तुतस्तु चरणोपभोगसुलभ इत्येव सांप्रदायिकः पाठः । चरणोपभोगयोग्य इत्यर्थः । मालविकाग्निमित्रे "नवसंरोहणशिथिलस्तरुरिव सुकरः समुद्धर्तुं" मित्यत्र शक्यमात्रार्थे सुकरशब्दवदिह योग्यमात्रार्थे सुलभशब्दः प्रयुज्यते । तथा च रामायणे "पतिसंयोगसुलभं वयोदृष्ट्वा तु मे पिता । चिन्तामभ्यगमद्दीनो वित्तनाशादिवाऽधनः" इति प्रयोगः । अन्येभ्यः वृक्षान्तरेभ्यः आपर्वभागं सन्धिप्रदेशं यावत् मणिबन्धावधीत्यर्थः । तावत एव दानोपयोगात् उत्थितैरुद्गतैः अत एव तेषां वृक्षाणां किसलयोद्भेदप्रतिद्वन्द्विभिः पल्लवोद्गमसदृशैः अचिरोद्गतपल्लवाभिरित्यर्थः । वनदेवतानां करतलैराभरणानि दत्तानि यत्तामन्यानामपि वृक्षाणां कल्पवृक्षसधर्मत्वं यच्च वनदेवतानामपि सेवनं स सर्व एव तातकाश्यपस्य प्रभाव इति भावः । **शार्दूलविक्रीडितं वृत्तम् ॥**

प्रियंवदा—(शकुन्तलां विलोक्य ।) [1]हला इमाए अब्भुववत्तीए सूइआ दे भत्तुणो गेहे अणुहोदव्वा राअलच्छी ।

शकुन्तला व्रीडां निरूपयति ।

प्रथमः—गौतम एह्येहि अभिषेकावतीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः ।

द्वितीयः—तथा ।

इति निष्क्रान्तौ ।

अनसूया—[2]सहि अणुवजुत्तभूसणो अअं जणो । तह वि चित्तकम्मपरिअएण दाणिं दे अंगेसु आहरणविणिओअं करेमो ।

---

[1]हला अनयाभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीः ।

[2]सखि अनुपयुक्तभूषणोऽयं जनः । तथापि चित्रकर्मपरिचयेनेदानीं ते अङ्गेष्वाभरणविनियोगं कुर्वः ।

शकुन्तलां विलोक्येति—भर्तुरसम्भावनाभीतामाश्वासयितुं । अनया दैवोपपादितया अभ्युपपत्त्या समीहितार्थसम्पत्त्या ते तव राज्ञः सत्याः भर्तुर्गेहे अनुभवितव्या भोक्तव्या राजलक्ष्मीः सूचिता निवेदिता 'अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणं' मिति न्यायेन 'आहरणोइं रूवं अस्समसुलहेहिं पसाहणेहिं विआरिअदि' इति चिन्तासमकालं दिव्याभरणवसनाद्युपस्थानं सुखोदर्कलक्षणमिति भावः । व्रीडां निरूपयति लज्जामभिनयति । राजलक्ष्मी वृत्तान्तेन गर्वाकारगोपनमिह व्रीडानिरूपणं । अभिषेकार्थमवतीर्णाय सरस्यवगाढाय वनस्पतीनां सेवां परिचर्यां क्षौमादिमङ्गलद्रव्योपहाररूपां निवेदयावः कथयावः । अनुपयुक्तभूषणः आश्रमसंवर्धितत्वादनभ्यस्तपरिकर्मा । चित्रकर्मणि परिचयेन यथास्थानमाभरणादिविन्यासाभ्यासेन ते अङ्गेषु आभरणानां विनि-

शकुन्तला—[1]जाणे वो णेवुणं। (उभे नाट्येनालंकुरुतः।)

ततः प्रविशति स्नानोत्थितः काश्यपः।

काश्यपः—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥६॥

---

[1]जाने वां नैपुणम्।

योगं समुचितनिवेशनं कुर्वः। अनेन चित्तस्वरूपत्वं शकुन्तलाया व्यज्यते। नैपुणं शिल्पकौशलं जाने सखीः प्रसाधनकलानैपुणं मम ज्ञातं कथं गोपायीयमिति भावः। आदौ स्नातः पश्चादुत्थितः जलाशयादुत्तीर्णः।

यास्यतीति। अद्य इदानीं शकुन्तला यास्यति पतिगृहं प्रस्थास्यत इति हेतोरुत्कण्ठया विक्लौत्सुक्येन हृदयं मनः संस्पृष्टं सम्यगालीढं। यद्यपि नेयं ममौरसी दुहिता अपि तर्हि मातापितृभ्यामङ्गिता शकुन्तैः फलरसार्पणेन परिपालिता भूतकारुण्याच्च मया स्वमाश्रममपनीय संवर्धिता। कन्यात्वेन च निश्चितं परार्थत्वं। तथापि स्नेहमात्रद्वारप्रसङ्गे विवेकमप्यपोह्य मनः समुत्सुकमिति व्यञ्जयितुं शकुन्तलेति नामग्रहणं। यास्यतीत्युक्त्या न वियुज्य गमनमेव प्रतिभाति न तु पतिप्राप्तिसौभाग्यमिति प्रतीयते। भावपत्यर्थयोगेण कालान्तरभावी तु नात्यर्थमुत्सुकयतीति च दर्शितं भवति। कण्ठः स्वरः 'किञ्चाकण्ठि' इत्यादिवदुपचारतः प्रयोगः। स्तम्भितया मङ्गलकाल इति प्रयत्ननिरुद्धया बाष्पवृत्त्या अश्रुप्रसरेण वाष्पनिरोधादित्यर्थः। कलुषः अव्यक्तः गद्गद इति यावत्। दर्शनं दृष्टिः चिन्तया शकुन्तलाध्यानेन जडं स्तब्धं। न हि विक्षिप्ते चेतसि संप्रयुज्यापि विषयैः करणान्तराणि किञ्चित्कराणि भवन्तीति भावः। दर्शनशब्देन श्रवणादिकमपलक्षितं भवति। अरण्यमेव ओकः स्थानं यस्य तस्य अनाघ्रातविषयस्येत्यर्थः। मम तावत् ममापि नैष्ठिक ब्रह्मचारिण इत्यर्थः। सकृदपि विषयवासनावासि-

इति परिक्रामति।

सख्यौ—[1]हला सउंदले अवसिदमंडणा सि। परिधेहि संपदं खोमजुअलं।

शकुन्तलोत्थाय परिधत्ते।

[1]हला शकुन्तले अवसितमण्डनासि। परिधत्स्व सांप्रतं क्षौमयुगलम्।

तात्मनस्तु वनौकसोऽपि कदाचिदन्तरात्मा द्रवतीति युज्येतापीति भावः। ईदृशं हृत्कण्ठदर्शनरूपकरणत्रयसङ्क्षोभात्मकं वैक्लव्यं अधैर्यं। कुतः स्नेहात् ममकारनिबन्धनाद्वात्सल्यापरनामः प्रीतिविशेषात् 'सङ्गात्संजायते काम' इति स्मरणान्ममकार एव संसार इति भावः। अत्तीत्यव्ययमाहार्यं 'अस्तिर्भवन्तिपरोऽप्रयुज्यमानोऽप्यस्तीति हि शाब्दिकाः। अथ वा मम तावत् ममापि चेदित्यर्थः। अव्ययानामनेकार्थत्वं तु आस्मर पद्ये तदानीमित्यनुपज्योत्तरणैकवाक्यं योजनीयं। गृहिणः नित्ययोगे मत्वर्थीयः। निवृत्तनिवृत्तयः प्रवृत्तिधर्माण इत्यर्थः। नवैः प्राथमिकैः अनुभूतदुःखस्य हि सजातीयं दुःखान्तरं नातिदुर्विषहमातपस्थस्येवातपः प्रथमदुःखं त्वतिमात्रदुस्सहमपूर्वपश्यस्येव सूर्यातपस्पर्श इति भावः। तनयाविश्लेषदुःखैः साक्षादात्मनविग्रहव्यथाभिः शरीरभूतत्वात्मत्रवर्धनादिना स्नेहाच्चोभयथा दुःस्सहैरित्यर्थः। कथं नु पीड्यन्ते कथं वा पीड्यन्त इति दुर्निरूपमित्यर्थः। कथं नेति पाठे पीड्यन्तएवेत्यर्थः। विषयैकवासितत्वे सति तु किमु वक्तव्यमित्यर्थापत्तिरलङ्करः। शार्दूलविक्रीडितं वृत्तम्॥

अवसितमण्डना सम्प्रसाधनरहिता। क्षौमयुगलं अन्तरीयमुत्तरीयं च 'क्षौमं केन चिदिन्दुपाण्डु तरुणा मङ्गल्यमाविष्कृत' मिति निर्दिष्टं परिधत्स्व धारय। परिधत्त इति। 'अन्वरम्भणादीनि प्रत्यक्षाणि न निर्दिशेत्' इति निषधस्य वस्त्रापहरणान्वयसम्यविषय-

गौतमी—[1]जादे एसो दे आणंदपरिवाहिणा चक्खुणा परिस्स-अंदो विअ गुरू उवट्ठिदो। आआरं दाव पडिवज्ज।

शकुन्तला—(सव्रीडम्।) [2]ताद वंदामि।

काश्यपः—वत्से।

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥७॥

---

[1]जाते एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः। आचारं तावत्प्रतिपद्यस्व।

[2]तात वंदे।

त्वात्पूर्वच्छादनानिगसादनौचित्यवर्तितमाच्छादनं प्रत्युत हृद्यंवेति रहस्यं। एष ते गुरुः पिता काश्यपः आनन्दे परिवाहयति मनस्यमान्तं कथाशरूपेणोद्वितीति तथाविधेन चक्षुषा परिष्वजमान आलिङ्गन्निव अन्यदुद्दिश्यैवार्थः। उपस्थितः सन्निहितः। आचर्यते शिष्टैरित्याचारः प्रत्युत्थानप्रणामादिस्तं तावत्तत्क्षणं प्रतिपद्यस्व अङ्गीकुरु। सव्रीडं भर्तृप्रसङ्गात्सलज्जं। तात वंदामि इति वाचिकः प्रणामः। अन्यथा वन्दे इत्येवोक्तं स्यात्॥

ययातेरिति। ययातेर्नाम दुष्यन्तकुलमहत्तरस्यैव राज्ञः शर्मिष्ठा नाम वृषपर्वदुहितेव भर्तुर्दुष्यन्तस्य बहुमता सम्भाविता भव "मतिबुद्धिपूजार्थेभ्यश्च" इति सूत्रे बुद्धेः पृथगुप दानान्मतिरिच्छा ततश्चेह वर्तमाने क्तः। 'क्तस्य च वर्तमाने' इति षष्ठी। 'भर्ता नाम परं नार्या भूषणं भूषणादपि' इति' न्यायेन भर्तृबहुमानात् परं नास्त्याशासनीयं योषितामिति भावः। सा शर्मिष्ठा पूरुमिव त्वमपि सम्राजं चक्रवर्तिनं सुतमाप्नुहि। परं चेदं श्रेयो यत्सदपत्यलाभ इति भावः॥ पुरा किल दैत्यगुरोरुशनसः सुता देवयानी दैत्येन्द्रस्य वृषपर्वणश्च सुता शर्मिष्ठा मिथः सख्यौ बभूवतुः। कदा चिद्विहर्तुं वनं गतयोस्तयोर्विवादे शर्मिष्ठा देवयानीमुवाच। त्वमसि देवयानि वन्दिनो भृत्यस्य दुहिता, अहं तु वन्द्यस्य भर्तुरतो दूरमन्तरमावयोरिति। तमथ गुरुतिरस्कारमसृष्यमाणा देवयानी पितरं तत्र वसन्तं नानुमेने। उशनस्यपि दुहितृवत्सले

गौतमी—[1]भअवं वरो खु एदे ण आसिसा ।

काश्यपः—वत्से एहि इतस्सद्योहुतानग्नीन् प्रदक्षिणीकुरुष्व ।

सर्वे परिक्रामन्ति ।

काश्यपः— (ऋक्छन्दसा आशास्ते ।)

---

[1]भगवन् वरौ खल्वेतौ नाशिषौ ।

दुहितुरशर्मं रक्षति वृषपर्वा तेन विना दानवराज्यमेव नष्टकल्पमनुचिन्तयन् देवयानीमेव प्रीणयिष्यन् वरेणाच्छन्दयामास । सा तु ततः प्रभृति पितृकुले वा पतिकुले वा शर्मिष्ठां दानवेन्द्रदुहितरं सपरिवारामात्मनः परिवारीक्रियमाणामेव वरमवृणीत । दत्ते च तस्मिन्वरे पितुरनुरोधाद्दास्यमङ्गीचकार शर्मिष्ठा । अथ च यदा देवयानीं ययातिरुपयेमे । तदा तस्या दास्येन शर्मिष्ठापि ययातेरवरोधं गता प्रमदवनैकदेशस्थिता गुणोत्तरतया राज्ञो हृदयसंवननं बभूव । पुत्रांश्चालभत । विदिते तु तस्मिन् भर्तुरावनये रुषिता साम्यर्थनमनुनीतापि प्रतीपवृत्तिः पितुरेव भवनं देवयानी गता । भार्गवोऽपि दुहितृवत्सलो यौवनमदविप्लुतसमयं मत्त एव जरात्वामभिभविष्यतीत्युक्तवान् कथमस्यानुनीयमानो विनिमयं हा केवलं जगामकर्तुम् । भार्गवविनिमयेन यौवनं याचमानं न कश्चिन्नृत्रपणमेनमभ्यनन्दत् । शर्मिष्ठासूनुस्तु पूरुः स्वेन यौवनेन पितुर्जरां प्रतिजग्राह । कालेन च पिता तदीयं यौवनं राज्यं च प्रत्यर्पितवानित्यैतिहासिकी कथात्रानुसन्धया । तव च देवयान्या भर्तुःप्रतीपगमनादर्थेय इत्यभिसन्धायोक्तं शर्मिष्ठेति । अग्रे च वक्ष्यति ' भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ' इति ।

एतौ ' भर्तुर्बहुमता भव ' ' चक्रवर्तिनमाप्नुहि' इत्युभौ वरौ खलु अन्योन्यचरितफलाविति यर्थः । नाशिषौ न तु प्रार्थनामात्रमित्यर्थः । नियतफलो वरः आशीस्त्वाशंसारूपा फलति न चेति विशेषः । देवानुभावत्वात्काश्यपस्येति भावः । एहीति इण आङ् पूर्वस्य रूपं । सद्योहुतानिति देवतासान्निध्यव्यञ्जनं प्रगतो दक्षिणं प्रदक्षिणमित्यव्ययं । आत्मनो दक्षिणभागस्थ इत्यवयवार्थः । अप्रदक्षिणं प्रदक्षिणंकुरु प्रदक्षिणीकुर्वित्यभूततद्भावे च्विः प्रदक्षिणं परिक्रामेत्यर्थः । ऋक्छन्दसावैदिकेनवृत्तेन आशास्ते आशिषं प्रयुङ्क्ते ।

अमी वेदिं परितः कुलप्रधिष्ण्याः
समिद्धाः प्राग्वंशास्तीर्णदर्भाः ।
अप्तन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां यजयः पालयन्तु ॥ ८ ॥

प्रतिग्रम्वेदानीं । (सदृष्टिक्षेपम् ।) क्व ते शार्ङ्गरवमिश्राः ? ।

प्रविश्य ।

शिष्यः—भगवन् इमे स्मः ।

काश्यपः—शार्ङ्गरव भागिन्यास्ते मार्गमादेशय ।

शार्ङ्गरवः—इत इतो भवती । (शकुन्तला पथिकं रूपयति ।)

काश्यपः—अयो सन्निहितदेवतास्तपोवनतरवः ।

अमीइति । वेदिं परितः यज्ञार्थं निर्मितायां भूमिस्संवेषु भागेषु 'अभितः परितः' इत्यादिना द्वितीया । कुलप्रधिष्ण्याः स्थानानि विहितानि धिष्ण्यानि स्थानानि येषां ते समिद्धतः सायंहुतत्वादग्निशमितसमिधः प्रान्तेषु पर्यन्तभागेषु संस्तीर्णा दर्भा येषां ते हव्यस्य होतव्यस्याज्यादिद्रव्यस्य गन्धैर्दुरितं पापमपघ्नन्तः गन्धमात्रेण दूरादपि पापहा इत्यर्थः । अमी वैतानाः यज्ञसम्बन्धिनः वयः गार्हपत्याहवनीयदक्षिणाग्नयः सभ्यावसथ्यसहेताः पत्र वा त्वां पालयन्तु रक्षन्तु । अत्रतुरीयपादमात्रस्य शालिनीवृत्तत्वादक्कछन्दसेयुक्तं । ऋक्छन्दसेत्यादिक्रमेणवत् प्रक्षिप्तमित्येके मन्यन्ते ॥

सदृष्टिक्षेपं शिष्यावलोकनार्थं दृष्टिं प्रसार्यैत्यर्थः । इमे स्मः सज्जा इत्यर्थः । वैशिष्ट्यतया शार्ङ्गरवे सन्देशमर्पयेत्यन्तेवत्र सम्बोधयति शार्ङ्गरवेति । भागिन्याः धर्मतः त्रसुः शिष्यस्यापि पुत्रकल्पत्वात् । आदेशय दर्शय अहो इति हर्षे । देवतासन्निधिः पुण्यनामेत्तमत्र हर्षहेतुः सन्निहितदेवताः अवस्थानकालत्वादवस्थितदेवताः । येनाचेतनानामपि चेतनवदामन्त्रणं नानुचितमिति भावः ।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः प्रसवप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ९ ॥

कोकिलमन्तं सूचयित्वा ।

पातुमिति । भो स्तपस्वः या युष्मास्वविद्यमानं पीतं पानं भावे क्तः । येषां तेषु सत्सु अथवा पीतं पानमेषामस्तीति पीता इत्यर्शआद्यच् । भुक्ता ब्राह्मणा इत्यादिवत् । अनथाभूतेषु सत्सु । यद्वा प्रसिद्धत्वादेवाकर्मकत्वाभिप्रायेण 'गत्यर्थाकर्मकश्लिषजीङ् स्थासवसजनरुहजीर्यतिभ्यश्च' इति कर्तरिक्तः । 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मका क्रिया' इत्युक्तेः । ततश्चापीतवत्स्वित्यर्थः । प्रथमं युष्मत्सेचनात्पूर्वं जलं पातुं न व्यवस्यति नाभिलषति । पिपासितापि युष्मानासिच्यैव स्वयं जलमात्रमपि पातुमिच्छतीत्यर्थः । युष्मास्विति बहुवचनादेकस्मिन्नप्यसिक्ते न पिबतीति विवक्षितं । एवं या प्रियमभिमतं मण्डनमवतंसादिप्रसाधनं यस्यास्तथाभूतापि शैशवात् प्रसाधनकामापि सती भवतां विषये स्नेहेन प्रेम्णा पल्लवं भवदीयं किसलयं नादत्ते न छिनत्ति चेतनानामिव वेदनाशङ्कया पल्लवच्छेदमप्यवयवच्छेदमिव न करोति सौन्दर्यस्नेहादिति भावः । वो युष्माकं सम्बन्धिनि आद्ये प्राथमिके प्रसव प्रसूतिसमये फलपुष्पोद्गमकाले यस्या उत्सवो भवति मङ्गलाचारसजग्ध्यादिभिः प्रथमप्रसवोद्गमस्तम्भाख्यत इत्यर्थः । सेयमेवं वत्सला शकुन्तला पतिगृहं याति वियुज्यावस्थातुमनिच्छन्त्यपि सतीधर्ममनुवर्तमाना गच्छतीत्यर्थः । सर्वैर्युष्माभिः कृतज्ञैस्तद्धितानुज्ञायतां बान्धवनिर्विशेषैरनुध्यानपूर्वं मयेवानुमतगमनास्त्वित्यर्थः । **शार्दूलविक्रीडितं वृत्तम् ॥**

कोकिलानां रुतं कूजितं सूचयित्वा श्रूयमाणमभिनीय ।

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥ १० ।

आकाशे

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायद्रुभिर्नियमितार्कमयूखतापः ।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ ११ ॥

अनुमतेति । इयं शकुन्तला वनवासेन बन्धुभिः स्निग्धैः जनपदवासोहि परस्पराभ्युच्छ्रयसंवर्धात् सुहृदामपि विभेदाय संपद्यते तपोवनवासस्तु निसर्गवैरिणामपि सत्त्वानां शमाय भवन् किं पुनः प्रयत्नसंवर्धितानां तरूणामिति व्यज्यते । तरुभिरनुमतं अनुज्ञातं गमनं पतिगृहयानं यस्याः सा भवति । कथमवगतं ? तदाह—परैति । यथा येन प्रकारेण ईदृशं एवंविधं अनन्यसदृशमित्यर्थः । कलं अव्यक्तमधुरं परैर्वायसैर्भृताः पुष्टाः कोकिलाः तेषां विरुतं कूजितं एभिस्तरुभिः प्रतिवचनीकृतं अनुज्ञायतामित्यभ्यर्थनसमन्तरोदीरणात् प्रतिवचनतामापादितं । मधुरप्रतिवचनादादेयानुमतमिवेति भावः । **अपरवक्त्रं वृत्तम् ॥**

आकाश इति । अप्रविष्टपात्रस्य ध्वनिमात्रं श्रूयत इत्यर्थः । न पुनरत्र ' किंब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ' इत्युक्तलक्षणमाकाशवचनम् ।

रम्येति । कमलिनीभिः नलिनीभिः हरितैः श्यामायमानैः भरितैरिति पाठे व्याप्तैरित्यर्थः । सरोभिर्जलाशयैः रम्याणि मनोरमाण्यन्तराणि मध्यभागाः यस्य सः छायाद्रुभिः छायाप्रधानैर्वृक्षैः शाकपार्थिवादिः अश्ववासादित्वात्तादर्थ्ये षष्ठीसमासो वा । नियमितः निवारितः अर्कमयूखानां रविकिरणानां ताप ऊष्मा यस्मिन् सः कुशे जले शेरत इति कुशेशयानि कमलानि तेषां रजोभिः पवनोपनीतैः मृदवः चरणसुखाः रेणवो रजांसि यस्य सः शान्तः निवृत्तरजाः अनुकूलो गम्यदिगाभिमुखश्च पवनो यस्य तथाविधश्च शिवश्च श्वापदाद्यनुपसर्गात् समीहितोपलम्भाद्वा सुखप्रदश्च भूयादित्याशिषि लिङ् । प्रथमविशेषणेन दृष्टिघ्राणसुखं तृष्णानुदयश्च, द्वितीयेन शरीरतापाद्वैवर्ण्यानुदयः

सर्वे सविस्मयमाकर्णयन्ति ।

गौतमी—[1]जादे दाणिं णादिजणसिणिद्धाहिं अणुण्णादगमणासि तवोवणदेवदाहिं । पणम भअवदीणं ।

शकुन्तला—(सप्रणामं परिक्रम्य । जनान्तिकम् ।) [2]हला पिअंवदे अज्जउत्तदंसणोस्सुआए वि अस्समपदं परिच्चअंतीए दुक्खदुक्खेण मे चलणा पुरोमुहा वट्टंदि ।

प्रियंवदा—[3]ण केवलं तवोवणविरहकादरा सही एव्व । तुए उवहिदविओअस्स तवोवणस्स वि दाव समवत्थं पेक्ख ।

---

[1]जाते इदानीं ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः । प्रणम भगवतीनाम् ।

[2]हलाप्रियंवदे आर्यपुत्रदर्शनोत्सुकाया अपिआश्रमपदं परित्यजन्त्या दुःखदुखेन मे चरणौ पुरोमुखौ वर्तेते ।

[3]न केवलं तपोवनविरहकातरा सख्येव । त्वयोपहितवियोगस्य तपोवनस्यापि तावत्समवस्थां पश्य ।

तृतीयेन चरणतलानुद्वेगः, चतुर्थेन पञ्चमेन च 'पवनस्यानुकूलत्वात्प्रार्थनासिद्धिर्शसितः' इत्युक्तं श्रेयः प्रदत्वं च व्यञ्जितं भवति । **वसन्ततिलकं वृत्तम्** ॥

सविस्मयं अशरीरिवचनश्रवणं विस्मयहेतुः । ज्ञातिजनस्निग्धाभिः बन्धुजनसौहार्दवतीभिः काश्यपस्य तपोवनदेवताभिरपि गुरुवत् सम्भावितत्वात्, शकुन्तलायाश्च मेनकासम्बन्धात् तपोवनदेवतानां ज्ञातिजनस्नेह इति भावः । प्रणम भगवतीनां तपोवनदेवताः प्रणमेत्यर्थः । सम्बन्धसामान्ये षष्ठी । भगवतीभ्य इति चतुर्थ्यन्तच्छायापक्षे भगवतीः प्रसादयितुमित्यर्थः । 'क्रियार्थोपपदस्य' इत्यादिना चतुर्थी । आर्यपुत्रस्य भर्तुः दर्शने विषये उत्सुकायाः उत्कण्ठितायाः अपि मे चरणौ आश्रमपदं परित्यजन्त्याः अस्मत्याः दुःखदुःखेन कथं कथंचित् पुरोमुखौ अग्रतः प्रसर्तौ वर्तेते भवतः । सत्यामपि प्रियसंयोगत्वरायां पूर्वसेवासविश्लेषो दुर्नीत्येवेति भावः । सख्येव केवलं त्वमेकैवेत्यर्थः । तपोवनस्य विरहे कातरा भीता न भवति किंतर्हि त्वया उपहितवियोगस्य आहितविरहस्य तपोवनस्यापि समवस्थां दशां तावदशेषेण पश्य । समवस्थामेवाह—

[1]उग्गलिअदब्भकवला मिआ परिच्चत्तणच्चणा मोरा ।
ओसरिअपण्डुपत्ता मुअन्ति अस्सूणि विअ लदाओ ॥१२॥

शकुन्तला—(स्मृत्वा) [2]ताद लदाभइणिं वणजोसिणिं दाव आमंतइस्सं

काश्यपः—अवैमि ते तस्यां सोदर्यस्नेहं । इयं तावद्दक्षिणेन ।

---

[1]उद्गीर्णदर्भकबला मृगाः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ।

[2]तात लताभगिनीं वनज्योत्स्नीं तावदामन्त्रयिष्ये ।

उग्गलिअ इति । मृगाः हरिणाः उद्गीर्णाः अनास्थया वान्ताः दर्भकबलाः कुशग्रासाः यैस्ते, मुखस्थानपि भ्रंशिनो दर्भग्रासान् न विदन्ति का कथा कवलान्तरग्रहणस्येति भावः । मयूराः परित्यक्तं अनुत्साहाद्वर्जितं नर्तनं यैस्ते चिन्ताविष्टा इव निभृतावस्थाना इत्यर्थः । न केवलं चेतना एव, अचेतनामपीत्याह—ओसरिअ इति । अपसृतानि निपतन्ति पाण्डुपत्राणि शुष्कपर्णानि यासां ताः लताः अश्रूणि स्थूलान् वाष्पबिन्दून् मुञ्चति विसृजन्तीव । यदि नामतिरश्चामचेतनानां च त्वद्वियोगादिदृशी समवस्था किं वक्तव्यं तव गुरुजनस्य सखी जनस्य चेति भावः । आर्या वृत्तम् ।

स्मृत्वेति । लताशब्दश्रवणेन लतासामान्याद्वनज्योत्स्नीस्मरणं । लता रूपां भगिनीं आश्रमे सहसंवृद्धतया भगिनीस्नेहविषयभूतामित्यर्थः । वनज्योत्स्नी नाम नवमालिकां तावत् इदानीं आमन्त्रयिष्ये आप्रक्ष्ये । तस्यां वनज्योत्स्न्यां समाने उदरे शयिता सोदर्या 'सोदराद्यः' इति निपातनात्समानशब्दस्य सभावः तस्यास्स्नेहं अवैमि जानामि । दक्षिणेनेत्येनवन्तमव्ययं । चूतेन स्ववृक्षेण सङ्गतापि इतोगताभिः अन्यतः प्रसृताभिः शाखाभिरेव बाहुभिर्भुजैः मां स्वसृभूतां प्रत्यालिङ्ग मयालिङ्गिता

शकुन्तला—(लतामुपेत्य ।) [1]वणजोसिणि चूदसंगदा वि पच्चालिंगमं इदोगदाहिं साहाबाहहिं । अज्ज पहुदि दूरवट्टिणी खु दे भविस्सम् ।

काश्यपः—

संकल्पितं प्रथमनेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम् ।
चूतेन संगतवती नवमालिकेय-
मस्यामहं त्वयि च संप्रति वीतचिन्तः ॥ १३ ॥

---

[1]वनज्योत्स्ने चूतसंगतापि प्रत्यालिङ्ग मामितो गताभिश्शाखाबाहाभिः । अद्य प्रभृति दूरवर्तिनी खलु ते भविष्यामि ।

प्रत्यालिङ्गनेन सम्भावय । अद्य प्रभृति ते तवदूरवर्तिना असन्निहिता स्वलु । यतो नगरस्थाया मे तपोवनस्था त्वं दुर्लभा भविष्यसि तत एव हेतोः प्रियसखीरपि मामपि प्रत्यालिङ्गेत्यर्थः । चूतसङ्गतापीति सूचितमर्थमादाय काश्यप आह—

सङ्कल्पितमिति । प्रथममेव प्रागेव त्वद्रूपयौवनदर्शनसमय एवेत्यर्थः । तव अर्थे प्रयोजने विषये मया सङ्कल्पितं मनसा निश्चितं आत्मसदृशं कुलशीलादिभिर्गुणैस्त्वदनुरूपं भर्तारं त्वं सुकृतैः स्वैरेव भाग्यैः अनायासमदाग्म्भामित्यर्थः । गता प्राप्तासि यस्त्वमात्मसदृशो भर्तेति मया निर्धारितस्तमेव स्वतस्त्वं प्राप्तासीत्यर्थः । इयं नवमालिका अपत्यनिर्विशेषा वनज्योत्स्नी च चूतेन आत्मसदृशेन सङ्गतवती मिलिता । सम्प्रति द्वयोरपि युवयोस्सदृशभर्तृलाभ इति अस्यां नवमालिकायां त्वयि च विषये वीतचिन्तः निवृत्तवरचिन्ताभारोऽस्मि । अनेन नवमालिकासमुच्चयेन महर्षेर्निर्विशेष एव भूतसामान्येन शकुन्तलायामपत्यस्नेह इति ध्वन्यते । अत्र सुकृतरूपकारणान्तरसन्निधानेन सदृशभर्तृलाभरूपकार्यस्य सौकर्यात् समाधिरलङ्कारः 'समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः' इति तल्लक्षणं । स्वप्रयत्नरूपकारणं विनापि कार्योत्पत्त्या विभावना वेति तयोस्सन्देहसङ्करः । **वसन्ततिलकं** वृत्तम् ।

इतः पन्थानं प्रतिपद्यस्व ।

शकुन्तला—[1]हला एसा दुवेणं वो हत्थणिक्खेवो ।

उभे—[2]अअं जणो दाणिं तुए कस्स हत्थे अप्पिदो । (इति बाष्पं विकिरतः ।)

काश्यपः—अनसूये अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला । (सर्वे परिक्रामन्ति ।)

शकुन्तला—[3]ताद एसा उडअपज्जंदआरिणी गब्भमंथरा मिअवहू जदा अणहप्पसवा होइ । तदा मे किं वि पिअणिवेदइत्तअं विसज्जेहि ।

काश्यपः—भवतु नेदं विस्मरिष्यामः ।

---

[1]हला एषा द्वयोर्वां हस्तनिक्षेपः ।

[2]अयं जनस्त्वयेदानीं कस्य हस्तेऽर्पितः ?।

[3]तात एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदानघप्रसवा भवति । तदा मे किमपि प्रियनिवेदयितृकं विसर्जय ।

इतः इदानीं पन्थानं प्रतिपद्यस्व मार्गं प्रामुहि । किं कालक्षेपेणेति भावः । एषा नवमालिका द्वयोरपि वां सख्योः हस्तनिक्षेपः साक्षात्समर्पितं न्यासवस्तु न्यासवद्रक्षणीयेत्यर्थः । अयं जनः सखीजनः इदानीं त्वयि गच्छन्त्यां कस्य हस्तेऽर्पितः त्वद्वियोगादशरणे स्व इति भावः । विकिरतः नयनाभ्यां वर्षतः । अलं रुदित्वा न रोदितव्यं 'अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा' । ननु भवतीभ्यामेव युवाभ्यामेव हि शकुन्तला स्थिरीकर्तव्या समाश्वासनीया वियुज्य पृथक्प्रवसन्ती स्थानास्थितेन सुहृज्जनेन मनःक्षोभाद्वारणीयेति भावः । उटजपर्यन्तचारिणी आश्रमोपकण्ठ एव परिवर्तमाना, तत्र हेतुः गर्भमन्थरा कठोरगर्भतया विश्रान्तस्खलनेत्यर्थः । यदा अनघः अनुपद्रवः प्रसवः गर्भमोक्षो यस्याः सा भवति । तदा तत्क्षणमेव प्रियस्य निवेदयितृ ज्ञापकं किमपि लेखादिकं विसर्जय प्रेषय । भवतु तथैवास्तु । नेदं विस्मरिष्यामः असन्निहिते हि प्रियजने तद्वचनं

शकुन्तला—(गतिभङ्गं रूपयित्वा।) [1]किं णु खु एसो पुणो पुणो वि णिवसणं मे सजइ। (इति परावर्तते।)

काश्यपः—वत्से।

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥१४॥

शकुन्तला—[2]वच्छ किं सहवासपरिच्चाइणिं मं अणुसरसि। अ-

---

[1]किं नु खल्वेष पुनः पुनरपि निवसनं मे सजति।

[2]वत्स किं सहवासपरित्यागिनीं मामनुसरसि। अचिरप्रसूतया

ह्रदयाच्चापैतीति भावः। गतिभङ्गं चरणोपान्तलग्नेन मृगशिशुना निजगमनप्रतिरोधं। किं नु खलु को वा एषः पुनः पुनः प्रतिपिद्धोऽपि भूयो भूयः। मे निवसनं सजति सम्बध्नाति लग्नो भवतीत्यर्थः।

यस्येति। कुशसूचिभिः कुशाग्रैः विद्धे मृदुत्वाद्वासकाले क्षते यस्य मृगस्य मुखे वक्त्राभ्यन्तरे व्रणस्य विरोपणं असृक्प्रसरात् प्ररोहहेतुभूतं। इंगुदीनां तापसतरूणां सम्बन्धि तैलं स्नेहः। लक्षणयात्र स्नेहमात्रपरस्तैलशब्दः। न्यषिच्यत समक्तं। सैं तथा प्रीतिपात्रं श्यामाकानां देवपित्रतिथिप्रयोजनानामपि धान्यानां मुष्टिभिः भूयः कृ सूचिवेधभिया स्वहस्तार्पितैः श्यामाकैरित्यर्थः। परिवर्धितकः अनुकम्पितः परिपुष्टः 'अनुकम्पाया' मिति कः। पुत्रकृतकः कृत्रिमपुत्रः। मयूरव्यंसकादिः। मृगस्ते पदवीं मार्गं न जहाति न मुञ्चति। तथा संवर्धितः कथं विरहं सहेतेति भावः। किमुत वयमित्यर्थापत्तिर्व्यज्यते। **वसन्ततिलकं वृत्तम्।**

सहवासं त्वया सहावस्थानं परित्यजतीति तां किं कृतोनुसरसि एवं निस्स्नेहामजानन्नुगच्छसीत्यर्थः। पतिदर्शनोत्सुकानामपि योषितां संस्तुतविप्रलम्भस्समये व्यथां जनयतीति लोकस्थितिरत्र दर्शिता। अचिरप्रसूतया अभिनवं त्वां प्रसूतवत्या जनन्या

इरप्पसूदाए जणणीए विणा वि वड्ढिदो एव्व। दाणिं वि तुमं मए विरहिदं तादो चिंतिस्सदि। णिवट्टेहि दाव।

(इति रुदती प्रस्थिता।)

काश्यपः—

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विरतानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति॥ १५॥

जनन्या विनापि वर्धित एव। इदानीमपि त्वां मया विरहितं तातश्चिन्तयिष्यति। निवर्तस्व तावत्।

मृग्या विनापि मृतायामपि जनन्यामित्यर्थः। वर्धित एव पोषित एव। यद्यपि गर्भान्निर्गतमात्रो मातृरहितोऽपि मया त्वं संवर्धित इति युज्यते स्नेहः। तथापीदानीमेवं निर्दयायाः किमनुसरणेनेत्यर्थः। यो मातरमपि विहाय शिशुर्मया सवर्धितः स मयापि विना सम्प्रति वर्धिष्यसे दैवं हि लोकयात्रां निर्वहति जन्तूनामिति च व्यज्यते। तदेवाह, दाणिं वि इति इदानीं मद्विरहेऽपि। चिन्तयिष्यति मत्पुत्रकृतकं न स्मरिष्यति। रुदती परिचितविप्रयोगाच्छोचन्ती।

उत्पक्ष्मणोरिति। उद्गतानि पक्ष्माणि ययोस्तयोः नयनयोरुपरुद्धा प्रतियेरु
ा वृत्तिः प्रवृत्तिः प्रसर इति यावत् यस्य तं सान्द्रपक्ष्मणोर्नयनयोः पक्ष्मपात एव बहिर्बाष्पप्रसरावकाश इति भावः। औत्सुक्यं च अनिमेषहेतुः। अथ वा उपरुद्धा तेर्दर्शनव्यापारो येन तं नयनयोरिति संबन्धसामान्ये षष्ठी। कृत्यन्वयिनी। सापेक्षत्वेपि गमकत्वात्समासः संवृतदृष्टिप्रसरमित्यर्थः। बाष्पं स्थिरतया धैर्यावष्टम्भेन विरतानुबन्धं निवृत्तानुवृत्तिं कुरु यावद्बाष्पो न पतति तावदेव धैर्येणनिश्चलीकृते मनसि पुनरनुद्भादपतित एव हि पूर्वबाष्पः शुष्यति। प्रकृतिवशादुच्छ्वसन्नपि हि नानुवर्तते शोको धीराणामिति भावः। ननु प्रतिक्रिया नामेयं शोकोत्पीडस्य यद्बाष्पः तदत्र को दोषः? तत्राह— अस्मिन्निति। अलक्षिताः बाष्पेण दृष्टिरोधादनुपलब्धाः नता निम्नाः उन्नता गाधाश्च

शार्ङ्गरवः—भगवन्नोदकान्तात् स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तादिदं सरस्तीरम्। अत्र संदिश्य नः प्रतिगन्तुमर्हसि।

काश्यपः—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः।

सर्वे परिक्रम्य स्थिताः।

काश्यपः—(आत्मगतम्।) किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः संदेष्टव्यम्?। (इति चिन्तयति।)

शकुन्तला—(जनान्तिकम्।) [1]हला पेक्ख दक्खिणदो णलिणी पत्तंदरिदं वि सहअरं अदेक्खंती आदुरा चक्कवाई आरसइ दुक्करं खु अहं करोमि।

---

[1]हला पश्य दक्षिणतो नलिनीपत्रान्तरितमपि सहचरं मपश्यन्ती आतुरा चक्रवाकी आरसति दुष्करं खल्वहं करोमि।

भूमभागाः यस्य तस्मिन्नस्मिन्नारण्येक मार्गे ते तव पदानि पादन्यासाः विषमीभवन्ति खलु समवृद्धुन्यासे निम्नेषु पतन्त्युन्नतेषु स्खलन्तीत्यर्थः। **वसन्ततिलकं वृत्तम्॥**

ओदकान्तात् आ उदकान्तादिति पदद्वयं जलसमीपावधि स्निग्धो जनः प्रियः जनः अनुगन्तव्यः उदकमतिक्रम्य न गन्तव्यं बन्धुभिरित्यर्थः। श्रूयते लोकवाक्यमिति शेषः। तदुदकान्तरूपं इदं सरस्तीरं। तत्तस्मादिति वा, प्रति गन्तुमर्हसीति संबन्धः। अत्र सरस्तीरे सन्दिश्य राज्ञो वक्तव्यं वाचिकमुक्त्वाप्रतिगन्तुं प्रतिनिवर्तितुमर्हसि। हि सन्देष्टव्यत्वेन हि इमां क्षीरवृक्षस्य न्यग्रोधस्य च्छायां आश्रयामः शिशिरत्वात् प्रायः तत्रभवतो राजर्षिवादभ्यर्हितस्य दुष्यन्तस्य युक्तरूपं प्रशस्तं युक्तमस्माभिः सन्देष्टव्यं किं खलु स्यात् दुष्यन्तसदृशमस्मत्सदृशं च सन्देष्टव्यमित्यर्थः। चिन्तयति सन्देशप्रकारमितिशेषः चिन्तावकाशं संपादयतु मारचयति। जनान्तिकमिति सर्वमात्रविदितामित्यर्थः। नलिनीपत्रेण कमलिनीदलमात्रेण न तु देशांतरप्रक्षेपणेत्यर्थः। अन्तरितं तिरोहितमपि सहचरं पुंश्चक्रवाकं द्वन्द्वचरत्वात्सहचरव्यपदेशः। अपश्यन्ती वर्तमानप्रयोगात्तत्क्षणमनवेक्षमाणैव केवलं, पूर्वमपि दृष्टवती पश्चादपि द्रक्ष्यति तथापि सतीत्यर्थः। चक्रवाकी तिर्यग्जातिरपीत्यर्थः। आतुरा उत्कण्ठिता सती आरसत्याक्रन्दति। दुष्करं स्त्रीणामशक्यं

अनसूया—[1]सहि मा एव्वं मंतेहि ।

[2]एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं ।
गरुअं वि विरहदुक्खं आसाबंधो सहावेदि ॥ १६ ॥

काश्यपः—शार्ङ्गरव त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्गरवः—आज्ञापयत्वत्रभवान् ।

---

[1]सखि मैवं मन्त्रयस्व ।

[2]एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुर्वपि विरहदुःखमाशाबन्धः साहयति ॥

भर्तृविरहमर्षणं अहं प्रतिबोधयत्यपि करोमि । मैवं मन्त्रयस्व अहमेव दुष्करं करोमीति न ब्रूहीत्यर्थः का पुनरन्यापि करोतीत्याह ।

एसावीति । एषापि नलिनीपत्रान्तरितमात्रमपि सहचरमसहमाना चक्रवाकवध्वपि विषादेन विरहशोकेन दीर्घतरां कल्पायमानां रजनीं कृत्स्नां रात्रिं अत्यन्तसंयोगे द्वितीया । जातावेकवचनं सर्वां रजनीमित्यर्थः । यः सर्वेषां मदनलीलाकालस्तं समयमपीत्यर्थः । प्रियेण विना सहचरं विहाय "पृथग्विना नानाभिस्तृतीयान्यतरस्यां" गमयति यापयत्येव न त्वसहा विपद्यत इत्यर्थः । कुतस्तत् ? उच्यते गुर्वपि वीति । आशा समागमाशंसनरूपो बन्धो बन्धनं धारणमिति यावत् । गुरु दुस्सहमपि विरहदुःखं साहयति। क्षणं विरहासहैव चक्रवाकी प्राभातिकप्रियसमागमप्रतीक्षया यदि प्रतिनिशं विरहव्यथां सहते किमुत नन्तर्हियावज्जीवसंगमाशंसिनी कादाचित्कं विप्रलम्भमिति भावः । "आशाबन्धः कुसमसदृशं प्रायशो ह्यङ्गनानां सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि" इति मेघसंदेशे । आर्या वृत्तम् ॥

त्वया कर्त्रा शकुन्तलां पुरस्कृत्याग्रे निधाय वक्ष्यमाणे श्लोके इदंशब्देन निर्देशानुरोधादिति भावः । मद्वचनात् मद्वाक्यम दायेात ल्यब्लोपे पञ्चमी । मामेव वक्तारं प्रदर्श्यत्यर्थः । स राजा दुष्यन्तः वक्तव्यः ब्रुवो दुहादित्वादप्रधाने कर्मणि प्रयोगः । सन्देशमाह—

काश्यपः—

अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ १७ ॥

अस्मानिति । 'अस्मदो द्वयोश्चे'ति चकारादेकस्मिन्नपि बहुवचनं । अस्मान् साधु सम्यग्विचिन्त्य विमृश्य कथंभूतान् संयमस्तप एव धनं येषां तान् अर्थपतेस्तत्वार्थं इव तपोरूपमस्माकमपि धनमस्ति सर्वमेवाभीप्सितं साधयितुमिति सदृशः सम्बन्ध इति भावः । आत्मनः सम्बन्धि उच्चैरुत्कृष्टं कुलं राजर्षिवंशं च सम्यग्विचिन्त्य कुलोचितश्चायं सम्बन्ध इति विदित्वेत्यर्थः । कथमपि कृच्छ्रात् गुरुजनानुरोधे सत्यपि प्रतिबन्धक इत्यर्थः । 'ज्ञातेहेतुविवक्षायामाद्यादि कथमव्ययं । कथमादि तथाप्यन्तं यद्गौरश्ववाहयो' रित्युत्पलमाला । अबान्धवकृतां न बान्धवैर्मातापित्रादिभिरुत्पादितां अविद्यमाना बान्धवा यस्मिन् कर्मणि तद्यथा भवति तथा कृतामिति वा । तां तव स्वसंवेद्यां त्वयि विषये अस्याः शकुन्तलायाः स्नेहप्रवृत्तिं रागावतारं च सम्यग्विचिन्त्येत्यनुषज्यते स हि गरिमा स्नेहस्य यत्सर्वबान्धवातिशेषेण वर्तनमिति भावः । ततश्च किं कर्तव्यं आह—सामान्येति । इयं शकुन्तला दारेषु धर्मपत्नीषु विषये या सामान्य साधारणा प्रतिपत्तिर्भजनं तत्पूर्वं यथा भवति तथा दृश्या । सत्स्वपि बहुषु दारेषु क्वचिन्न चिदतिशयितश्चशूरागो भवति येन नायिकासु ज्येष्ठाकनिष्ठा व्यपदेशः । यतश्चोक्तं 'भिन्नरुचिर्हिलोक' इति । अतो न तत्र नियमः । सामान्यप्रतिपत्तिमात्रं हि । इति भावः । कथमिच्छाया एव दरिद्रता विशेषप्रतिपत्तिरेव कुतो नेष्यत इत्याह-नां ग्यति । अतः सामान्यप्रतिपत्तेः परमतिरिक्तं वस्तु भाग्ये अनुभवितृभागधेये नु निघ्नं । सति भाग्ये भवितुमर्हति विपर्ययं विपर्येतीत्यर्थः । तत् सामान्यप्रतिपत्त्यतिरिक्तं वस्तु वधूबन्धुभिः न खलु वाच्यं इत्यमाणमपि भर्तुः सकाशे न वक्तुं युक्तमित्यर्थः । संयमधनानित्यनेन 'शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः' इत्युक्तमर्थाभाग्यत्वं संयमधनानां को विशेष ईश्वरदुर्गतयोः इत्यनपेक्षत्वं च व्यज्यते । उच्चैः कुलमि

त्यनेन स्वैरवृत्तेः कुलधर्मप्रतीपत्वं 'त्रिलोकनाथेन सता मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा । स चेत्स्वयं कर्मसधर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ।' इति रीत्या धर्मगोप्तुरेव मर्यादालङ्घनं न साम्प्रतमिति च प्रतीयते । किञ्च 'भार्यासु प्रतीक्ष्येषु कुलोचिता ते' इत्युक्तं कुले चिरं पूज्यपूजनं कुलोत्तंसेन नातिक्रमणीयमिति च ध्वनितं । तदेवं यदस्माभिः समुचितं यच्च नवोचितं तदेवाचरणीयं न तु पृथग्जनेषु पृथग्जनप्रवर्तनामिति च दर्शितं भवति । कथमपीत्यनेन 'गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः' 'परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः' इत्याद्युपच्छन्दनजातमभिसन्धीयते । अथान्धबकुलामित्यनेन प्रेम्णः परमा दशा सूच्यते । उक्तहेतूनामेकैकमपि पर्याप्तमस्यास्सम्भावनाय किं पुनस्त्रितयमेव मिलितमिति च गम्यते । दारेष्वित्यनेन धर्मपत्न्यां स्वैरवृत्तं न युज्यत इति स्फुटीकृतं । सामान्यप्रतिपत्तिपरिपोषेण सत्यपुत्ररूपेषु विशेषप्रतिपत्तिनिमित्तेषु धर्मतस्सामान्यप्रतिपत्तिरभिप्रेतेत्यभिधातुमाह इति व्यक्तीकृतं । अतः परमित्यनेन स्वायत्तनायकत्वं महादेवीपदाधिरोहणं पुत्रजननमित्यादिकमभिसंहितं । वधूबन्धुभिर्न वाच्यमित्यनेन 'द्वे प्रतिष्ठे' इति प्रतिष्ठाद्वयं ध्वनितं । त्वयेत्यनेनोपोद्घातव्यं यद्यपि नोऽस्माकं विधानाधिकारः इति च स्फुटीकृतं । भाग्यायत्तमित्यनेन सर्वमस्या भविष्यति यद्यपि त्वया न संविधास्यते इति व्यज्यते ... यथा महाभारते शकुन्तलोपाख्याने "त्वामृतेऽपि च दुष्यन्तशैलराजावतंसकं । चतुरन्तमिमां पुत्रो मे पालयिष्यति" ति शकुन्तलया वाक्यं । यत्तु दारेषु सत्सु स मान्यप्रतिपत्तिपूर्वकं कलत्रान्तरसाम्यज्ञानपुरस्सरमिति व्याख्यानं, तन्न मनोरमं । दाराणां सतायां इदानीमविषयत्वात् सर्वेषु च कलत्रेषु तुल्यरूपस्य प्रीतिप्रकाशस्यासम्भवेन कलत्रान्तरसाम्यज्ञानासम्भवात् । एतेन बहुकलत्रसंग्रहस्समुचित इति संग्रहो इति च निरस्तं । अपि च "पुंभूम्नि दाराः" इति नियतबहुवचनान्ततया विहितबहुत्वारशब्दस्य बहुत्वावगमहेतुत्वं न युज्यते दारेषु मध्य इति निर्धारणसप्तम्यव्याख्यानं न सम्भवति । सामान्यप्रतिपत्तेरन्वयात् । निर्धारणं हि नाम समुदायतः पृथक्करणं यथा नृषु द्विजः श्रेष्ठ इति, न चैवं भवति नृषु द्विजो जन्तुरिति । यदपि सेति सर्वभङ्ग्या सेयं शकुन्तला मान्यप्रतिपत्तिपूर्वकं दृश्या, अतः परं मान्यप्रतिपत्तिं व्यतिरेकेण अभाग्यायत्तं, अतो वधूबन्धुभिर्न वाच्यं नाम्यर्थनीयं इति व्याख्यानं । तदतिरुद्धम् । तथान्यदपि । **शार्दूलविक्रीडितं वृत्तम् ॥**

शार्ङ्गरवः—गृहीतः संदेशः ।

काश्यपः—वत्से त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लोकज्ञा वयम् ।

शार्ङ्गरवः—न खलु धीमतामविषयो नाम ।

काश्यपः—सा त्वमितः पतिकुलं प्राप्य ।

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।

गृहीतः अवधृतः । इदानीं भर्तर्यनुज्ञाते सति । अनुशासनीया भर्तरि वृत्तिं शिक्षणीयासि । परिणीयाप्यय यावदसम्भावयितरि भर्तरि वैमनस्यं, विभूतिं वा लब्ध्वा पूज्येष्वनुग्राह्येषु च प्रतिपत्तिं मा भूदित्यमुमर्थं स्मृत्यारूढं बोधनीयेति भावः । वनं ओकः स्थानं येषां ते वनौकसोऽपि अननुभूतसंसारधर्माणोपीति भावः । लोकज्ञा लोकवृत्तभिज्ञाः 'लोकवृत्तं लोकः' इति वामनः । धीमतां प्रशस्तमतीनां अविषयो नाम अज्ञात इति नास्ति खल्वधिक्षेपार्थः । येन न चिरं लोकज्ञत्वमिति भावः । 'प्रत्यक्षं गुरवः स्मृत्याः' इति न्यायेन दुर्वा । इतः अस्मत्सकाशात् पतिकुलं भर्तृगृहं प्राप्य अधिष्ठाय गृहिणीत्वमवाप्येत्यर्थः ।

शुश्रूषस्वेति । गुरून् कुलवृद्धान् श्वश्वादीन् गृहागतान् ज्ञानतपोवृद्धांश्च शुश्रूषस्व परिचर । सत्स्वेव परिजनेषु विनयं दर्शयन्ती स्वैरेव गुरुपरिचर्यां विधेहीत्यर्थः । यथा महाभारते द्रौपदीसत्यभामासंवादे द्रौपदीवचनं "नित्यमार्यामहं कुर्यां वीरसूं सत्यवादिनीं । स्वयं परिचरिष्यामि पानाच्छादनभोजनैः" इति । 'ज्ञाश्रुस्मृदृशां सन' इत्यात्मनेपदं । सेवको हि स्वामिनियोगं श्रोतुमिच्छतीति श्रशूषापद सेवार्थं । 'शुश्रूषा श्रोतुमिच्छायां परिचर्यावधानयो'रिति विश्वः । समानः पतिर्यासां तासां सपत्नीनां जने वर्गे विषये 'नित्यं सपत्नवादिष्वि'ति निपातनात् साधुः । प्रियसखीषु या वृत्तिस्तां तुल्यसुखदुःखतामिति यावत् कुरु न पुनरीर्ष्यां दर्शयेत्यर्थः । विप्रकृता अपकृता वस्तुत एवान्य सङ्गादिना भर्त्रा कृतापराधापि रोषणतया क्रोधशीलतया हेतुना भर्तुः प्रतीपं प्रतिकूलं यथा भवति तथा मा स्म गमः न प्रवर्तेथाः । किमुतरोषिते दोष इति भावः । यदा दृष्टापराधेपि निरपराधवदुपलक्ष्यते तदा स्वात्मनैव गुरुणेव शिक्षि-

भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥१८॥

कथं वा गौतमी मन्यते ?।

गौतमी—[1]एत्तिओ एव्व बहूअणस्स उवएसो। वच्छे एदं खु सव्वं ओधारेहि।

---

[1]एतावानेव वधूजनस्योपदेशः। वत्से एतत् खलु सर्वमवधारय।

तोसौ न भूयोप्यपराध्यति। मिथ्यैवापि दर्शितदोषस्तु पुरुषो हठादपि दुष्यतीति नीतिरिह दर्शिता। 'स्मोत्तरे लङ् च' इति चकारात्लुङ् 'न माड्योग' इत्यडागमप्रतिषेधः। परिजने विषये भूयिष्ठं अत्यर्थं दक्षिणा उदारा भव न कश्चिन्नापराध्यतीति मत्वा सापराधेपिक्षन्ता निरपराधे च प्रसन्ना भवेत्यर्थः। भाग्येषु महादेवीत्वपुत्राभिषेकादिरूपेष्वभ्युदयेषु बहुष्वपि सत्सु अनुत्सेकिनी अगर्विता भव। न खलु धीरा प्रकृतिरनित्यैरभ्युदयैस्संक्षोभमुपयाति अल्पाशयानां ह्यणुरपि विशेषो महानिव विकाराय स्यादिति भावः। एवमुक्तैः प्रकारैः युवतयो बालवयसोऽपि योषितः गृहमस्या अस्तीति गृहिणी गृहस्वामिनी तस्याः पदं स्थानं यान्ति गच्छन्ति उक्तशेषविशेषोपेतं हि श्रीमतां गृहं। यदेतेषामितरेतरानुपरोधेन प्रवर्तनं स गृहिणीधर्मः। नचायमजितात्मनां सुकर इति भावः। वामाः अतो विपरीतवर्तिन्यो नार्यः कुलस्य गृहस्याधयः मनोव्यथाः यथा ह्याधिरविकलमपि क्षणकलेवरमवसादयति तथा स्वदोषेण कुटुम्बमेव दूषयन्तीत्यर्थः। एतेन 'मूर्धानं पत्युरारोह प्रजया च विराड्भव संराज्ञी श्वशुरे भव संराज्ञी श्वश्रुवां भव ननान्दरि संराज्ञी भव संराज्ञी अधि देवृषु पतीनां च देवृणां च सजातानां विराड्भव' इति श्रुत्युक्तं गुणोपपादितं सर्वकुटुम्बप्रतीक्ष्यत्वं पतिकुमारभाग्योदयश्च भावी प्रतीयते। अन्तश्शरीरगत एव हि सन्नाधिश्शरीरमशेषेण शोषयति तथान्तर्गृहगता एव वामाः स्त्रियः कुलमेवाकुलयन्तीत्युपमया वस्तुध्वनिः। **शार्दूलविक्रीडितं वृत्तम्॥**

गौतमीति। स्त्रीधर्मे हि स्त्रियः प्रमाणं। तपोवृद्धा च गौतमीति तदनुयोगः। एतावानेतत्प्रमाण एव वधूजनस्य युवतिजनस्य स्नुषाजनस्य वा स्नुषाभावमुपेष्यतो जनस्येत्यर्थः। उपदेशः उपदेष्टव्योर्थः। अन्यूनानतिरिक्तं भगवतैवोपदिष्टं यतो नास्ति

काश्यपः—वत्से परिष्वजस्व मां सखीजनं च।

शकुन्तला—[1]ताद इदो एव्व किं पिअंवदामिस्साओ सहीओ णिवत्तिस्संदि।

काश्यपः—वत्से इमे अपि प्रदेये। न युक्तमनयोस्त्वत्र गन्तुं। त्वया सह गौतमी यास्यति।

शकुन्तला—(पितरमाश्लिष्य।) [2]कहं दाणिं तादस्स अंकादो परिब्भट्ठा मलअतडुंमूलिदा विअ चंदणलदा देसंदरे जीविदं धारइस्सं।

काश्यपः—वत्से किमेवं कातरासि।

---

[1]तात इत एव किं प्रियंवदामिश्रे सख्यौ निवर्तिष्येते।

[2]कथमिदानीं तातस्याङ्कात् परिभ्रष्टा मलयतटोन्मूलितेव चंदनलतादेशान्तरे जीवितं धारयिष्ये।

वक्तव्यमन्येषामिति भावः। अवधार्य न विस्मर। इतः अत्रैवोदकान्ते प्रियंवदामिश्रे सख्यौ प्रियंवदा चानसूया च अत नात्रके प्रियंवदायाः प्रगल्भत्वं तस्या वचनक्रमेण दुर्वासः प्रसादनादिषु दुष्कर्माधनेषु चावसीयते अत उक्तं प्रियंवदा मिश्रे इति। किं निवर्तिष्येते येन परिष्वङ्ग इति भावः। पितृगृहं यावदपि नानुगमिष्यतः किमित्यर्थः। अविसृष्टदूते राज्ञि साशङ्कायाः शकुन्तलायाः प्रियंवदयानुगतया सर्वं सुवि हितं स्यादिति हृदयं। इमे अपि प्रियंवदा चानसूया च प्रदेये कन्यात्वात् कस्मै चिद्वराय प्रदानार्हे। तत्र गन्तुं पितृगृहगमनं न युक्तं पितृगृहादन्यत्र गमनं हि कन्यानामनुचितमिति भावः। गौतमी यास्यति नत्वेषाकिन्या गन्तव्यमिति भावः। तातस्याङ्कादुत्सङ्गात् परिभ्रष्टा च्युता दूरगतेत्यर्थः। मलयस्य स्वामिनृद्धिस्थानस्य तटात् सानोः उन्मूलिता उत्खाता चन्दनलतेव उपमानस्यानिर्लिङ्गस्वार्थं लोकशब्दः कविसमयात् प्रयुक्तः। कथं जीवितं धारयिष्ये। का कथा भोगानामिति भावः।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ १९ ॥

शकुन्तला पितुः पादयोः पतति ।

अभिजनवत इति । वत्से अभिजनवतः प्रशस्ताभिजनस्य चन्द्रवंशप्रसूतत्वान्महाकुलीनस्येति यावत् । भर्तुस्सम्बन्धिनि श्लाघ्ये राजर्षिमहर्षीत्वात् सर्वं श्लाघनीये गृहिणीपदे गृहस्वामिनीस्थाने स्थिता 'यान्त्येवं गृहिणीपद' मित्युक्तलक्षणेन स्वेनैव गुणगरिम्णा लब्धप्रतिष्ठा, विभवेन ऐश्वर्येण गुरुभिर्महद्भिः पृथग्जनदुर्वहैरित्यर्थः । तस्य भर्तुः कृत्यैः अत्यन्तयाचेन्तनानुनीविभरणकृताकृतावेक्षणपूज्यपूजनपात्रप्रतिपादनादिभिः प्रतिक्षणं प्रतिकलं आकुला व्यग्रा अविश्रान्तव्यापारेति यावत् । तथा च महाभारते द्रौपदीसत्यभामासंवादे द्रौपदी वचनं 'सर्वं राज्ञः समुदयमायं च व्ययमेव च । एकाहं वेद्मि कल्याणि' इति 'तमहं भारमासक्तमनाधृष्यं दुरात्मभिः । सुखं सर्वं परित्यज्य राज्यहानि घटामि वै' इति च । अचिरात् कठोरगर्भतया स्वल्पेनैव कालेन प्राची पूर्वा दिगर्कमिव पावनं उभयकुलोत्तारकं अनेन पुनातीति पुत्र इति व्युत्पत्तिः स्मर्यते । तनयंप्रसूय जनयित्वा च मम विरहजां शुचं त्वं न गणयिष्यसि न स्मरिष्यसि । नास्ति हि भर्त्रा सदृशः पुरन्ध्रीणां बन्धुरन्यः स च सर्वथा विशिष्टः तत्संगम एवप्रथमं श्रेयः । तत्रापि गृहिणीपदं ततश्च गुणानुरोधात् कृत्येषु भर्तुस्ताच्चिंत्यं । ततोपि पुत्रलाभ इत्यभ्युदयपरंपरा शैशवोचितपितृसन्निधिविगमं स्मर्तुमवसरं न यच्छेदिति भावः । प्राचीवार्कमित्युपमया सुखप्रसवः कुमारस्य निसर्गतेजस्वित्वं लोकप्रतीक्ष्यत्वमित्यादिकं वस्तु व्यज्यते । अपि च सूर्योदयात् पूर्वं यथा प्राचीतमसा वृता न प्रकाशते तथा पुत्रोदयात् पूर्वं दुष्यन्तस्य शापमोहादप्रकाशत्वं शकुन्तलाया वक्तृविवक्षानारूढमपि गार्भितं भवति । **हरिणी वृत्तम्** ॥

काश्यपः—यदिच्छसि ते तदस्तु।

शकुन्तला—(सलज्जावपेत्य।) [1]हला दुवे वि मं समं एव्व परिस्सजह।

उभे—(तथा कृत्वा।) [2]सहि जइ णाम सो राजा पच्चहिण्णाणमंथरो भवे। तदो से इदं सणामहेअंकिदं अंगुलीअअं दंसेहि।

शकुन्तला—[3]हला इमिणा संदेहेण वो आअंपिदम्हि।

उभे—[4]मा भाआहि। अदिसिणेहो पावसंकी।

---

[1]हला द्वे अपि मां परिष्वजेथाम्।

[2]सखि यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्। ततोऽस्मै इदं स्वनामधेयाङ्कितमंगुलीयकं दर्शय।

[3]हला अनेन संदेहेन वामाकम्पितास्मि।

[4]मा भैषीः अतिस्नेहः पापशङ्की।

यदिच्छसि यद्यदभिलषसि तत् सर्वं ते अस्तु सम्पद्यतां। द्वे अपियुवां समं युगपत्। परिष्वजेथां आलिङ्गतं। सममिति तुल्यस्नेहदर्शनार्थं प्रत्यभिज्ञाने पूर्ववृत्तस्मरणे मन्थरः अक्षमः यदि भवेत् एतावन्तं कालं सन्दर्शमात्रस्याप्यविसर्जनादिति भावः। दुर्वासः शापस्तु हृदिस्थः। स्वेन राजकीयेन नामधयेनाङ्कितं चिह्नितं अंगुलीयकं तेनैव राज्ञा त्वदङ्गुलौ निवेशितं दर्शय। येनावश्य स्मर्तव्यं भवतीति भावः। शापमोचनं चाभिप्रायस्थं। अनेन सन्देहन प्रत्यभिज्ञालोपसंशयेन आकम्पिता भीतास्मि। किं नाम विस्मृतिनिमित्तं युवयोर्विदितं किमपि भवेदिति भावः। अतिस्नेहः पापमनिष्टं शङ्कते इति तथाविधः। स्निग्धगतं पापशङ्कनं प्राधान्यात् स्नेह उपचर्यते। न हि वस्तुतो निमित्तमस्ति विदितं स्नेहातिशयस्त्वसदप्यनिष्टमुपस्थापयतीति भावः।

शार्ङ्गरवः—युगान्तरमधिरूढः सविता । त्वरतां भवती ।

शकुन्तला—(आश्रममभिमुखं स्थित्वा ।) [1]ताद कदा णु खु भूओ वि तवोवणं पेक्खिस्सं ।

काश्यपः— श्रूयताम् ।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ २० ॥

---

[1]तात कदा नु खलु भूयोपि तपोवनं प्रेक्षिष्ये ।

युगान्तरं गुणप्रमाणमवकाशं युगस्यान्तरमिति समासः । अधिरूढः प्राचीमूलादूर्ध्वं गतः । युगप्रमाणं च दृष्टिग्रहणानुरोधात्तथा लोकव्यवहारगाच्चोक्तं । त्वरतां अविलम्बं प्रतिष्ठतां । भूयः पुनरपि । श्रूयतां यदा द्रक्ष्यसि स काल उच्यमान आकर्ण्यताम् ।

भूत्वेति । चिराय दीर्घं कालं चत्वारः समुद्ररूपा अन्ताः सीमानो यस्यास्तस्या मह्याः सपत्नी भूत्वा अनेन भर्तुरभंगुरं सार्वभौमत्वं दम्पत्योश्च दीर्घमायुः प्रतीयते । महीसपत्नीशब्देन भर्तृबहुमानातिशयलक्षणमग्रमहिषीत्वं व्यज्यते । दुष्यन्तस्यापत्यं पुमान् दौष्यन्तिः बाह्वादेराकृतिगणत्वादिञ् , 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' त्यणोपवादः तं। दौष्यन्तमिति पाठान्तरं । अविद्यमानः प्रतिरथः प्रतिकूलो रथिको यस्य तं निस्सपत्नमित्यर्थः । रथशब्दादर्शआद्यच् , तथा च महाभारते रथमहारथादिशब्दैरथिव्यपदेशः । तनयं त्वदात्मजं निवेश्य विवाह्य प्रसूयेत्यपपाठः । कठोरगर्भायाः प्रसवस्य चिरातिक्रमासम्भवात् प्रसवानुपदमेव कुटुम्बार्पणानौचित्याच्च । तस्मिंस्त्वत्तनये अर्पितो न्यस्तः कुटुम्बस्य राज्यरूपस्य भरो भर्ण येन तेन भर्त्रा सार्धं शान्ते तपोयोग्ये अस्मिन्नाश्रमे पुनः पदं पादन्यासंकरिष्यसि । राजमहिष्याः पुत्राभिषेचनात् पूर्वं का कथा वनगमनस्येति भावः । 'गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रत' मितिवदिह राजर्षेः स्तपोवनसंवार्धितायाश्च पश्चात्तपोवनमेव विश्रमभूमिरिति सूचितं । भर्त्रा सार्धमित्यप्रधानतृतीयया

गौतमी—[1]जादे परिहीअदि दे गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो पुणो एसा एवं मंतिस्सदि । णिवट्टदु भवं ।

काश्यपः—वत्से उपरुध्यते मे तपोऽनुष्ठानम् ॥

शकुन्तला—(भूयः पितरमाश्लिष्य) [2]भूओ वि तवच्चरणपीडिदं तादस्स सरीरं अदिमत्तं मह किदे उक्कंठिदं भविस्सदि ।

काश्यपः— (सनिश्वासम्) ।

शममेष्यति ते शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥ २१ ॥

---

[1]जाते परिहीयते ते गमनवेला । निवर्तय पितरं । अथ वा चिरेणापि पुनः पुनरेवैवं मन्त्रयिष्यते । निवर्ततां भवान् ।

[2]भूयोपि तपश्चरणपीडितं तातस्य शरीरमतिमात्रं मम कृते उत्कण्ठितं भविष्यति ।

अस्मिन्निति स्वाश्रमनिर्देशेन च धर्माचरणेपि शकुन्तलामनोनुरोधित्वं राज्ञो दर्शितं **वसन्ततिलकं वृत्तम्** ॥

गमनवेला गमनकालः परिहीयते न्यूनो भवति दूरं गन्तव्यं अतैव च कालातिलङ्घने दिनस्य शिष्टांशः गन्तुं न पर्याप्त इति भावः । निवर्तय विद्वच्चनादेव निवर्तेतेति भावः । शैशवात् प्रथमविरहाच्च शकुन्तला न त्यक्तुमिच्छेदिति तमेवाह—अह वा इति । पुनः पुनः नवं नवं किमप्युपेक्ष्य एवमनेन प्रकारेण मन्त्रयिष्यते विरहाक्षमतया वदिष्यति न तु वक्तव्यावश्यंभावादिति भावः । तपसश्चरणेनानुष्ठानेन पीडितं प्रथममेव कर्शितं । मम कृते मदर्थं मामुद्दिश्येत्यर्थः । भूयोपि अधिकतरं उत्कण्ठितं विरहपीडितम् ।

शममिति । वत्से त्वया रचितपूर्वं पूर्वं परिकल्पितं वत्स्यर्थमुप्तमित्यर्थः । उटजस्य द्वारे द्वाराभ्यर्णदेशे विरूढं विशेषेणां कुरपक्ष्वादिभिरभिवृद्धं नीवारबलिं तृणधान्यरूपं देवपित्रादिपूजोपकरणद्रव्यं विलोकयतः उटजाङ्गनस्थत्वादेव मुहुः पश्यतो मे

उभे[४]—ताद सउंदलाविरहिदं सुण्णं विअ तवोवणं कहं पविसामो ।

काश्यपः—स्नेहवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य ।) हन्त भोः शकुन्तलां प्रतिविसृज्य लब्धमिदानीं स्वास्थ्यम् कुतः । गच्छ । शिवास्ते पन्थानः सन्तु ।

इति निष्क्रान्ता शकुन्तला सहयायिनश्च ।

सख्यौ—(शकुन्तलां विलोक्य) [1]हद्धि हद्धि । अंदरिदा पिअसही वणराईए ।

काश्यपः—(सनिश्वासम् ।) अनसूये गतवती वां सहचारिणी । निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

[1]हा धिक् हा धिक् । अन्तरिता प्रियसखी वनराज्या ।

शोकस्त्वद्विरहदुःखं कथं शमयेयमिति त्वया विरहितस्याश्रमे सर्वमेव त्वत्सम्बन्धि दृश्यमानं सन्दीपनमेव शोकस्येत्यर्थः । आर्या वृत्तम् ॥

ते पन्थानः गन्तव्या मार्गाः शिवाः सुखदाः सन्तु समीहितार्थसंपत्तिरेव मार्गाणां सुस्थत्वं । सहयायिनः शार्ङ्गरवादयः । वनराज्या वनपङ्क्त्या अविरलेन वनेनेत्यर्थः अन्तरिता व्यवहिता । दूरदर्शनमपि न भवतीति भावः । वां सहचारिणी चिरायाविनियुता सखी गतवती । किमतिक्रान्ते चिन्तयेति भावः । सहधर्मचारिणीति पाठान्तरं । शोकं विरहखेदं निगृह्य बुद्ध्या नियम्य । शून्यमिव विजनमिव यद्यप्येकया शकुन्तलयात्यक्तमिति भावः । स्नेहवृत्तिः प्रेम्णो गतिः एवं पश्यतीत्येवंदर्शिनी एकेनैव संपन्नमेकेनैव च विना शून्यं च प्रीतिः प्रकाशयतीत्यर्थः । स्नेहवृत्तेः प्राधान्यात् कर्तृत्वोपचारः । सविमर्शं सविवेकं आत्मनः प्रसादस्यात्मनैवोपलब्धस्य निमित्तमनुचिन्त्येत्यर्थः । हन्त भो इति हर्षे । शकुन्तलां प्रतिविसृज्य न्यासमिव स्वामिने प्रत्यर्प्य । स्थित्येति शेषः । तेन

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥

॥ इति निष्क्रान्ताः सर्वे ॥

इति चतुर्थोऽङ्कः ।

---

[2]**तात शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशामः ।**

न समानकर्तृकत्वहानिः । मे मनो निर्वृतं प्रसन्नं । किमथमुत्सवकाले शोकइति भावः । ननु कथमात्मदुहितुः परगृहेप्रेषणं प्रतिविसर्जनं स्यात् आह—

अर्थ इति । हि यस्मात् कारणात् कन्या नाम परकीयः परिग्रहीतुसम्बन्ध्येवार्थः द्रव्यं । तस्मात्तां कन्यां परिग्रहीतृस्वभूतां परिग्रहीतुः संप्रेष्य सम्बन्धसामान्ये षष्ठी । स्वामिनो वशमुपनीय ममायमन्तरात्मा प्रत्यर्पितः पुनर्निक्षेपसात्कृतः न्यस्त इति न्यासः निश्चिप्तद्रव्यं येन स इव अद्य शकुन्तलाप्रेषणानन्तरं प्रकाममत्यर्थं विशदः प्रसन्नः जातः । संवृत्तः । परिग्रहीतृचिन्तया पूर्वमेव तु कलुषमासीदिति भावः । अन्तरात्मनः प्राधान्यात् कन्यासंप्रेषणन्यासप्रत्यर्पणयोः कर्तृत्वोपचारः । अतिक्रान्ते धैर्यावलम्बनं धीराणां प्रकृतिरिति चानेन व्यज्यते ।

॥ इति शाकुन्तलव्याख्याने सहृदयसमाख्याने चतुर्थोऽङ्कः ॥

॥ अथ पञ्चमोऽङ्कः ॥

ततः प्रविश्यासनस्थो राजा विदूषकश्च ।

विदूषकः—(कर्णं दत्त्वा ।) [1]भो वअस्स संगीदसालंदरे अवहाणं देहि । कलविसुद्धाए विअ सरसंजोओ सुणीअदि । जाणे तत्तहोदी हंसपदिआ वण्णपरिअअं करोदित्ति ।

[1]भो वयस्य सङ्गीतशालान्तरे अवधानं देहि । कलविशुद्धाया गीतेरिव स्वरसंयोगः श्रूयते जाने तत्र तत्रभवती हंसपादिकावर्णपरिचयं करोतीति ।

॥ अथ पञ्चमाङ्कव्याख्याप्रारम्भः ॥

तपोवनमेव रङ्गमादाय चतुर्भिरङ्कैर्निर्व्यूढमंशः कथावस्तु । राजकुलं पुनराश्रित्य शेषः प्रवर्तते । तत्र च शकुन्तला पित्रा प्रहिता भर्तुः सकाशं प्रस्थितेति चतुर्थेऽङ्के गतं । अथ च 'दूराध्वान' मित्यादि निषेधात् पात्रनिष्क्रमं विधाय भर्तृगृहप्राप्तिं प्रस्तोतुं राजविदूषकयोरङ्कार्थयोरेव प्रवेशमङ्कावतारेणारभते । ततः प्रविशतीत्यादिना । अङ्कावतारलक्षणमुक्तं भावप्रकाशे 'अङ्कावतारस्त्वङ्कान्ते पात्राङ्कस्याविभागतः । पूर्वाङ्कस्यावसानोक्तकथाविच्छेदपूर्वकं । प्रवेशो भाविनोऽङ्कस्य सोऽङ्कावतरइष्यते । ' 'अङ्कावतारो विष्कम्भाद्यनन्तरित एव सः । ' इति विदूषकश्च आसनस्थ इत्यनुपश्यते । कर्णं दत्त्वा किञ्चिदिव श्रूयमाणमभिनीय । सङ्गीतशाला नाम राज्ञो नृत्तगीतादिपरिभोगाय निर्मितं शिल्पिनीवादित्रादिसम्भृतं स्थानं तस्या अन्तरे अभ्यन्तरप्रदेशे, अवधानं देहि शुश्रूषां प्रवर्तय । श्रीकण्ठः काकलीत्वादभ्यन्तरगतत्वाच्च दूरे स्फुटं न विभाव्यत इत्युक्तमवधानमिति ।

राजा—तूष्णीं भव । यावदाकर्णयामि ।

(आकाशे गीयते ।)

[1]अहिणवमहुलोलुवो तुमं तह परिचुम्बिअ चूअमञ्जरिं ।
कमलवसइमत्तणिव्वुदो महुअर विरहरिओ सि णं कहं ॥ १ ॥

---

[1]अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम् ॥

कलाया अव्यक्तमधुरायाः 'ध्वनौ तु मधुरस्फुटे । कल' इत्यमरः । विशुद्धाया अवक्रललितस्वरायाः । तदुक्तं गीतयः पञ्च शुद्धाया भिन्ना गौडी च वेसरा । साधारणी विशुद्धास्यादवक्रैर्ललितैः स्वरैः । भिन्नामूष्मैः स्वरैर्वक्रैर्मधुरैर्गमकैर्युता । गाढैश्लिष्टानगमकैरोहार्थं लालितैः स्वरैः । अखण्डतस्थितिः स्थानत्रयं गौडी मता सताम् । वेगवद्भिः स्वरैर्वर्णचतुष्कव्यतिरिक्तितः । वेगस्था रागगीतिर्वेसरा चोच्यतेबुधैः । चतुर्गीतिगतं लक्ष्मश्रिता साधारणी मता' इति । भावप्रकाशे च 'यथाश्रुति भवाश्शुद्धरागा इति समीरिताः । भिन्नादिकाः कलमता गौडरागाः प्रकीर्तिताः । अधिकन्यूनसंसृष्टिमया वेसरसंज्ञिताः । भिन्नन्यूनोपगमनाद्विरागा इति स्मृताः । साधारणा भवेयुश्च भिन्नन्यूनाधिकाल्पकाः ।' इति । स्त्रीगीतिर्वेसरात्र शुद्धत्वं । गीतेः गेयपबन्धस्येव ऊहार्थं इत्र शब्दः । स्वरसंयोगः षड्जाद्यारोहावरोहनियमरूपः सम्बन्धविशेषः । हंसपदिकाया राजाश्रयात्तत्र-भवतीत्युपचारो विदूषकस्य । हंसपदिका नाम मालिनो राज्ञः । वर्णस्य स्थाय्यादिस्वरसन्दर्भावशेषस्य परिचयं परिजीलनं । तदुक्तं 'वर्णः स्वरसमूहःस्यात्' इति । वर्ण्यते व्यक्तिमानीयते रागः अनेनेति वर्णः । यावदाकर्णयामि श्रोष्यामि अतस्तूष्णीं भवेति सम्बन्धः । आकाशे रङ्गादन्यत्र गीयत इति भावे ।

अभिनवेति । हे मधुकर भ्रमर अभिनवे मधुनि मकरन्दे अननुभूतपूर्वे नानाकुसुमसम्बन्धिनीत्यर्थः । लोलुपः चपलः त्वं चूतमञ्जरीं तदात्वोन्मीलितां चूतलतां तथा तेन प्रकारेण अनन्यपरत्वेनेत्यर्थः । परिचुम्ब्य आस्वाद्य कमलमेव वसतिः वासगृहं तन्मात्रेण निर्वृतः सन्तुष्टः सन् एनां तथाभिमतां अनुभूतपूर्वां चूतमञ्जरीं कथं विस्मृ-

राजा—अहो रागपरिवाहिणी गीतिः।

विदूषकः—[1]किं दाव गीदीए भवदा अवगदो अक्खरत्थो।

राजा—(स्मितं कृत्वा।) सकृत्कृतप्रणयोऽयं जनः। तदस्या देवीं वसुमतीमन्तरेण मदुपालम्भमवगतोऽस्मि। सखे माढव्य मद्वचनादुच्यतां हंसपदिका। निपुणमुपालब्धोऽस्मीति।

---

[1]किं तावद्गीत्या भवता अवगतोऽक्षरार्थः?।

तोऽसि। स्त्रीत्वव्यञ्जनाय वसतिशब्दः। यः कमलवसतिमपि विहाय चूतमञ्जर्यां प्रत्यग्रकुसुमितया विलोभितोऽसि स एवैनां संप्रति न स्मरस्यपीति भावः। मधुकरेत्यनेन मदात् स्वैरवृत्तं सूच्यते। अभिनवयौवनां मां यः प्रथमं शुद्धान्तमपि परित्यज्य तथा रागादनुभूतवानसि स एवेदानीं शुद्धान्तसन्तुष्टो न चिन्तयसीति प्रकृतार्थप्रकाशनादप्रस्तुतप्रशंसालङ्कारः। अत्र शकुन्तलां पूर्वमनभ्यर्च्य सम्प्रति विस्मृत इति च प्रतीयते। परिगृह्येत्यपभोगस्योपदेशलक्षणं। अत्र शकुन्तलवृत्तान्तस्य विवक्षानारूढतया ध्वनिरेव। 'आगन्तुकेन भावेन यदभिव्यक्तिकारकं। वस्तुनो भाव्यवस्थस्य पताकास्थानकं तु तत्। अतीतानागते कार्ये दर्श्येतेदृक्च वस्तुनः। उत्पाद्यदेशकालाद्यैः पताकास्थानकं तु तदि' त्युक्तलक्षणं पताकास्थानकम्। **अपरवक्त्रं वृत्तम्।**

अहो इति हर्षे। रागं स्वरमन्दर्भविशेषं परिवाहयति प्रवर्त्यातिरिक्तमनुवर्तयतीति रागपरिवाहिणी अनुरणनवदनुवृत्तरागेत्यर्थः। अक्षरार्थः प्राकरणिकार्थः यस्य विवक्षया गीतिः प्रवृत्तेत्यर्थः। अयं जनः हंसपदिका सकृदेकवारं कृतः मया विहितः प्रणयः परिचयः भोग इति यावत् यस्य सः पश्चादनुपलालित इति भावः। अथ वा अयं जनः अहं कृतः प्रणयो हंसपदिकापरिचयो येन सः। तत् भूयोऽप्यसम्भावनात् वसुमती नाम देवी महिषी अन्तरेणापदिश्य विपर्यये कृत्येति यावत्। अस्या हंसपदिकायास्सम्बन्धिनं मम कर्मणः उपालम्भमपराधसूचनं अवगतोऽस्मि गीतेरक्षरार्थं ज्ञातवानस्मि।

विदूषकः—[1]जं भवं आणवेदि (इत्युत्थाय।) भो वअस्स गहीदस्स ताए परकेरएहिं हत्थोहिं सिहण्डए अच्छराए विअ वीदराअस्सणत्थि मे मोक्खो।

---

[1]यद्भवानाज्ञापयति। भो वयस्य गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके अप्सरसेव वीतरागस्य नास्ति मे मोक्षः।

तथा चात्र मधुकरशब्देन मत्सम्बोधनं चूतमञ्जरीमिति हंसपदिकायाः स्वात्मोपक्षपः कमलवसतिपदेन वसुमत्तादेव्याश्चापदेशः इत्ययमक्षरार्थ इति भावः। अत्र कमलवसतिपदेन राज्याधिकारः प्रत्याय्यते। अतश्च देवीं वसुमतीमन्तरेणेत्युच्यत इति के चिदाहुः। तदेतत् 'परिग्रहबहुत्वेपि' 'बहुवल्लभा राजानः' इत्यादिदर्शनाद्राज्यविषयं हंसपदिकाया ईर्ष्यामानस्य स्वरसविरोधाच्च न चतुरश्रं। माठर्येति विदूषकनामग्रहणं। मद्वचनात् मदीयं वाक्यमादाय 'ल्यब्लोपे पञ्चमी' मामेव वक्तारं प्रकृत्येत्यर्थः। निपुणं अन्यापदेशाच्चतुरं उपालब्धोऽस्मीत्युच्यतामिति सम्बन्धः। तया हंसपदिकया प्रयोजिकया परकीयैः प्रयोज्यसम्बन्धिभिः हस्तैः शिखण्डके अल्पे शिखाजूटे 'अल्पार्थे कप्रत्ययः' गृहीतस्य हंसपदिकं परिजनगृहीतस्येत्यर्थः 'पञ्चभिर्हलैः कर्षति ग्रामान् ग्रामणी'रित्यादिवत्प्रयोज्यकर्तृकेपि फलस्वाम्यात् प्रयोजकस्य कर्तृत्वोपचारः। अप्सरसा गृहीतस्य वशीकृतस्य वीतरागस्य मुनेरिव मोक्षः मोचनं निर्वाणं च नास्ति। अप्सरोवशंवदस्य वीतरागस्यापि रागोपरागात् संसरतो यथा न निर्वाणसिद्धिः तथा ममाप्यनागरिकस्य हास्यगणिकानां नागरिकवधूनां ग्रहणोपेतस्य नैव स्याद्विमोचनमिति भावः। एकवचनान्तस्यामरशब्दस्य साधुत्वे प्रमाणमवोचाम। 'तत्रावश्यं बलयकुलिशोद्घट्टनोद्गीर्णतोयं नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वं। ताभ्यो मोक्षस्तव यदि सखे धर्मलब्धस्य न स्यात् क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्मापयेथाः। इत्यादिषु व्यक्तं नागरिकाङ्गनानां क्रीडापरत्वं अत्र त्वद्वचनाद्वदन्नहं तव प्रतिनिधीकृत्य त्वदपराधस्य कृते दण्डितः स्यामित्यपि विवक्षितं। नागरिकवृत्त्या विदग्धरीत्या

राजा—गच्छ । नागरिकवृत्त्या संज्ञपयैनाम् ।

विदूषकः—[1]का गई । (इति । निष्क्रान्तः ।)

राजा—किं नु खलु गीतमेवंविधार्थमाकर्ण्य इष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि । अथ वा ।

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं

[1]का गतिः ।

प्रशस्तेवेषभाषादिस्वीकारेणेत्यर्थः । संज्ञपय निवेदय । ज्ञपेर्मित्त्वादवृद्धिः । न हि नागरिकवृत्तिरुपहासास्पदं भवतीति भावः । का गतिः अनिच्छयापि कर्तव्यमेव जातमित्यर्थः । अत्र विदूषकसाचिव्यौ शकुन्तलाप्रत्यादेशो न युज्येत स्वयं हि राज्ञा तस्मै स्वानुरागो निवेदितः अतो व्याजेन विदूषको निर्गमितः । विदूषकेणाग्रे 'परिहासविजल्पित' मिति राजवचनं परमार्थमवगतवता स्वेन कथान्तरेष्वप्रसञ्जनस्य समर्थनेऽपि सति प्रसङ्गे यथाश्रुतमुक्तमेव हि विदूषकेण सर्वं स्यात् । किं नु खलु किं नामेदं । यत् पुनः एवंविधार्थमधुकरोपालम्भविषयं । इष्टजनविरहादृतेऽपि असत्यपि प्रियाविरोग इत्यर्थः 'अन्यारादितरर्ते' इत्यादिना पञ्चमी । बलवदुत्कण्ठितः विरहादुन्मना अस्मि । तदेतत् किं नु खल्विति सम्बन्धः । असति कारणे कार्यमचिन्त्यसम्भवमिति भावः । 'चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः । उत्कण्ठोत्कलिके तस्मिन्नि' ति शब्दार्णवः । प्रकारान्तरेण समर्थयते, अथ वेति ।

रम्याणीति । सुखितः प्रियविरहादेर्दुःखहेतोरभावेन निर्वृतचित्तोऽपि जन्तुर्जनः रम्याणि दर्शनीयानि वस्तूनि सरित्समुद्रचन्द्रतारकादिनि वीक्ष्य दृष्ट्वा च मधुरान् श्रोत्रसुखान् शब्दान् तन्त्रीकण्ठस्वनान् निशम्य श्रुत्वा च पर्युत्सुकः अलब्धलिप्साभु-

भावस्थिराणि जननान्तरसौहृदानि ॥ २ ॥

इति पर्याकुलस्तिष्ठति ।

ततः प्रविशति कञ्चुकी ।

कञ्चुकी—निश्वस्य अहो खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि ।

भितः भवतीति यत् तत् पर्युत्सुकत्वं भावेन भावनाख्येन संस्कारेण स्थिराणि शरीरापायेऽप्यनपेतानि जननान्तरसौहृदानि अन्यजन्मसम्भूतान् स्नेहान् चेतसा केवलेन मनसा अबोधपूर्वं इदमित्थमिति विवेकपूर्वं यथा न भवति तथा स्मरति स्मरणरूपं तदित्यन्वयः भावप्रधानमाख्यातमिति हि शाब्दिकाः । अन्येतु यत्तदोर्यदातदेत्यर्थः । तथा च यदा पर्युत्सुको भवति । तदा स्मरतीति व्याचक्षते । यत्तु पर्युत्सुको भवतीति यत्तस्मात् स्मरतीति व्याख्यानं तादिदं न समञ्जसं । सुखितस्याप्यौत्सुक्यं किं निबन्धनमिति हि निर्णयः प्रकृतः तत्र च कारणमेव वक्तव्यं न पुनः फलमिति । नूनमिति सम्भावनायां असति निमित्तान्तरे परिशेषादिदं सम्भाव्यत इत्यर्थः । अयमाशयः उद्दीपनं हि विरहिणामेवोत्पलवाय भवति । प्रत्युतेतरेषां भोगाय सम्पद्यते । एवं स्थिते यदहमिदानीमनुभूतविप्रलम्भोऽपि पर्युत्सुकोस्मि । जन्मान्तरसंस्तुतविरहेणात्र हेतुना भवितव्यं । जन्मान्तरसंस्तवश्च मनोमात्रसंवेद्यः ' मनो हि जन्मान्तरसङ्गतिज्ञमित्युक्तं । तत्विदमित्थमिति विवेक्तुं शक्यः यथा हि कस्य चित् क्वचिदेव स्वरसतः प्रवृत्तिर्दृश्यते सा च कारणान्तरेष्वनाश्वसन्ती जननान्तरवासनामेव परिशिष्यमाणामुपलभावति । तथैतदपि किञ्चिदात्मसंवेद्यं भवितुमर्हतीति । शापान्तर्गतत्वाच्छन्मान्तरायनुभंगवद्वासनाशेषं शकुन्तलासङ्गतमिति दर्शितमनेन । वसन्ततिलकं वृत्तम् ।

पर्याकुलः संक्षुभितमनाः । निश्वस्येति दुःखानुभाव उक्तः । अहो नु खल्विति-निपातससुदायो दुःखव्यञ्जनः । ईदृशीमनुभूयमानप्रकारां दशां परिणामरूपामवस्थां । दशादोषं दर्शयति ।

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्था ॥ ३ ॥

भोः कामं खलु धर्मकार्यमनतिपात्यं देवस्य । तथापीदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम् । अथ वा अविश्रमो लोकतन्त्राधिकारः । कुतः ।

आचार इति । या वेत्रयष्टिः आचारः परंपराप्राप्तमधिकारलक्षणमिति-हेतोर्मया अवहितेन यत्नादविस्मरता सता राज्ञः अवरोधगृहेषु अन्तः पुरसद्मनि 'गृहाः पुंसि च भूम्न्येवे' त्यभिधानाद्बहुवचनं । गृहीता धृता न त्ववरोधादन्यत्र अनुपयोगादिति भावः । सैव वेत्रयष्टिर्बहूनां पूरणे बहुतिथे 'तस्य पूरणे डट्,' 'बहुगणवतुडतिसंख्यस्य तिथुक्' । काले गते अतिक्रान्ते सति प्रस्थाने देशान्तरगमने विक्लवा असमर्था गतिर्यस्य तस्य मम अवलम्बनायेयमवलम्बनार्था जाता अवष्टम्भप्रयोजना संवृत्ता । पूर्वमाचारभूता संप्रति त्वाधारतां गता, यथा न शक्यं विस्मर्तुमिति भावः । काल-जीर्णं हि सर्वमन्यदेव भवतीति सामान्यं वस्तु व्यज्यते । तेन च प्रकृतविशेषसमर्थ-नरूपार्थान्तरन्यासालङ्कारध्वनिः । अवलम्बनार्थमिति पाठे क्रियाविशेषणं । **वसन्त-तिलकं वृत्तम्** ।

धर्मः प्रतीक्ष्यभक्त्यादिः श्रुतधर्म एव कार्यमवश्यकर्तव्यं देवस्य राज्ञः कामं खल्व-नतिपात्यं यद्यपि कृच्छ्रेण्यनतिक्रमणीयं 'अकामानुमतौ काम'मिति ह्युक्तं । 'कृत्यानां कर्तरिवे'ति षष्ठी । धर्मासनाद्व्यवहारासनात् इदानीं तत्क्षणमेव उत्थिताय अविश्रान्ता-येत्यर्थः । पुनरुपरोधकारि श्रान्तस्यापि निर्बन्धश्रमावहं । निवेदयितुं कथयितुं नोत्सहे

भानुः सकृद्युक्ततुरङ्ग एव रात्रिंदिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥४॥

यावन्नियोगमनुतिष्ठामि । (परिक्रम्यावलोक्य ।) एष देवः ।

नेच्छामि । अनिच्छयापि निवेदनमपरिहार्यमेवेत्याह । अथ वेति । लोकस्य तन्त्रः प्रवर्तनं तन्त्राधिकारः स्वाम्यं अविश्रमः असम्भवद्विराम एव । न हि जगत्प्रभुत्वं विश्रमसहं स्यात् अतो निवेदनीयमेवेति भावः । उक्तमर्थं निदर्शयति ।

भानुरिति । भानुः सूर्यः सकृदेकवारं सर्गादावित्यर्थः । युक्ततुरङ्गः वियुक्त-युग्य एव युग्यमीक्षणस्याप्यलब्धावकाश इत्यर्थः । कीदृशो विश्रमस्येति भावः । तथा गन्धवहो वायुः रात्रिंदिवं रात्रौ च दिवा च 'अचतुर' इत्यादिना निपातितो रात्रिंदिव-शब्दः । अविश्रान्तमित्यर्थः । प्रयाति वाति सदागतित्वादिति भावः । एवं शेषः सदा सन्ततमेव आहितो धात्रा न्यस्तो भूमिभारो यस्मिन् सः । तथा षष्ठांशः वर्णो-चितः करो वृत्तिर्यस्य तस्यापि राज्ञोपीत्यर्थः । एषः अविश्रमो धर्मः अवर्जनीय इत्यर्थः । यथा क्रमेण मेरुमभितः परिक्रामन् स्वापप्रबोधक्रियासमभिहारेण लोकमेव धिनोति भानुः, यथा चोच्छ्वासनिश्वासादिभिर्वर्षातपतुषारादिभि श्रान्तर्बाह्यैर्वृत्तिभिरनिलः कृत्स्नं बिभर्ति, यथा च भुवमेव शिरसि निहितां शेषो बिभर्ति, यदि चैतेषामन्यतमो विश्राम्येत् जगदेवोत्सीदेत्, तथेति भावः । 'गुणोत्कृष्टैः समीकृत्य वचोन्या तुल्ययोगिता' इत्युक्तलक्षणस्तुल्ययोगिताभेदः । अविश्रमरूपैकधर्मान्वयात् । **इन्द्रवज्रा वृत्तम् ॥**

नियोगं स्वाधिकारं निवेदनरूपं यावदनुतिष्ठामि करिष्यामि । किं परिजनस्य प्रभुवृत्तिचिन्तयेति भावः । एष देव ईति । निषेवत इत्यग्रिमेण सम्बन्धः ।

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषवेते शान्तमना विविक्तम् ।
यूथानि सञ्चार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः ॥

(उपगम्य ।) **जयतु देवः । एते खलु हिवमदुपत्यकारण्यवासिनः काश्यपसंदेशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः । श्रुत्वा देवः प्रमाणम् ।**

राजा— (सादरम् ।) **किं काश्यपसन्देशहारिणः? ।**

प्रजा इति । प्रजाः जनान् स्वाः आत्मीयाः प्रजाः सन्तानानिव 'प्रजा-स्यात् सन्ततौ जन' इत्यमरः । तन्त्रयित्वा धारयित्वा अर्थिप्रत्यर्थिव्यवहारनिर्णयेन मर्यादायां स्थापयित्वेत्यर्थः । तन्त्रः कुटुम्बधारणार्थोऽपि कर्मान्तरसमभिव्याहारादिह धारण-मात्रार्थः । कुटुम्बेति धात्वन्तरमिति तु चान्द्रमतं । अपत्य निर्विशेषं परिपाल्येत्यर्थः । शान्तमनाः अव्याक्षिप्तचित्तस्सन् शान्तेति पाठान्तरं । विविक्तं विजनं निषेवते विश्रमार्थं प्राप्नोति । स हि महापुरुषाणां स्वो भावः यद्यथाकालं क्रियामयत्वमनुपदं चाक्रियत्वं चेतसो नश्वदिति व्यक्तीयतुं शान्तमना इति विशेषणं । तद्यथा, यूथानि करिणीकलभादि-मयान् स्ववर्गान् सञ्चार्य स्नानपानघासाद्यर्थं तत्र तत्र नीत्वा दिवा मध्यंदिने रविणा कठोरेण सूर्येण प्रतप्तः । यावद्यूथसञ्चारं सोढातप इति भावः । द्विपेन्द्रो यूथपतिः शीतं सन्तापरहितं स्थानं तरुमूलादिप्रदेशमिव । स लोकार्कच्छायां निषेवत इति भावः । जनया चोपमया प्रभोरधृष्यत्वमभिगम्यत्वं च व्यज्यते । **उपजातिर्वृत्तम् ।**

एते सन्निकर्षस्थिताः हिमवतो गिरेरुपत्यकारण्ये आसन्नवर्तिनि तपोवने व-सन्तीति तथाभूताः 'उपाधिभ्यां त्यकञ्चासामीपाधिरुदयो' रित्यनुशासनं । 'उपत्य-काद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरोक्तेरिति पदिचायकमात्रं न तु प्रवृत्तिनि-मित्तप्रविष्टं, ततश्च न हिमवत्पदान्वयविरोधः । हिमवद्गिरेरिति तु पाठान्तरं । हिमवतो गिरेरिति चान्यत्र । काश्यपस्य कण्वस्य सन्देशं वाचिकमादाय निमित्तीकृत्य । सस्त्रीकाः तपस्विनः संप्राप्ता इति राज्ञे निवेदनीयमिति तैरेवकञ्चुकी प्रार्थितस्तथा निवे-

कञ्चुकी—अथ किम् ।

राजा—तेन हि मद्वचनादुच्यतामुपाध्यायः सोमरातः । अमूना श्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हसीति । अहमप्येतांस्तपस्विजनसन्दर्शनयोग्ये देशे प्रतिपालयामि ।

कञ्चुकी—यदाज्ञापयति देवः (इति निष्क्रान्तः ।)

राजा—(उत्थाय ।) कः कोऽत्र भोः ।

(प्रविश्य प्रतिहारी ।)

प्रतिहारी—[1]आणवेदु देवो ।

राजा—वेत्रवति । अग्निशरणमार्गमादेशय ।

प्रतिहारी—[2]इदो इदो देवो ।

---

[1]आज्ञपयतु देवः ।

[2]इत इतो देवः ।

दितवानित्यवगम्यते, तावतैव राज्ञः शकुन्तलास्मृतिः स्यादिति हि तेषामाशयः । प्रमाणं निर्णेता । देवाज्ञैव तान् प्रतिवक्तुं प्रतीक्षत इत्यर्थः । सादरं काश्यपगोत्रत्वात् सत्वहुमानं । किं काश्यपसन्देशग्रहणे इति प्रश्नेन सङ्कीर्णा इत्यस्मिन्नंशेऽनास्था विस्मृति-निबन्धना व्यज्यते । तेन हि काश्यपसन्देशग्रहणत्वेनैव । उपेत्याधीयतेऽस्मादित्युपाध्यायः सोमरातो नाम—उपाध्याय इति प्रशस्तिशब्दमवासो राजपुरोहितः सोमरातोभिधान इत्यर्थः । मद्वचनादुच्यतां मां वक्तव्यमादिश्य निवेद्यतां । आश्रमवासिन इति दूरत्वा-तिशयं दर्शयति । श्रौतेन श्रुतिदृष्टेन विधिना विधानेन 'शुक्रमसी' त्यादिमन्त्रपूर्व-मित्यर्थः । स्वयं साक्षादात्मनैव सत्कृत्यार्घ्यादिभिरर्हयित्वा प्रवेशयितुमस्मत्सकाशे प्राप-यितुमर्हसीत्युच्यतामिति सम्बन्धः । सङ्कीर्णत्वाद्राज्ञा स्वयमर्हणं न कृतमिति ह्रस्वं । तपस्विजनानां सन्दर्शनस्य योग्ये समुचिते देशे अभिशरण इत्यर्थः । प्रतिपालयामि प्रथ-ममेव सज्जः प्रतीक्षे । तत्रैव प्रवेशयितव्यमिति भावः । कः कोत्र भोः परिजनानामिति शेषः । वेत्रवतीति प्रतीहारीनामग्रहणं । अभिशरणस्याभिगृहस्य मार्ग 'शरणं गृहरक्षित्रो'

राजा— (परिक्रामति। अधिकारखेदं निरूप्य।) **सर्वः प्रार्थितमर्थमधिगम्य सुखी संपद्यते जन्तुः। राज्ञां तु चरितार्थता दुःखोत्तरैव। कुतः।**

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेवं।
नातिश्रमापनयनाय न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ ६ ॥

नेपथ्ये।

रित्यमरः। अधिकारस्य अधिष्ठातृव्यापारस्य खेदं दुर्वहत्वं निरूप्य विमृश्य। सर्वो जन्तुः प्राकृतो जनः प्रार्थितमभिलषितमर्थं प्रयोजनमधिगम्य प्राप्य सुखी निर्वृतचित्तः संपद्यते भवति, यावत्समीहितसाधनमायस्य कृतार्थो विश्राम्यतीत्यर्थः। राज्ञां तु वैलक्षण्यार्थस्तुशब्दः। चरितः कृतः अर्थो येन तस्य भावः। दुःखमुत्तरमुपरितनं यस्यास्तथाभूता। यथा यथा च महीविजयात् सिद्धिर्भवति तथा तथा प्रत्यवेक्षणश्रमो भूयान् भवतीति भावः। कुतः किं कारणं चरितार्थता दुःखोत्तरा आह—

औत्सुक्येति। प्रतिष्ठा प्रार्थितार्थसिद्धिः औत्सुक्यमात्रं इष्टार्थविषयां चिन्तामेव केवलं अवसाययति समापयति निवर्तयतीत्यर्थः। अवसादयतीति पाठेपि स एवार्थः। लब्धस्य सम्प्राप्तस्यार्थस्य परिपालनं प्रत्यवेक्षणमेव वृत्तिर्व्यापारः। एवमनुभूयमानेन प्रकारेण क्लिश्नाति खेदयति। राज्यं राजाधिकारः नातिश्रमापनयनाय अत्यन्तं निश्शेषमेव श्रमस्य परिहाराय न भवति, न च श्रमाय एकान्ततः खेदायापि न भवति। तद्यथा, स्वहस्तेन धृतो दण्डो यस्य तत् आतपात् त्रायत इत्यातपत्रं छत्रमिव—यथा नामातपत्रं आतपश्रमं शमयति हस्तधारणश्रमाय च सम्पद्यते तथैव सिषाधयिषादुःखं प्रशमयन्त्यपि सिद्धिः नान्तरीयकं उपर्युपरि पालनखेदमावहत्येव पाल्यबहुत्वादिति भावः। अत्र पूर्वार्धेन नातिश्रमापनयनायेत्यादिसमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः उपमानुप्राणितः। **वसन्ततिलकं वृत्तम्** ॥

वैतालिकौ—विजयतां देवः ।

प्रथमः—स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथ वा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥ ७ ॥

द्वितीयः—नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ।

वैतालिकौ । वितालं गायन्तौ । यथा भावप्रकाशे 'तत्तत्प्रहरकर्यागैरागैस्तत्काललवाचिभिः श्लोकैः । सरभसमेव वितालं गायन् वैतालिको भवति' इति । विजयतां देव इति द्वयोस्समं प्रयोगः । प्रथम इति श्लोकपाठक्रम एव प्राथम्यादिनिमित्तमत्र ।

स्वेति । स्वस्मिन् आत्मीये सुखे शरीरेन्द्रियनिर्वृतौ भोगशान्दतायां निरभिलाषः आसङ्गरहितस्सन् लोक एव हेतुः प्रवर्तकस्तस्य 'षष्ठी हेतुप्रयोगे' प्रजार्थमित्यर्थः । प्रतिदिनं खिद्यसे व्याप्रियसे । प्रजानां परैः परस्परेण वा बाधां वारयितुं अगणितात्मखेदो न जातु विश्राम्यसीत्यर्थः । गोप्तृतायाः पारार्थ्यं स्वभावायातमित्याह—अथ वेति । ते गौप्तुः वृत्तिः परिपालनव्यापारः एवंविधा स्वात्मानमनादृत्यापि परार्थधुरूपैव । तथा हि—पादैः पिबतीति पादपः मूर्ध्ना प्रधानभूतेन शिरसैवेत्यर्थः । तीव्रं सोढुमशक्यं उष्णं ग्रीष्मातपसन्तापं अनुभवति सहते । छायया अनातपेन संश्रितानां पादमूलगतानां परितापमातपखेदं शमयति निवारयति । परसुखेन मुखवानुन्नतो नात्मश्रमं गणयतीति स्वो भाव इति भावः । दृष्टान्तसंवलित आक्षेपालङ्कारः । **मालिनीवृत्तम्** ॥

नियमयसीति । विमार्गेण विरुद्धेन मार्गेण प्रस्थितान् प्रक्रान्तप्रवृत्तीनेव सतो जनान् आत्तदण्डः नित्योद्यतनिग्रहस्सन् नियमयसि निवारयासि 'यम च परिवेषण' इति चकारानुमित्त्वं, येन ह्रस्वः । उपसर्गसन्नियोगाद्वारणार्थत्वं । 'नित्यमुद्यतदण्डः स्यात्' इति मनुशासनानुरोधेन दण्डप्रदर्शनात् विमार्गगमनमेव प्रजानां निवर्तयसि, न पुनर्गच्छत उपेक्ष्य पश्चाद्दण्डेन दुनोषीत्यर्थः । तथा च रघुवंशे 'न संयत-

अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् ॥ ८ ॥

राजा—एते वयं क्लान्तमनसः पुनर्नवीकृताः स्मः।

(इति परिक्रामति।)

प्रतिहारी—[1]एसो अहिणवसंमज्जणससिरीओ मण्णिहिदहोमधेणू अग्गिसरणालिंदो। आरूहदु देवो।

---

[1]एषोऽभिनवसम्मार्जनसश्रीक सन्निहितहोमधेनुरग्निशरणालिन्दः। आरोहतु देवः।

स्तस्य बभूव रक्षिनृर्विसर्जनेयेत्र सुतजन्महर्षितः' इति। विवादे विरुद्धे वादे धनक्षेत्रादिस्वाम्यविप्रतिपत्तिमित्यर्थः। प्रशमयसि प्रकर्षेण शान्तं करोषि। सम्यगवगमेन तत्त्वावधारणात् अपुनरुभेषं करोषीत्यर्थः। 'नान्ये मितोऽहेतौ' इति पर्युदासात् हेतुमणिाचे शमादीनामप्यन्तत्वेन मित्त्वं। उक्तं च रघुवंशे 'नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शिते। पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः।' इति। स्मर्यते हि 'व्यवहारान् नृपः पश्येद्विद्वद्भिर्ब्राह्मणैस्सह' इति। रक्षणाय दस्युप्रतिपक्षादिभ्यः परित्राणाय कल्पसे समर्थो भवसि 'क्षत्रियश्च सम्पदामान' इति वक्तव्याच्चतुर्थी। एवं प्रथमवाक्येन विनयाधानमुक्तं द्वितीयेन मर्यादास्थापनरूपं भरणं। तृतीयेन च अनिष्टप्रतीघातरूप रक्षणं इति त्रिविधं पितृकृत्यं दर्शितं। अतनुषु विपुलेषु विभवेषु संपत्सु सतीषु ज्ञातयो बान्धवाः सन्तु नाम कामं वर्तन्तां। प्रजानां सम्बन्धि बन्धुकृत्यं बन्धुभिः कर्तव्यं उक्तरूपं त्वयं तु त्वयि परिसमाप्तं न तु बन्धूनां शिष्यत इत्यर्थः। अतः कृत्यविरहात् 'एकः स्वादु न भुञ्जीत' इति व्याहारमनुसृत्य विभव एव यथाभागंबन्धुभिर्भुज्यत इति भावः। नामेत्यनास्थायाम् सत्स्वभ्युदयः अन्यथा तु नापक्षयः इत्यनास्थाहेतुः। नामेत्यवधारणार्थं वा। त्वया नित्योपचितविभवानां संविभागार्थं बन्धुभिर्भवितव्यमेवेति भावः। ज्ञातीनामुपमानभूतानां कैमर्थ्यस्यासिद्धत्वात् प्रतीपभेदः। **मालिनी वृत्तम्** ॥

क्लान्तमनसः अधिकारश्रमेण शिथिलात्मानः पुनर्भूयः नवीकृताः मधुरगीतश्रवणात् प्रजासुखावगमाच्च सन्नद्धतोन्मेषाः श्रीष्मालापितास्तवो वर्षसेकादिवेति भावः। लोकसुखाय भवत् श्रमोऽपि महतां न श्रम इति दर्शितं। नवीकृतशब्देन तपास्त्रकार्य-

राजा—(आत्मानं परिजनांसावलम्बो स्थित्वा ।) **वेत्रवति! किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः? ।**

किं तावद्भूतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केन चिदुत प्राणिष्वसच्चेष्टितम्?
आहो स्विद्वत प्रसवो ममापचरितैर्विष्टम्भिता वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥९॥

क्षमत्वं व्यज्यते । अभिनवेन राजप्रवेशार्थमचिरोपपादितेन संमार्जनेन शोधनेन सशोभः शोभावान्, सन्निहिता स्थिता होमस्यधेनुः होमार्था गौः यस्मिन् सः पावनत्वात् तपस्विसन्दर्शनयोग्य इति भावः । अभिशरणस्य अभिन्दः बहिर्द्वारप्रकोष्ठकं 'प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठकं' इत्यमरः । उक्तं रघुवंशेऽपि 'त्वं प्रशस्ते महिते मदीये वसंश्च तुर्थेऽग्निरिवाग्न्यगारे' इति । परिजनस्य असं अवलम्बनं अवष्टम्भत इति तथाभूतस्सन् अगृहीतासनेऽपि तपस्विष्वासनपरिग्रहानौचित्यादिति भावः । असावलम्बनं चोपचारमात्रं किं प्रयोजनमुद्दिश्य अभिसन्धाय भगवता महिमवता । मत्सकाशं रक्षितुरसमीपमित्यर्थः । प्रभावेणैव सर्वं साधयितुं क्षमेण काश्यपेन बहूनामृषीणां प्रेषणं नाल्पेन हेतुना भवितुमर्हतीति भावः । तपस्विगौरवादनिवेदितमपि स्वयमूह्येत्यागमनप्रयोजनं विकल्पयति ।

किमिति । उपोढतपसां बद्धव्रतानां तपः विघ्नैः रक्षः प्रभृतिभिः किं दूषितं । तावदिति सम्भावनार्थे । आपादिभिस्तपोविघ्नमनिच्छतां श्वत्वान्वेषणं भवतीति भावः । उत अथ वा धर्मारण्ये तपोवने चरन्तीति धर्मारण्यचराः 'चरेष्टः' तेषु प्राणिषु मृगादिषु केन चित् पुरुषेण असत् अयुक्तं चेष्टितं प्रवृत्तं किं भावेत्तः । राजपुरुषापराध एव किमयं स्यादित्यतिशङ्कयते । आहो स्वित् अथवा मम राज्ञा एव अपचरितैः अदण्ड्यदण्डनदण्ड्यादण्डनादिभिः अविदितैः केनचित् विशेषेण गोहन्तीति वीरुधः न्यङ्कादिः तासां लतानां तरुगुल्मादयोऽप्युपलक्ष्यन्ते प्रसूयत इति प्रसवः फलपुष्पोद्गमः विष्टम्भितः प्रतिबद्धः स्यात् । राजापचारो ह्यवग्रहादिना सर्वमुपहन्ति, 'राजा कालस्य कारणं' इत्युक्तेरिति भावः । इति एवं एभिरेवंविधैश्च प्रकारैरित्यर्थः । आरूढाः पूर्वपूर्वोपमर्देनाविर्भूताः बहवः प्रतर्काः विकल्पाः यस्मिंस्तत् मे मनः अपरिच्छेदेन आगमप्रयोजनानव-

प्रतिहारी—[1]सुअरिदाहिणंदिणो इसीओ देवं संभावेदुं आअद तितक्केमि ।

ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः ।
पुरश्चैषां पुरोहितः कञ्चुकी च ।

कञ्चुकी—इत इतो भगवन्तः ।

---

[1]सुचरिताभिनन्दिन ऋषयो देवं सम्भावयितुमागता इति तर्कयामि ।

धारणेन आकुलं पारिप्लवं । अवधारितेतु प्रतीकारप्रवृत्त्यान स्यादाकुलमिति भावः । प्रथमविकल्पेन उदासीनराश्रसाध्यपराधः शङ्कितः । द्वितीयेन स्वजनापराधः । तृतीयेन च स्वापराध इति पूर्वपूर्वोपमर्दः । प्रथमवाक्येन 'रक्षांसि न इष्टिविघ्नमुत्पादयन्ती'ति वृत्तान्तः द्वितीयेन मृगयावृत्तान्तः, तृतीये च प्रसवो विघ्नम्भित इत्यनेन शकुन्तलागर्भस्थापनं अपचरितशब्देन च तद्विस्मरणं इत्यादिकं स्ववृत्तं, अपरिच्छेदाकुलमित्यनेन अविशदस्वप्नदृष्टमिव शापान्तरितस्मृतेरपि वासनामात्र स्थितमपरिच्छिद्यमानमाकुलयतीति च गम्यते । 'निरागसस्तु निर्निमित्तं स्वतएव मनः प्रसाद' इति 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तय' इत्यत्रोक्तं । **शार्दूलविक्रीडितं वृत्तम् ॥**

सुचरितं धर्मतः पालनादिरूपं स्वदीयं सद्वृत्तं अभिनन्दितुं शीलमेषां तथाभूताः निसर्गतस्सुचरितप्रिया इत्यर्थः । ऋषयः वीतरागतया निमित्तान्तरनिरपेक्षा इति भावः । देवं महाराजं सभाजयितुं द्रष्टुं सेवितुं वा 'सभाज प्रीतिदर्शनयोः । प्रीतिसेवनयोरित्यन्ये' इति चुरादिषु पाठः । तर्कयामि असम्भवति निमित्तान्तरे परिशेषादभ्यूहामि । गौतमीसहितां स्त्रीत्वेन गौतम्या सहचरितां मुनयः शार्ङ्गरवादयः । यद्यपि शार्ङ्गरवशारद्वतश्च द्वावेवोपरिष्टात् प्रस्तूयेते, तथापि तदुपसर्जनभूतांः परेऽपि शिष्याः प्रविष्टा अवगम्यन्ते, अत एव चतुर्थाङ्के 'हास्तिननगरगामिनो मुनयश्शब्दाय्यन्त' इत्युक्तं । गौतमीसहिता इति पाठे मुनिविशेषणं । शकुन्तलाया एव राज्ञो दर्शनीयत्वात् पुरस्कारः एषां मुनीनां पुरः पूर्वभागे कञ्चुकी सोमरातं प्रति यः पूर्वं राज्ञा प्रहितः सः । पुरोहितस्सोमरातश्च प्रविशतीति विपरिणामेन सम्बध्यते ।

शार्ङ्गरवः—शारद्वत ।

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं वनमिव ॥ १० ॥

शारद्वतः—स्थाने भवान् पुरप्रवेशादित्थं भूतः संवृत्तः । अहमपि।

महाभाग इति । असौ नरपतिः दुष्यन्तः महान् भागः भाग्यं श्रीकीर्त्यादिसमृद्धिः यस्य सः अभिन्ना अविप्लुता रक्षितेत्यर्थः स्थितिः धर्मस्थैर्यम येन तथाभूतश्च कामं यद्यपि भवति । वर्णानां ब्रह्मक्षत्रविट्शूद्राणां चतुर्णां सम्बन्धी अपकृष्टः कुलशीलज्ञानादिभिरवरोऽपि पुरुषः न पन्थाः अपथं 'पथो विभाषे' तिपाक्षिकस्समासान्तः 'अपथं नपुंसक' मिति नपुंसकत्वं 'अपन्थास्त्वपथं तुल्ये' इत्यमरः । तत् न भजते न प्राप्नोति । तथायमभिन्नस्थितिः यथा न कश्चित् स्वधर्मादपराध्यतीत्यर्थः । अथ वा यस्मादयं स्वधर्मादविच्युतः तस्मादस्य प्रजा अपि न स्खलन्तीत्यर्थः । काममित्यत्राप्यनुषज्यते । तदेवं नास्ति किं चिदुद्वेजनीयमिति भावः । तथापि असत्यप्युद्वेगहेतौ शश्वत्परिचितं सदाभ्यस्तं विविक्तं विजनस्थानं येन तेन मनसा करणेन मन्य इत्यनेनास्य सम्बन्धः । जनैराकीर्णं व्याप्तं अविरलजनमित्यर्थः । इदं नगररूपं स्थानं हुतवहेन दावानलेन परीतं समन्ता दावेष्टितं वनमिव मन्ये जानामि विविक्तरसिकतया केवलं जनसङ्गं उद्वेजयति राजनि जनेषु वा न कश्चिदस्ति दोष इत्यर्थः । गृहमिवेति पाठस्तु न मनोरमः, यतः परिचितविविक्तेनेति वदतो मुनेः वननिदर्शनमेव स्वानुभवानुरोधादुपपद्यते । उपमालङ्कारः । **शिखरिणी वृत्तम्** ॥

स्थान इत्यव्ययं युक्तमित्यर्थः 'युक्ते द्वे सांप्रतं स्थाने' इत्यमरः । अहमपीति अवैमीत्यनेनास्य सम्बन्धः ।

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुप्तसङ्गिनमवैमि ॥११॥

शकुन्तला—(निमित्तं सूचयित्वा ।) [1]**अम्महे किं वामेदरं मे णअणं विप्फुरदि ।**

गौतमी—[2]**जादे पडिहदं अमङ्गलं। सुहाइ दे भत्तुउलदेवदाओ विदरंदु ।**

इति परिक्रामन्ति ।

पुरोहितः—(राजानं निर्दिश्य ।) **भोस्तपस्विनः असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति । पश्यतैनम् ।**

---

[1]अहो किं वामेतरन्मे नयनं विस्फुरति ।

[2]जाते प्रतिहतममङ्गलं । शुभानि ते भर्तृकुलदेवता वितरन्तु ।

अभ्यक्तमिति । स्नातः जलावगाहेन निर्मलः पुरुषः अभ्यक्तं तैलाद्यालिप्तमिव, शुचिः आचारपूतः अशुचिं त्यक्ताचारमिव, प्रबुद्धः त्यक्तनिद्रः सुप्तं निद्रापरवशमिव, स्वैरं स्वच्छन्देन 'स्वादीरेरिणो'रिति वृद्धिः । गतिः सञ्चारो यस्य सः स्वतन्त्रः बद्धं परतन्त्रमिव च इह नगरे राजगृहे वा सुखेषु दारागारादुपभोगेषु सङ्गिनं तत्परं जनं अवैमि जानामि । यथा नाम दोषादुत्तीर्णः दोषेष्ववगाढं सोद्वेगः पश्यति तथेत्यर्थः । वीतरागाणां सांसारिकेषु सुखेषु निर्वेद इति भावः । अत्र अभ्यक्तपदेन विषयासङ्गस्य दुरपोहत्वं, अशुचिशब्देन पापानुबन्धित्वं, सुप्तशब्देन तमोगुणोद्रेकात् सत्त्वानुन्मेषः, बद्धशब्देन अविमोक्षश्च व्यज्यते । मनसश्चाप्रसादो भाव्यनिष्टं दर्शयति । वाक्यार्थोपमा कल्पिता मालारूपा च । **आर्या वृत्तम् ॥**

निमित्तं इष्टानिष्टव्यञ्जनं । अर्थादिहाशुभनिमित्तमर्थः । अम्महे इति खेदे । वामादितरत् दक्षिणं स्त्रीणां हि दक्षिणाक्षिस्पन्दनमानिमित्तमिति भावः । प्रतिहतममङ्गलं अशुभं निरस्तं भवत्वित्यर्थः 'आशंसायां भूतवच्च' । भर्तृकुलस्य देवताः इष्टदेवताः ते तुभ्यं शुभानि वितरन्तु अशुभं निरस्यन्त्वित्यर्थः । इतः परं भर्तृकुलाधिष्ठानाद्दुष्टं भर्तृकुलदेवता इति । अयमसौ द्रष्टुमाशंसित इत्यर्थः । अत्रभवान् पूज्यः वर्णाश्रमाणां

शार्ङ्गरवः—भो महाब्राह्मण काममेतदभिनन्दनीयं । तथापि वयमत्र मध्यस्थाः । कुतः ।

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥१२॥

ब्राह्मणादीनां ब्रह्मचार्यादीनां च रक्षिता यथासंख्यं वृत्तीनां नियमानां च असङ्कीर्णं स्थापयिता सर्वेषामर्हणीय इति भावः । प्रागेव युष्मदवेक्षया चिरादेव । मुक्तासनः अभ्युत्थितः सन् । प्रतिपालयन्ति प्रतीक्षते । प्रतीक्ष्योऽपि प्रतीक्षत इत्यर्थः । सत्यगुणेष्वशेषेण विस्मयावेशस्सेवाधर्म इति दर्शितमनेन । महाब्राह्मणेति, ज्ञानशीलादिकृतं महत्त्वं । ब्राह्मणेति जातिसामान्येन निर्देशो वृत्तिपरतन्त्रत्वं दर्शयति । इदं राज्ञः प्रश्रयग्रहणं काममभिनन्दनीयं सत्यपि जगदैश्वर्ये न मार्यतीति यद्यपि प्रशंसास्थानमित्यर्थः । अत्र अभिनन्दनीयेऽपि विषये वयं मुनयः वृत्तेरपरतन्त्रा इत्यर्थः । मध्यस्थाः उदासीनाः । न हि सहजेषु गुणेषु गुणविदां विस्मय इति भावः ।

भवन्तीति । तरवो वृक्षाः फलोद्गमैः भूयोभिः फलोदयैः नम्राः अवनताः भवन्ति "नमिकम्पिस्म्पनसकमहिंसदीपो रः ।" यथा यथा फलभारः चीयते तथा तथा नतिरपि भवतीति किमत्र चित्रमिति भावः । घनाः मेघाः नवाम्बुभिः अचिरसंभृतैरुदकैः दूरं विलम्बिनः अत्यर्थमधोगामिनः भवन्ति । एवं सत्पुरुषाः श्लाघ्यकुलशीलादिकाः पुरुषाः समृद्धिभिः विभवैः अनुद्धताः मदवर्जिताः भवन्ति । अत्र नम्रत्व दूरविलम्बित्वानुद्धतत्वानां धर्माणां बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः । परोपकारिणां परोपकारशीलानां एषः उक्तरूपः स्वभावः सहजो धर्मः । सर्वमेव विभवं परार्थं परिणमयन्तो नात्मना दृष्यन्ति सन्त इति भावः । अनेन वाक्यार्थेन पूर्ववाक्यार्थानां समर्थनात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । **वंशस्थं वृत्तम् ॥**

प्रतिहारी—[1]देव पसण्णमुहराआ विअ इसिणो दीसंदि । ता जाणामि विस्सद्धकज्जत्ति ।

राजा—(शकुन्तलां दृष्ट्वा ।) **अथात्रभवती ।**

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥ १३ ॥

प्रतिहारी—[2]देव कुदूहलगब्भो मे तक्को पसीददि । दंसणिज्जा उणसे आकिदी लक्खीअदि ।

---

[1]देव प्रसन्नमुखरागा इव ऋषयो दृश्यन्ते तज्जानामि विस्रब्धकार्या इति।
[2]देव कुतूहलगर्भो मे तर्कः प्रसीदति। दर्शनीया पुनरस्या आकृतिर्लक्ष्यते।

सभाजायितुमागता इति तर्कित प्रतीहारी संवादयति । देवेति प्रसन्नः क्रोधाद्यनभिभूतः मुखरागः मुखवर्णः येषां ते । विस्रब्धं असंभ्रान्तं कार्यं येषां ते । जानामि तर्कयामि । संभ्रमे तु मुखवर्णविपर्यासः स्यादिति भावः । ऋषय इत्यगूढाकारत्वव्यञ्जनम् । अथात्रभवती अत्रभवती तु वाक्यान्तरारम्भे अथ शब्दः "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ" इत्यमरः । शकुन्तला निर्देशोऽयं, का स्विदित्यन्वेति ।

केति । अवगुण्ठनमस्या अस्तीत्यवगुण्ठनवती । राजदारसमुदाचारात् कृतावगुण्ठनेत्यर्थः । अत एव नातिपरिस्फुटं अनतिव्यक्तं मुखे पाणिपादे च स्तोकव्यक्तमित्यर्थः । शरीरस्य लावण्यं छायाविशेषः यस्याः सा । तदुक्तं 'मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते' इति । तपोधनानां मध्ये पाण्डुपत्राणां मध्ये किसलयमिव स्थिता अत्रभवती का स्वित् का नाम स्यात् ? । परकलत्रबुध्योत्तमत्रभवतीति । ऋषीणामस्याश्च दूरमन्तरमित्युपमया व्यज्यते । एवंरूपायाः किमर्थमस्मदुपगमः कथं वा ऋषिभिरानयनमिति प्रश्नाभिप्रायः । **आर्या वृत्तम् ॥**

कुतूहलगर्भः श्रेयोविशेषचिन्तासंवलितः मे तर्कः सभाजायितुमागता इत्येवंरूप ऊहः । प्रसीदति अस्या दर्शनादसंशयो भवति । राजार्हेति तपस्विभिरुपदीक्ष्यत इवेति भावः । अस्या आकृतिः पुनर्मूर्तिरेव केवलं दर्शनीया मनोज्ञा लक्ष्यते दृश्यते ।

राजा—भवतु । अनिर्वर्णनीयं परकलत्रम् ।

शकुन्तला—(हस्तमुरसि कृत्वा , आत्मगतम् ।) [1]हिअअ किं एव्वं वेवासि । अज्जउत्तस्स भावं अणवहरिअ ? धीरं दाव होहि ।

पुरोहितः—(पुरो गत्वा ।) देव एते विधिवदर्चितास्तपस्विनः । कश्चिदेषामुपाध्यायसन्देशः । तं देवः श्रोतुमर्हति ।

राजा—अवहितोऽस्मि ।

ऋषयः—(हस्तमुद्यम्य ।) विजयस्व राजन्

राजा—अखिलानभिवादये वः ।

ऋषयः—स्वस्ति भवते । इष्टेन युज्यस्व ।

राजा—अपि निर्विघ्नतपसो मुनयः ? ।

---

[1]हृदय किमेवं वेपसे आर्यपुत्रस्य भावमनवधार्य । धीरं तावद्भव।

आहार्यशोभां नागरिकोचितामन्तरेणापि रमणीयं रूपमात्रमिति भावः । अनिर्वर्णनीयं । अदृश्यं । अनेन शापादप्रत्यभिज्ञानं व्यज्यते । उरसि कृत्वेति हृदयसमाश्वासनार्थमिति भावः । आर्यपुत्रस्य राज्ञः भावं दृष्टाया अप्यसम्भावनं निमित्तभूतमभिसन्धि अनवधार्य अविदत्वा किं वेपसे कुतो बिभेषि । धीरं स्थिरं । नहि निर्निमित्तं न सम्भावयिष्यतीति भावः । ओधारिअ इति पाठे भूतपूर्वं दृष्टानुरागं विदित्वापीत्यर्थः । नास्ति । भयस्थानमिति भावः । तपस्विनश्शार्ङ्गरवादयः । विध्यर्हं विधिवत् श्रौतेन विधिनेत्युक्तप्रकारेणेत्यर्थः । एषां सम्बन्धी उपाध्यायस्य कण्वमहर्षेः कर्तुः स देशः कश्चित् ममाविदित इत्यर्थः । अस्तीति शेषः । तं सन्देशं । अवहितः एकाग्रः । हस्तावुद्यम्य आशीः प्रयोगार्थमूर्ध्वीकृत्य हस्तान्, स्तनादीनां द्वित्वविशिष्टा जातिः । हस्तानिति पाठान्तरं । इष्टेन ईप्सितार्थेन युज्यस्व सङ्गच्छस्व । प्रियजनेन सङ्गच्छस्वेत्यपि व्यज्यते । निर्विघ्नं रक्षः प्रभृतिप्रतिबन्धरहितं तपो येषां ते । अपिः प्रश्नार्थः ।

ऋषयः—

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति धर्मांशौ कथमाविर्भविष्यति ॥ १४ ॥

राजा—अर्थवान् खलु मे राजशब्दः । अथ भगवान् लोकानुग्रहाय कुशली काश्यपः ?

शार्ङ्गरवः—स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वमिदमाह ।

राजा—किमाज्ञापयति भगवान् ?

शार्ङ्गरवः—यन्मिथस्समयादिमां मदीयां दुहितरं भवानुपायंस्त । तन्मया प्रीतिमता युवयोरनुज्ञातम् । कुतः ?

कुत इति । त्वयि सतां साधूनां धर्मचारिणामिति यावत् । रक्षितरि पालयितरि सति धर्मक्रियायास्तपसः विघ्नः प्रत्यूहः कुतः कस्माद्भवति नैव भवतीत्यर्थः । धर्मांशौ सूर्ये तपति प्रकाशमाने सति तमः कथमाविर्भविष्यति । दृष्टान्तालङ्कारः ।

राजशब्दः राजेति पदं अर्थवान् खलु अन्वर्थ एव 'तथैव सोभूदन्वर्था राजा प्रकृतिरञ्जनात्' 'राजा प्रजारञ्जनलब्धवर्णः' इति रघुवंशे । रञ्जेरनुनासिक लोपेन राजपदनिष्पत्तिरिति कवेराशयः । अन्यशब्दसाम्यमात्राणि निर्ब्रूया' दिति नैरुक्ताः । मल्लिनाथस्तु धातुनामनेकार्थत्वाद्राजतेरेव रञ्जनार्थादयं शब्दो निष्पन्न इति मन्यते । अथेति प्रश्ने । भगवान् महाप्रभावः लोकानुग्रहाय लोकमनुग्रहीतुं 'तुमर्थाच्च भाववचना' दिति चतुर्थी । कुशली स्वार्थनिरपेक्षोऽपि लोकानुग्रहार्थं कुशली प्रार्थ्यत इति भावः । सिद्धिमन्तः सिद्धतपसः स्वाधीनं स्वायत्तं कुशलं येषां ते । किं तर्हि भवदागमनप्रयोजनं आह—स इति । स काश्यपः अनामयप्रश्नपूर्वं कुशलानुयोगं पुरस्कृत्येत्यनुग्रहव्यञ्जनं भवन्तमिदं । वक्ष्यमाणमाह—मन्मुखेन ब्रवीति । किमाज्ञापयतीति गौरवं दर्शयितुं । संदेशमर्थतः संगृह्णाति यदिति । इमां मदीयां दुहितरं शकुन्तलां मिथस्समयात् रहस्संविदं विधाय ममापि पितुरनिवेद्येति यावत् । मिथुनस्य हीतरेतरं प्रति प्रतिज्ञानं विवाहः, सचासाक्षिको गान्धर्वस्त्वया कृत इति भावः । 'समयाः

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमतीव सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥१५॥

शपथाचारकालसिद्धान्तसंविद' इत्यमरः । भवानुपायंस्त परिणीतवानिति यत् 'उपायमः स्वकरण' इत्यात्मनेपदं । तदुपयमनं युवयोर्दुहितरि त्वयि च विषये प्रीतिमता अनुरूपसङ्गमात् परितुष्टेन मयानुज्ञातमङ्गीकृतं । प्रीतिहेतुं विवृणोति ।

त्वमिति । त्वमर्हतां पूजार्हाणां प्राग्रं प्रथमभागं सरति गच्छतीति प्राग्रसरः 'प्रादय' इति निपातितस्य प्रेत्यभ्ययस्याग्रशब्देन सह 'सुप्सुपे'ति समासः । हर इति पाठे प्राग्रं हरत्यादत्त इति तथाभूतः नः अस्माकं स्मृतोऽभिमतोऽसि 'मांतबुद्धी'त्यादिना वर्तमाने क्तः । 'क्तस्य च वर्तमान' इति षष्ठी । शकुन्तला च नः शकुन्तलेत्यपि वक्तुं युक्तं । मूर्तिमती शरीरिणी सत्क्रिया पूजेव । मूर्तिमतीव सत्क्रियेत्यधिकारूढवैशिष्ट्योपमा । तदेवं पूज्ये पूजासंक्रान्तिः प्रीतिस्थानमिति भावः । तुल्याः परस्परसदृशा गुणाः कुलशीलादयो यस्य तत् वधूश्च वरश्च समाहृताविति वधूवरं समाहारैकत्वादेकवचनं 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गाना'मिति सूत्रे हि समाहारैकत्वे सिद्धे नियमार्थं प्रकरणमिति कौमुदी ततश्च ज्ञायते पाक्षिकं समाहारैकत्वं सर्वत्र भवतीति । समानयन् सङ्गमयन् प्रजापतिर्विधाता चिरस्य दीर्घकालादनन्तरं । चिरायेति पाठान्तरं । वाच्यं विसदृशयोजननिमापवादं न गतः न प्राप्तः । आ सृष्टिप्रारम्भादिदमेकमेवोदाहरणं समगुणमिथुनयोजनस्य स्रष्टुरिति भावः । यत् प्रजापतेरपि वाच्यनिस्तारायं कर्म तदस्माभिर्नाभिनन्दनीयमिति व्यज्यते । अत्र मयानुमतमिति वचनादस्मात् साध्वविचिन्त्येत्येतदनूदितमर्थतः । त्वमर्हतां प्राग्रसर इत्येनेन उच्चैः कुलं चात्मन इत्ययमर्थ उक्तः, त्वय्यस्या इतीदंशब्दनिर्देशाभिप्रायः शकुन्तला मूर्तिमतीव सत्क्रियेत्युक्तः । समानयन्नित्यादिप्रजापतिविशेषणेन चाश्रान्यवकृतामित्येतद्दर्शितं इति संदेशार्थानुवादो द्रष्टव्यः । अत्र च किं वाच्यप्रस्तावेन प्रजापतिनिन्दया वधूवरस्तुतेर्व्यङ्ग्यात् व्याजस्तुतिः, उत वाच्योत्तीर्णतया प्रजापतिस्तुत्यैव प्रस्तुतार्थस्तुतिव्यक्तेरप्रस्तुतप्रशंसेति द्वयोः सन्दंहसङ्करः ।

वंशस्थं वृत्तम् ॥

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सह धर्माचरणायेति ।

गौतमी—[1]अज्ज किं वि वत्तुकामम्हि। ण खु मे वअणावआसो अत्थि। कहंत्ति ।

[2]णावेक्खिओ गुरुअणो तुए इमाए ण पुच्छिओ बंधू ।
एक्केक्कं एव्व चरिए भणामि किं एक्कएक्कस्स ॥१६॥

---

[1]आर्य किमपि वक्तुकामास्मि । न खलु मे वचनावकाशोऽस्ति । कथमिति ।

[2]नापेक्षितो गुरुजनस्त्वयानया न पृष्टो बन्धुः ।
एकैकमेव चरिते भणामि किमेकैकस्य ॥

तत्तस्मात् अनुरूपसम्बन्धादित्यर्थः । आपन्नः प्राप्तः सत्त्वः जन्तुर्यया सा आपन्नसत्त्वा गर्भिणी । 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इति । 'आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी' इति चामरः । सह मिलित्वा धर्मस्य गृहाश्रमधर्मस्य आचरणायानुष्ठानाय प्रतिगृह्यतां अङ्गीक्रियतां । आपन्नसत्त्वेत्यनेन पुत्रलाभोप्यचिरेण भावीति व्यज्यते । किमपि शकुन्तला विषये किं चिद्वाक्यं वक्तुकामास्मि अवश्यवक्तव्यं यद्यपि वक्तुमिच्छामीत्यर्थः । तथापीत्यादिः । वचनावकाशः वाक्यावसरः न खल्वस्ति । किमर्थमिते वचनेनेति भावः । अनवकाशमेवाह ।

णावेक्खिओ इति । त्वया लोकज्ञास्त्रविदा राजर्षिणा सतेत्यर्थः । गुरुजनः शकुन्तलाया नियन्ता पित्रादिः नापेक्षितः न गणितः नानुज्ञापित इत्यर्थः । अनया शकुन्तलयापि बन्धुः पित्रादिः न पृष्टः स्वयं मुग्धया हिताहितविदासौ जनो न चिकीर्षितं निवेदित इत्यर्थः । 'त्वय्यस्याः कथमप्यबान्धवकृता'मिति सन्देशार्थोऽनूदितः । एकैकस्य प्रत्येकं तव चास्याश्च चरिते वृत्ते विषये एकैकमेव तव कन्यागुरुजनाविगणनं कन्यायाश्च स्वबन्धुजनानिवेदनमित्येकैकमात्रमपि किं भणामि किमिति वदेयं । तिष्ठतु पश्चादसंभावनादिकं शेषमित्यर्थः । उभयोरप्ययमपराधः, तदेवमतिक्रान्ते किमुक्तेनेति भावः । राजमात्रेऽपराधाविष्कारस्यारम्भत्वादुभयोर्ग्रहणं,

शकुन्तला—(आत्मगतम् ।) [1]किं णु खु अज्जउत्तो भणादि ।

राजा—किमिदमुपन्यस्तम् ।

शकुन्तला—(आत्मगतम् ।) [2]पावओ खु वअणोवण्णासो ।

शार्ङ्गरवः—तत् कथं किमिदं नाम । ननु भवन्त एव सुतरां लोकतन्त्रनिष्णाताः ।

---

[1]किं नु खल्वार्यपुत्रो भणति ।

[2]पावकः खलु वचनोपन्यासः ।

वधूवदेव जामातुरप्यनुशासनीयत्वाभिप्रायं च । 'णावेक्खिदा गुरुअणा इमिणा ण तुए वि पुच्छिदा बन्धू । एक्केकमव्वचरिदे किं भण्णदु एक्कएक्कस्स ।' इति पाठे नापेक्षिता गुरुजना अनया नत्वयापि पृष्टा बन्धव इति बहुवचनं । भण्यतामिति कर्मणि प्रयोगः अनयेति स्थाने इमिणेति पुल्लिङ्गप्रयोगस्तु चिन्त्यः । यदत्र केषां चिद्व्याख्यानं चरिते विवाहव्यापारे एकैकं केवलावेव युवां स्थः । एक एकस्येति चतुर्थपादच्छाया । एकः अन्यः एकस्य तदन्यस्य किं भणति इति । तत्र एकैकमिति द्विरुक्तैकशब्दस्य केवलावेवेत्यर्थकरणं नोचितं । अपि च व्याख्यानमेवेदं प्रथमं व्याख्येयं भवति । न च किञ्चिदत्र विवक्षितं पर्यवस्यति ।

किं णु वु कीदिसं प्रतिवचनं । खल्विति जिज्ञासायां । अत्यादरादन्तरा श्रवणौत्सुक्यं । मालविकाग्निमित्रेऽपि पञ्चमेऽङ्के परिव्राजिकावचनानन्तरं 'किं णु खु संपदं भट्टा भणादि' इति मालविकाया औत्सुक्यमुक्तं । उपन्यस्तं उपन्यासः 'भावे क्तः' । अभूतमर्थमादाय दोषारोपोऽपि कोऽयमिति भावः । वचनोपन्यासः वाक्योच्चारणं अर्थाद्राजसम्बन्धी । पावकः अग्निः खलु रोषसंवलितं पावकवत्तीक्ष्णं वचनमित्यर्थः । पावन इति पाठस्तु प्रकरणे न सङ्गच्छते । अत्र दुर्वासःशापमजानन् राज्ञो विस्मृतिमनुप्रेक्षमाणः शिष्यः, 'किमिदमुपन्यस्त' मिति राजवाक्यं, अप्रतिग्रहे को दोषः पितृगृह एव हि सेयं वसति इत्येवमाक्षेपार्थमवगच्छन् प्रत्याह 'तत् कथ' मिति । यदेतत् किमिदमित्युच्यते, तत् कथमित्यर्थः । लोकतन्त्रे लोकव्यवहारे निष्णाताः कुशलाः । निनदीभ्यां स्नातेः कौशल' इति षत्वं, ततश्च ष्टुत्वं । किं चात्र लोकतन्त्रमित्याह—

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
तदप्रियापि प्रमदा स्वबन्धुभिः ॥ १७ ॥

राजा—किं चात्रभवती मया परिणीतपूर्वा ।

शकुन्तला—(सविषादम् । आत्मगतम् ।) [1]हिअअ संपदं जुत्तं दे अदङ्कोआसी ।

---

[1]हृदय सांप्रतं युक्तं ते आतङ्क आसीत् ।

सतीमिति । सतीं साध्वीमपि 'सती साध्वी पतिव्रता' इत्यमरः । ज्ञातिकुलं पित्रादिस्वबन्धुगृहमेकः केवलः संश्रयः स्थानं यस्यास्ता 'एके मुख्यान्यकेवला' इत्यमरः । कुतश्चित् कारणादत्यक्तज्ञातिकुलामित्यर्थः । भर्तृमतीं कृतोद्वाहां जीवद्भर्तृकां स्त्रियं जनो लोकः अन्यथा असतीं शङ्कते संदिग्धे । अतो हेतोः प्रमदा स्वबन्धुभिः मातापित्रादिभिः परिणेतुर्भर्तुः समीपे तस्य परिणेतुरप्रियाऽनभिमतापि इष्यते वर्तमाना आशास्यते । अनभिमन्यमानस्यापि भर्तुरेव समीपगा वरं प्रमदा, न त्वभिमन्यमानानामपि ज्ञातीनां, मुग्धादपि हि यशः प्रथमं गणयन्ति प्रमदायाः स्वबान्धवा इत्यप लोकव्यवहारः कथं न विदितः, यस्यलोकमर्यादास्थापनमधिकार इति भावः । **वंशस्थ** वृत्तम् ।

किं चेति । चोऽवधारणे । अत्रभवती कण्वदुहिता किं मया परिणीतपूर्वा, पूर्व परिणीतैवेत्यर्थः । परिणये प्रथमं सिद्धे हि तत्प्रतिग्रहविचार इति भावः । सांप्रतं एव वचने श्रुते सति युक्तं न्याय्यमेव ते आतङ्को भीतिरासीत् प्रागेव जातः । त्वं हि भावि सुखं वा दुःखं वा जानासीत्यर्थः ।

शार्ङ्गरवः—

किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा ।

राजा—कुतोऽयमसत्कल्पनाप्रश्नः ?

शार्ङ्गरवः—

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु ॥१८॥

किमिति । कृतं निर्वर्तितं कार्यं स्वप्रयोजनं येन तस्मिन् जने द्वेषः, कृते कार्येवा द्वेषः किं । चिकीर्षिते कार्ये प्रणयः तितीर्षेरिव नाविके, कृते तु लोभात् प्रद्वेषः तीर्णस्येवातरार्थिनि नाविके दृष्टः, सइदानीं त्वयि जातः किमित्यर्थः । नवनवाभिलाषिणां रागिणामास्वादितरसे विषये वैरस्यं भवतीति भावः । किं वा धर्मं प्रति धर्मविषये विमुखता अनादरः, इत्थंभूताख्याने प्रतिः कर्मप्रवचनीयः । अतस्त्र्योगाद्धर्ममिति द्वितीया 'लक्षणेत्थं भूताख्यानभागवीप्सासु प्रतिपर्यनवः' इति विधानात् । केवलार्थकामपरतया पत्न्याः प्रतिभट्टो धर्मत्वादेव नेष्यते किमेत्यर्थः । परिणामापरुषतस्सत्यरूपे धर्मे एव किमनास्थेति वा । अथ वा । केवलधर्मरतेन किमनेन जनेनेति किमुपेक्षेत्यर्थः । किं वा अवज्ञा आरण्यकाः असंपदः इत्यस्मात्स्वपर्कषबुद्धिः कृता । अत्रोभयत्र कृतकार्यत्वं हेतुरनुक्तप्यते । अधिक्षेपासहो धार्मिको राजा वाक्यविरामममप्रतीक्षमाणः पृच्छति । कृत इति । अयमुक्तरूपः असतीनामयथार्थानां कल्पनानां आरोपितप्रकाराणां कृतकार्यद्वेषादीनां प्रश्नः कुतः किं निमित्तं क्रियते । कथं मिथ्यैव दोषभारोपणमसीत्यर्थः । भूयश्चापलापमिवाशङ्कयासहमानः शार्ङ्गरवः प्रत्याह—मूर्च्छन्तीति । अमी पूर्वोक्ताः कृतकार्यद्वेषादयः विकाराः चित्तान्यथाभावाः ऐश्वर्यमत्तेषु विभवोद्धतेषु पुरुषेषु प्रायेण बाहुल्येन मूर्च्छन्ति वर्धन्ते । पानमद इव श्रीमदः सतामपि विकाराय भवति, विरला हि जगति पुरुषाः ये श्रियमप्यवाप्य न माद्यन्तीति भावः । उक्तं च 'ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते' इति । 'किं कृतकार्यद्वेषाद्धर्मं प्रति विमुखतोचिता राज्ञः' इति पाठे अमी विकारा इति बहुवचनं न युज्यते । दृश्यमाना विकारा इति क्रोधाद्यर्थतया कथं चित् समर्थने च 'कुतोयमसत्कल्पनाप्रश्न' इति वचनवैरूप्यम् । आर्या वृत्तम् ।

राजा—विशेषेणाधिक्षिप्तोऽस्मि ।

गौतमी—[1]जादे मुहुत्तं मा लज्जेसु। अवणइस्सं दाव दे अवगुण्ठणं । तदो तुमं भट्टा अहिजाणिस्सदि । (यथोक्तं करोति ।)

राजा—(शकुन्तलां निर्वर्ण्य । आत्मगतम् ।)

इदमुपनतमेवंरूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नापि शक्नोमि हातुम् ॥१९॥

---

[1]जाते मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्तेऽवगुण्ठनं । ततस्त्वां भर्ताऽभिज्ञास्यते ।

विशेषेणाधिक्षिप्तः उत्तरार्धेनापराधनिर्धारणाद्दूयिष्ठसुपालब्धोस्मीत्यर्थः । मुहूर्तं यावत्प्रत्यभिज्ञानं मा लज्जस्व अवगुण्ठनापनयनेन लज्जां मा कृथाः । प्रत्यभिज्ञानानस्तु न प्रत्यादिशादति भावः । ततः अपनयनानन्तरं अभिज्ञास्यते पूर्वदृष्टां स्मरिष्यति । निर्वर्ण्य अवगुण्ठनापनयनादभिव्यक्तरूपविशेषामालोक्य ।

इदमिति । उपनतं अन्वेषणीयमपि स्वयमन्विष्योपयातमित्यर्थः । एवं दृश्यमानप्रकारं रूपं सौन्दर्यं यस्य तत् । अनुपममित्यर्थः । अक्लिष्टकान्ति वनवासदूराध्वगमनादिभिरप्यम्लानच्छायं इदं शरीरं कर्म, अव्यवस्यन्, परिभोक्तुं, हातुमित्येभिरन्वयः । प्रथमपरिगृहीतं पूर्वपरिणीतं स्यात्, न वा स्यादित्यव्यवस्यन्नवधारयन् अहं । मुनिवचनप्रत्ययादन्तःकरणस्य चाप्रसादात् स्यादिति कोटिः अस्मृते श्च न स्यादिति कोटिः प्रतिभातीति भावः । विभाते निशान्ते अन्तस्तुषारं अन्तर्गतहिमं कुन्दं माध्यकुसुमं भ्रमर इव परिभोक्तुं परिग्रहीतुं च न खलु शक्नोमि न समर्थोऽस्मि । यथा तुषारभीतो भ्रमरः कुन्दं नावतरति मधुलुब्धश्च न परिहरति, तथाहमपि परिग्रहणानवगमादन्तर्वत्नीं ग्रहीतुमपि नोत्सहे, अनुपमरूपलावण्यां हातुमपि न प्रभवामीत्यर्थः । कुन्दस्य शैशिरत्वात् प्राभातिकमन्तस्तुषारत्वं । इदमिति सामान्ये नपुंसकं । ततश्च रूपलावण्यात्मकं वस्त्विति

(इति विचारयन् स्थितः ।)

परिजनः—(जनान्तिकम् ।) [1]अम्हो धम्मावेक्खिदा भट्टिणो। ईदिसं णाम सुहोवणदं रुव्वं दक्खिअ को अण्णो विआरेदि ।

शार्ङ्गरवः—किमिदं जोषमास्यते ।

राजा—भोस्तपोधन चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि । तत् कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रिण-माशङ्कमानः प्रतिपत्स्ये ।

---

[1]अहो धर्मावेक्षिता भर्तुः । ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति ?।

प्रतीयते । परिणयानाकलनाच्च स्त्रीत्वमनुद्घाट्य वस्तुसामान्येन निर्देशः । अन्तस्तुषार-मिति च गर्भिणीत्वाभिप्रायं । कल्पिता वाक्यार्थोपमालङ्कारः । **मालिनी** वृत्तम् ॥

विचारयन् एकतरकोट्यै चित्ताविश्रमाद्विचिन्तयन् । धर्मावेक्षिता धर्मैकदर्शित्वं अहो आश्चर्य । ईदृशं नाम एवंविधमपि अमानुषमपीत्यर्थः । सुखोपनतं अयत्नोपागतं रूपं दृष्ट्वा कः युष्मदन्योस्मद्भर्तुर्व्यतिरिक्तो विचारयति सन्दिग्धे । मुनिभिरेव परिग्रहमभ्यर्थितोऽपि धर्मलोपभयान्नप्रवर्तत इत्यर्थः । किमिदं कथमेतत् जोषमास्यते तूष्णीमवस्थानं, न किंचि-दुच्यत इत्यर्थः । तपोधनेति धर्मज्ञत्वं दर्शयति । चिन्तयन् विशिष्यावमृशन्नपि । स्वीकरणं परिग्रहं न खलु स्मरामि नैवावगच्छामि । तत्तस्मात् अभिव्यक्तसत्त्वलक्षणां दृष्टगर्भचिह्नां स्मां प्रति लक्षणार्थः प्रतिः कर्मप्रवचनीयः अनया निरूपितमित्यर्थः । क्षेत्रिणं कलत्रवन्तं भर्तारं आत्मानं मां आशङ्कमानः भवत्प्रत्ययादेव केवलमुत्प्रेक्षमाणः सन् कथं प्रतिपत्स्ये एनामङ्गीकरिष्ये । क्षेत्रिणमित्यनेन प्रजानिपेक्षस्य तु कैव कथेत्यभि-धीयते । 'क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयो'रिति विश्वः । अथ वा आशङ्कमानः

शकुन्तला—(सविषादं आत्मगतम्।) [1]णं परिणए एव्व संदेहो। कुदो मे दाणिं दूराहिरोहिणी आसा।

शार्ङ्गरवः—मा तावत्।

कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥२०॥

[1]ननु परिणय एव संदेहः। कुतो मे इदानीं दूराधिरोहिण्याशा।

सन्दिहानोहमात्मानमिमां प्रति श्रोतृवर्गं कथं प्रतिपत्स्ये निश्चिनुयां। अपवार्य पराकृत्य। ननु परिणय एव सन्देहः प्रथमं विवाहमात्रे संशयो जातः। इदानीं एवं स्थिते दूराधिरोहिणी 'दौष्यन्तिमप्रतिरथं तनयं निवेश्य' इत्यादितातोदितप्रकृष्टपदविषयिणी आशा स्पृहा कुतः नैव सेत्स्यतीति किमुतेत्यर्थः। मैवं नञर्थमव्ययं। तावदित्यवधारणे। यदुक्तं न स्मरामीति नैतदेवमित्यर्थः। किं तर्हीत्याह—

कृतेति। कृताभिमर्शां गृहजनमनिवेद्य त्वया मिथः कृतस्पर्शां दयिताभित्यर्थः। कन्यायां अपि पित्रायधीनतया परकीयागणनं क्रियते, येन दूषणमेवाभिमर्शं इति भावः। सुतां स्वां दुहितरं अनुमन्यमानः अङ्गीकुर्वन् त्वदीयं दुहितुरभिमर्शं मृष्यमाण इत्यर्थः। मुनिः राज्यमदादुपेक्षार्हो मृदुरित्यर्थः। त्वयाकृतापराधेनेति भावः। विमान्यो नाम अवधीरणीयः खलु। दण्ड्यमदण्डयन् कथं नावमानास्पदमिति भावः। येन मुनिना पात्रीकृतोऽसीति सम्बन्धः। मुष्टं अपहृतं स्वमात्मीयं अर्थं धनं पतिग्राहयता दस्यव एव प्रत्यर्पयता पुरुषेण दस्युः स एव मोषक इव पात्रीकृतः अपात्रमपि पात्रं सम्पद्यमानः कृतोसि। अपात्राय चोराय हृतं धनं दक्षिणीकृतमिव येन परिणीतेत्यनुमता सुता स विमाननामर्हति, 'मृदुर्हि परिभूयत' इति भावः। यदि दाहशमं स्वं तेज उत्सृजेत् तदानीं का ते समवस्थेत्यपे व्यज्यते। मुनेरवधारणमेवाप्रतिग्रहनिमित्तं, न पुनरस्मरणं, असंभवादिति समुदितोऽर्थः। के चित्तु मातावदित्यस्य त्वमित्यनेन सम्बन्धमादाय न विमन्य इति व्याख्यामारचयन्ति। तत्र नामेत्यस्य त्वयेत्यनेन सम्बन्धः अवधारणार्थत्वं च चिन्त्यम्। उपजाति वृत्तम्॥

शारद्वतः—शार्ङ्गरव विरम त्वमिदानीम्। शकुन्तले वक्तव्य मुक्तमस्माभिः। सोऽयमत्रभवानेवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम्।

शकुन्तला—(आत्मगतम्।) [1]एदं अवत्थंदरं गदे तारिसे अणुराए किं वा सुमरिदेण। अत्ता दाणिं मे सोअणिज्जो त्ति ववसिदं एदं। (प्रकाशम्) अज्जउत्त। (इत्यर्धोक्ते।) संसइदे दाणिं परि-

---

[1]इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन। आत्मेदानीं मे शोचनीय इति व्यवसितमेतत्। आर्यपुत्रेत्यर्धोक्ते। संश-

---

इदानीं संदेशे निर्वादिते विरम, परवता यावत्कर्तव्यं तावद् धृतं किमतः परेणेत्यर्थः 'व्याङ् परिभ्यो रमः' इति परस्मैपदं। वक्तव्यं गुरोस्सन्देश इत्यर्थः। सोऽयं त्वयैव परिचितपूर्वः इदानीं साक्षात् स्थित इत्यर्थः। अत्रभवान् पूज्यः न तु यः कश्चित् येन नियन्तुं न युज्यत इति भावः। एव न स्मरामीत्याह। प्रत्ययप्रतिवचनं विस्रम्भहेतुमुत्तरं। त्वयैव तु प्रत्यभिज्ञापयितव्यं, न त्वस्माभिरविदितार्थैः किमपि युक्तं वक्तुमिति भावः। तादृशे 'द्वे प्रतिष्ठे कुलस्यनः' 'मां पुनर्दहत्येव' 'श्रियो नेत्रापः कथमीप्सितो जनः' 'संवाहयामि चरणावुत पश्यतार्यौ' इत्यादिप्रियवचनजाते प्रदर्शिते अनुरागे प्रेमातिशये इदमनुभूयमानप्रकारं अवस्थान्तरं जन्मान्तरवदत्यन्तानभिज्ञानं। स्मारितेन प्रत्यायनेन किंवा। यदनुराग एव विस्मर्यते किं तत्र बहिरङ्गैर्लिङ्गैरिति भावः। आत्माशरीरमेव शोचनीयः इति व्यवसितं निर्णीतं यावच्छरीरं दुःखानुभवाय सङ्कल्पमनेनेत्यर्थः। विस्मृतेरसम्भवेन शठवृत्तिः केन वा प्रत्याय्यत इति भावः। परिणयविवाह एव संशयिते अस्तीति मम नास्तीति च राज्ञो विप्रतिपिद्धाभ्यां वचनाभ्यां तदस्यभेजयविषये सति एषः आर्यपुत्रेति सम्बोधनं न समुदाचरः न न्याय्यः क्रमः।

णए ण एसो समुदाआरो । पोरव ण जुत्तं णाम दे पुरा अस्सम-पदे सहावुत्ता णहिअअं इमं जणं समअपुव्वं पदारिअ संपदं ईरि-सेहिं अक्खरेहिं पच्चाचाक्खिदुम् ।

राजा—(कर्णौ पिधाय ।) शान्तं पापम् ।

व्यपदेशमाविलयितुं किमीहसे जनामिमं च पातयितुम् ।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तटरुहं च ॥ २१ ॥

यित इदानीं परिणये नैष समुदाचारः पौरव न युक्तं नाम ते पुरा आश्रमपदे स्वभावोत्तानहृदयमिमं जनं समयपूर्वं प्रतार्य सांप्रतमी-दृशैरक्षरैः प्रत्याख्यातुम् ।

पोरवेति । 'पोरव रक्ख विणयं' इति विवाहात् पूर्वसम्बोधनस्यैवायमनुकारः अभिजनविरुद्धमारभ्यत इति भावः । आश्रम काश्यपतपोवने स्वभावोत्तानहृदयं निस-र्गादेव प्रतारणानभिज्ञमित्यर्थः । तेन राज्ञः शठहृदयत्वं आविष्कृतं भवति । समयपूर्वं गान्धर्वविवाहरूपं शास्त्रविधिं पुरस्कृत्य प्रलोभ्य प्रियवचनैर्व्यामोह्येदृशैः अवधनीयै रित्यर्थः । अक्षरैरेवंविधैः अक्षरशब्देन आशयविरुद्धत्वं व्यज्यते । प्रत्याख्यातुं न युक्तं तिरस्कारो नोचितः । पिधाय करान्यामाच्छाद्य अश्राव्य श्रवणासहत्वादिति भावः । 'वाष्टि भागुरि'रित्यादिना अपिशब्दलोपः । शान्तमिति 'आशंसायां भूतवच्चे' ति साधुः शाम्यत्वित्यर्थः ।

व्यपदेशमिति । किं कुतः व्यपदेशं कीर्तिं आविलयितुं मिथ्यावादित्वादिभिरपवादैर्मलिनीकर्तुं इमं जनं मां पातयितुं पतितं पातकिनं यावत् कर्तुं च ईहसे यतसे । कन्तमयि प्रद्वेषः येनैवंवादिनी अनङ्गीकारे लोकस्य निन्द्यं अङ्गीकारे च पातकस्पृष्टं उभयथापि निर्विमोक्षं कर्तुं प्रवर्तस इति भावः । तद्यथा । कूलं कषति हन्तीति कूलङ्कषा 'सर्वकूलकरीषाभ्रेषु कषः' इति खश् । तटरुहं 'अरुर्द्वि-षदजन्तस्य मुम्' विजृम्भितपूरेत्यर्थः । सिन्धुः प्रावृट्सरित् प्रसन्नं विमलं अम्भः जलं तटरुहं तीरप्ररूढं वृक्षं चेव । अम्भः आविलयितुं वृक्षं च पातयितुं यथा प्रवर्तते तथे-त्यर्थः । अत्र यशः स्थानापन्नं जलं तरुस्थानापन्नो राजा, इत्युपमालङ्कारः । अथ वा

शकुन्तला—[1]होदु जइ परमत्थदो परपरिग्गहसंकिणा तुए एव्वं पउत्तं, अहिण्णाणेण इमिणा तुह संदेहं अवणइस्सम् ।

राजा—उदारः कल्पः ।

शकुन्तला—(मुद्रास्थानं परामृश्य ।) [2]हद्धि हद्धि अंगुलीअअसुण्णा मे अंगुली । (सविषादं गौतमीमवेक्षते ।) ।

गौतमी—[3]णूणं सक्कावदारब्भंदरे सईतित्थं वंदमाणाए तुह हत्थादो पब्भट्ठं अंगुलीअअं ।

---

[1]भवतु यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं प्रवृत्तं । अभिज्ञानेनानेन तव सन्देहमपनेष्यामि ।

[2]हा धिक् हा धिक् । अंगुलीयकशून्या मे अंगुली ।

[3]नूनं शक्रावताराभ्यन्तरे शचीतीर्थं वन्दमानायास्तव हस्तात् प्रभ्रष्टमंगुलीयकम् ।

व्यपदेशं त्वदीयं सतीचरितमित्यर्थः । आविलयितुं भर्तुरनिर्णयात् पांसुलयितुं, यथा पूरोत्पीडेन नदी स्वं जलं कलुषयति तटस्थं च तरुं पातयति तथा त्वमप्यनया प्रवृत्त्या स्वं चरितं दूषयसि मामपि च अधोनयसीत्यर्थः । तदेवं आत्मदोषेणापि मदनिष्टं विधातुं कस्ते मयि प्रद्वेष इति भावः । आर्या वृत्तम् ॥

परमार्थतः न तु च्छद्मनेत्यर्थः । परकलत्रशङ्किना परकलत्रमिति मन्यमानेन यदि प्रवृत्तं प्रत्याख्यातुमारब्धं । अभिज्ञानेन अङ्गुलीछद्मना यकनं । एव तु न प्रतीकार इति भावः । उदारः श्लाघ्यः कल्पः निर्णयप्रकारः मुद्रास्थानं अंगुलीयकपदं परामृश्य स्पृष्ट्वा । अवेक्षते दैवमेव विरोधीत्यवेक्षणाभिप्रायः । नूनमिति सम्भावनायां । शक्रावतारस्य शक्रतीर्थाख्यस्य मालिनीनदीस्थानविशेषस्य अभ्यन्तरे मध्यप्रदेशे शचीतीर्थं इन्द्राणीतीर्थाख्यमेकदेशं वन्दमानायाः आचमनादिभिरसेवमानायास्तस्याः प्रभ्रष्टं ।

राजा— (सस्मितम्) इदं तन् प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते।

शकुन्तला—[1]एत्थ दाव विहिणा दंसिदं पहुत्तणं। अवरं दे कहइस्सं।

राजा—श्रोतव्यमिदानीं संवृत्तम्।

शकुन्तला—[2]णं एक्कस्सिं दिअहे णोमलिआमंडवे णलिणीपत्तभाअणगदं उदअं तुह हत्थे संणिहिदं आसी।

राजा—शृणुमस्तावत्।

---

[1]अत्र तावद्विधिना दर्शितं प्रभुत्वं। अपरं ते कथयिष्यामि।

[2]नन्वेकस्मिन् दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते संनिहितमासीत्।

अगुलीयकस्य पुरुषहस्तपरिणाहात् जलक्लेदाच्चाङ्गुलेः स्वस्तं सम्भाव्यत इत्यर्थः। सस्मितं स्वाभिप्रायसिद्धिरत्र स्मितहेतुः। प्रतिनवमुत्पन्ना मतिर्यस्य तत्। स्त्रैणं स्त्रीत्वं स्त्रीणां आत्मकार्यसाधनीनां सामयिकं प्रतिभानं सहकारीति भावः। इति यदुच्यते तदिदमित्यन्वयः। स्त्रीति समर्थयितुं सिद्धमभिज्ञानं गलितमेवाभिनीयते विषादादिना शकुन्तलया, वृद्धया च शचीतीर्थवन्दनं निमितमुद्भाव्यत इति सर्वमिदं मायामात्रमिति भावः। अत्र दृश्याभिज्ञानविषये विधिना दैवेन प्रभुत्वं स्वशक्तिः। विधिदोषादेव हि गलितमभिज्ञानमिति भावः। अन्यदभिज्ञानं प्रत्यक्षादन्यदेव लिङ्गं। इदानीं असति द्रष्टव्ये श्रोतव्यं संवृत्तं पर्यवसितं नान्या गतिरित्यर्थः। दृश्यं प्रक्रम्य श्राव्ये पर्यवसितमितिशृणोत्यर्थमिति भावः। एकस्मिन् दिने समागमानन्तरमेकदा नलिनीपत्रमेव भाजनं पात्रं गतं पत्रपुटोद्भूतमित्यर्थः। शृणुमस्तावत् शृणुम एव न पुनर्जानीमइति भावः। अथ वा साकल्येन

शकुन्तला—[1]तक्खणं मह पुत्तकिदओ दीहापंगो णाम हरिणपोदओ उवट्ठिदो । तदो तुए दाव पुढमं एसो पिबदु त्ति अणुकंपिणा उवच्छंदिदो उअएण । ण उण सो दे अपरिअआदो हत्थब्भासं उवगदो । पच्छा तस्सिं एव्व मए गहीदे सलिले किदो देण पणओ । तदो इत्थं पहसिदो सि, सव्वो सगंधेसु विस्ससदि, दुवे वि खु एत्थ आरण्णअ त्ति ।

राजा—स्वमादिभिरात्मकार्यनिर्वर्तिनीनां योषितामनृतवाङ्माधुभिराकृष्यन्ते विपयिणः ।

---

[1]तत्क्षणं मम पुत्रकृतको दीर्घापाङ्गो नाम हरिणपोतक उपस्थितः ततस्त्वया तावत् प्रथममेष पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन। न पुनस्स ते अपरिचयात् हस्ताभ्याशमुपगतः । पश्चात्तस्मिन्नेव मया गृहीते सलिले कृतस्तेन प्रणयः । तत इत्थं प्रहसितोऽसि सर्वः स गंधेषु विश्वासिति । द्वावपि खल्वारण्यकाविति ।

शृणुमः कृतमन्तरा वाक्यावसानेन यतो न प्रत्यभिज्ञानीम इति भावः । पुत्रकृतकः संवर्धितत्वात् कृत्रिमपुत्रः मयूरध्वंसकादिः । दीर्घापाङ्गो नाम मया कृतनामधेय इत्यर्थः । प्रथमं आत्मनः पानात् पूर्वं एष मृगशिशुः । अनुकम्पिना दयावता । उपच्छन्दितः विलोभितः । अपरिचयात् अभिनवत्वेनाविश्रम्भात् । हस्ताभ्याशं समीपं । तस्मिन्नेव त्वत्कृतस्य एव । गृहीते त्वत्कृतादुपलते सति तेन मृगेण प्रणयः अनाहूतेनापि स्वतः प्रार्थना । प्रहसितः हसितवान् अकर्मकत्वात् कर्तरि क्तः । समानो गन्धो येषां तेषु सगन्धेषु समानगुणेष्वित्यर्थः । अत्र गुणमात्रपरो गन्धशब्दः । द्वावप्यारण्यकौ अतस्सगन्धत्वमित्यर्थः । अरण्ये भवो आरण्यकौ । यद्यपि 'पथ्यध्यायन्यायविहारमनुष्यहस्तिषु' इति वाक्यादारण्यकशब्दो न मृगे साधुः, तथापि पुत्रकृतक इति शकुन्तलावाक्यानुरोधात् अनागरिकत्वसाम्याद्वा निर्वाहः । एवमादिभिः एतादृशैः आत्मकार्यनिर्वर्तिनीनां स्वाभिमतसाधनीनां न तु धर्मदर्शिनीनामित्यर्थः । 'न स्त्री धर्ममधर्मं वाऽवेक्षते कामयत एव' इति हि वात्स्यायनः । योषितां स्त्रीणां सम्बन्धिभिः

गौतमी—[1]महाभाअ णारुहसि एव्वं मंतेदुं । तवोवणसंवड्ढिदो अणाहिण्णो अअं जणो कइअवस्स ।

राजा—अयि तापसवृद्धे ।

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥२२॥

---

[1]महाभाग नार्हस्येवं मंत्रयितुं । तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य ।

अनृतवाङ्मधुभिः मकरन्दवत् सद्यः प्रीणनैरसत्यवचनैः विषयिणः शब्दादिविषयप्रसक्ताः आकृष्यन्ते वशीक्रियन्ते । न पुनर्वयमिति भावः । महाभाग एवं पांसुलासामान्येन, नार्हसि, महाभागस्य नेदमुचितमित्यर्थः । तपोवनसंवर्धितः धर्मैरेव परिपुष्ट इत्यर्थः । कैतवानां छद्मनामनभिज्ञः । तापसी च सा वृद्धा च तापसवृद्धा तस्यास्सम्बुद्धिः तापसवृद्धे ।

स्त्रीणामिति । स्त्रीणां सामान्यतस्सर्वासां अशिक्षितं अनभ्यस्तं जन्मसिद्धमित्यर्थः । पटुत्वं आत्मकार्यनिर्वहणचातुर्यं अमानुषीषु मानुषीव्यतिरिक्तासु बुद्धिप्रागल्भ्यरहितासु तिर्यग्योनिजास्वपि स्त्रीत्वित्यर्थः । सन्दृश्यते साक्षादनुभूयते । यास्तु प्रतिबोधवत्यः इष्टानिष्टविवेकशालिन्यः मानुष्य इत्यर्थः । तासु किमुत अशिक्षितपटुत्वमस्तीति किं वक्तव्यं । आहारनिद्रादिसाम्यधर्ममात्रं वेदिनीष्वपि स्त्रीत्वमात्रं यदि चातुर्यमादधाति, किमु वक्तव्यं तर्हि विदग्धास्वित्यर्थः । परभृताः परैर्वायसैः भृताः पुष्टाः कोकिलस्त्रियः । स्वमात्मीयं अपत्यजातं पुत्रवर्गं न तु यदृच्छया किञ्चेदेवापत्यमिति भावः । अन्तरिक्षगमनात् प्राक उत्पतनात् पूर्वं यावत् पक्षोदयमित्यर्थः । अन्यैरन्यजातीयैः द्विजैः पक्षिभिः वायसैः प्रयोज्यैः पोषयन्ति संवर्धयन्ति खलु । परपुष्टाः किल निजान्यण्डानि वायसनीडेषु गूढं निधाय स्वैरं यान्ति, वायसाश्च निजाण्डभ्रमेण पुष्यन्ति उत्पतनानन्तरमेव 'काकः काकः पिकः पिकः' इति भिद्यत इति प्रसिद्धिः । अण्डपरि-

शकुन्तला— (सरोषम् ।) अणज्जा अत्तणो हिअआणुमाणेण पेक्खासि । को दाणिं अण्णो धम्मकञ्चुअप्पवेसिणो तिणछण्णकूवोवमस्स तुह अणुकिदिं पडिवज्जिस्सदि ।

राजा— (आत्मगतम् ।) संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । तथा ह्यनया ।

---

[1]अनार्य आत्मनो हृदयानुमानेन सर्वं पश्यसि । क इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते ।

पोषः पुंपक्षिणां कर्म अतो न स्त्रीवैदग्ध्यहानिः । पूर्वार्धे कैमुत्येनार्थं संसाधनादर्थापत्तिः । उत्तरार्धे परभृतवृत्तान्तरूपविशेषेण स्त्रीणामशिक्षितपटुत्वरूपसामान्यस्य समर्थनादर्थान्तरन्यासः । तदनुप्राणिता चार्थापत्तिः इति तयोरङ्गाङ्गिभावसंकरः । **वसन्ततिलकं** वृत्तम् ॥

सरोषमिति । सत्यनिह्नवादिति भावः । आत्मनः स्वस्य हृदयं मन एव अनुमीयते तर्क्यते अनेनेत्यनुमानं दृष्टान्त इत्यर्थः । स हि व्याप्तिनिश्चयमूलित्वादनुमितिसाधनं । पश्यसि अन्यमपि शठवृत्तिमवगच्छसि । स्वयमनार्य एवपरानप्यनार्यान् संभावयतीति भावः । धर्मरूपं कञ्चुकं प्रावेशयतीति तस्य धर्मकञ्चुकप्रवेशिनः पापमनसः बहिरेव धर्मं व्यञ्जयत इत्यर्थः । यथा कञ्चुकः शरीरदोषानेव रजः स्वेदादीन् संवृणोति, तथा तवायं धर्मः मनोगतं शाठ्यं नापनेतुं प्रभवतीति भावः । तृणच्छन्नः कूपः उपमीयते अनेनेत्युपमा उपमानं यस्य तस्य । बहिस्सुभगस्य विस्रंभादुपेयुषां मृगवदवपातहेतोरित्यर्थः । अनुकृतिं साम्यं प्रतिपत्स्यते प्राप्स्यति । त्वमसदृशश्शठः त्वामनुकर्तुमपि का शक्तिरस्माकमिति भावः । मां सहजकृतकविवेकविदमपीति भावः । सन्दिग्धबुद्धिं अविदितेपि परिग्रहे संशयक्षुभितमतिं कुर्वन् अत एव अकैतवः परमार्थ इव लक्ष्यते अनुमीयते । परमार्थकोपश्च न मृषाहेतोर्भवितुमर्हतीति भावः ।

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥ २३ ॥

(प्रकाशम् ।) भद्रे प्रथितं दुष्यन्तचरितं । तथापीदं न लक्ष्ये ।

मयीति । मय्येव विस्मरणेन वस्तुतोवृत्तस्य प्रणयस्याविभावनेन दारुणा निरनुकम्पा चित्तवृत्तिर्यस्य तस्मिन् अत एव वृत्तं परमार्थतो भूतं न त्वारोपितमित्यर्थः । रहः प्रणयं असाक्षिकं संगतं अप्रतिपद्यमाने अनङ्गीकुर्वाणे सति अति रुषा-अतिशयितामर्षया अत एवातिलोहिताक्ष्या अत्यर्थरक्तनेत्रया सत्या अनया कुटिलयोः स्वभावभुग्नयोः भ्रुवोर्भेदात् भङ्गाद्धेतोः स्मरस्य संबन्धि शराः अस्यन्ते क्षिप्यन्ते अनेनेति शरासनं धनुः भग्नमिव । भञ्जो आर्दने' इति धातोः 'ओदितश्च' इति निष्ठानत्वं । मय्येवेत्येवकारेण नास्या अभूतार्थकथनं दोष इति व्यवच्छिद्यते । स्त्रीणामभूतार्थकथने हि हसितादिव्यतिकरितो विलासात्मा केवलं कोपस्यात् । अस्यास्तु नयनयोर्निकामम-रुणिमा, भावान्तरव्यवधायीरोषावेशः, भ्रुवोश्चच्छेदसदृशो भङ्गातिरेकः ममैव परमार्थमपराधं व्यनक्तीतिभावः । इव शब्दो विशिष्टवाक्यान्वयी । मय्येवापराधिनि यथा भ्रूभेदादिः स्यात् तथा ह्ययं जात इति वाक्यार्थः । भ्रुवोर्नतत्वात् स्मरशरासनौपम्यं । भङ्गोत्प्रेक्षया शरासनोपमाध्वनिः । एकत्रैवानुरागाधानवैधेयात् स्मरधनुर्भङ्ग इति भावः । किञ्च अननुभूतमपि भावनारूढं येन प्रत्यक्षायते तदेव पुरः स्थितेपि वस्तुनिस्मृतिं नादधातीति स्मरशरासनस्याकिञ्चित्करत्वमपि भङ्गहेतुरनेन व्यज्यते । भेदादित्यपद्यवगर्भत्वात् सापह्नवोत्प्रेक्षा । **वसन्ततिलकं वृत्तम् ॥**

प्रथितं प्रसिद्धं । प्रसिद्धिमेव दर्शयितुं दुष्यन्तचरितमिति परोक्षनिर्देशः । तेन शाठ्यादिकं न सम्भाव्यत इति भावः । तथापि सशठत्वेपि इदं त्वत्परिग्रहणं न

शकुन्तला—[1]सुट्ठु दाव सच्छंदआरिणी किद म्हि जा अहं इम स्सपच्चएण मुहमहुणो हिअअविस्सस्स हत्थब्भासं उवगदा

शार्ङ्गरवः—इत्थमात्मकृतमप्रतिहतं चापलं दहति ।

अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥२४॥

[1]सुष्ठु तावत् स्वच्छन्दचारिणी कृतास्मि । याहमस्य प्रत्ययेन मुखमधोर्हृदयविषस्य हस्ताभ्याशमुपगता । (इति पदान्तेन मुखमावृत्य रोदिति ।)

लक्ष्ये नाभिजनं । सुष्ठु तावत् सम्यगेव स्वच्छन्देन अनियमेनचरितुं प्रवर्तितुं शीलमस्या इति स्वच्छन्दचारिणी स्वैरिणी । राज्ञो हि शुद्धचरितत्वमनभिज्ञानं च ममैव पांसुलात्वे पर्यवस्यतीति भावः । युक्तं चेदमित्याह । जेति । याहं प्रत्ययेनापातितो विस्रम्भेण मुखे वचने मधु माधुर्यं यस्य तस्य हृदये मनसि विषं यस्य केवलं मधुरभाषिणः कठोरहृदयस्येत्यर्थः । अस्य राज्ञः इदं मध्यस्थान् प्रति वचनं । हस्ताभ्याशं पाणिसमीपं उपगता विवाहितेत्यर्थः । 'नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निशितस्तीक्ष्णधारः । तदुभयमेतद्विपरीतं क्षत्रियस्य वाङ्नवनीतं हृदयं तीक्ष्णधारं ।' इति महाभारतवचनमत्र स्मारितं भवति । साहं स्वच्छन्दचारिणी कृतास्मीति सम्बन्धः । आत्मकृतं स्वतः प्रयुक्तं चापलं चपलकर्म कामकार इत्यर्थः । अप्रतिहतं अप्रतीकारं सत् दहति सन्तापयति । आत्मकृतमित्यनेन गुरुजनाननुज्ञानं अभिप्रेयते चापलमित्यनेनाविमृश्यकारित्वम् ।

अत इति । अतः एवं दुःखोदर्कत्वात् सङ्गतं स्नेहमात्रमेव परीक्ष्यशीलं परिशील्य कर्तव्यं । रहः अपश्चीणं सङ्गतं वधूवरसख्यं तु विशेषात् सख्यमात्रमपेक्ष्य सविशेषं परीक्ष्य कर्तव्यमिति सम्बन्धः । पतिजीवितानां स्त्रीणां पतिप्रातिकूल्यमेव निरयादपि दुःखतरमिति भावः । अज्ञातहृदयेषु अपरीक्षिताशयेषु सौहृदं मैत्री एवं अनुभूयमानेन प्रकारेण वैरीभवति विद्वेषरूपं परिणमति । अभूततद्भावे च्विः । 'शीलं संवसता ज्ञेयं तच्च कालेन भूयसा' इति ह्युच्यते । अत एवासैः बन्धुभिः परिशीलितशीलेष्वेव कन्यानामुचितस्सङ्गमः अविमृश्य चापलात् कृतस्तु न केवलं स्वयं न भवति, प्रत्युत वैरमपि हि पर्यवस्यतीत्यर्थः । अनुष्टुप् वृत्तम् ॥

राजा—अयि भोः किमत्रभवतीप्रत्ययादेवास्मान् संभृतरोषाक्षरै-रधिक्षिपसि ।

शार्ङ्गरवः—(सासूयम् ।) श्रुतं भवद्भिरधरोत्तरम् ।

आ जन्मनः शाठ्यनिशिक्षितो यत्तस्याप्रमाणं वचनं जनस्य ।
परातिसंधानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः ॥२५॥

अत्रभवतीप्रत्ययात् स्त्रीप्रामाण्यनिर्णयात् अस्मान् धर्मसीमभूतानपीत्यर्थः । सम्भृतरोषैः रोषगर्भैः अक्षरैः वचनैः अधिक्षिपसि निन्दसि । शकुन्तलाविषयेऽपि क्रोधोऽस्मासु अज्ञातहृदयत्वादिदोषारोपरूप इति भावः । 'सम्भृतदोषैरि'ति पाठे मिथ्यैवारोपितैर्दोषैरित्यर्थः । 'अधिक्षिपये'ति बहुवचनपाठे शकुन्तलादीन् सर्वान् प्रत्युक्तिरिति व्याख्येयं । क्षिणुयेति पाठे तुदयेत्यर्थः । सासूयं सरोषं भवद्भिरिति पूजायां बहुवचनं कोपव्यञ्जनं । अधरोत्तरं अपकृष्टं प्रतिवचनं । भवांस्तु परिणीतां मुनिपुत्रीं स्त्रीणामशिक्षित पटुत्वमित्यादिभिः स्त्रैरिणीमिव प्रथयन् युक्तवादी । भवतस्तु विषये एतावदपि प्रतिवचनं अधिक्षेपो भवति हन्तेति भावः । अत्रभवतीप्रत्ययादित्येतत् प्रतिवक्ति—

आ जन्मन इति । यः जनः आ जन्मनः उत्पत्तितः प्रभृति शाठ्यं गूढविप्रियकारितां प्रतारकतामिति यावत् । अधिशिक्षितः अनुपदिष्टः तस्य जनस्य आप्तसंवर्धितस्येत्यर्थः । वचनं अप्रमाणं अश्रद्धेयं पृथुकादिवच्छलमात्रानभिज्ञस्य जनस्य अप्रत्येयत्वं भवानेव ब्रूयादिति भावः । राजवाक्ये अस्मानित्युक्तं प्रतिवक्ति - परेति - यैः सुश्लिष्टैः परेषां शत्रूणां अतिसन्धानं वञ्चनं सामदानादिभिः सन्धिविग्रहादिभिः तीर्थैः चारादिभिश्च जम्बुकादिवत् परप्रतारणमेवेत्यर्थः । विद्येति नीतिशास्त्ररूपं विद्यास्थानमिति अधीयते गुरुभ्यस्सचिवादिभ्यश्च यावज्जीवं परिचीयते, ते तथा शिक्षितातिसन्धानाः आप्तवाचः विश्वसनीयवचसः सन्तु किल भवेयुर्हि । छद्मविदच्छद्मविदोर्मध्ये धार्मिकेऽपि प्रथमे दोषः संभाव्यते । न कथं चिच्चम इति भावः । 'आप्तः प्रत्ययितश्चिरु' इत्यमरः ।

उपजातिः वृत्तम् ॥

राजा—भोः सत्यवादिन् अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमामतिसंधाय लभ्यते ।

शार्ङ्गरवः—विनिपातः ।

राजा—विनिपातः पौरवैः प्राप्यत इति न श्रद्धेयमेतत् ।

शार्ङ्गरवः—भो राजन् किमुत्तरोत्तरेण । अनुष्ठितो गुरुनिदेशः । प्रतिनिवर्तामहे वयम् ।

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥ २६ ॥

सत्यवादिन् सत्यवदनशील अशिक्षितशाठ्येत्यर्थः । 'स्वस्मिन् दोषाविष्कारानौचित्यसूचतार्थं सम्बोधनं । अभ्युपगतं सत्यं परातिसन्धानमधीमहे इत्यर्थः । इमां तापसकन्यां । किं फलं लभ्यते प्राप्यते न वयं स्तेनवदतिसन्धानमधीमहे—अपि तु प्रजापरित्राणोपजीव्यं द्विपदतिसन्धानमात्रं । नचानया अस्मद्राज्यस्य कश्चित् प्रतिरोध इति भावः । 'कृतो धर्मक्रियाविघ्नस्ततो रक्षितरि त्वयि' इति भवदुक्तमेवान्यथा विपर्यस्येत् इत्यभिसन्धायोक्तं सत्यवादिन्निति । विनिपतत्यधो गच्छत्यनेनेति विनिपातः पापं लभ्यत इत्यनुपज्यते । फलाभावादतिसन्धानं न भवतीति राजाभिप्रायः । अतिसन्धानमेवेदं क्रियते पापं तु भविष्यतीति मुनेरभिप्रायः । पौरवैः शुद्धवंश्यैरित्यर्थः । विनिपातः पातकं अभ्यर्थ्यते फलत्वेनाशास्यत इत्येतत् न श्रद्धेयं न विश्वसनीयं । ये वर्णाश्रमान् विनिपाताद्वारयन्ति तैरेव न किंचिदभिसन्धाय विनिपातमात्रमाशास्यत इति तत्स्थानामश्रद्धेयमित्यर्थः । उत्तरोत्तरेण प्रतिवचनस्यापि प्रांतवचनेन उपर्युपरि वचनप्रतिक्षेपेणेत्यर्थः । उत्तरेणेति पाठान्तरं । गुरोर्नियोगः संदेशार्पणरूपस्सन्दिष्टार्थः अनुष्ठितः कृतः । सन्देशसमर्पकेषु राज्ञापि स्वमतं न युक्तं वक्तुं, न चारमाभिरपि प्रतिवक्तुं युक्तमिति भावः । प्रतिनिवर्तामहे गुरोस्सकाशं प्रतिगच्छामः ।

तदिति । तत् गुरुसन्देशात् एषा शकुन्तला भवतः कान्ता तवैव प्रिया न हि त्रैकाल्यवेदिनो गुरोर्वितथा वाग्भवति किं तस्तत्त्वविचारेणेति भावः । एनां स्वदारभूतां त्यज वा गृहाण अङ्गीकुरु वा 'हलः श्नः शानज्झौ' इति महेः शानच् । न वयं भवन्तं नियन्तुमुत्सहामहे इति भावः । यदि नाम कांतेति विदितं, कथं तर्हि

गौतमिगच्छाग्रतः ।

इतिप्रस्थिताः ।

शकुन्तला—[1]कहं दाव । इमिणा किदवेण विप्पलद्ध म्हि । तुम्हे वि मं परिदेविणिं परिच्चअह ।

गौतमी—(स्थित्वा) [2]वच्छ सङ्गरव अनुगच्छइ इअं णो करुणपरिदेविणी सउंदला । पच्चादेसपरुसे भत्तुम्मि किं वा मे पुत्तिआ करेदि ।

शार्ङ्गरवः— (सरोषं संनिवृत्य ।) आः पुरोभागिनि किमिदं स्वातन्त्र्यमवलम्बसे ।

शकुन्तला भीता वेपते ।

[1]कथं तावत् । अनेन कितवेन विप्रलब्धास्मि। यूयमपि मां परिदेविनीं परित्यजथ । (इत्यनुप्रतिष्ठते ।)

[2]वत्स शार्ङ्गरव अनुगच्छतीयं नः करुणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोति ।

त्यागाभ्यनुज्ञानं । तदाह-उपपन्नेति । हि यस्मात् दारेषु विषये सर्वतः त्यागाभ्युपगमादिषु सर्वेषु प्रकारेषु मुखं प्रवृत्तिर्यस्यास्सा प्रभुता नियन्तृता उपपन्ना युज्यते । रागविरागानुरोधात् परिग्रहः परित्यागो वा भवति, येनात्र नान्यो नियन्तुमर्हतीति भावः । स्त्रीस्वभावात् परित्यक्तुमनिच्छन्तीं पश्चादवस्थितां गौतमीमाह—

गौतमीति । अग्रतः पुरस्तात् गच्छ स्नेहान्न विलम्बस्वेत्यर्थः । प्रस्थिताः गन्तुं प्रवृत्ताः । कितवेन विप्रलम्भकेन अनेन राज्ञा विप्रलब्धा वञ्चितास्मि । यूयमपि कथं परित्यजथेति सम्बन्धः । अनुप्रतिष्ठते अनुगन्तुमारभते । करुणं दीनं परिदेवयति रोदितीति करुणपरिदेविनी तां 'संपृचे' त्यादिना धिनुण् । प्रत्यादेशेन प्रत्याख्यानेन परुषे निर्दयहृदये सति किं वा करिष्यति अस्माभिरपि त्यक्तायाः का गतिरित्यर्थः । आ इति रोषे । पुरः प्रथमं भजते दोषमादत्त इति पुरोभागिनी 'संपृचे' त्यादिना भजेर्धिनुण तस्यास्संबुद्धिः दोषैकदर्शिनि । पतिगृहावस्थानस्य अवर्जनीयतां विहाय

शार्ङ्गरवः—शकुन्तले ।

यदि यथा वदति क्षितिपस्तथा त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचि व्रतमात्मनः पतिकुले तव दास्यमपि क्षमम् ॥
तिष्ठ तिष्ठ साधयामो वयम् ।

राजा—भोस्तपस्विन् किमत्रभवतीं विप्रलभसे ।

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥ २८ ॥

भर्तर्यस्मासु च मुधैव त्यागदोषमाविष्करोषीति भावः । 'दोषैकदृक् पुंश्चलीवत्' इत्यमरः । स्वातन्त्र्यं स्वेच्छया प्रवर्तनं । निवर्तनस्य पित्रादिभिरनुज्ञातत्वादिति भावः । वेपते शरीरकम्पेन भीतिं मनुभावयति । प्रत्यादिष्टायाः किमन्यावस्थानेन तदाह—

यदीति । क्षितिं पातीति क्षितिपो राजा यथा येन प्रकारेण वदति त्वामपरिणीतामाह तथैव त्वमसि यदि मिथ्याचारा भवसि चेत् तदेति शेषः । उत्कूलया उत्सन्नकुलधर्मया त्वया पितुः किं ? कुलस्त्रियैव सत्या पितृकुलं रक्षितव्यं इतरथा पितापि नाभिनन्दिष्यतीति भावः । अथ पक्षान्तरे तु परिणयस्य सत्यत्वेवेत्यर्थः । आत्मनस्तस्बन्धि शुचि दोषरहितं व्रतं साध्वीधर्मं वेत्सि यदीत्यनुषज्यते । अस्मत्प्रत्याख्यात्र साध्वित्वात् स्वयं चेदवगच्छसीत्यर्थः । पतिकुले भर्तृगृहे दास्यं दासकर्मापि मा भून्महिषीभाव इति भावः । तव साध्व्यास्सत्या इत्यर्थः । क्षमं युक्तं । बहुमानो भवतु मा वा भूत् पतिरेकः शरणं सतीनामित्यर्थः । उभयथाप्यस्मदनुगमनं न प्राप्तमिति भावः ।

द्रुतविलम्बितं वृत्तम् ॥

साधयामः गच्छामः । किं कुतः विप्रलभसे त्यजसि । अत्रभवतीव्यपदेशो राज्ञः परकलत्रवुध्या । कुतः अपरिग्रहे को हेतुरित्यर्थः । हेतुं विवृणोति—

कुमुदानीति । शशाङ्कः चन्द्रः कुमुदान्येव बोधयति विकासयति न तु कदाचित् पङ्कजान्यपीति व्यवच्छेदाभिप्राय एवकारः । सविता सूर्यः पङ्कजानि कमलान्येव बोधयति न तु कुमुदानि । । वशयन्तीन्द्रियाणीति वशिनो जितेन्द्रियास्तेषां वृत्तिः प्रवृत्तिः परपरिग्रहसंश्लेषे परदारसम्बन्धे पराङ्मुखी अनासक्तेत्यर्थः । परपरिग्रहत्व-

शार्ङ्गरवः—यदि पूर्ववृत्तमन्यासङ्गाद्विस्मृतो भवान्, तत्कथमधर्मभीरुः ।

राजा—भवन्तमेवात्र गुरुलाघवं पृच्छामि ।

मूढः स्वामहमो वा वदेन्मिथ्येति संशये ।
दारत्यागी भवा यातो परस्त्रीस्पर्शपांसुलः ॥२९॥

मेव अस्पदग्राहिग्रहणं न तु परिग्रहादन्यः. अतः किमत्र अवस्थानेनेति भावः । अत्र विशेषमूलाभ्यां वस्तुदृष्टान्ताभ्यां सामान्यस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः । वृत्तेर्भावरूपतया मुख्यस्य स्वाङ्गत्वाभावेऽपि कवेर्विवक्षया स्त्रीत्वसम्भवाङ्ङीप् । **आर्यावृत्तम् ।**

यदा यदि तु, तुशब्दः प परिग्रहशङ्काव्यवच्छेदार्थः । पूर्वं वृत्तं भूतपूर्वमेव परिग्रहणं अन्यासङ्गात् वनितान्तरासक्तित्वशात् भवान् विस्मृतः नत्विदं मिथ्यावादिनीत्यर्थः । विप्रतिपत्तौ शकुन्तलावाक्यमेव प्रमाणं स्यादित्यर्थः । कथमधर्मभीरुः अधर्मभीरुत्वप्रशस्तिर्न तदानीं ववर्तु युज्यत इति भावः । अत्र विप्रतिपत्तिविषये गुरुलाघवं गुरुत्वं लघुत्वं च भावप्रधाननिर्देशाद्गौणार्थौ गुरुशब्दः, मृद्वादिवद्धर्मपरो वा 'मृदुप्रभृतयो हि गुरुत्वतया भावकृत्य एव' इति हि भट्टाभिलावयुक्तिः । गौरवं लाघवं च धर्मसङ्कल्पनिपाते कस्यास्मीहितत्वं इत्यमुं विषयमित्यर्थः । भवन्तमेव धर्मज्ञमेव शकुन्तलापक्षपातिनमेवेति वा पृच्छतेर्दुहादित्वात् द्विकर्मकत्वं । प्रश्नं विवृणोति ।

मूढ इति । अहं मूढः अन्यासङ्गादिना विक्षेपेण विस्मृतपरिग्रहः स्यामिति प्रथमकोटिः । अथ वा एषा शकुन्तला मिथ्या वदेत् असत्यमेव परिग्रहमारोप्य ब्रूयात् इति द्वितीयकोटिः—इति एवमुभयकोटिके संशये सन्देहे सति वादिप्रतिवादिवाक्याभ्यां विरुद्धाभ्यां मध्यस्थसन्देहे जाते सतीत्यर्थः । दारांस्त्यजतीति दारत्यागी भवामीति काकुः किं दारत्यागी स्यामित्यर्थः । आहो अथ वा परस्त्रियाः स्पर्शेन परामर्शेन पांसवो दोषा अस्य सन्तीति पांसुलः सिध्मादिः पातकीत्यर्थः । भवामीत्यनुषज्यते । मोहादपरिग्रहे दारत्यागो दोषः मिथ्यावचनप्रत्ययेन परिग्रहे परदारस्पर्शदोष इति कोटिद्वयेऽप्य वर्जनीयं दोषभागित्वं, तत्र कतरो दोषः श्रेयानित्यमुमर्थं भवानेव निर्धारयत्वित्यर्थः । सन्दिहानस्य वरं दारत्यागो न पुनः परस्त्रीस्पर्श इति राज्ञः स्वाभिप्रायः । **अनुष्टुप् वृत्तम् ।**

पुरोहितः—(विचार्य ।) यदि तावदेवं क्रियताम् ।

राजा—अनुशास्तु मां भवान् ।

पुरोहितः—अत्रभवती तावदा प्रसवान्नम गृहे तिष्ठतु । कुत इदमुच्यत इति चेत् । त्वं साधुभिरादिष्टः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति । सचेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, ततः प्रतिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि । विपर्यये पितुरस्याः समीपगमनमवस्थितमेव ।

राजा—यथा गुरुभ्यो रोचते ।

पुरोहितः—वत्से अनुगच्छ माम् ।

विचार्य उभयेनार्जवं राज्ञस्मन्तानावधर्यं सिद्धादेशं शकुन्तला चान्तर्वर्त्नी विचिन्त्येत्यर्थः । यदि तावत् यदि नामैवमपीत्यर्थः । एवं वक्ष्यमाणप्रकारेण । अत्रभवती तावत् शकुन्तला तु आ प्रसवात् पुत्रजातं यावत् अस्मद्गृहे मदाश्रमपदे तिष्ठतु । अनभिज्ञानात् भवद्गृहवासो नोचितः परिणीतायास्तु प्रत्यादेशो न न्याय्य इत्यतोयमविरोधीकल्प इति भावः । इदं अस्मद्गृहावस्थानं । साधुभिः सिद्धादेशैर्मुनिभिः चक्रवर्तिनं पुत्रं जनयिष्यसीत्यादिष्टः अभिहितोसि । अनेन मृगानुधावने 'पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि' इति वैखानसवचनं प्रत्यागतमात्रेण राज्ञा पुरोहिते निवेदितं, न तु शकुन्तलावृत्तान्तो लज्जया । शापेन चान्तरितं शकुन्तलास्मरणमिति सन्दर्भार्थोवसीयते । स अनया प्रसोष्यमाणः मुनेः काश्यपस्य दुहितुरपत्यं पुमान् दौहित्रः तद्भगैः चक्रवर्तिलक्षणैः उपपन्नः उपेतश्चेत् प्रतिनन्द्य प्रतिपूज्य एनां शकुन्तलां शुद्धान्तं अन्तःपुरं प्रवेशयिष्यसि प्रवेशयितुमर्हसि । विपर्यये तथाविधलक्षणाभावे अस्याः पितुः समीपगमनं अवस्थितं अन्तरेणापि विधानं सिद्धमेव । गुरुभ्य इति पूजायां बहुवचनं 'रुच्य-

शकुन्तला—[1]भअवदि वसुहे देहि मे विवरं । (इति रुदती निष्क्रान्ता सह पुरोधसा तपस्विजनैश्च ।)

राजा—(शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति ।)

नेपथ्ये ।

आश्चर्यमाश्चर्यम् ।

राजा—(आकर्ण्य ।) **किं नु खलु स्यात् ।**

प्रविश्य ।

पुरोहितः—(सविस्मयम् ।) **देव अद्भुतं संवृत्तम् ।**

राजा—**किमिव ? ।**

पुरोहितः—**देव परावृत्तेषु कण्वशिष्येषु ।**

---

[1]भगवति वसुधे देहि मे विवरम् ।

र्थानां प्रीयमाण' इति संप्रदानत्वाच्चतुर्थी । विवरं अन्तः प्रवेशाय मार्गं । परिभवलज्जया अपि वरं भूमौ निमज्जनमिति भावः । भगवतीत्यनेन देवतात्वादप्सरस्सम्भवाया स्वजनत्वमवसीयते । सीतावृत्तान्तनिदर्शनमत्र क्रोडीक्रियते । स्त्रिय एव हि स्त्रीदुःखं जानन्तीत्यपि ध्वन्यते । पितृपतिवर्गपरित्यक्तायाः शरीरावसानमेव शरणमित्यपि प्रतीयते । शापेन 'स्मरिष्यति त्वां न स बोधितोऽपि सन्' इत्येवं रूपेण व्यवहिता तिरोहिता संस्कारमात्रशेषा व्यक्तिमनुपगतेत्यर्थः । स्मृतिः स्मरणं यस्य सः । चिन्तयति कदा कथं परिगृहीतेति विशेषमालोचयति । आश्चर्यमिति 'आश्चर्यमनित्य' इति निपातनात् सुट् । किन्नु खलु किंनामाश्चर्यं स्यात् भवितुमर्हति । अद्भुतं खलु अलोकसाधारणं हि वस्तु । किमेवं-अत्यद्भुतं संवृत्तमित्यर्थः । परावृत्तेषु आश्रमं प्रतिप्रयातेषु सत्सु ।

सा निन्दन्ती स्वानि भाग्यानि बाला
बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता ।

राजा—किं च ।

पुरोहितः—

स्त्रीसंस्थानं चाप्सरस्तीर्थमारा-
दाक्षिप्यैनां ज्योतिरेकं तिरोऽभूत् ॥३०॥

सर्वे विस्मयं रूपयन्ति ।

राजा—भगवन् प्रागपि सोस्माऽभिरर्थः प्रत्यादिष्ट एव । किं वृथा तर्केणाकृष्यते । विश्राम्यतु भवान् ।

सेति । सा बाला मुग्धाङ्गना स्वानि स्वीयानि भाग्यानि भर्तृविप्रलम्भव्यपदेशदूषणादिभागधेयविपर्ययान् निन्दन्ती गर्हयन्ती सती बाहू उत्क्षिप्य बाहूत्क्षेपं 'स्वाङ्गेऽधुवे' इति 'णमुल् बाहूत्क्षेपश्चाऽऽणत्वव्यञ्जनं । क्रन्दितुं रोदितुं प्रवृत्ता आरब्धा च । देहि मे विवरमिति शकुन्तलोक्तं श्रुतवान् राजा सातिशङ्कः सावज्ञप एव पुरोहितस्य वचने क्रन्दितुं चेति चकारसमुच्चितमर्थं सम्भ्रमात् पृच्छति किं चेति, अन्यच्च किमभूदित्यर्थः । पुरोहितः प्रत्याह—स्त्रीति । स्त्रिया इव संस्थानं अवयवसन्निवेशो यस्य तत् एकं यत् किंचित् ज्योतिः तेजः तेज एव सत् स्त्रीरूपपरिच्छेद्यमित्यर्थः । देवयोनित्वादुक्तं ज्योतिरिति । एनां शकुन्तलां आक्षिप्य सम्भ्रमादादाय उत्क्षिप्येति पाठे उत्थाप्येत्यर्थः । अप्सरस्तीर्थमागात् अप्सरस्तीर्थाख्यस्य राजकुलान्तिकसरोविशेषस्य समीपं तिरोभूत् अन्तर्हितं । 'तिरोऽन्तर्धौ' इति गतिसंज्ञायां 'कुगतिप्रादय' इति समासः । सानुप्रत्या देवयोनित्वादुक्तं ज्योतिरिति । यद्यपि 'अन्यारादितरर्ते' इत्यादिना अप्सरस्तीर्थशब्दस्य पञ्चम्यन्तत्वं प्राप्तं तथापि निरंकुशाः कवयः । **शालिनी वृत्तम् ॥**

रूपयन्ति अभिनयन्ति । प्रागपि तिरोधानात् पूर्वं साक्षाद्दर्शनकाल एव सः शकुन्तलारूपः अर्थः वस्तु । असंभाव्यं स्त्रीलिङ्गप्रयोगोऽनुचित इत्यर्थशब्दः । प्रत्यादिष्टः परित्यक्तः तस्मादतीतो न खेदायेति भावः । वृथातर्केण तेजःपरिग्रहादिव्यत्वाभ्यूहेन,

पुरोहितः—(विलोक्य।) विजयस्व। (इति निष्क्रान्तः।)

राजा—वेत्रवति पर्याकुलोऽस्मि शयनभूमिमार्गमादेशय।

प्रतीहारी—[1]इदो इदो देवो। (परिक्रामति।)

राजा—(आत्मगतम्।)

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम्।
बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम् ॥३१॥

इति निष्क्रान्ताः सर्वे।

इति पञ्चमोऽङ्कः।

---

[1]इत इतो देवः।

अन्विष्यते पुनः पुनश्चिन्त्यते। वस्तुस्थितिर्यथा तथा वस्तु, अनुपलब्धिर्हि नः प्रमाणं प्रत्यादेश इति भावः। भवानपि अहमिवेत्यर्थः। विश्राम्यतु विरमतु। इयन्तं कालं परिश्रान्तोसीति भावः। पर्याकुलः अनेन वृत्तान्तेनसंक्षुभितमनाः। आदेशय विश्रामार्थमिति भावः।

कामामिति। प्रत्यादिष्टां प्रतिषिद्धसंग्रहां मुनेस्तनयां शकुन्तलां परिग्रहं भार्यां कामं यद्यपि न स्मरामि न प्रत्यभिजानामि। अप्रत्यभिजानतः प्रत्यादेशो निर्वृत्यै भवितुमर्हतीति भावः। तु तथापि बलवत् दृढं दूयमानं अन्तर्विषण्णं चेतः मां प्रत्याययतीव परिणयमेव निश्चाययतीव। न हि न्याय्यमाचरितं अन्तस्तापमावहेदिति भावः। 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तय' इति ह्युक्तम्।

॥ इति शाकुन्तलव्याख्याने सहृदयसमाख्याने पञ्चमोऽङ्कः ॥

॥ अथ षष्ठोऽङ्कः ॥

ततः प्रविशति नागरिकः स्यालः । पश्चाद्बद्धं पुरुषमादाय रक्षिणौ च ।

रक्षिणौ—(ताडयित्वा ।) [1]अले कुम्भीलअ कहेहि कहेहि कहिं तुए एशे मणिबन्धणुक्किण्णणामहेए लाअकीए अंगुळीअए शमाशादिए ।

[1]अरे कुम्भीलक कथय कथय कुत्र त्वयैतन्मणिबन्धनोत्कीर्णनामधेयं राजकीयमंगुलीयकं समासादितम् ।

॥ अभिज्ञानशाकुन्तलव्याख्याने षष्ठोऽङ्कः ॥

एवं दुर्वासः शापनिमीलितस्मृति तां दुष्यन्तेन प्रत्यादिष्टायाश्शकुन्तलाया व्योमचरेण ज्योतिषाऽभ्युपपत्तिर्दर्शिता । अभिज्ञानदर्शनावसानश्च शापश्चतुर्थेऽङ्केऽभिहितः शकुन्तलाहस्तगतस्य च राजांगुलीयकस्य शक्रावतारात्यन्तरे प्रभ्रंशः पञ्चमेऽङ्के शकुन्तलावाक्येन निवेदितः । संप्रति तदेव रत्नांगुलीयकं शक्रावतारमत्स्येनाभिगमिति निगीर्णं मत्स्योपलम्भादुपलब्धं विक्रेतुं नगरमागतस्य मुद्रां दर्शयित्वा तेन इति रत्नांगुलीयकगृहीतस्य धीवरस्य प्रवेशरूपः प्रवेशकः प्रस्तूयते । तत्र इति । तत्र नियुक्तः सांव्यवहारिकः 'तत्र नियुक्त' इति ठक् । स्यालः अस्मवर्णो राजपत्नीसोदर्यः स हि पितृष्वस्रीयस्या लब्धांशः स्वसुः पतिगृहं गच्छत्याः यौतकेन सहानुप्रहितः कर्मसिद्धिर्दधिकर्णे नियुज्यत इत्याचारः 'राज्ञः स्यालस्तु राष्ट्रिय' इत्यमरः । पश्चात् पृष्ठतः बद्धं निगडितभुजं पुरुषं कुम्भीलकं आदाय वशीकृत्य रक्षिणौ चोररक्षकौ स्यालानुचरौ । अहो कुम्भीलक हे चोर मणिबन्धनेन रत्नविनिवेशनेन उत्कीर्णं उल्लिखितं रत्नरचितमित्यर्थः नामधेयं यत्राभिधानं यस्मिंस्तत् अत एव राजकीयं राजसम्बन्धि 'राज्ञः कच' इति छप्रत्ययसन्नियोगेन कादेशः । अंगुलौ भवमंगुलीयं 'जिह्वामूलांगुलेश्छः' । समासादितं संप्राप्तं । भीतैर्नाटितकैनाभि-

पुरुषः—(भीतिनाट्यितकेन।) [1]पशीदन्तु भावमिश्शा। हगे ण ईरिशकम्मकाली।

रक्षिणोःप्रथमः—[2]किं खु शोभणे बह्मणेत्ति कलिअ रण्णा पडिग्गहे दिण्णे?।

पुरुषः—[3]शुणुह दाणिं। हगे शक्कावदालतित्थवासी धीवले।

द्वितीयः—[4]पाडच्चल किं अह्मेहिं जादी दे पुच्छिदा?।

स्थानः—[5]सूअअ कहेदु सव्वं अणुक्कमेण। मा णं अन्तला पडिबडेह्।

---

[1]प्रसीदन्तु भावमिश्राः। अहं नेदृशकर्मकारी।

[2]किं खलु शोभनो ब्राह्मण इति कृत्वा राज्ञा प्रतिग्रहो दत्तः?।

[3]शृणुतेदानीम्। अहं शक्रावतारतीर्थवासी धीवरः।

[4]पाटच्चर किमस्माभिर्जातिस्ते पृष्टा?।

[5]सूचक कथयतु सर्वमनुक्रमेण। मैनमन्तरा प्रतिबध्नीतम्।

नयेन भयमभिनीयेति यावत्। भावमिश्रा इति नागरिकं प्रति पूजानिर्देशः। प्रसीदन्तु-न कुप्यन्तु। ईदृशं राजस्वापहारूपं कर्म करोतीति तथा भूता नास्मि 'सुप्यजाता' वितिवत्। रक्षिणोः प्रथमः एकतरस्सूचको नाम। शोभनः अभिजनविद्यावृत्तादि-गुणोपेतः ब्राह्मण इति कृत्वा निश्चित्य; क्रियासामान्यपरोऽपि कृञत्र क्रियाविशेषमा-चष्टे। तथा च न्यायसप्ततीव्याख्यायां 'करोति स्वानुभवार्थकः। अत एव देवदत्तो दुःखमनुभवतीत्यर्थे दुःखं करोतीति प्रयोगः' इत्युक्तं। प्रतिगृह्यत इति प्रतिग्रहो दक्षिणा। दत्तः किमेतत् पात्रदानमित्यर्थः। अस्तेयेन कथमिदं हस्तगतं तवेति भावः। शक्रावतारे शक्रावतारास्ये तीर्थे राज्ञाया अवतारविशेष वसतीति तथाभूतः तीरवासीति पाठान्तरं शक्रावताराभ्यन्तरवासीति पाठस्त्वभ्यन्तरवासस्यासम्भवान्न साधुः। पाटयन्विदलयंश्चर-तीति पाटच्चरः स्तेनः पृथोदरादिः। जातिरिति— अंगुलीयकगमे पृष्टे धीवर इति जाति-मुत्तरयन्न पृष्टप्रतिवचनं ददातीति भावः। अनुक्रमेण जातिवृत्त्यादिक्रमेण सर्वं अंगुली-यकलाभान्तं वृत्तान्तं। अन्तरा मध्ये मां प्रतिबध्नीतं अवान्तरवाक्यप्रतिक्षेपेण वचनगतिं

उभौ—[1]जं आवुत्तो आणवेदि ।

(इति तूष्णीं तिष्ठतः ।)

स्यालः—[2]कहेहि कहेहि ।

पुरुषः—[3]हगे जालुग्गालादीहिं मच्छबन्धणोवाएहिं कुडुम्बभलणं कलेमि ।

स्यालः—(विहस्य ।) [4]विसुद्धो दाव दे आजीवो ।

पुरुषः—[5]भट्टा सुणोदु ।

[6]सहए किल जे विणिंदिए ण खु दे कम्म विवज्जणीअए ।
पसुमाळगकम्मदारुणे अणुकंपामिदु एव्व सोत्तिए ॥१॥

---

[1]यदावुत्त आज्ञापयति ।

[2]कथय कथय ।

[3]अहं जालोद्धारादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि ।

[4]विसुद्धस्तावत्ते आजीवः ।

[5]भर्ता शृणोतु ।

[6]सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम् ।
पशुमारणकर्मदारुणः अनुकंपामृदुरेव श्रोत्रियः ॥

न निवार्यते । श्रोत्रियस्तु पुनरेषु मध्ये प्रातरोधाद्वचनगतिर्न प्रसरतीति भावः । प्राकृते आवुत्तेति गौरवस्यूपचारः । तथा च मालविकाग्निमित्रे पितरमग्निमित्रं प्रति वसुलक्ष्म्यास्सम्बोधनं । जालं आनायः उद्धारः मत्स्योद्धरणोपहविशेषः । आदिपदेन बडिशादयो गृह्यन्ते । मत्स्यबन्धनोपायैः मत्स्यग्रहणसाधनैः कुटुम्बस्य भरणं पोषणं । ते तव आजीवः वृत्तिः तावत् साकल्येन विशुद्धः निर्दोषः विपरीतलक्षणा । भट्टेति राजपुरुषगौरवात् ॥

सहजे इति । विनिन्दितं प्रतिषिद्धमपि यत् कर्म सहजं कुलागतं तत् कर्म व्यापारः न खलु विवर्जनीयं न कस्यापि हेयं निन्दितेनापि हि स्वधर्मेण वृत्तिर्न दुष्यति येन नोपहासावसर इति भावः । तथथा अनुकम्पया दयया मृदुस्सरलहृदय एव

स्यालः—[1]तदो तदो ।

पुरुषः—[2]अह एक्कट्ठिंश दिअशे खण्डशो लोहिअमच्छे मए कप्पिदे । तश्श उदलब्भन्तले एदं लअणभाशुलं अंगुळीअअं दक्खिअ पच्छा शे बिक्कअस्स दंशअन्ते हगे गहीदे भावमिश्शेहिं । मालेह वा मुच्चेह वा । अअं शे आअमो ।

---

[1]ततस्ततः ।

[2]अथैकस्मिन्दिवसे खण्डशो लोहितमत्स्यो मया कल्पितः । तस्योदराभ्यन्तरे इदं रत्नभासुरमङ्गुळीयकं दृष्ट्वा पश्चादस्य विक्रयाय दर्शयन् अहं गृहीतो भावमिश्रैः । मारयत वा मुञ्चत वा । अयमस्यागमः ।

श्रोत्रियः ब्राह्मणः 'श्रोत्रियश्छन्दोऽधीते' इति निपातनात् साधुः । पशोर्यज्ञियस्य मारणकर्मणि संज्ञपनरूपे धर्मे दारुणः निष्ठुरः । यज्ञा नामानृशंस्यधर्मणो ब्राह्मणस्यापि यज्ञपशोर्विषये नृशंसकर्मापि स्वधर्मत्वादपरिहार्यं किं पुनस्तदा मद्विधस्येति भावः । अनेन नाहं पापकारी येन मयि स्तेयमाशंक्येतेति व्यज्यते । विशेषेण सामान्यसमर्थनमर्थान्तरन्यासः । **वियोगिनी वृत्तम् ॥**

तदो तदो इति वृथाकथां वारयितुं । अथैवं कुटुम्बभरणे क्रियमाणे । रोहितो मत्स्यविशेषः 'रोहितं कुंकुमे रक्ते कनौ शक्रशरासने । पुंसि स्यान्मीनमृगयोर्भेदे नारोहितद्रुमे' इति मेदिनी । खण्डशः कल्पितः खण्डीकृतः खण्डशः कृत इति पाठान्तरम् । तस्य खण्डितस्य मत्स्यस्योदरस्य जठरस्थानस्याभ्यन्तरेऽन्तर्भागे रत्नैर्भासुरं दीप्यमानं इदमंगुळीयकं दृष्ट्वा पश्चात् दर्शनानन्तरं विक्रयाय विक्रेतुं 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । दर्शयन् सन् भावमिश्रैर्धृष्यामिः गृहीतः स्तेन इति बद्धः मत्स्यग्राहिणा मत्स्यान्तरुपलब्धस्य ग्रहणं स्तेयन्न भवतीति भावः । मारयत स्तेयदोषमारोप्य हिंसतवा मुञ्चत आजीवेन सह लब्धमस्तेयमिति न हिंसतवेत्यर्थः । अस्यांगुलीयकस्यायमुत्तरूप एवागमः प्राप्तिमार्गः न तु स्वदोषनिह्नवाय यत्किंचिदुच्यत इति भावः । आगमवृत्तान्त-

स्थालः—[1]जाणुअ विस्सगन्धीघोलाकिदी मच्छबन्धो एव्व णिस्संसअं । अङ्गुळीअअदंसणं से विमरिसिदव्वं । ताळाअकुळं एव्व गच्छह्यो ।

रक्षिणौ—[2]तह । गच्छ अळे गन्धिभेअअ ।

(इति सर्वे परिक्रामन्ति ।)

स्थालः—[3]सूअअ इमं गोउरदुवारे अप्पमत्ता पडिवाळेह । जाव इदं अङ्गुळीअअं जहागमणं भट्टिणो णिवेदिअ तदो से सासणं पडिच्छिअ णिक्कमामि ।

[1]जानुक विस्रगन्धिघोराकृतिर्मत्स्यबन्ध एव निस्संशयम् । अङ्गुळीयकदर्शनमस्य विमर्शयितव्यम् । तद्राजकुलमेव गच्छामः ।

[2]तथा । गच्छारे ग्रन्थिभेदक ।

[3]सूचक इमं गोपुरद्वारे अप्रमत्तौ परिपालयतं । यावदिदमङ्गुळीयकं यथागमनं भर्त्रे निवेद्य ततोस्य शासनं प्रतीप्य निष्क्रमामि ।

इति पाठान्तरं । विस्रस्य पर्युषितपक्वस्येव गन्धो यस्य सः विस्रगन्धिः 'उपमानाच्च' इति गन्धस्येत् । 'विस्रं स्यादामगन्धि यत्' इत्यमरः । घोराकृतिः विकृतरूपः मत्स्यान् बध्नातीति मत्स्यबन्धः भवति भवितुमर्हति गन्धाकृतिभ्यां सम्भाव्यत इत्यर्थः । गोघातीति न युक्तः पाठः गोघातस्य घीवरव्यापारबहिर्भावात् । अस्य पुरुषस्य अंगुलीयकदर्शनं राजांगुलीयकप्राप्तिः विमर्शयितव्यं किमेतदुत्तमप्रकारेण उतवा अन्यथा स्यादिति विचारणीयं । तस्मात् विमर्शनीयत्वात् राजकुलं राजभवनमेव गच्छामः यत्र निर्णेष्यत इति भावः । अरे इति हीनसम्बोधनं । ग्रन्थिं कुब्जादिसन्धिं मंजूषादिमुखबन्धं वा भिनत्तीति ग्रन्थिभेदकश्चोरः । पुरस्य राजगृहस्य 'अगारं नगरं पुरं' इत्यमरः द्वारे निर्गमे अप्रमत्तौ अवहितौ परिपालयतं यथा नायमतिक्रामेत् तथा रक्षतं । इदमंगुलीयकं आगमनमनतिक्रम्य यथागमनं यथास्माभिरुपलब्धं तथेत्यर्थः । शासनं राजाज्ञां प्रतीप्य

उभौ—[1]पविशदु आवुत्तो शामिप्पशादाआ ।

(निष्क्रान्तस्खालः ।)

प्रथमः—[2]जाणुअ चिराअदि खु आवुत्तो ।

द्वितीयः—[3]णं अवशळोवशप्पणीआ ळाआणो ।

प्रथमः—[4]जाणुअ फुळन्ति मे हत्था इमश्श वज्झश्श सुमणशो पिणद्धुं ।

(इतिपुरुषं निर्दिशति । (

पुरुषः—[5]णाळुहदि भावे अकाळणामाळणे होदुं ।

द्वितीयः—(विलोक्य ।) [6]एशे अह्माणं शामी गह्हिअ ळाअशाशणं इदोमुहं देक्खदि । तदो तुमं गिद्धबळी भविश्शशि ।

---

[1]प्रविशत्वावुत्तः स्वामिप्रसादाय ।

[2]जानुक चिरायति खल्वावुत्तः ।

[3]नन्वसरोपसर्पणीया राजानः ।

[4]जानुक स्फुरतो मे हस्तौ अस्य वध्यस्य सुमनसः पिनद्धुं ।

[5]नार्हति भावः अकारणमारणो भवितुम् ।

[6]एषोऽस्माकं स्वामी गृहीत्वा राजशासनमितोमुखं पश्यति। ततस्त्वं गृध्रबलिर्भविष्यसि ।

प्रतिगृह्य निष्क्रामामि निर्गच्छामि तावत् परिपालयतमिति पूर्वेण सम्बन्धः । स्वामिप्रसादाय अंगुलीयकं दर्शयित्वा राजानुग्रहं प्राप्तुं । चिरायति विलम्बते । अवसरे युक्तकाले उपसर्पणीयाः उपगन्तव्याः । अवसरप्रतीक्षया । विलम्ब इति भावः । वध्यस्य स्तेयदण्डार्थं हन्तव्यस्य अस्य कुम्भीलकस्य सुमनसः वध्यालङ्कारपुष्पाणि पिनद्धुं शिरसि बद्धुं स्फुरतः स्वरेते । पुरुषे धीवरं निर्दिशति अस्येत्यंगुल्या दर्शयति । अकारणमनिमित्तं मारणो घातकः निरागसि न दण्डः प्रणेतव्य इत्यर्थः । स्वामी स्यालः । गृहीत्वेति नागृहीतशासनः प्रत्यागच्छतीति भावः । पत्तहत्थो इत्यधिकपाठे राजशासनं पत्रं हस्ते धारयन्नित्यर्थः । इतोमुखं अस्मदभिमुखं गृध्रेभ्यो बलिः उपहारः 'कोपहारयोः पुंसि बलिः' इत्य-

(प्रविश्य स्थालः ।)

स्थालः—[1]सूअअ मुच्चिअदु एसो जालोवजीवी । उववण्णो किलसे अङ्गुलीआअमो ।

प्रथमः—[2]जह आवुत्तो भणादि ।

द्वितीयः—[3]एशे जमसदणं पविशिअ पडिनिवुत्त ।

(इति पुरुषमुन्मुक्तबन्धनं करोति ।)

पुरुषः— (स्थालं प्रणम्य ।) [4]भट्टा तुह्मकेलए मे जीविदे ।

स्थालः—[5]एसो भट्टिणा अङ्गुलीजअमुल्लसम्मिदो अत्थो पारितोसिओ पदाविदो ।

---

[1]सूचक मुच्यतामेष जालोपजीवी । उपपन्नः किल अस्याङ्गुलीयकस्यागमः ।

[2]यथा आवुत्तो भणति ।

[3]एष यमसदनं प्रविश्य प्रतिनिवृत्तः ।

[4]भर्तः युष्मदीयं मे जीवितम् ।

[5]एष भर्त्रा अङ्गुलीयकमूल्यसम्मितोऽर्थः पारितोषिकः प्रदापितः ।

मरः । चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरिति समासः । सुणो वा मुहं दक्खिस्ससि (शुनोवा मुखं द्रक्ष्यसि) इति क्वचिदधिकः पाठः अवश्यं भावी ते वध इति भावः । जालं उपजीवति आश्रयते इति जालोपजीवी न तु स्तेन इति भावः । मुच्यतां न दण्डमर्हतीत्यर्थः । अयं धीवरोक्तरूपः आगमः प्राप्तिप्रकारः मत्स्योदरोपलम्भरूप इत्यर्थः । उपपन्नः न्याय्यः अस्य शक्रावतारतीर्थवासित्वात् शकुन्तलयापि तत्रैवांगुलीयकपातस्य कथनादिति भावः । यमसदनं मृत्योर्गृहं प्रविश्यान्तर्गत्वैव प्रतिनिवृत्तः प्रत्यागतः दृष्टापराधस्तु मुक्तो मृत इव प्रत्युज्जीवित इत्यर्थः । युष्मदीयं अपहर्तुं मोक्तुं वायूयं प्रभवथेति भावः । अह केलिसे मे आजीवे (अथ कीदृशो म आजीवः) इति पाठे विशुद्ध आजीव इति रक्षिणः पूर्वोपहासप्रतिवचनं विमोचनेन निरपराध त्वादद्रुह्यो ममायमाजीव इति भावः । अंगुलीयकमूल्येन सम्मितस्सदृशः मूलेन व्यवहर्तव्यद्रव्येण प्राप्यं मूल्यं

(इति पुरुषायाथ प्रतिः)

पुरुषः—(सप्रणामं प्रतिगृह्य।) [1]भट्टा अणुग्गहीद म्हि।

सूचकः—[2]एशे णाम अणुग्गहीदे। जे शूलादो ओदाळिअ हत्थिक्कन्धे पडिट्ठाविदे।

जानुकः—[3]आवुत्त पारिदोशिअं एव्वन कहेदि। तेण अङ्गुळी अअएण भट्टिणो सम्मदेण होदव्वत्ति।

स्थालः—[4]ण तस्सिं महारुहं रदणं भट्टिणो बहुमदंति तक्केमि।

---

[1]भर्तः अनुगृहीतोऽस्मि।

[2]एष नामानुगृहीतः यश्शूलावतार्य हस्ति स्कन्धे प्रतिष्ठापितः।

[3]आवुत्त पारितोषिकमेव कथयति तेनाङ्गुळीयकेन भर्तुस्सम्मतेन भवितव्यमिति।

[4]न तस्मिन् महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि। तस्य दर्श-

---

नौवयोधर्मविषमूलमूलसीता तुलाभ्यस्तार्थतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु' इति यत्प्रत्ययः। अर्थः द्रविणं। पारितोषिकः प्रीतिदानं। पुरुषाय धीवराय। अथ राजदत्तं धनं। एषनाम धीवरएव खलु अनुगृहीतः कृतप्रसादो भवति। शूलात् वध्यशङ्कोः अवतार्यावरोप्य हस्तिस्कन्धे गजस्कन्धपीठे प्रतिष्ठापितः उपवेशितः अश्वानां पृष्ठं गजानाञ्च स्कन्धः स्थानमुपवेशस्य। तथा च रामायणे 'गजस्कन्धेश्वपृष्ठे च' इति। न केवलं वध्यस्य वधदण्डनिवृत्तिरेव प्रत्युत पारितोषिकमपीति महाननुग्रह इत्यर्थः। वाक्यार्थवृत्तिनिर्देशनालङ्कारः। संमतेन आदरविशेषविषयेण अन्यथा हि सापराधस्य दण्डो निरपराधस्य मोक्ष इत्येतावदेव प्राप्तं यत् पुनरस्य दृष्टापराधस्य उत्सवेष्विव मोचनं ततश्च पारितोषिकमपि तदेव दर्शयति राज्ञो महोत्सवहेतुरयमिति भावः। शर्मदेनेतिच्छायापाठे तु सुखप्रदेनेत्यर्थः। महानर्हो मूल्यं यस्य तत् महार्हं 'आन्महतः समानाधिकरणजातीययोः' इत्यादादेशः। बहुमतं आदृतं। न तर्कयामि न मन्ये। तस्याङ्गुलीयकस्य। कोपि अस्मदपरिज्ञातः अभिमतः प्रियो जनः भर्त्रा राज्ञा स्मृतः प्रत्यभिज्ञातः नान्यो

तस्स दंसणेण कोवि अभिमदो जणो भट्टिणा सुमरिदो । जं मुहुत्तअं पकिदिगम्भीरो वि पज्जस्सुणअणो आसी ।

सूचकः—[1]शेविदं णाम आवुत्तेण ।

जानुकः—[2]णं भणाहि । इमश्श किदे मच्छशत्तुणोत्ति

(पुरुषमसूयया पश्यति ।)

पुरुषः—[3]भट्टा इदो अद्धं तुम्हाणं सुमणोमुल्लं होदु ।

तेन कोऽप्यभिमतो जनः भर्त्रा स्मृतः । यन्मूहूर्तं प्रकृतिगम्भीरोऽपि पर्यश्रुनयन आसीत् ।

[1]सेवितं नाम आवुत्तेन ।

[2]ननु भण । अस्य कृते मत्स्यशत्रोरिति ।

[3]भर्तः इतोऽर्धं युष्माकं सुमनोमूल्यं भवतु ।

हेतुः तावतो बहुमानस्येति भावः उक्तं च रघुवंशे 'स तुल्य पुष्पाभरणो हिधीरः' इति । प्रकृत्यागम्भीरः अक्षोभ्यः सन्नपि परिगतानि अश्रूणि यथोस्तादृशं नयने यस्य सः शोकहर्षादिभिरनभिभाव्यस्याप्यश्रुहेतुः प्रियजनस्मरणादन्यो न भवतीति भावः । आवुत्तेन तादृशमभिमतं द्रव्यमुपहरता सेवितत्वापसेवाफलमवाप्तं खल्वित्यर्थः । मत्स्यशत्रोः कृते धीवरार्थमिति भण ब्रूहि सेवाफलं पारितोषिकमनेन हि लब्धमिति भावः । मत्स्यशत्रोरित्यनेन निरपराधजीवघातात् वधार्हत्वं व्यज्यत पारितोषिकद्रव्यादुत्कोचग्रहणार्थमेवमुक्तं । मच्छियाभत्तुणो [मत्स्यिकाभर्तुः] इति पाठे मत्स्यसजातीयस्येति सोपहासवचनं व्याख्येयं । असूयया द्रव्यलाभामर्षेण पश्यति निमित्तान्तरं द्रक्ष्यामीति दर्शनाभिप्रायः । इतः राजप्रसाददव्यात् अर्धं कश्चिदंशः प्राकृतत्वात् लेशमात्रार्थेपि नपुंसकत्वमविरुद्धं समांश इत्यपि शक्यं व्याख्यातुं । सुमनोमूल्यं सौमनस्यनिष्क्रयः इतः प्रभृति मयि सौहार्देन वर्तनार्थं धनमिति यावत् राजनिवेदनोपकारप्रत्युपकारोवा । अत्रायं सुमनश्शब्दो भावप्रधानः । यत्तु सुमनसां पुष्पाणां वध्यस्य इति यावत् मूल्यं 'फुल्लन्ति मे हत्था इमश्श पज्जारश्श सुमणो पिणद्धुं' इति जानुकवाक्यस्य सावहेलमुत्तरमिति व्याख्यानं तत्र वध्यस्य कृतानुग्रहस्य राजपुरुषे गर्हायस्युपहासानौचित्यं चिन्त-

जानुकः—[1]एदं जुज्जइ ।

स्थालः—[2]धीवर महत्तरो पिअवअस्सो दाणिं मे संवुत्तो कादम्बरीसाक्खअं अम्हाणं पुडमसोहिदं इच्छीअदु । ता सोण्डिअ आपणं एव्व गच्छम्ह ।

(इति निष्क्रान्ताः सर्वे ।)

॥ प्रवेशकः ॥

(ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः ।)

सानुमती—[3]णिव्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थमंणिज्झं जाव साहुजणस्स अभिसे अकालोत्ति । संपदं इमस्स राएसिणो

---

[1]एतद्युज्यते ।

[2]धीवर महत्तरः प्रियवयस्य इदानीं मे संवृत्तः । कादम्बरीसाक्षिकमस्माकं प्रथमसौहृदमिष्यतां । तच्छौण्डिकापणमेव गच्छामः

[3]निर्वर्तितं मया पर्यायनिर्वर्तनीयमप्सरस्तीर्थसान्निध्यं यावत्साधीयं । एतत् विभागार्पणं युज्यते न्याय्यं भवति । त्वया मत्स्योदराद्धं त्वत्तश्चास्माभिरुपलब्धमिति वयमप्यत्रांशमर्हाम इति भावः । एत्तके इति पाठे एतावान् गरीयानेश इत्यर्थः । युज्यते अल्पांशस्तु नास्माभिर्ग्राह्य इति भावः । महत्तरः श्रेयान् प्रियवयस्यः अभिमतस्सखा इदानीं द्रव्ये संविभक्ते सति संवृत्तस्सञ्जातः । कादम्बरी मदिरा साक्षिणी साक्षाद्द्रष्ट्री यस्य तत् कादम्बरीसाक्षिकं प्रथमसौहृदं अभिनवसख्यं इष्यतां क्रियतां इष्यत इति पाठान्तरं सपीतिरेव सौहार्दसम्भावनमिति भावः । शुण्डा सुरा पण्यमस्येति शौण्डिकः 'शुण्डा पानगृहे मता । अभ्युद्धरस्तिनि वेश्यासु हस्तिहस्तासुरासु च' इति मेदिनी 'तदस्य पण्यं' इति ठक् । तस्यापणं निपद्यामेव ॥

एवमभिज्ञानदर्शनादपेतशापस्य परिणयस्मरणं राज्ञः प्रस्तुतं अथ शकुन्तलाया आशाबन्धाय शकुन्तलासख्यास्सानुमत्या नामाप्सरसो राजविग्रहदर्शनं प्रस्तूयते । आकाशयानेन ऊर्ध्वमार्गेण । अप्सु सरतीत्यप्सराः उदधेर्हि निर्मथिता दक्षसुतां जन्म । यतः

उत्तंतं पच्चक्खीकरिस्सं । णंमेणआसम्बन्धेण सरीरभूदा मेसउन्दला । ताए अ दुहिदुणिमित्तं आदिट्ठपुव्वाम्हि । (समन्तादवलोक्य ।) किं णु खु उदुच्छवकाले वि णिरुच्छवारम्भं विअ एदं राअउलं दीसइ । अत्थि मे विहवो पणिधाणेण सव्वं परिण्णादुं । किं तु सहीए आअरो मए माणइदव्वो । होदु । इमाणं दाव उज्जाणपालिआणं तिरक्खरि-

---

धुजनस्याभिषेककाल इति । साप्रतमस्य राजर्षेर्वृत्तान्तं प्रत्यक्षीकरिष्यामि । ननु मेनकासम्बन्धेन शरीरभूता मे शकुन्तला । तया च दुहितृनिमित्तमादिष्टपूर्वास्मि । किं नु खलु ऋतूत्सवकालेऽपि निरुत्सवारम्भमिव राजकुलं दृश्यते । अस्ति मे विभवः प्रणिधानेन सर्वं परिज्ञातुं । किं तु सख्या आदरो मया मानयितव्यः । भवतु । अनयोस्तावदु-

---

तीर्थसान्निध्याधिकारः एकवचनोपपत्तिः प्रथमाङ्के समर्थिता । पर्यायेण वारक्रमेण निर्वर्तनीयं संपादनीयं अप्सरस्तीर्थे अप्सरस्तीर्थाख्ये पुण्ये गङ्गावतारविशेषे सान्निध्यमधिष्ठानं मया निर्वर्तितं समासो मत्पर्याय इत्यर्थः । साधुजनस्य मुनिजनस्याभिषेककालः स्नानसमयः देवताधिष्ठानादेव पवित्रत्वादिति भावः । राजर्षेरुदन्तं शकुन्तलाप्रत्यादेशादनन्तरवृत्तान्तं प्रत्यक्षीकरिष्यामि प्रत्यादिश्यापि किमनुतप्यते नवेति तत्त्वतो ज्ञास्यामीत्यर्थः । मेनकायास्सम्बन्धेन दुहितृत्वरूपेण । शरीरमिव शरीरभूता प्रियसखीत्यर्थः । तया मेनकया दुहितृनिमित्तं स्वसुतायाः शकुन्तलायाः कृते आदिष्टपूर्वा प्रथममेवाज्ञापिता मेनकासम्बन्धो मेनकावचनं च निमित्तं मे राजप्रवृत्तिसाक्षात्कारस्येत्यर्थः । ऋतूत्सवकालेऽपि वसन्तोत्सवावसरेऽपि उत्सवेऽपि [उत्सवेऽपि] इति पाठान्तरं निरुत्सवारम्भं दोलाधिरोहकुसुमापचयाद्युत्सवव्यापाराशून्यं 'उत्सवो हर्षमित्येष उत्सवः परिकीर्तितः' इत्युत्सवशब्दव्युत्पत्तिः । राजकुलं राजगृहं । प्रणिधानेन चित्तसमाधानेन । सर्वं परोक्षमपरोक्षं वा । विभवः शक्तिः देवतात्वादिति भावः । सख्याः शकुन्तलायाः आदरः अभिलाषः मानयितव्यः यत्नेन संपादनीयः निमित्तादिवत् प्रणिधानदर्शनं नालं सखीविसम्भायेति

णीपडिच्छण्णा पस्सपरिवट्टिणी भविअ उवलंभिस्सं ।

(इति नाट्येनावतीर्य स्थिता ।)

(ततः प्रविशति चूतांकुरमवलोकयन्ती चेटी । अपरा च पृष्ठतस्तस्याः ।)

प्रथमा—[1]चूअं हरिसिअपिअअं जीविदसरिसं वसन्दमासस्स ।
सद्दरणचरणभग्गं उदुमङ्गलं विअ पेक्खामि ॥२॥

द्यानपालिकयोस्तिरस्करिणीप्रतिच्छन्ना पार्श्ववर्तिनी भूत्वोपलप्स्ये ।

[1]चूतं हर्षितपिकं जीवितसदृशं वसन्तमासस्य ।
षट्चरणचरणभग्नमृतुमङ्गलमिव पश्यामि ॥

भावः । पार्श्वपरिवर्तिनी समीपस्थिता । तिरस्करिण्या नाम तिरोधानविद्यया प्रतिच्छन्ना परैरदृश्या सती तावत् कौतूहलेन उपलप्स्ये उत्सवनिवृत्तिहेतुं ज्ञास्यामि । नाट्येनावतीर्य विभ्रमादरोहणमभिनीय । चूतांकुरं चूतवल्लिकाम् ॥

चूअमिति । हर्षिताः मदं प्रापिताः पिकाः कोकिलाः येन तत् वसन्तमासस्य चैत्रस्य जीवितसदृशं प्राणवन्मुख्यतमं षट्चरणानां भ्रमराणां चरणैः पादाक्रमणैः भग्नं विदलितं उच्छ्रिंदतामिति यावत् । अनेन पिकासात् पूर्वमेव प्रथमसौरभलोलुपानां मधुपानामापातो व्यज्यते । चूतमाम्रकुसुमं ऋतोर्वसन्तस्य मङ्गलं प्रारम्भनान्दीमिव वासन्तिककुसुमेषु प्राथम्यात् कुसुमाञ्जलिप्रकाश्यस्य च नान्दीलक्षणत्वादिति भावः । पश्यामि उत्प्रेक्षे पिकषट्चरणप्रमदातिरेकेण चूतकुसुमस्य वसन्तकुसुमेषु प्राथम्यमभ्यर्हितत्वं च व्यज्यते । षट्चरणचरणभग्नमित्यनेन भ्रमराणां नटसाधर्म्यं हर्षितपिकमिति च पिकानां सामाजिकौपम्यं सम्भूय च वसन्तावतारत्व नाट्यसादृश्यं प्रतीयते । 'आअंमहरिअपहुर वसंदमासस्स जीअसव्वस्स । दट्ठोसि चूदकोरअ उदुमङ्गळं तुमं पसादेमि' ॥ [आताम्रहरितपाण्डुर वसन्तमासस्य जीवसर्वस्व । दृष्टोऽसि चूतकोरक ऋतुमङ्गळं त्वां प्रसादयामि ॥] इति पाठे आताम्रः केसरादिषु रक्तः बहिर्दलेषु हरितः अन्तर्दलेषु च पाण्डुरः तस्य सम्बुद्धिः वसन्तमासस्य जीवसर्वस्व जीवितसार हे चूतकोरक दृष्टः आविर्भूतोऽसि ऋतोर्मङ्गळभूतं त्वां प्रसादयामि उत्सवार्थमभ्यर्थय इत्यर्थः । आर्या वृत्तम् ।

द्वितीया—[1]परहुदिए किं एअइणी मन्तेसि ? ।

प्रथमा—[2]महुअरिए चूतकलिअं दक्खिअ उम्मत्तिआ कु परहुदिआ होदि ।

द्वितीया— (सहर्षं त्वरमाणोपगम्य ।) [3]कहं उवट्ठिदो महुमासो ।

प्रथमा—[4]महुअरिए तुह दंसणि कालो एसो मदविब्भमगीदाणं ।

द्वितीया—[5]सहि ओलम्बेसु मं जाव अग्गपादट्ठिआ भविअ कामदेवच्चणस्स चूअंकुरावअअं करोमि ।

---

[1]परभृतिके किमेकाकिनी मन्त्रयसे ? ।

[2]मधुकरिके चूतकलिकां दृष्ट्वा उन्मत्ता खलु परभृतिका भवति ।

[3]कथमुपस्थितो मधुमासः ।

[4]मधुकरिके तवेदानीं काल एष मदविभ्रमगीतानाम् ।

[5]सखि अवलम्बस्व मां यावदग्रपादस्थिता भूत्वा कामदेवार्चनाय चूतांकुरापचयं करोमि ।

प्रथमा परभृतिका । द्वितीया तु मधुकरिका । एकाकिनी असहाया सती 'एकादाकिनिच्चासहाये' मन्त्रयसे जल्पसि द्वितीया तु पादाग्रगता न दृष्टा प्रथमयेत्यत उक्तमेकाकिनीति । उन्मत्ता विभ्रान्तचित्ता खलु । चूतकलिकादर्शनेन परभृतिकायाः चित्तविकारो न चित्रमिति भावः । अत्र परभृतिका पदश्लेषः चमत्कारी । कथमिति हर्षे । उपस्थितः संप्राप्तः मधुमासः चैत्रः 'मधुश्च माधवश्च वासन्तिकावृतू' इति श्रुतेः । ते तव मदविभ्रमगीतानां मधुमदविलासभवानां गानानां एष मधुमासः कालः प्रारम्भसमयः चूतकालश्चमासाद्य मधुमतायां भ्रमर्यां इव वसन्तोत्सवप्रमुदितायस्त्वयापि मधुकरिकाया गानसमयोयमित्यर्थः । अवलम्बस्व धारय । अग्रे चासौ पादश्चाग्रपादः तेन पादाग्रेण एकदेशस्य समुदायोपचारात् कर्मधारयः । कामदेवार्चनाय मन्मथरूपाभीष्टदेवतामर्चयितुं । अपचयमादानं यावत् करोमि तावदवलम्बस्वेति सम्बन्धः ।

प्रथमा—[1]जइ मम वि अद्धं अच्चणफलस्स ।

द्वितीया—[2]अकहिदे वि एदं संपज्जइ । जदो एक्कं एव्व णो जीविदं दुहा ट्ठिदं सरीरं । (सख्यावलम्बिता चूतांकुरं गृह्णाति ।) अण्ण अप्पडिबुद्धो वि चूदप्पसवो एत्थ बन्धणभङ्गसुरभी होदि ।

(इति कपोतं कृत्वा ।)

---

[1]यदि ममाप्यर्थमर्चनफलस्य ।

[2]अकथितेऽप्येतत्संपद्यते । यत एकमेव नौ जीवितं द्विधा स्थितं शरीरम् । अये अप्रतिबुद्धोऽपि चूतप्रसवोऽत्र बन्धनभङ्गसुरभिर्भवति ।

अर्चनफलस्य मन्मथाराधनसुकृतस्यार्धं भागः ममापि यदि तदावलम्ब्य इति विपरिणामेनानुषङ्गः । अभणिते अनुक्तेऽपि सति एतत् पूजाफलं एवं उभयोस्साधारणमेव संपद्यते पर्यवस्यति । यतो निमित्तात् । जीवितमेकं एकप्राणात्मा । शरीरन्तु शरीरमेव पृथं द्विधा स्थितं परेषां रूपभेदेन दृश्यं भवति । न त्वावयोरन्तरापि भेद इत्यर्थः । तस्मादात्मगामिनि सुकृते साधारण्यं अविप्रतिपन्नमिति भावः । सख्योरभिन्नसुखदुःखत्वं आत्मैक्यनिमित्तमवगन्तव्यं : सख्या परभृतिकया अवलम्बिता धृता सती सखीमवलम्ब्येति पाठान्तरं । अहो आश्चर्यं अप्राप्तविबुद्धोपि अप्राप्तविकासोपि चूतप्रसवः चूतपुष्पं अत्रास्मिन्नुद्याने बन्धनभङ्गेन वृन्तच्छेदमात्रेण सुरभिः सुगन्धिः । अनेन कलिकायाश्चिरनिर्गतत्वं वक्ष्यमाणं व्यज्यते । अत्र चूतप्रसवशब्देन राजा व्यज्यते । शकुन्तलाविस्मरणादप्रतिबोधः बन्धनभङ्गसुरभिरित्यनेन अभिज्ञानदर्शनजनितेन शापमोक्षेण स्निग्धहृदयत्वं प्रतीयते । कपोतं कामदेवप्रणाम व्यञ्जकं संयुतहस्तविशेषं । यथाह भरतः 'उभाभ्यामपि हस्ताभ्यामन्योन्यं पार्श्वसंग्रहात् । हस्तः कपोतको नाम कर्मचास्य निबोधत । विनयोपगमे चैवप्रणामकरणे तथा । गुरोस्सम्भाषणे चैव कपोतः परिकीर्तित' इति । अन्यत्र च 'सर्वपार्श्वसमाश्लेषात् कपोतस्सर्पशीर्षकः । भीतौ विज्ञापने चैव विनये च प्रयुज्यते' इति ।

[1]तुं सि मए चूअंकुर दिण्णो कामस्स गहिदधणुअस्स ।
परिकुविदतवइलक्खो पञ्चब्भहिओ सरो होहि ॥ ३

(इति चूतांकुरं क्षिपति ।)

(प्रविश्य पटाक्षेपेण कुपितः कञ्चुकी ।)

कञ्चुकी—मा तावत् । अनात्मज्ञे प्रतिषिद्धे वसन्तोत्सवे त्वमात्रकलिकाभङ्गमारभसे।

उभे—(भीते ।) [2]पसीददु अज्जो । अगहीदत्था वअं ।

---

[1]त्वमसि मया चूतांकुर दत्तः कामाय गृहीतधनुषे ।
परिकुपितयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भव ॥
[2]प्रसीदत्वार्यः अगृहीतार्थे आवाम् ।

तुंसीति । हे चूताङ्कुर त्वं गृहीतधनुषे नववसन्तागमादुपात्ताभिनवपुष्पचापाय कामाय मन्मथाय मया दत्तस्समर्पितोसि । परिकुपिताः प्रणयिजनेष्वत्यन्तकलुषिताः । युवतयो लक्ष्यं शरव्यं यस्य सः, पहिअजणजुवइलक्खो (पथिकजनयुवतिलक्ष्यः) इति पाठे प्रोषितभर्तृकावर्ग इत्यर्थः । पञ्चाभ्यधिकः कोमलतया निशिताग्रो विकस्वरादरविन्दादिबाणपञ्चकादधिकगुण इत्यर्थः । अथवा पञ्चसु बाणेषु अभ्यधिकः गुणोत्तर इत्यर्थः भव । सभानानामुत्तमश्लोको भवेति भावः । अनिवर्तनीयेष्वपि मानिनीमात्रेष्वकुण्ठशक्तित्वमेवात्राधिक्यम् । **आर्या** वृत्तम् ॥

पटाक्षेपेण राजशासनानुपालनसम्भ्रमादिति भावः । मा तावत् नैवंदंयुक्तं । अनात्मज्ञे स्वपरिमाणानभिज्ञे राजशासनानुरोधो हि परिजनेन ज्ञातव्य इति भावः । आरभसे अन्येन केनाप्यकृतं त्वमेव प्रथमं करोषीत्यर्थः । उभे परभृतिका मधुकरिका च । भीते मधुकरिकाया एव केवलं कञ्चुकिना शिक्षणेपि सख्योः प्रवृत्तिसाम्यादभिन्नसुखदुःखत्वाच्च द्वे अपि कतरीभूते इत्यर्थः । अगृहीतार्थे आवेदितवसन्तोत्सवप्रतिषेधरूपवि-

कञ्चुकी—न किल श्रुतं युवाभ्यां यदा वासन्तिकैस्तरुभिरपि-देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्त्रिभिश्च । तथा हि ।

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरबकं तत् कोरकावस्थया ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ॥ ४ ॥

षये । युवाभ्यां प्रतिबोधनीयमिति भावः । न किल श्रुतं राजशासनमश्रुतमिति कथमित्यर्थः । यदा यस्मिन् काले वासन्तिकैः वसन्ते पुष्पद्भिः 'कालात् साधुपुष्यत्-पच्यमानेषु' इति शेषिकष्ठाणः 'ओऽवसन्तादन्यतस्यामि'ति विभाषणात् पक्षे 'कालात् ठञ्' । तरुभिः चूतादिभिर्वृक्षैरपि अचेतनैरपीत्यर्थः । शासनं उत्सवप्रतिषेधरूपं प्रमाणीकृतं अनतिलङ्घितं । किञ्च तदाश्रयिभिः वृक्षाधिवासिभिः पत्त्रिभिः कोकिलादिभिः पक्षिभिश्च चेतनतया प्रवृत्तिक्षमैः तिर्यक्त्वेन शासनगोचरानभिज्ञैरपि चेति भावः । प्रमाणीकृतमित्यनुषज्यते कथं तर्हि युवाभ्यां न श्रुतमिति पूर्वेण सम्बन्धः । यद्वासन्तिकैरिति पाठे यत् राजशासनमित्यर्थः । तत्र किल श्रुतमिति सम्बन्धः ॥

चूतानामिति—चिरनिर्गतापि दीर्घेण कालेनाङ्कुरितापि चूतानां सम्बन्धिनी कलिका कोरकः स्वमात्मीयं रजः परागं न बध्नाति न सन्धत्ते येन नाद्यापूर्णमीलतीति भावः । यदपि कुरबकं कङ्केल्लिकुसुमं सन्नद्धं बद्धपरागं विकासोन्मुखमित्यर्थः । तत् कोरकावस्थया विकसिष्यदवस्थानेनैव स्थितं प्रभुशासनदशायां यद्यदवस्थारूढं तदिदानीमपि तदवस्थमेव भवतीति भावः । अनेन कुरबकस्य चूतात् प्राथम्यं गम्यते । तथा च मालविकामित्रेऽपि अत्र विकीर्णकुरबमिति कुरबककुसुमस्य पातमतीतं प्रस्तुत्य फल-जालकभिव्यमानसहकारमिति सहकारकुसुमपरिणामो वर्तमानः प्रपञ्चितः । शिशिरे कण्ठरोधिनि गते व्यतिक्रान्तेऽपि सतिपुंस्कोकिलानां सम्बन्धि । पुंस्कोकिलशब्दो मदाति-रेकव्यञ्जनाय । रुतं कूजितं कण्ठेषु स्खलितं प्रतिबद्धं कण्ठाद्बहिर्निर्गतमित्यर्थः । वस-न्तागमप्रमोदात् प्रक्रान्तमेव देवशासनादनिर्गतं अन्तः कण्ठं कुण्ठितमिति भावः । किं बहुनेत्याह—शङ्क इति । स्मरोऽपि सर्वत्राकुण्ठप्रसरोऽपीत्यर्थः । चकितः देवप्रभावभीतस्सन्

सानुमती—[1]णत्थि सन्देहो । महापहावो खु राएसी ।

प्रथमा—[2]अज्ज कदि दिअहाइं अम्हाणं मित्तावसुणा राट्टिणा भट्टिणो पाअमूलं पेसिदाणं । इदं अ णो पमदवणस्स पालकम्मं समप्पिदं । ता अस्सुदपव्वो अम्हेहिं एसो वुत्तन्तो ।

---

[1]नास्ति सन्देहः । महाप्रभावः खलु राजर्षिः ।

[2]आर्य कति दिवसान्यावयोर्मित्रावसुना राष्ट्रियेण भर्तुः पादमूलं प्रेषितयोः । । इदं च नौ प्रमदवनस्य पालनकर्म समर्पितम् । तदश्रुतपूर्व आवाभ्यामेष वृत्तान्तः ।

तृणात् शरधेः अर्धकृष्टं असमग्रोद्धृतमेव शरं संहरति प्रत्यादत्ते इति शङ्के मन्ये उत्प्रेक्षामदनबाणानां कुसुमानामसमग्रनिर्गमेण कोकिलकृतस्य च सहकारिणः प्रतिबन्धेन मन्मथबाणस्यैव प्रतिसंहारसम्भावनादुत्प्रेक्षा । 'मन्येशङ्केध्रुवंप्रायोनूनमित्येवमादयः । उत्प्रेक्षाव्यञ्जकाश्शब्दा इवशब्दोपि तादृशः ' इत्युक्तमाचार्यदण्डिना । राज्ञः स्वाभिज्ञानदर्शनात् पूर्वं यावान् मधुमन्मथयोः प्रचयः तावंतंवावस्थानमुत्सवप्रतिषेधादिति भावः । **शार्दूलविक्रीडितं वृत्तम् ॥**

नास्ति सन्देहः सर्वैः प्रतीष्यशासनो राजेत्यसन्दिग्धमित्यर्थः । राजर्षिरित्यनेन सर्ववशीकारयोग्या प्रभावानुभावसंपत्तिर्व्यज्यते । आर्यमित्रावसुना पूज्येन मित्रावसुनाम्ना । राष्ट्रे नियुक्तः राष्ट्रियः तेन राज्ञः स्थालेन 'राज्ञः स्थालस्तु राष्ट्रिय' इत्यमरः । 'राष्ट्रावारपारत् घखौ ' इति घः । पादमूल सेवाधिकारं प्रतीत्यर्थः । प्रेषितयोर्विसर्जितयोरस्मत्योः कति दिवसानि अल्पान्येव दिनानि जातानीत्यर्थः । प्रमदवनस्य अन्तःपुरोद्यानस्य पालनरूपं कर्म व्यापारः समर्पितं न्यस्तं अभिनवगतत्वात् अस्थानविप्रकर्षाच्च नायमर्थो विदित इति भावः । 'भत्तुणो पादमूलादो एत्थ चरन्दीणं' [भर्तुः पादमूलादव चरन्त्योः] इति पाठान्तरं तत्र भर्तृसमीपं विहाय बहूनि दिनान्यतीतानीत्यर्थः । एषः वसन्तोत्सवप्रतिषेधः अश्रुतपूर्वः

कञ्चुकी—भवतु न पुनरेवं प्रवर्तितव्यम्।

उभौ—[1]अज्ज कोदूहलं णो होइ। अइ इमिणा जणेण सोदव्वं कहेदु अज्जो। किं णिमित्तं भट्टिणा वसन्तुस्सवो पडिसिद्धो।

सानुमती—[2]ऊसवप्पिआ क्खु माणुसा। गुरुणा कारणेण होदव्वं।

कञ्चुकी—बहुलीभूतमेतत्किं न कथ्यते। किमत्रभवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेशकौलीनम्।

उभे—[3]सुदं रट्ठिअमुहादो जाव अङ्गुलीअअदंसणं।

---

[1]आर्ये कौतूहलं नौ भवति। यद्यनेन जनेन श्रोतव्यं कथयत्वार्यः। किं निमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः।

[2]उत्सवप्रियाः खलु मानुषाः। गुरुणा कारणेन भवितव्यम्।

[3]श्रुतं राष्ट्रियमुखाद्यावदंगुलीयकदर्शनम्।

इतः पूर्वमनाकर्णितः। पुनः श्रवणात् परं एवं आम्रकलिकाभक्षणादिप्रकारेण न प्रवर्तितव्यं न कर्तव्यं। कौतूहलं जिज्ञासा। अनेन जनेन आवाभ्यामित्यर्थः। यदि श्रोतव्यं न चेदहस्यमित्यर्थः। मनोरपत्यानि मानुषाः 'मनोर्जातावञ्यतौ षुक् च' इति साधुः। उत्सवे प्रियं प्रीतिर्येषां ते गुरुणा प्रबलेन कारणेन उत्सवप्रतिषेधहेतुना भवितव्यं अवश्यभाव्यं। बहुलीभूतं व्याप्तं एतत् प्रतिषेधनिमित्तं किं कुतो न कथ्यते सर्वविदितस्य कथनं नानुचितमित्यर्थः। शकुन्तलाप्रत्यादेशविषयं कौलीनं लोकवादः। कुलीनस्य कर्म कौलीनं युवाद्यण् 'स्यात् कौलीनं लोकवादे युद्धे पश्वहिपक्षिणां' इत्यमरः। कर्णपथं कर्णविषयं 'ऋक्पूरब्धूःपथामानक्षे' इत्यकारस्समासान्तः। नायातं न प्राप्तं। राष्ट्रियस्य मित्रावसोः मुखाद्वाक्यात् अंगुलीयकदर्शनं यावत् राज्ञः स्वमुद्रावलोकनान्तं। स्वांगुलीयकस्य धीवरोपनीतस्य दर्शनाद्धेतोः देवेन राज्ञा रहसि विजने ऊढपूर्वा पूर्वं परिणीता मोहाद्विस्मरणात् प्रत्यादिष्टा अनङ्गीकृता विवाहस्यासाक्षित्वेन मम चानभि-

कञ्चुकी—तेन ह्यल्पं कथयितव्यम् । यदैव खलु स्वांगुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मया तत्रभवती रहसि शकुन्तला मोहात् प्रत्यादिष्टेति । तदा प्रभृत्येव पश्चात्तापमुपगतो देवः । तथा हि ।

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्नित्यं सेव्यते
शय्याप्रान्तविवर्तनैर्विनमयत्युन्निद्र एव क्षपाः ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् ॥५॥

नेन निरस्तेत्यर्थः । इति यदैवानुस्मृतं तदा प्रभृत्येव पश्चात्तापं धर्मपत्नीपरित्यागादनुतापं उपगतः प्राप्तः ॥

रम्यमिति । रमयतीति रम्यं मनःप्रसादनं शब्दादिकमिन्द्रियार्थं द्वेष्टि नाद्रियते । यथा पुरा पूर्वमिव यथापुरमिति पाठान्तरे अव्ययीभावः । प्रकृतिभिर्मन्त्रिप्रभृतिभिः 'प्रकृतिर्गुणसाम्ये स्यादमात्यादित्रिभावयोः । योनौ लिङ्गे पौरवर्गे' इति मेदिनी । अहन्यहनि प्रत्यहं वीप्सारूपे यथार्थेऽव्ययीभावः । न सेव्यते नोपसृप्यते, उत्कण्ठितत्वात् प्रायः प्रकृतय एव राज्यधुरं वहन्तीति भावः । शय्यायाः शयनीयस्य प्रान्तेषु परिभागेषु विवर्तनैः विलुठनैः उद्विद्रः उत्सन्नस्त्वाप एव सन् क्षपाः रात्रीः विगमयति विनयति वियोगदीर्घा रात्रीः निद्रानुपगमेन व्यापारान्तरानिच्छया च शयनीयभागविनिमयैरेव कथं कथमपि यापयतीत्यर्थः । दाक्षिण्येन पूर्वपरिग्रहत्वेऽपि सहृदयत्वेन 'दक्षिणोऽस्यां सहृदयः' इति दक्षशब्दपक्षे । अन्तःपुरेभ्यः उचितां प्रश्नानुरूपां वाचं ददाति स्वयमन्तःपुरैः पृष्टोऽपि प्रश्नातिरिक्तं न किंचिद्वदतीत्यर्थः । यदा गोत्रेषु अन्तःपुरनामग्रहणेषु स्खलितः शकुन्तलानामोपगमादपराद्धः तदा चिरं व्रीडया लज्जया विलक्षः स्तब्धः भवति च । दक्षिणत्वाद्वैमुख्यं न भजत इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥

सानुमती—[1]पिअं मे।

कञ्चुकी—अस्मात् प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः।

उभे—[2]जुज्जइ जुज्जइ।

(नेपथ्ये।)

[3]**इदो इदो भवं।**

कञ्चुकी—(कर्णं दत्वा।) अये इत एवाभिवर्तते देवः। स्वकर्मानुष्ठीयताम्।

उभे—[4]तह।

(इति निष्क्रान्ते।)

(ततः प्रविशति प्रश्वात्तापसदृशवेषो राजा विदूषकः प्रतीहारी च।)

विदूषकः—[5]इदो इदो भवं।

---

[1]प्रियं मे।

[2]युज्यते युज्यते।

[3]इत इतो भवान्।

[4]तथा।

[5]इत इतो भवान्।

प्रभवतः राज्ञः अस्मात् उक्तरूपात् विगतं मनो यस्य स विमनास्तस्य भावो वैमनस्यं तस्मात् दुःखितत्वाद्धेतोः। इदो इदो भवं इति राजानं प्रति विदूषकवचनं। स्वकर्म स्वाधिकारः उद्यानपालनरूपः। पश्चात्तापस्य विरहानन्तरखेदस्य सदृशः अनुरूपः वेषः मण्डनाल्पत्वादिः यस्य सः। सर्वास्ववस्थासु परिकर्म्यपरिकर्मणि वा आकृतिविशेषाणां स्वतो विशेषवतां रूपाणां। एवं दृश्यमानेन प्रकारेण उत्सुको विरहखिन्नोपि प्रियं प्रीतिकरं दर्शनं यस्य सः॥

कञ्चुकी—(राजानमवलोक्य।) अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम्। एवमुत्सुकोपि हि प्रियदर्शनो देवः। तथा हि।

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत् काञ्चनमेकमेव वलयं श्वासापरक्ताधरः।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते॥

सानुमती—(राजानं दृष्ट्वा) [1]ठाणे खु पच्चादेसविमाणिदा वि इमस्स किदे सउन्दला किलम्मदि।

---

[1]स्थाने खलु प्रत्यादेशविमानितापि अस्य कृते शकुन्तला क्लाम्यति।

प्रत्यादिष्टेति। प्रत्यादिष्टः परिवर्जितः विशेषमण्डनानां उत्सवकालोचितानामलङ्कारविशेषाणां विधिर्विधानं येन सः वामप्रकोष्ठे सव्यमणिबन्धे अर्पितं न्यस्तं काश्यात् प्रकोष्ठं यावद्गलितमिति भावः। काञ्चनं सुवर्णमयं नियतधार्यमेव न पुनर्विशेषेण रत्नमयमिति भावः। एकमेव वलयं कङ्कणं वीरलक्षणत्वादपरिहार्यमिति भावः। अत एव वामहस्तधारणमुक्तं। बिभ्रत् धारयन् अनिच्छयाप्युद्वहन्निति भावः। श्वासेन चिन्ताजनितेन निःश्वासेन अपरक्तः शोषाद्विवर्णः अधरो यस्य सः चिन्तया प्रियानुचिन्तनेन जागरणेन निद्रात्यागेन च प्रतान्ते परिम्लाने नयने यस्य सः प्रतान्तेति पाठे रक्तनेत्र इत्यर्थः। तत्र चिन्तायास्तु रक्तिमहेतुत्वं चिन्त्यं। आत्मनः तेजोगुणात् नैसर्गिकतेजः प्रकर्षाद्धेतोः संस्कारेण मन्त्रेण उल्लिखितः उत्तेजितः महामणिर्महार्घ रत्नमिव क्षीणोपि कृशोपि सन् नालक्ष्यते क्षीणत्वेन न ज्ञायते। तेजस्विनां रूपतः काश्यमकिञ्चित्करमिति भावः। "मणिश्शाणोल्लीढः समरविजयी हेतिदलितो मदक्षीणो नागः शरदि सरिदाश्यानपुलिना। कलाशेषश्चन्द्रः सुरतमृदिता बालवनितातनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः॥" इति चोक्तम्। उपमालङ्कारः। **शार्दूलविक्रीडितं**-**वृत्तम्॥**

राजा— (ध्यानमन्दं परिक्रम्य ।)

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ॥ ७ ॥

सानुमती—[1]णं ईरिसाइ तवास्सणभिआहेआइ ।

विदूषकः— (स्वागतम् ।) [2]लङ्घिदो एसो भूओ वि सउन्दलावाहिणा । ण आणे कहं चिकिच्छदव्वो भविस्सदित्ति ।

[1]नन्वीदृशानि तपस्विनीभागधेयानि ।

[2]लङ्घित एष भूयोऽपि शकुन्तलाव्याधिना न जाने कथं चिकित्सितव्यो भविष्यतीति ।

प्रत्यादेशेन परित्यागेन विमानिता लब्धकृतापि अस्य राज्ञः कृते राजानमुद्दिश्येत्यर्थः । क्राम्यति दूयत इत्येतत् स्थाने खलु युक्तमेव । एवं प्रियदर्शने प्रणयिनि न परिवर्जनीयो मनः सङ्ग इति भावः । ध्यानेन चिन्तया मन्दमलसम् ।

प्रथममिति । प्रथमं प्रियासन्निधानसमये सारङ्गं चित्रवर्णमङ्गं यस्य सः सारङ्गः शक्रध्वादिः तस्य हरिणस्येव अक्षिणी यस्याः तया प्रियया प्रति बोध्यमानं प्रत्यभिज्ञाप्यमानमपि सुप्तं अनिवृत्तमोहमभूत् । इदं हतहृदयं दैवहतं मदीयं मनः संप्रति प्रियाव्यवधाने सति अनुशयदुःखाय पश्चात्तापदुःखमनुभवितुं "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । विबुद्धं स्वयमुपजातप्रत्यभिज्ञं सन्निधौ व्यामोहः असन्निधौप्रतिबोधश्चेत्युभयं प्रतिकूलदैवचेष्टितमिति भावः ॥

तपस्विन्याः ओघ्यायाः शकुन्तलायाः भागधेयानि ननु भाग्यान्येव ईदृशानि । दुःखावसानानि । स्त्रिया एव हि भर्तृपरित्यागो महद्दुःखमिति भावः । स्वगतमित्येव युक्तः पाठः न त्वपवार्येति जनान्तापवारितयोर्द्वयोरपि नियतश्राव्य भेदत्वेन रहस्यं कथ्यते अन्यस्य परावृत्यापवारितमिति लक्षणेन च तस्यात्रासम्भवात् । राजा च विदूषकश्च द्वावेव अत्र प्रविष्टौ । तिरस्करिणीतिरोहिता च सानुमती । न चोपगतः कञ्चुकी त्रितयादन्यूनेषु समवेतेषु नियतश्राव्यं प्रसजति केनचिद्वक्तव्यं अन्येन श्रोतव्यं न चेतरेणेति । भूयः पुनरपि शकुन्तलाव्याधिना शकुन्तलारूपेण रोगेण दुःखेहेतुत्वसाम्यादिति भावः । शकुन्तलाविषयेण मनोव्याधिनेति वा । लङ्घितः अभिभूतः वशीकृत इति यावत् । भूयः

कञ्चुकी— (उपगम्य ।) जयतु जयतु देवः । महाराज प्रत्यवेक्षिताः प्रमदवनभूमयः । यथाकाममध्यास्तां विनोदस्थानानि महाराजः ।

राजा—वेत्रवति मद्वचनादमात्यमार्यपिशुनं ब्रूहि । चिरप्रबोधान्न सम्भावितमस्माभिरद्य धर्मासनमध्यासितुम् । यत् प्रत्यवेक्षितं पौरकार्यमार्येण तत् पत्रमारोप्य दीयतामिति ।

प्रतीहारी—[1]जं देवो आणवेदि ।

(इति निष्क्रान्ता ।)

राजा—वातायन त्वमपि नियोगमशून्यं कुरु ।

कञ्चुकी—यदाज्ञापयति देवः ।

(इति निष्क्रान्तः ।)

---

[1]यद्देव आज्ञापयति ।

शब्देन मृगयाकालिकं वृत्तं प्रत्यभिज्ञाप्यते । चिकित्सितव्यः व्याधिप्रतीकारार्थमुपक्रमितव्यः । प्रत्यवेक्षिताः महाराजोपस्थानयोग्यत्वेन परिदृष्टाः । यथाकामं यथेच्छं विनोदनस्थानानि चित्तविश्रमयोग्यान् प्रदेशान् अध्यास्तां "अधिशीङ्स्थासां कर्म" इति कर्मसंज्ञायां कर्मणि द्वितीया । सर्वमेवासनयोग्यं परिकल्पितं स्थानविशेषपरिग्रहे तु स्वाभिरुचिः प्रमाणमिति भावः । वेत्रस्याधिकारलक्षणत्वाद्वेत्रवतीति सम्बोधनं संज्ञा वा । आर्यपिशुनं आर्यं पिशुननामानं कार्यसूचकत्वादमात्यस्य पिशुन इति नाम । अथवा आर्यलक्षणोपेतत्वार्थं आर्यपिशुन पदं "पिशुनो खलसूचकौ" इत्यमरः । चिरप्रबोधात् दीर्घकालजागराद्धेतोः विरहौत्कण्ठ्यं जागरनिमित्तमाकूतस्थं । धर्मासनं व्यवहारदर्शनस्थानं अध्यासितुं अधिष्ठातुं न सम्भावितं न सङ्कल्पितं । आर्येण भवता पौरकार्यं क्षेत्रधनव्यवहारादिरूपं प्रत्यवेक्षितं परामृष्टं । पत्रमारोप्य लेखे विलिख्येत्यर्थः । निष्पन्नमेवार्थं ज्ञातुमिच्छामीति भावः । प्रतिद्वियते प्रतिनिवर्त्यते जनः अनेनेति प्रतीहारः "उपसर्गस्य घञ्यमनुष्ये बहुलं" इति पक्षे प्रतेर्दीर्घः । "प्रतिहारो द्वारपालद्वारस्थद्वास्थितदर्शकाः" इत्यमरः । गौरादित्वाद्ङीष् । वातायनेति तस्य कञ्चुकिनस्संज्ञा ।

विदूषकः—[1]किदं भवदा णिम्मक्खिअं। संपदं सिसिरेतावच्छेअरमणिज्जे इमस्सिं पमदण्णुद्देसे अत्ताणं रमइस्ससि।

राजा—वयस्य रन्ध्रोपनिपातिनोऽनर्था इति यदुच्यते तदव्यभिचारि वचः। कुतः।

मुनिसुताप्रणयस्मृतिरोधिना
मम च मुक्तमिदं तमसा मनः।
मनसिजेन सखे प्रहरिष्यता
धनुषि चूतशरश्च निवेशितः ॥८॥

---

[1]कृतं भवता निर्मक्षिकम्। सांप्रतं शिशिरेतापच्छेदरमणीयेऽस्मिन् प्रमदवनोद्देश आत्मानं रमयिष्यसि।

ग्रहणं नियोगं स्वाधिकारं अशून्यं स्वेनाविधुक्तं। मक्षिकाणामभावो निर्मक्षिकं अर्थाभावेऽव्ययीभावः विविक्तमित्यर्थः। शिशिरे स्पर्शसुखमाहते तापच्छेदेन छायया तापापनोदेन रमणीये मनोज्ञे शिशिरातपच्छेदरमणीय इति पाठे शिशिरेचातपच्छेदरमणीये चेत्यर्थः। प्रमदवनस्य उद्देशे प्रदेशे आत्मानं मनः रमयिष्यसि विनोदयिष्यसि अनर्थाः विपत्तयः विरोधार्थेन नञा समासः। रन्ध्रे व्यसनरूपे स्वावकाशे उपनिपातिनः सम्भूय प्रवृत्तिशीलाः। तत् लौकिकं वचः अव्यभिचारि अनन्यथासिद्धम् अवितथमिति यावत्। रन्ध्रोपनिपातमुपपादयति।

मुनीति। सखे मुनिसुतायाः शकुन्तलायाः प्रणयस्य सख्यस्य विवाहस्येति यावत् स्मृतिं स्मरणं रुणद्धि प्रतिबध्नातीति तथाभूतेन तमसा व्यामोहेन प्रत्यक्षेप्यनवबोधसाम्यात्तमश्शब्दः। मयेदं मनः मुक्तं च सद्यः परित्यक्तमितीदं शब्दार्थः। प्रहरिष्यता मनसिजेन मन्मथेन धनुषि स्वचापि चूतशरः चूतकुसुमरूपो बाणः निवेशितः संहितश्च। उत्कण्ठानुपदं वसन्तागमोयमनर्थोपर्यनर्थ इति भावः। समुच्चयालङ्कारः। "गुणक्रियायोगपद्यं समुच्चयः" इति लक्षणात्। **द्रुतविलम्बितं वृत्तम्** ॥

विदूषकः—[1]चिट्ठ दाव। इमिणा दण्डकट्ठेण कन्दप्पबाणं णास इस्सं।

(इति दण्डमुद्यम्य घृताङ्कुरं पातयितुमिच्छति।)

राजा—(सस्मितम्।) भवतु। दृष्टं ब्रह्मवर्चसम्। सखे कोपविष्टः प्रियायाः किंचिदनुकारिणीषु लतासु दृष्टिं विलोभयामि।

विदूषकः—[2]णं आसण्णपरिआरिआ चदुरिआ भवदा संदिट्ठा। माहवीमण्डवे इमं वेलं अदिवाहिस्सं। तहिं मे चित्तकलए सहत्थलिहिदं तत्तहोदीए सउन्दलाए पडिकिदिं आणेहि त्ति।

---

[1]तिष्ठ तावत्। अनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयिष्यामि।

[2]नन्वासन्नपरिचारिका चतुरिका भवता संदिष्टा। माधवीमण्डपे इमां वेलामतिवाहयिष्यामि। तत्र मे चित्रफलके स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति।

तिष्ठ तावत् स्थितो भव मा मेपीत्यर्थः। दण्डकाष्ठेन अवष्टम्भरूपेण काष्ठेनेत्यर्थः। वेत्रलतादिष्वावर्तनः। कन्दर्पबाणं घृताङ्कुररूपं नाशयिष्यामि पातयिष्यामि येन नानार्थो भवेदिति भावः। कन्दर्पव्याधिं [कन्दर्पव्याधिं] इति पाठे व्याधिहेतौ घृताङ्कुरे उपचारतः प्रयोगः। व्याधमिति पाठे व्याधवद्विदधं कन्दर्पमित्यर्थः। आयुधपातेन निष्प्रभः कन्दर्पो नष्टकल्प इति भावः। इच्छति यदि। ब्रह्मवर्चसं इत्यादिव्ययनसंपत्तिः ब्रह्मणः तपसो वेदस्य वा वर्चो वर्तते ब्रह्मवर्चसं "ब्रह्महस्तिभ्यां वर्चसः" इत्यच् प्रत्ययः समानार्थः। वसिष्ठादिवद्दण्डकाष्ठमात्रेण सर्वास्त्रप्रतिरोधसामर्थ्यमित्यर्थः। दृष्टं अनुभूतपूर्वं किमाविष्कारणेनेत भावः। प्रियायाः शकुन्तलायाः कर्मणः किंचित् अल्पं अनुकारिणीषु अनुकरणशीलासु कृत्रिमात् कर्मणि षष्ठी। कात्स्न्येन सादृश्यं दुर्लभमिति भावः। उक्तमन्यत्रापि "कलमन्यभृतासु भाषितं कलहंसीषु गतं मदालसं। पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमः" "हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति" इत्यादि। दृष्टिं शकुन्तलारूपां विलोभितां विलोभयामि रमयामि। आसन्ना समीपवर्तिनी परिचारिका चतुरिका नाम सन्दिष्टा आज्ञापिता। अतिवाहयिष्यामि गमयिष्यामि। तत्र माधवीमण्डपे चित्रफलके आलेख्योचित-

राजा—ईदृशं हृदयविनोदस्थानम्। तमेव मार्गमादेशय।

विदूषकः—[1]इदो इदो भवं।

(उभौ परिक्रामतः। सानुमत्यनुगच्छति।)

विदूषकः—[2]एसो मणिसिलापट्टअसणाहो माहवीमण्डवो उवहाररमणिज्जदाए णिस्संसअं साअदेण विअ णो पडिच्छदि। ता पविसिअ णिसीददु भवं।

(उभौ प्रविश्य रूपयित्वोपविष्टौ।)

सानुमती—[3]लदासंणिहिदा दक्खिस्सं दाव सहीए पडिकिदिं। तदो से भट्टिणो बहुमुहं अणुरागं णिवेदइस्सं। (इति तथा कृत्वा स्थिता)

[1]इत इतो भवान्।

[2]एष मणिशिलापट्टकसनाथो माधवीमण्डप उपहाररमणीयतया निस्संशयं स्वागतेनेव नौ प्रतीच्छति। तन् प्रविश्य निषीदतु भवान्।

[3]लतासंनिहिता द्रक्ष्यामि तावत् सख्याः प्रतिकृतिम्। ततोऽस्या भर्तुर्बहुमुखमनुरागं निवेदयिष्यामि।

फलके मे मम स्वहस्तलिखितां साक्षादालिखितां निजफलकगतामिति पाठान्तरं। प्रतिकृतिं प्रतिमां। हृदयस्य मनसः विनोदस्थानं उत्कण्ठापनोदनिमित्तं ईदृशं प्रतिकृत्यादिरूपमेव। प्रियाचिन्ताविधुरं विनोदान्तरेण न शक्यं मनो विनोदयितुमिति भावः। अथवा साक्षात् प्रियाया दुर्लभत्वात् सादृश्यदर्शनमात्रं शरणमिति भावः। तमेव माधवीमण्डपगामिनमेव। मणिशिलापट्टेन स्फटिकशिलाफलकेन सनाथः सहितः उपहारैः कुसुमप्रकरादिभिरूपचारैः रमणीयतया मनोहरत्वेन हेतुना प्रतीच्छति प्रतिगृह्णातीव। विशिष्टानामुपगमे वन्दनमालादिभिः ग्रहादिप्रसाधनं हि स्वागतव्यञ्जनमिति भावः। लताया सन्निहिता समीपवर्तिनी संश्रितेति पाठान्तरं। सख्याश्चकुन्तलायाः प्रतिकृतिमालेख्यं तावत् साकल्येन ततः दर्शनानन्तरं भर्तुस्सम्बन्धिनं बहुमुखं मनोवाक्कायाश्रयमनेकप्रकारं अनुरागं प्रेम निवेदयिष्यामि निवेदनमात्रमपि हि संप्रति कियानाश्वास इति

राजा—सखे सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तम् । कथितवानस्मि भवते । स भवान् प्रत्यादेशवेलायां मत्समीपगतो नासीत् । पूर्वमपि न त्वया कदाचित् सङ्कीर्तितं तत्रभवत्या नाम । कच्चिदहमिव विस्मृतवानसि त्वम् ? ।

विदूषकः—[1]ण विसुमरामि । किं तु सव्वं कहिअ अवसाणे उणं तुए परिहासाविअप्पओ एसो ण भूदत्थो त्ति आचक्खिदं । मए विमिप्पिण्डबुद्धिणा तह एव्व गहीदं । अहवा भविदव्वदा बलवदी ।

सानुमती—[2]एव्वं एदं ।

---

[1]न विस्मरामि । किं तु सर्वं कथयित्वावसाने पुनस्त्वया परिहासविजल्प एष न भूतार्थ इत्याख्यातम् । मयापि मृत्पिण्डबुद्धिना तथैव गृहीतम् । अथ वा भवितव्यता बलवती ।

[2]एवमेतत् ।

भावः । प्रथमवृत्तान्तं मृगयाकालिकं चक्षूरागादिकं सर्वं निरवशेषं इदानीमसन्निधौ स्मरामि किमतीते स्मरणेनेति भावः । कथितवान् तदानीमेव निवेदितवानस्मि । स भवान् विदितार्थस्त्वं प्रत्यादेशवेलायां शकुन्तलाप्रतिषेधसमये नासीत् हंसपादिकां प्रति प्रहितत्वादिति भावः । पूर्वमपि शकुन्तलोपगमात् प्रागपि त्वया विदितवृत्तान्तेन सतेत्यर्थः । कदाचित् क्वचिदपि प्रस्तावे तत्रभवत्याः शकुन्तलायाः नाम नाममात्रमपि न सङ्कीर्तितं नोक्तं । विस्मृतवानसि न हि स्वयं स्मरन् नाममनुस्मारयिष्यसीति भावः । सर्वं परस्परानुरागप्रकारमशेषं । अवसाने कथान्ते । परिहासजल्प एषः परिहासार्थमुक्तमिदं न भूतार्थः न तु परमार्थः "परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः" इत्येतदर्थतोऽनूदितं । मृत्पिण्डमिव बुद्धिर्यस्य तेन स्थौल्यात् प्रमाणशून्यबुद्धिना यथाश्रुतग्राहिणेत्यर्थः । न हि भवता मिथ्यैव शकुन्तलानुरागः प्रस्तुतो भवेत् निह्नवस्तु कार्यतस्यादिति ज्ञातव्यं पश्चात् प्रस्तोतव्यञ्च मया न कृतमिति भावः । भवितव्यता नियतिः

राजा—(ध्यात्वा) सखि परित्रायस्व माम् ।

विदूषकः—[1]भो किं एदं। अणुव्वण्णं खु ईरिसं तुइ । कदा वि सुप्पुरिसा सोअपत्तत्ताणो ण होंति । णं पवादे वि णिक्कंपा गिरीओ ।

राजा—वयस्य निराकरणविक्लवायाः प्रियायाः समवस्थामनुस्मृत्य बलवदशरणोऽस्मि । सा हि ।

इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।

---

[1]भोः किमेतत् । अनुपपन्नं खल्वीदृशं त्वयि । कदापि सत्पुरुषाः शोकपात्रात्मानो न भवन्ति । ननु प्रवातेऽपि निष्कम्पा गिरयः ।

बलवती प्रबला नह्यन्यथा त्वया स्वानुभूतं वस्तु विस्मर्यतेति भावः । परित्रायस्वेति शोकदैन्याविष्कारः । त्वयि धीर इत्यर्थः । ईदृशं अतिभूमिं गतं दैन्यं अनुपपन्नं अनुचितं । कदापि सत्यपि हेतौ सत्पुरुषाः धीराः शोकपात्रं शोकस्थानभूतः आत्मा मनः येषां तथाविधाः न भवन्ति । प्रवाते प्रबले वाते सत्यपि गिरयः पर्वताः ननु निष्कम्पाः निश्चला एव खलु दृष्टान्तालङ्कारः । " नपृथग्जनवच्छुचो वशंवशिनामुत्तम गन्तुमर्हसि । द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः " इति रघुवंशे । निराकरणेन प्रतिषेधेन विक्लवाया दीनायाः निष्कारणनिराकरणेति पाठान्तरं । प्रियायाश्शकुन्तलायाः समवस्थां दशां अनुस्मृत्य इदानीमनुचिन्त्य बलवत् दृढं अशरणः अगतिकः धैर्यरूपावलम्बरहित इत्यर्थः । नायं स्वार्थो मे विषादः किन्तर्हि प्रियार्थ इति भावः ॥

इतइति— इत अस्मात् मत्सकाशादित्यर्थः । प्रत्यादेशात् प्रतिषेधाद्धेतोः स्वजनं ज्ञातिजनं पितृशिष्यवर्गमिति यावत् । अनुगन्तुं व्यवसिता आरब्धाभर्तृपरित्यक्तानां सतीनां शरणान्तरभावादिति भावः । गुरुणा पित्रा समं ज्ञानशीलतपःप्रभृतिभिस्तुल्ये आत्मवचन इत्यर्थः । गुरोः पितुः शिष्ये शार्ङ्गरवे तिष्ठेति उच्चैः उन्नतस्वरेण वदति सति स्थिता निवृत्तानुगमना । ततस्तिष्ठेत्युच्चैर्वदतीति पाठे उच्चैर्वदति सति पुनर्दृष्टिम-

पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत् सविषमिव शल्यं दहति माम् ॥ ९ ॥

सानुमती—[1]अम्महे ईरिसी सकज्जपरदा णाम । इमस्स सन्दावेण अहं रमामि ।

विदूषकः—[2]भोः अस्ति मे तक्को केण वि तत्तहोदी आआसचारिणा णीदेत्ति ।

---

[1]अहो । ईदृशी स्वकार्यपरतानाम । अस्यसन्तापेनाहं रमे ।

[2]भोः अस्ति मे तर्कः । केनापि तत्रभवत्याकाशचारिणा नीतेति ।

र्पितवतीत्यन्वयः । तत्र च पुनरशब्दवैयर्थ्यं । मुहुस्तिष्ठेति च पाठान्तरं चिन्त्यं न हि तथा प्रौढाया मुहुः प्रतिषेधः संभवति । पञ्चमाङ्के च सकृदेव तिष्ठेति प्रतिषेधो दृश्यते । पुनः स्वजनानुगमेऽपि प्रतिषिद्धेसतीत्यर्थः । बाष्पप्रसरेण दुःखाश्रुसन्तानेन कलुषामविशदां दृष्टिं दर्शनं क्रूरेतदानीमप्यकरुणे मयि अर्पितवती दत्तवती त्वमेव शरणमिति स्वात्मार्पणमेव दृष्ट्वादर्शितमिवेति भावः । समानेपि प्रत्याख्याने मय्येव दृष्ट्वर्पणं न तु स्वजन इति तादृगं तस्याः प्रेम मम तु विपर्यय इति भावः । इति यत् तत् सविषं विषदिग्धं शल्यं बाणाग्रमिव मामपराधिनं सन्तं दहति सन्तापयति । हृदिनिमग्नस्य प्रत्यादेशशल्यस्य विषलेपोयं यद्बाष्पकलुषप्रियादर्शनानुदर्शनामित्यर्थः । उपमालङ्कारः । **शिखरिणीवृत्तम् ॥**

स्वकार्यपरता स्वार्थप्रधानता ईदृशी नाम एवं विधापि स्वदुःखे सति परदुःखसंवेदनमन्यथा चावधीरणमिति गरीयसीति भावः । रमे हृष्यामि सखीसन्तापकारी स्थाने किलायं सन्तप्यत इति भावः । तर्कः ऊहः । केनाप्याकाशचारिणा गन्धर्वादिना नीता हृता "आक्षिप्यैनां ज्योतिरेकं तिरोभूत्" इति पुरोहितवचना-

राजा—कः पतिदेवतामन्यः परामर्ष्टुमुत्सहते। मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि। तत्सहचारिणीभि स्तां हृतां मे हृदयमाशङ्कते।

सानुमती—[1]संमोहो खु विम्हइ अणिज्जो ण पडिबोहो।

विदूषकः—[2]जइ एव्वं अत्थि समाअमो कालेण तत्तहोदीए।

राजा—कथमिव।

विदूषकः—[3]ण खु मादापिदरा भत्तुविओअदुक्खिअं दुहिदरं देक्खिदुं पारेन्ति।

राजा—वयस्य।

---

[1]संमोहः खलु विस्मयनीयो न प्रतिबोधः।

[2]यद्येवमस्ति समागमः कालेन तत्रभवत्याः।

[3]न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं पारयतः।

दवगम्यत इति गावः। पतिर्देवता यस्यास्तां साध्वीं अन्यः कः पुमान् परामर्ष्टुं स्पृष्टुमपि किंपुननेंतुमिति भावः। उत्सहते शक्नोति। मेनकानामाप्सराः किलेत्यैतिह्ये तव सख्याः शकुन्तलायाः जन्मप्रतिष्ठा उत्पत्तिभूमिः इति श्रुतवानस्मि शकुन्तलासख्यीमुखादिति भावः तत्सहचारिणीभिः। मेनकासखीभिः हृतां वात्सल्यादपनीतां। आशङ्कते अभ्यूहति मत्वस्याः शीलदूषणं संभाव्यत इति भावः। तथा विलुप्तस्मरणस्य कथमिदं सविशेषं स्मरणमित्यनुचिन्त्याह—सम्मोहो इति। सम्मोहः खलु विस्मरणमेव हि। प्रतिबोधः प्रत्यभिज्ञानं अनुभूतस्य हि स्मरणमुपपद्यते। एवंविधस्य प्रेम्णो विस्मरणमेव तु परं निर्निमित्तमिति भावः। यद्येवं मातृगणेन चेद्गीता स्यात् कालेन कालान्तरेण अस्ति सम्भवति भवदभिप्रायज्ञानमात्रमत्र विलम्ब इति भावः। कथमिति समागम इत्यनुषज्यते। माता च पिता च मातापितरौ "आनङृतो द्वन्द्वे" इति मातृशानङादेशः। भर्तृवियोगेन दुःखितां। न खलु पारयतः नैव शक्नुतः॥

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम् ।
असंनिवृत्त्यै तदतीतमेव
मनोरथानामतटाः प्रपाताः ॥ १० ॥

स्वप्नइति । नु इति वितर्के स्वप्नो नु स्वाप्निकार्थसन्निधानं किं क्षणभङ्गुरत्वात् अपुनर्दर्शनाच्च स्वाप्निकार्थकल्पमित्यर्थः । नायं स्वप्नो भवति यतोऽन्यैरप्ययमर्थ उपलब्ध इत्याह—मायेति । माया नु इन्द्रजालादिकं कृतकैर्निर्माणं किमित्यर्थः । गन्धर्वनगरादेर्मिथ्याभूतस्यापि सर्वानुभाव्यस्य सम्भवादिति भावः । मायापि हि मायाविदः कर्म नचायमुपलभ्यते तदाह—मतीतिमतेः बुद्धेः भ्रमो विपर्यासः अभूतार्थदर्शीकश्चिदुन्मादकल्पः चित्तविकारः किमित्यर्थः । अन्यानुभूतत्वप्रतिसन्धानमपि हि भ्रान्तमेव स्यादिति भावः । इदानीमपि स्मर्यमाणतया नायं मतिभ्रम इत्यनाश्वासादाह—क्लिष्टमिति । अथ वा पुण्यं जन्मान्तरसुकृतं किमपि तावत् सकृदनुभवमात्रावसानं फलं सुखरूपं कार्यस्य तथाभूतं सत् क्लिष्टं नु निरनुबन्धं निवृत्तं किं । उक्तानां विकल्पानां सामान्यं निमित्तमाह—असन्निवृत्त्या इति । असन्निवृत्त्यै अपुनर्निवृत्तये तत् शकुन्तलारूपं वस्तु । स्वप्नाद्यन्यतमत्वाभिसन्धानात् पूर्वदृष्टत्वसामान्येन नपुंसकं । अतीतमतिक्रान्तमेव । अतो मनोरथानां प्राप्त्यभिलाषाणा प्रपाताः निर्झरवत्पतनानि अतटाः भूमिरहिताः अप्राप्तविश्रमा इत्यर्थः । विषयसिद्धिरेव हि विश्रान्तिर्मनोरथानामिति भावः । प्रवाहा इति पाठे अतटाः प्रतिबन्धकाहित्येन निर्गलाः इत्यर्थः । अतटप्रपात इति पाठे अतटे अभूमौ प्रपात इत्यर्थः । "असन्निवृत्या तदतीव मन्ये मनोरथानामतटप्रपातं" इति पाठे असन्निवृत्तत्वादेव मनोरथानां अतटप्रपातमुत्प्रेक्ष इत्यर्थः । असन्निवृत्त्यै तदतीतमेवेति वाक्यार्थस्य मनोरथानामित्यनन्तरवाक्यार्थं प्रति हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । तदनुप्राणिता च स्वप्नत्वाद्युत्प्रेक्षेत्यङ्गाङ्गिभावसङ्करः । **उपजातिवृत्तम्** ॥

विदूषकः—[1]मा एव्वं। णं अङ्गुलीअअं एव्व णिदंसणं अवस्सं माविणो अचिन्तणिज्जो समाअमो होदि त्ति।

राजा—(अंगुलीयकं विलोक्य।) **अये इदं तावदसुलभस्थानभ्रंशि शोचनीयम्।**

तव सुचरितमङ्गुल्याय नूनं प्रतनु ममेव विभाव्यते फलेन।
अरुणनखमनोहरासु तस्या श्च्युतमसि लब्धपदं यदङ्गुलीषु॥

---

[1]**मैवं नन्वङ्गुलीयकमेव निदर्शनमवश्यंभाविनोऽचिन्तनीयः समागमो भवतीति।**

मैवं नत्वसन्निवृत्त्यै व्यतिक्रान्तं। अवश्यम्भाविनः अवश्यं भवनशीलस्यवस्तुनः समागमः संप्राप्तिः अचिन्तनीयः अतर्क्यः इतीमं विषयं प्रति अङ्गुलीयकमेवं अचिन्तितोपनतमेवेत्यर्थः। निदर्शनं निश्चायकं अज्ञातपातमपि स्वेनोपयातमंगुलीयकमेव प्रियाप्रत्यावृत्तिसूचकं निमित्तं यदपायो वियोगनिमित्तमासीदिति भावः। असुलभात् दुर्लभात् स्थानात् शकुन्तलांगुलिदेशात् भ्रंशि लब्धास्पदमपि गलितं इदं तावदंगुलीयमपि शोचनीयं अहमिव शोकार्हमित्यर्थः॥

तवेति। हे अंगुलीय तव सुचरितं त्वदीयं सुकृतं ममेव मत्सुकृतमिव प्रतनु अतिमात्रकृशं फलेन क्षणिकपदासादनरूपेण कार्येणैव विभाव्यते अनुमीयते अल्पपुण्यस्य स्वर्गपदमिव क्षणभंगुरमावयोरपि सुकृतफलमिति भावः। यत्यस्मात् अरुणैस्ताम्रैः नखैः मनोहरासु हृद्यासु तस्याश्शकुन्तलायाः अंगुलीषुलब्धपदं लब्धाश्रयं सत् च्युतं भ्रष्टमसि। सुकृतवशादंगुलीपदलाभः सुकृतावसानाच्च प्रच्युतिरिति भावः। नखानामरुणत्वविशेषेण कैमुतिकन्यायसिद्धमंगुलीनामारुण्यं। ततश्च अरविन्ददलसाम्यं लक्ष्मीस्थानत्वादुन्नतपदत्वं च व्यञ्जितं भवति। अंगुलीष्विति च बहुवचनेन पुरुषांगुलिप्रमाणपरिणाहस्यांगुलीयस्य सर्वांगुलिविनिवेशनं सुप्रमाविशेषदर्शनाभिलाषिणा स्वेनोपपादिततया च प्रेमपरतन्त्रया प्रतिपन्नमिति व्यज्यते। उपमासंसृष्टमनुमानमलङ्कारः।

पुष्पिताग्रा वृत्तम्॥

सानुमती—[1]जइ अण्णहत्थपदं भवे सच्चं एव्व सोअणिज्जं भवे ।

विदूषकः—[2]भो इअं णाममुद्दा केण उग्घादेण तत्तहोदीए हत्थसंसग्गं पाविदा ।

सानुमती—[3]मम वि कोदूहलेण आकरिदो एसो ।

राजा—श्रूयताम् । तदा स्वनगराय प्रस्थितं मां प्रिया सबाष्पमाह कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यतीति ।

विदूषकः—[4]तदो तदो ।

राजा—पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता ।

---

[1]यद्यन्यहस्तगतं भवेत् सत्यमेव शोचनीयं भवेत् ।

[2]भोः इयं नाममुद्रा केनोद्घातेन तत्रभवत्या हस्तसंसर्गं प्रापिता ।

[3]ममापि कौतूहलेनाकारित एषः ।

[4]ततस्ततः ।

अन्यस्य दुष्यन्तादितरस्य हस्तगतं हस्तं प्राप्तं । शकुन्तलाहस्तभ्रष्टमपि एतदंगुलीगतं न शोच्यमिति भावः । नाममुद्रा नाममुद्रितमंगुलीयकं । उद्घातेन आरम्भेण निमित्तेन " स्यादभ्यादानमुद्घात आरम्भः " इत्यमरः । तव वा विस्मरणस्य तस्या वा त्वय्यविसम्भस्य असम्भावनीयत्वात् कोवसर इति भावः । उद्देसेण इति पाठे अभिसन्धिनेत्यर्थः । हस्तसंसर्गं हस्तांगुलीसंयोगं प्रापितः लम्भितः । कौतूहलेन जिज्ञासया एषः अंगुलीयनिवेशहेतुः आकारितः आहूतः विषयीकृत इति यावत् । ममापि जिज्ञासितोयमित्यर्थः । आकारित इत्यस्य प्रेरित इति व्याख्याने एष इति विदूषकपरं यदृच्छया मम जिज्ञासितमयमेव पृष्टवानित्यर्थः । तदा परिणये जाते स्वनगराय स्वनगरं गन्तुं प्रस्थितं आश्रमं त्यक्तुं व्यवसितमित्यर्थः । सबाष्पं विरहासहतयेति भावः । कियच्चिरेण कियता कालेन चिरशब्देन विरहे सति क्षणस्यापि दीर्घत्वं व्यज्यते । प्रतिपत्तिं अङ्गीकारं दास्यति प्रत्यानेष्यतीत्यर्थः । निवेशयता स्वयमामुञ्चता सता प्रत्यभिहिता प्रत्युक्ता ॥

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम् ।
तावत् प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति ॥ १२ ॥

तच्च दारुणेन मया मोहान्नानुष्ठितम् ।

सानुमती—[1]रमणीओ क्खु अवही विहिणा विसंवादिदो ।

विदूषकः—[2]कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलद्धभंतले आसी ? ।

---

[1]रमणीयः खल्ववधिर्विधिना विसंवादितः ।

[2]कथं धीवरकल्पितस्य रोहितमत्स्यस्योदराभ्यन्तर आसीत् ? ।

एकैकमिति । दिवसे दिवसे दिने दिने अत्रांगुलीयके स्थितं एकमेकं मदीयं नाम्नः दुष्यन्तालयावस्थस्यक्षरं गणय संख्याहि यावत् येन कालेन अन्तं समाप्तिं गच्छसि प्राप्नोषि । मच्चान्न इति शेषः । तावत् तं कालमनतिक्रम्य द्वित्रैर्दिनैरिति भावः । मम अवरोधगृहस्य अन्तः पुरभवनस्य कर्मणः प्रवेशं नेता प्रापयिता जनः मत्परिजनः तव समीपं शेषपति प्राप्स्यति । इति प्रत्यभिहितेति पूर्वेणान्वयः । मानसेनापरिकरेण त्वामवरोधमानयिष्यामीति भावः । नामाक्षरगणनं च विरहावनोदार्थं "शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा विन्यस्यन्ती भुविगणनया देहलीदत्तपुष्पैः" इत्युक्तं मेघसन्देशे । नेतृशब्दस्तृच्छीलयतृजन्तः अत एव "न लोकाव्ययनिष्ठाखलर्थतृनां" इति निषेधान्न षष्ठी । अथवा शेषे विभाषेति वार्तिकस्य केचिदविशेषेण विभाषामिच्छन्तीति व्याख्यं न तृजन्तस्यापि "कर्तृकर्मणोः कृति" इति विधेर्विकल्पनं बोध्यं । **वसन्ततिलकं वृत्तम्** ॥

तच्च स्वयमुक्तं च दारुणेन विरसेन । मोहादनभिज्ञानात् । नानुष्ठितं नकृतं । तादृशस्य सङ्गतस्यानिर्वहणं हि विरसकर्मेति भावः । अवधिः प्रत्यानयनकालपरिच्छेदः रमणीयः निजाभरणरूपविनोदसंपादनाभिजातः । विसंवादितः विरोधितः अनुरागे तु न वैकल्यमिति भावः । धीवरेण कल्पितस्य खण्डितस्य रोहिताख्यमत्स्यविशेषस्य । शकु-

राजा—शचीतीर्थं वन्दमानायाः सख्यास्ते हस्ताद्भ्रष्टस्रोतसि परिभ्रष्टम्॥

विदूषकः—[1]जुज्जइ।

सानुमती—[2]अदो एव्व तवस्सिणीए सउंदलाए अधम्मभीरुणो इमस्स राएसिणो परिणए एव्व सन्देहो आसी। अह वा ईरिसो अणुराओ अहिण्णाणं अवेक्खदि। कहं विअ एदं?।

राजा—उपालप्स्ये तावदिदमङ्गुलीयकम्।

विदूषकः—(आत्मगतम्) [3]गहिदो णेण पंथा उम्मत्ताणं।

---

[1]युज्यते।

[2]अत एव तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणय एव सन्देह आसीत्। अथवेदृशोऽनुरागोऽभिज्ञानमपेक्षते। कथमिवैतत्।

[3]गृहीतोऽनेन पन्था उन्मत्तानां।

न्तलांगुलौ विनिवेशितस्य कथं मत्स्येन निगरणमित्यर्थः। शचीतीर्थं नाम गङ्गायां शक्रावताराभ्यन्तरगतं स्थानविशेषं वन्दमानायाः उपस्पर्शनेनाभ्यर्हयन्त्यास्तस्याः परिभ्रष्टं विगलितं। युज्यते प्रवाहपतितस्य मत्स्येन निगरणं सम्भवतीत्यर्थः। अत एव अंगुलीयविगमादेव राजर्षेः जितेन्द्रियस्येति भावः। अधर्मभीरोः परदारस्पर्शरूपपापभीतस्य तपस्विन्याः गोत्र्यायाश्शकुन्तलायाः परिणय विवाह एव। कथमन्यथा धार्मिको धर्मपत्नीं परित्यजतीति भावः। ईदृशः एवमुत्कटः अनुरागः प्रेमातिशयः अभिज्ञानमपेक्षत इति काकुः असम्भाव्यविस्मरणं विषये कथमभिज्ञानाधीनं स्मरणमिति भावः। इदमंगुलीयकं उपालप्स्ये। निन्दिष्यामि। उन्मत्तानां विभ्रान्तचित्तानां पन्थाः चेतनाचेतनविशेषानवधारणरूपो मार्गः गृहीतः अङ्गीकृतः।

राजा—कथं नु तं बन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि ।

अथवा ।

अचेतनं नाम गुणं न लक्षये-
न्मयैव कस्मादवधीरिता प्रिया ॥१३॥

विदूषकः—(आत्मगतम् ।) [1]कहं बुभुक्खाए खादिदव्वो म्हि ।

---

[1]कथं बुभुक्षया खादितव्योऽस्मि ।

कथमिति । हे अंगुलीयकेति सम्बोधनमर्थसिद्धं । बन्धुरा उन्नतानताः मूलतोविपुलाः आनुपूर्व्या च तन्वभा इत्यर्थः । कोमला मृदुलाश्च अंगुल्योयस्य तथाभूतं तं शकुन्तलासम्बन्धिनं करं विहाय कथं नु कथं वा अम्भसि निमग्नमसि आभरणस्याप्याभरणभूते यत्र सविशेषं शोभिष्यसे ततो गलितं जले च निमग्नं मृग्यतां गतमसीति कस्त्वायमविवेक इति भावः । अथवा अचेतनं नाम जडं खल्वंगुलीयकं गुणं आश्रयोत्कर्षं न लक्षयेत् न जानीयात् । अचेतनस्य विशेषाग्रहणं नैसर्गिकमित्यर्थः । मयैव विशेषविदाचेतनेनैव सता कस्मात् कारणात् प्रिया अवधीरिता निषिद्धा । गुणज्ञ एव सन्ननुभूतप्रियापरित्यागी पर्यनुयोज्य इत्यर्थः । अथवा अचेतनं अंगुलीयकं गुणं न लक्षयेत् न गृह्णातु नामेत्यङ्गीकारे । अचेतनानामगुणं न लक्षय इति पाठे ज्ञात्वापि कृतावधीरणस्य अचेतनेषु मे दोषदर्शनमनुचितमित्यर्थः । फले कियदन्तरमग्रहणविस्मरणयोरिति भावः । विपर्यस्यति भागधेये प्रज्ञापि नार्थकरोति किं मुधाप्राज्ञमानितयेति च गम्यते । **वंशस्थं वृत्तम् ॥**

बुभुक्षया अशनायया खादितव्यः भक्षणीयः भक्षणीयालाभादतिभूमिगतया बुभुक्षया स्वाश्रयाशिन्यहमेव भक्षयितव्योस्मीति भावः । यत् पुनरत्र बुभुक्षया शकुन्तलां प्रति रिरंसया राज्ञ इति शेषः । अहं खलु अहमेव खादितव्यः भोक्तव्यः शकुन्तला दुर्लभा निकटेऽन्यः कोऽपि न विद्यते शकुन्तलाधिया मामेव ग्रहीष्यतीति पलायन-

राजा— अकारणपरित्यागानुशयतप्तहृदयस्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन ।

(प्रविश्य चतुरिका पटाक्षेपेण चित्रफलकहस्ता)

चतुरिका—[1]इअ चित्तगता भट्टिणी ।

(इति चित्रफलकं दर्शयति ।)

विदूषकः—[2]साहु वअस्स महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो । खलदि विअ मे दिट्ठी णिण्णुण्णअप्पदेसेस ।

सानुमती—[3]अम्हो एसा राएसिणो वट्टिआणिउणदा । जाणे सही अग्गदो मे वट्टदि त्ति ।

---

[1]इयं चित्रगता भट्टिनी ।

[2]साधु वयस्य मधुरावस्थानदर्शनीयो भावानुप्रवेशः । स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु ।

[3]अहो एषा राजर्षेर्वर्त्तिकानिपुणता । जानामि सख्यग्रतो मे वर्तत इति ।

चिन्ता व्यज्यते " इति व्याख्यानं तत् क्लिष्टं ग्राम्यञ्च । अकारणपरित्यागेन निर्हेतुकेन प्रत्याख्यानेन योयमनुशयः पश्चात्तापः तेन तप्तहृदयः पीडितमनाः अकारणपरित्यक्त इति पाठे शकुन्तलासम्बोधनं व्याख्येयं । अयं जनः अहं अनुकंपनीयतां दर्शयितुं जनसामान्येन व्यपदेशः । अनुकम्पनीयः सकृत् कृतमपराधं विस्मृत्य दर्शनान्तरदानेनेत्यादिः । पटाक्षेपेण सम्भ्रमात् कार्यालप्यत्वाच्च तिरस्करिणीक्षेपं विनैवेत्यर्थः । मधुरेण सुन्दरेण अवस्थानेन अङ्गसन्निवेशेन दर्शनीयः मनोरमः भावस्य अनुभूतार्थसंस्कारस्य अनुप्रवेशः प्रतिकृतावभिव्यक्तिः यथानुभूतमालेख्ये निवेशितमिति भावः । मे मम दृष्टिः आलोकः निम्नोन्नतप्रदेशेषु नयनाधारनाभिप्रदेशप्रभृतिषु नासिकास्तनजघनादिषु च यथासंख्यं निम्नपून्नतेषु च स्थानेषु स्खलतीव अवरोहतीव चेवेत्यर्थः । समफलकन्यस्तमपि चित्रं वर्णविन्यासवैदग्ध्यात् उत्सेधानुत्सेधवदिव विभाव्यत इति भावः । एषा ईदृशी वर्त्तिकानिपुणता

राजा—यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा ।
तथापि तस्या लावण्यं रेखया किंचिदन्वितम् ॥

सानुमती—[1]सरिसं एदं पच्छादावगुरुणो सिणेहस्स अणवलेवस्स अ ।

---

[1]सदृशमेतत् पश्चात्तापगुरोः स्नेहस्यानवलेपस्य च ।

लेखिनीग्रहणप्रवीणता । सखी साक्षादेव शकुन्तला अग्रतो वर्तते पुरस्तात् तिष्ठतीति जाने विदितार्थं भ्रान्तास्मीत्यर्थः । वर्णिकानैपुणमिति पाठे "वर्णकश्चारणे स्त्री तु चन्दने च विलेपने । द्वयोर्नील्यादिपू स्त्री स्यादुत्कर्षे काञ्चनस्य च" इति मेदिनीकोशात् नील्यादिपदोपलक्षिते रागमात्रे वृत्तो वर्णिकाशब्दः शिल्पकलामिह लक्षयति ॥

यद्यदिति । चित्रे आलेख्ये यद्यत् अवयवस्थान् साधु समीचीनं प्रकृतिसरूपमित्यर्थः । न स्यात् तत्तत् सर्वमेव अन्यथा क्रियते अपमृज्य पुनस्साधुतामानीयते हेयहानादुपादेयोपादानाच्च भूयो भूयस्संस्कृत्य चित्रं निर्वर्त्यत इत्यर्थः । किं वक्तव्यमनन्यमनसो भवेति च व्यज्यते । तथापि यत्नोपपादितत्वेपि सति तस्याः शकुन्तलायास्सम्बन्धि लावण्यं शोभाविशेषः रेखया मात्रया नतु कात्स्न्येनेत्यर्थः । किंचिदन्वितं ईषदेवानुगतं । लेख्यमिति पाठे बहिराकारमात्रेणेत्यर्थः । आलेख्येष्वालिखितुमशक्यं तदूपमिति भावः । मालविकाग्निमित्रेऽप्युक्तं "चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम् । संप्रति शिथिलसमाधिमन्ये येनेयमालिखिता ॥" इति । यत्तु यद्यत् साधु स्वतस्सुन्दरं न स्यात् तत्तच्चित्रे अन्यथा क्रियते सुन्दरत्वमानीयत इति व्याख्यानम् । तदसुन्दरं प्रतिकृतेर्हि प्रकृतितो न्यूनातिरेको दूषणमेव न तु भूषणं । नरं वानरयन्निव वानरमपि हि नरयन्न शिक्षितो गण्यते । अपि च वाक्यान्तरस्थस्य चित्र इति पदस्य अन्यस्मिन् वाक्ये योजनया वाक्यगर्भितं नाम दोषस्समानीयत इति । अनुष्टुप् वृत्तम् ॥

एतत् चित्रस्य न्यूनत्वकथनं पश्चात्तापेन परित्यागानुशयेन गुरोः गाढस्य स्नेहस्य अनुरागस्य अनवलेपस्य शिल्पविज्ञानमदाभावस्य च सदृशमनुरूपं । प्रियानुरागः सर्व-

विदूषकः—[1]भो दाणिं तिण्णि तत्तहोदीओ दीसन्ति । सव्वाओ अ दंसणीआओ । कदमा एत्थ तत्तहोदी मउन्दला ।

सानुमती—[2]अणभिण्णो क्खु ईरिसस्स रूवस्स मोहदिट्ठी अअं जणो ।

राजा—त्वं तावत् कतमां तर्कयसि ।

विदूषकः—[3]तक्केमि जा एसा सिढिलबन्धणुव्वंतकुसुमेण केसन्तेण उब्भिण्णसेअबिन्दुणा वअणेण विसेसदो ओसरिआहिं बा-

---

[1]भोः इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते । सर्वाश्च दर्शनीयाः । कतमात्र तत्रभवती शकुन्तला ।

[2]अनभिज्ञः खल्वीदृशस्य रूपस्य मोघदृष्टिरयं जनः ।

[3]तर्कयामि यैषा शिथिलबन्धनोद्भ्रान्तकुसुमेन केशान्तेनोद्भिन्नस्वेदबिन्दुना वदनेन विशेषतोऽपसृताभ्यां बाहाभ्यामवसेकस्निग्धतरु-

---

मपि इतरत्ततो न्यूनं दर्शयति विनीतत्वाच्च स्वनिर्माणे नाभिमान इति भावः । सर्वाः तिस्रोपि दर्शनीयाः येन न वेदितुं शक्यत इति भावः । कतमा तिसृणां मध्ये का । अनसूया प्रियंवदा चालिखिते इति व्यज्यते । सर्वारूपस्य शकुन्तलासौन्दर्यस्य अनभिज्ञः अविवेचकः "इगुपधाज्ञाप्रीकिरः कः" कृद्योगाच्च कर्मणि षष्ठी । मोघदृष्टिः वितथदर्शनः साध्वसाधुपरिज्ञानं हि फलदृष्टेरिति भावः । त्वं तावत् त्वमात्मनैवेत्यर्थः । कां तर्कयसि तिसृणां मध्ये कतमां शकुन्तलां जानासि । शिथिलं सत्तं बन्धनं यस्य तेन उद्भ्रान्तान्युन्मुक्तानि कुसुमानि येन तेन च केशान्तेन केशपर्यन्तेन । उद्भिन्नस्वेदबिन्दुना अंकुरितश्रमाम्बुकणेन । विशेषतः अत्यर्थं अपसृताभ्यां श्रमशिथिलाभ्यां बाहाभ्यां भुजाभ्याञ्च उपलक्षितेनेति शेषः । अवसेकेन सलिलसेचनेन स्निग्धं अम्लानतया मनोज्ञ

हा हिं अवसे असिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे ईसिपरिस्संता विअ आलिहिदा एसा सउन्दला । इदराओ सहीओ त्ति ।

राजा—निपुणो भवान् । अस्त्यत्र मे भावचिह्नम् ।

स्विन्नाङ्गुलिर्विनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः ।
अश्रु च कपोलपतितं दृश्यमिदं वर्णिकोच्छ्वासात् ॥ १५ ॥

चतुरिके अर्धलिखितमेतद्विनोदस्थानम् । गच्छ । वर्णिकास्तावदानय ।

चतुरिका—[1]अज्ज माढव्य ओलम्ब चित्तफलअं जाव आअच्छामि ।

णपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्तेवालिखिता एषा शकुन्तला । इतरे सख्याविति ।

[1]आर्य माढव्य अवलम्बस्व चित्रफलकं यावदागच्छामि ।

तरुणांकसलयं नवपल्लवं यस्य तस्य । पार्श्वे समीपे ईषत्परिश्रान्तेव विकीर्णकेशत्वं स्वेदधाराप्रसरः गात्रोपतापादिश्च अतिपरिश्रमव्यञ्जनं नोत्तमप्रकृतौ सम्भवतीति भावः । निपुणः विवेककुशलः । अत्र शकुन्तलाचित्रे मे भावस्य सात्त्विकस्य चिह्नं आलेखनसंक्रान्तं लिङ्गं । तदिदमपि लक्षणान्तरमिति भावः ॥

स्विन्नेति ॥ रेखाणां अवयवभक्तिराजीनां प्रान्तेषु पर्यन्तदेशेषु मलिनः अभास्वरः स्विन्नायाः सात्त्विकस्वेदयुक्तायाः अंगुलेः अवष्टम्भभूतायाः कनिष्ठिकायाः विनिवेशः विन्यासः दृश्यते । तदेतत् सात्त्विकचिह्नमिति भावः । कपोलात् मदीयगण्डस्थलात् पतितं इदं अश्रु नयनसलिलं च कपोलं अप्राप्तस्य पतनाभावात् उक्तं कपोलपतितमिति स्थूलबिन्दुत्वमनेन व्यज्यते । वर्णिकायाः रागस्य उच्छ्वासात् विच्छेदात् उत्फुल्लत्वाद्वा लक्ष्यं दृश्यं । वर्तिकोच्छ्वासादिति पाठे लेखिन्न्यासस्य उच्छ्वसनत्वादित्यर्थः । अयमपि सात्त्विकभावः । अनुमानालङ्कारः । आर्या वृत्तम् ॥

विनोदस्थानं उत्कण्ठापनोदनिमित्तं एतदालेख्यं अर्धलिखितं असमाप्तामिप्रायं । वर्णकाः रागद्रव्याणि । वर्तिकामिति पाठान्तरं । समुद्गच्छत्यस्मादिति समुद्गः "अन्ये-

राजा—अहमेवैतदवलम्बे । (यथोक्तं करोति ।)

(निष्क्रान्ता चेटी ।)

राजा—(निश्वस्य ।)

साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहुमन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् १६ ॥

विदूषकः—(आत्मगतम् ।) [1]एसो अत्तभवं णदिं अदिक्कमिअ अतिण्हिआए संकन्तो (प्रकाशम् ।) भो अवरं किं एत्थ लिहिदव्वम् ।

---

[1]एषोऽत्रभवान्नदीमतिक्रम्य मृगतृष्णिकायां संक्रान्तः । भो अपरं किमत्र लिखितव्यम् ।

प्यपि दृश्यते" इति डः । स्वार्थे कः समुद्गकः पेटिका । अहमेवेति आलेख्यमात्रमप्यवलम्ब्य कृती भवामीति भावः ॥

साक्षादिति । पूर्वं उपगतां स्वतस्सम्प्राप्तां साक्षात् प्रियां परमार्थशकुन्तलां अपहाय परित्यज्य चित्रार्पितां चित्रन्यस्तां कृत्रिमामिति यावत् । इमां प्रियां स्मरणमात्रहेतुं न त्वनुभाव्यामिति भावः । बहुमन्यमानः स्वहस्तावलम्बादिभिरुपचारैरादियमाणः अहं पथि मार्गे निकामजलां अतिसम्भृतस्रोतसं वहतीति वहा स्रोतसो वहा तां महानदीं अतीत्य अनुपस्पृशन्नेवातिक्रम्य मृगतृष्णिकायां मरीचिकायां सलिलभ्रमकृति खेदातिरेकहेतावपि भावः । प्रणयवान् प्रार्थनावान् जातः संवृत्तः वस्तुन्यवस्तुबुद्धि रवस्तुनि च वस्तुबुद्धिरुभयमपि जातमिति किमिदं मौख्यमिति भावः । अत्र वाक्यार्थयोः सदृशयोरैक्यारोपात् वाक्यार्थवृत्तिनिदर्शनालङ्कारः । तेन च मृगतृष्णानुसारिणः पिपासेव चित्रगतप्रियादर्शिनो नोत्कण्ठा विरमतीति वस्तु व्यज्यते । वसन्ततिलकं वृत्तम् ॥

सानुमती—[1]जो जो पदेसो सहीए मे अहिरुइदो तं तं आलिहिदुकामो भवे ।

राजा—श्रूयताम् ।

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ १७ ॥

---

[1]यो यः प्रदेशः सख्या मेऽभिरुचितस्तं तमालिखितुकामो भवेत्।

अपरं । विहितादन्यत् शकुन्तलायाः सख्योश्चालिखितत्वादिति भावः । सख्याः शकुन्तलायाः अभिरूपः मनः प्रियः । तं तं तपोवनादिकम् । श्रूयता मिति—लिखितव्यमिति विदूषकवाक्यस्थमनुकृष्यते ।

कार्येति । सैकतेषु सिकतावत्सु प्रदेशेषु "सिकताशर्कराभ्यां च" इत्यण् । लीनानि निविष्टानि हंसमिथुनानि यस्याः सा लीनशब्देन धावल्यात् सैकतविशिष्टत्वं वस्तुनोऽभ्यते । ततश्च सामान्यालङ्कारध्वनिः तदुक्तं "सामान्यं गुणसामान्याद्यत्र वस्त्वन्तरैक्यता" इति । किं च हंसानां अचलनात् विस्रम्भविहारयोग्यं विजनत्वं व्यज्यते । मालिनी नाम क्षेतोवहा नदी कार्या आलेखनीया । तामभितः मालिन्या उभयतः 'अभितः परितः समया निकषा हा प्रतियोगेऽपि' इति वक्तव्यात्द्वितीया । निषण्णाः विस्रब्धमासीनाः हरिणाः निसर्गभीरवोऽपीति भावः । येषु ते प्रशान्तत्वमत्र व्यज्यते । गौरीगुरोः हिमवतः पावनाः पवित्राः पादाः प्रत्यन्तपर्वताः कार्या इति विपरिणामेनान्वयः । शाखासु विटपेषु आलम्बितानि शोषणार्थं आसञ्जितानि वल्कलानि यस्य तस्य तरोः तपोवनवृक्षस्य अधः मूलदेशे कृष्णमृगस्य सहचरस्य कृष्णसारस्य शृङ्गे विषाणे वामनयनं निजमदक्षिणं नेत्रं कण्डूयमानां विघर्षयन्तीं । "कण्डूञ् गात्रविघर्षणे" इत्यतः । "चाऽऽदिभ्य" इति यकि शित्त्वात् पाक्षिकमात्मनेपदं । मृगीं हरिणीं निर्मातुं आलेखितुं इच्छामि । स्त्रीणां वामनयनप्राधान्यात् तस्यापि शृङ्गे कण्डूयनेन विस्रम्भातिशयो व्यज्यते । तेन स्वस्य शकुन्तलाविषये रूक्षत्वमनुचितमिति

विदूषकः— (आत्मगतम् ।) [1]जह अहं दक्खामि पूरिदव्वं णेण चित्तफलअं अम्बकुच्चाणं कदम्बेहिं ।

राजा—वयस्य अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः ।

विदूषकः—[2]किं विअ ।

सानुमती—[3]वणवासस्स सोउमारस्स अ जं सरिसं भविस्सदि।

---

[1]यथाहं पश्यामि पूरयितव्यमनेन चित्रफलकं लम्बकूर्चानां कदम्बैः ।

[2]किमिव ।

[3]वनवासस्य सौकुमार्यस्य च यत सदृशं भविष्यति ।

विवक्षितंप्रतीयते । शृङ्गे कृष्णमृगस्येत्यादिः स्वभावोक्तिः "स्वभावोक्तिस्तु डिम्भादेः स्वक्रियायाद्यभिवर्णनं" इति लक्षणात् । **शार्दूलविक्रीडितं वृत्तम् ॥**

जह अहं दक्खामि मत्तकीनुरोधेन । अनेन राज्ञा लम्बकूर्चानामायतश्मश्रूणां तापसानामित्यर्थः । क्वचित्तपसानामित्यपि पाठः । "कूर्चमस्त्री भ्रुवोर्मध्ये कलथनश्मश्रुकैतवे" इत्युक्तम् । सार्थेन समूहेन पूरयितव्यं स्यात् । आरण्यकैः चित्रशोभाहानिः स्यादिति भावः । "लम्बकुआणं तावसीणं कअंबेण [लम्बकुचानां तापसीनां कदम्बेन]" इति पाठान्तरम् । "लुम्बकुआणं परिकम्म कुव्वाणेण तावसीणं णिअरेण [लम्बकुचानां परिकर्म कुर्वाणेन तापसीनां निकरेण] इति पाठे लम्बानां स्वकुचानामलङ्कारं कुर्वाणेनेत्यर्थः । अन्यच्च आलिखितादतिरिक्तमपि शकुन्तलायाः अभिप्रेतं हृदयङ्गमं प्रसाधनमलङ्करणं । अथवा अभिप्रेतं प्रथमं चिकीर्षितमेव अन्यच्च शकुन्तलायाः प्रसाधनं अत्र विस्मृतमित्यन्वयः । सौकुमार्यस्य कोमलतायाः सदृशमनुरूपम् ॥

सानुमती—[1]जो जो पदेसो सहीए मे अहिरुइदो तं तं आलिहिदुकामो भवे ।

राजा—श्रूयताम् ।

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ १७ ॥

---

[1]यो यः प्रदेशः सख्या मेऽभिरुचितस्तं तमालिखितुकामो भवेत्।

अपरं । विहितादन्यत् शकुन्तलायाः सख्योश्चालिखितत्वादिति भावः । सख्याः शकुन्तलायाः अभिरूपः मनः प्रियः । तं तं तपोवनादिकम् । श्रूयता मिति—लिखितव्यमिति विदूषकवाक्यस्थमनुकृष्यते ।

कार्येति । सैकतेषु सिकतावत्सु प्रदेशेषु " सिकताशर्कराभ्यां च " इत्यण् । लीनानि निविष्टानि हंसमिथुनानि यस्याः सा लीनशब्देन धावल्यात् सैकतविशिष्टत्वं वस्तुनोऽभ्यते । ततश्च सामान्यालङ्कारध्वनिः तदुक्तं " सामान्यं गुणसामान्याद्यत्र वस्त्वन्तरैक्यता " इति । किं च हंसानां अचलनात् विस्रम्भविहारयोग्यं विजनत्वं व्यज्यते । मालिनी नाम गौतोवहा नदी कार्या आलेखनीया । तामभितः मालिन्या उभयतः 'अभितः परितः समया निकषा हा प्रतियोगेऽपि' इति वक्तव्यात्[2]द्वितीया । निषण्णाः विस्रब्धमासीनाः हरिणाः निसर्गभीरवोऽपीति भावः । येषु ते प्रशान्तत्वमत्र व्यज्यते । गौरीगुरोः हिमवतः पावनाः पवित्राः पादाः प्रत्यन्तपर्वताः कार्या इति विपरिणामेनान्वयः । शाखासु विटपेषु आलम्बितानि शोषणार्थं आसक्तितानि वल्कलानि यस्य तस्य तरोः तपोवनवृक्षस्य अधः मूलदेशे कृष्णमृगस्य सहचरस्य कृष्णसारस्य शृङ्गे विषाणे वामनयनं निजमदक्षिणं नेत्रं कण्डूयमानां विघर्षयन्तीं । "कण्ड्वादिभ्यो गात्रविघर्षणे" इत्यतः । 'चाऽवादिभ्य' इति यकि अित्त्वात् पाक्षिकमात्मनेपदं । मृगीं हरिणीं निर्मातुं आलेखितुं इच्छामि । स्त्रीणां वामनयनप्राधान्यात् तस्यापि शृङ्गे कण्डूयनेन विस्रम्भातिशयो व्यज्यते । तेन स्वस्य शकुन्तलाविषये रक्तत्वमनुचितमिति

विदूषकः— (आत्मगतम् ।) [1]जह अहं दक्खामि पूरिदव्वं णेण चित्तफलअं अम्बकुच्चाणं कदम्बेहिं ।

राजा—वयस्य अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः ।

विदूषकः—[2]किं विअ ।

सानुमती—[3]वणवासस्स सोउमारस्स अ जं सरिसं भविस्सदि।

---

[1]यथाहं पश्यामि पूरयितव्यमनेन चित्रफलकं लम्बकूर्चानां कदम्बैः ।

[2]किमिव ।

[3]वनवासस्य सौकुमार्यस्य च यत् सदृशं भविष्यति ।

विवक्षितंप्रतीयते । शृङ्गे कृष्णमृगस्येत्यादिः स्वभावोक्तिः "स्वभावोक्तिस्तु डिम्भादेः स्वक्रियायाद्यभिवर्णनं" इति लक्षणात् । **शार्दूलविक्रीडितं वृत्तम् ॥**

जह अहं दक्खामि मत्कौतुकानुरोधेन । अनेन राज्ञा लम्बकूर्चानामायतश्मश्रूणां तापसानामित्यर्थः । क्वचित्तपसानामित्यपि पाठः । "कूर्चमस्त्री भ्रुवोर्मध्ये कलापनश्मश्रुकैतवे" इत्युक्तम् । सार्थेन समूहेन पूरयितव्यं स्यात् । आरण्यकैः चित्रशोभाहानिः स्यादिति भावः । "लम्बकुआणं तावसीणं कअंबेण [लम्बकुचानां तापसीनां कदम्बेन]" इति पाठान्तरम् । "लुम्बकुआणं परिकम्म कुव्वाणेण तावसीणं णिअरेण [लम्बकुचानां परिकर्म कुर्वाणेन तापसीनां निकरेण] इति पाठे लम्बानां स्वकुचानामलङ्कारं कुर्वाणेनेत्यर्थः । अन्यच्च आलिखितादतिरिक्तमपि शकुन्तलायाः अभिप्रेतं हृदयङ्गमं प्रसाधनमलङ्करणं । अथवा अभिप्रेतं प्रथमं चिकीर्षितमेव अन्यच्च शकुन्तलायाः प्रसाधनं अत्र विस्मृतमित्यन्वयः । सौकुमार्यस्य कोमलतायाः सदृशमनुरूपम् ॥

राजा—कृतं न कर्णार्पितबन्धनं सखे
शिरीषमागण्डविलम्बिकेसरम् ।
न वा शरच्चन्द्ररीचिकोमलं
मृणालसूत्रं रचितं स्तनान्तरे ॥ १८ ॥

विदूषकः—[1]भो किं णु तत्तहोदी रत्तकुवलअसोहिणा अग्गह त्थेण मुहं आवारिअ चइदचइदा विअ ट्ठिआ । (सावधानं निरूप्य)

---

[1]भोः किं नु तत्रभवती रक्तकुवलयशोभिनाग्रहस्तेन मुखमा-

कृतमिति । कर्णे अर्पितमासक्तिं बन्धनं कृतं यस्य तत् आगण्डं कपोलं यावत् विलम्बीनि केसराणि यस्य तत् केसराणामायतत्वमिति भावः । शिरीषं कर्णावतंसभूतं न कृतं नास्पिन्नालिखितं । न वा न च शरच्चन्द्ररीचिवत् कोमलं मनोहरं मृणालसूत्रं आश्रमसुलभं बिसतन्तुहारदाम स्तनयोरन्तरे मध्ये रचितं निर्मितं ग्रीष्मे शकुन्तलादर्शन द्वीष्मलक्षणं शिरीषकुसुमावतंसस्तापहरं च बिससूत्रदाम निधेयमिति भावः । "वद्धं कर्णशिरीषरोधि वदनेघर्मम्भसां जालकं" "स्तनन्यस्तैर्शीरं प्रशिथिलमृणालैकवलयं" इत्याद्यनुभूतपूर्वमिह राज्ञा स्मृतमिति व्यज्यते । आश्रमगुणेन अरण्यसुलभं शिरीषमृणालसूत्रमात्रादिकमपि महार्हाभरणशोभामुपगतमिति च प्रतीयते । राजकुलमानीताया वनदेवतापसादिकृतदिव्याभरणधारणं परकलत्रशङ्कना न प्रत्यक्षीकृतं राज्ञेति न तन्निर्माणादरः । **वंशस्थं वृत्तम् ॥**

रक्तकुवलयं रक्तोत्पलमिव शोभत इति तथाभूतेन रक्तकुवलयं कुवलयं जातिविशेषः । सामान्यतः कुवलयस्य नीलत्वेपि सितरक्तादीनामपि सम्भवाभिप्रायतः । तदुक्तम् । "स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च । इन्दीवरं च नीलेऽस्मिन् सिते कुमुदकैरवे ॥" इत्यमरसिंहेन । अत्र सितासितयोः पृथगुपादानेन तदतिरिक्तत्यापि सम्भवोऽवगम्यते । उत्पलादिशब्दवज्जलजसामान्यपरत्वमपि भवति । अतश्च "उत्पलं कुवलयं द्वे कुमुदस्य । कमलसाधारणस्येत्यन्ये । " इत्यमरव्याख्या । अमं

आ एसो दासीए उत्तो कुसुमरसपाडच्चरो तत्तहोदीए वअणं अहिलङ्घेदि महुअरो ।

राजा—ननु वार्यतामेष धृष्टः ।

विदूषकः—[1]भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि ।

राजा—युज्यते । अयि भोः कुसुमलतापिप्रियातिथे किमत्र परिपतनखेदमनुभवसि ।

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता ।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति ॥

वार्यं चकितचकितेव स्थिता । आः एष दास्याः पुत्रः कुसुमरसपाटच्चरस्तत्रभवत्या वदनमभिलङ्घते मधुकरः ।

[1]भवानेवाविनीतानां शासितास्य वारणे प्रभविष्यति ।

चासौ हस्तश्च तेन । आवृत्य आच्छाद्य । चकितचकिता चकितप्रकारा । सावधानं एकाग्रतया । दास्याः पुत्र इति निन्दायाम् । "षष्ठ्या आक्रोशे" इत्यलुक् । कुसुमासवस्य पुष्परसस्य पाटच्चरः चोरः एषः मधुकरः । अतिलंघते अभिभवति । कमलभ्रमादिति भावः । धृष्टः निर्भयः । वार्यतां निषिध्यताम् भावनातिरेकाच्चित्रेऽपि परमार्थभ्रमः विधिनिषेधविषये विषयत्वभ्रमश्च । अविनीतानुशासी दुष्टनिग्रहणशीलः दण्डधर इति भावः । प्रभविष्यति न तु पृथग्जनो मद्विध इति भावः । कुसुमलतानां पुष्पितानां लतानां । प्रियश्चासावतिथिश्चेति तस्य सम्बुद्धिः सविशेषमर्हणीयेत्यर्थः । अनेन प्रवासागतप्रियसाधर्म्यं व्यज्यते । इतः अत्र परितपनखेदं परिश्रमणायासं किं कुतः अनुभवसि सहसे। नेयं कुसुमिता लता अपि तु मत्प्रिया यतस्ते वृथाश्रम इति भावः । भ्रान्तिमदलङ्कारोऽत्र व्यज्यते ॥

एषेति । एषा पुरस्ताद्दृश्यमाना मधुकरी कुसुमे मधुभाजनभूत इत्यर्थः । निषण्णा आसीना प्रासार्थमपीति भावः । तृषिता पिपासुरपि सती अनुरक्ता कामयमाना भवन्तं सपीतिसखं प्रियतममित्यर्थः । प्रतिपालयति प्रतीक्षते । त्वया विना त्वां विहाय

सानुमती—[1]अज्ज अभिजादं खु एसो वारिदो ।

विदूषकः—[2]पडिसिद्धा वि वामा एसा जादी ।

राजा—एवं भो न मे शासने तिष्ठसि । श्रूयतां तर्हि संप्रति ।

अक्लिष्टवालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु ।
बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥ २० ॥

---

[1]अद्याभिज्ञातं खल्वेष वारितः ।

[2]प्रतिषिद्धापि वामैषा जातिः ।

मधु न खलु पिबति नैवास्वादयति । सानुरागप्रियानवेक्षणकथनात् स्ववृत्तान्तो व्यञ्जितः ॥ आर्या वृत्तम् ॥

अभिज्ञातं मनोज्ञं । प्रतिषिद्धापि निवारितापि एषा जातिः मधुपजातिरित्यर्थः । वामा कुटिला हठप्रवृत्तिशीलेत्यर्थः । मे शासितुरित्यर्थः । शासने निषेधरूपे न तिष्ठसि न यन्त्रितो भवसि ॥

अक्लिष्टेति— । हे भ्रमर भ्रमणशील । अक्लिष्टं करस्पर्शादिभिर्दूषितं बालतरुपल्लवं अचिरोद्भूततरुसम्बन्धि किसलयमिव । तरोरिव बालत्वे पल्लवसौकुमार्यं किमु वक्तव्यमिति भावः । बालशब्दस्य पल्लवविशेषणत्वे तरुशब्दवैयर्थ्यम् । लोभनीयं स्पृहणीयं । अत एव रतोत्सवेषु मोहभरितेष्वपीति भावः । बहुवचनेन प्रकारानन्त्यं व्यज्यते । मया रागवतापीत्यर्थः । सदयं मृदुलमेव पीतमास्वादितं प्रियायाः सम्बन्धिनं बिम्बाधरं बिम्बसदृशमधरं "बिम्बाधरादिषु मध्यमपदलोपी समासः" इति वामनः । अतो 'नोपमित' मित्यादिना बिम्बशब्दस्य परनिपातः । स्पृशसि चेत् त्वां कमलोदरे पद्माभ्यन्तर एव बन्धने कारागृहे तिष्ठतीति तथाभूतं कारयामि । प्रदोषेण प्रयोज्येन प्रयोजयामीत्यर्थः । राजा हि कालस्य कारणमिति भावः । अधरावस्कन्दनं हि दुर्मर्षमिति प्रतीयते उक्तं च "रतिं सर्वस्वमधर" मिति ॥ भोग्येऽपि कमलोदरे स्वैरिनिरोधेनावस्थापनं दण्ड इति भावः । केचित्तु अनुभूतलोकोत्तरशकुन्तलामुखसौरभस्य कम-

विदूषकः—[1]एव्वं तिक्खदंडस्स किं ण भाइस्सदि । (प्रहस्य-आत्मगतम्) एसो दाव उम्मत्तो । अहं वि एदस्स संसग्गेण ईरिसो ह्मि संवुत्तो । (प्रकाशम् ।) भो चित्तं क्खु एदं ।

राजा—कथं चित्रम् ।

सानुमती—[2]अहं वि दाणिं अणपगदत्था । किं उण जगालिहिदाणुभावी एसो ।

राजा—वयस्य किमिदमनुष्ठितं पौरोभाग्यम् ।

---

[1]एवं तीक्ष्णदण्डस्य किं न भेष्यति । एष तावदुन्मत्तः । अहमप्येतस्य संसर्गेणेदृशोऽस्मि संवृत्तः । भो चित्रं खल्वेतत् ।

[2]अहमपीदानीमनवगतार्था । किं पुनर्यथालिखितानुभाव्येषः ।

लसौरभमेवोद्वेजकमिति कमलोदरावस्थानमेव कारागृहावस्थानमित्यभिप्राय इत्याहुः । तन्मते राजानुरोधाननुरोधार्यारविशेषः उभयथापि हि विम्बाधरालाभ एव पर्यवस्यति । यदपि रतोत्सवेऽपीति न्याय्यः पाठः न तु रतोत्सवेष्विति यतो बहुरतोत्सवानुभवे सति रसो न विद्यत इति । तन्न समञ्जसं लोकविरोधात् कामशास्त्रविरोधाच्च । उक्तं हि रघुवंशे " सदयं बुभुजे महाभुजं सहसेद्वेगमियं व्रजेदिति । अचिरोपनतां समर्दिनीं नवपाणिग्रहणां वधूमिव " इति । अनेन हि ज्ञायते निर्दयोपभोगयोग उत्तरोत्तरं रतेषु भवतीति तत्रापि सदयमेव पानमुच्यमानं सौकुमार्यातिशयमवरस्य राज्ञश्च नागरिकत्वं दर्शयतीति । बहुवचनस्य प्रकारानन्यपरतया व्याख्यानाच्च न किञ्चिदनुपपन्नं ।

वसन्ततिलकं वृत्तम् ॥

तीक्ष्णदण्डस्य उग्रदण्डस्य तव सकाशे किं वा वस्तु न भेष्यतीत्युपहासः । मधुकरस्य मधुभाजने कमले बन्धनं न दण्ड इति भावः । एष राजा तावत् स्वयमेव उन्मत्तः भ्रान्तचित्तः एतस्य उन्मत्तस्य सङ्गेन सम्बन्धेन । ईदृशः सोन्मादः येन द्वयोश्चित्ते परमार्थव्यवहार इति भावः । कथमिति किमित्यर्थः । अहमपि उदासीनाऽपि भ्रमप्रसङ्गरहितापीति यावत् । अनवगतार्था अज्ञातयाथार्थ्या अचित्रमिति भ्रान्तेति यावत् । किंपुनः किंपुन यथालिखितं आलिखितप्रकारमनतिक्रम्य अनुभवतीति यथालिखितानुभावी आले-

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वयाभेपुनरपि चित्रीकृता कान्ता ॥ २१ ॥

(इति बाष्पं विकिरति ।)

सानुमती—[1]पुव्वावरविरोही अपुव्वो एसो विहाणमग्गो ।

राजा—वयस्य कथमेवमविश्रान्तं दुःखमनुभवामि ।

प्रजागरात् खिलीभूतस्तस्याः स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥ २२ ॥

---

[1]पूर्वापरविरोध्यपूर्व एष विधानमार्गः ।

रूयारम्भात् प्रभृति तन्मयीभूतचित्त इत्यर्थः । पुरोभागिनः दोषैकदृशः कर्म मदभिप्रायेणाचित्रेऽपि चित्रमिति दोषोद्भावनमित्यर्थः । " गुणवचनब्रह्मादिभ्यः कर्मणि च " इति ष्यञ् । अनुष्ठितं कृतं कार्यत्वात्र तत्त्ववेदनाविष्कारेणेति भावः ॥

दर्शनेति । तन्मयेन भावनाभावितप्रियातादात्म्यापन्नेन विषयान्तरमस्पृशतेत्यर्थः । हृदयेन मनसा साक्षात् परमार्थप्रियायामिव दर्शनसुखमनुभवतस्ततो मे स्मृतिकारिणा चित्रमिति स्मारयता त्वया कान्ता प्रिया पुनरपि अचित्रं चित्रं संपद्यमाना कृता चित्रीकृता । चित्रेऽपि साक्षात् कान्तामुपस्थापयन् वरं मोहः न तु तवायमुपदेश इति भावः । अत्र शकुन्तलालाभजनितहर्षस्य तदवगमजनितविषादस्य च व्यभिचारिणोर्भावयोर्व्यतिकरात् भावसन्धिरलङ्कारः । **आर्या वृत्तम् ॥**

विकिरति वर्षति विसृजतीति पाठान्तरं । विधानमार्गः संविधानप्रकारः विधेः प्रवृत्तिर्वा पूर्वापरविरोधी पूर्वोत्तरविरोधवान् अत एव अपूर्वः अभिनवः अननुभूतपूर्व इत्यर्थः । साक्षादुपस्थितायां प्रियायामनभिज्ञानं तस्या एव सारूप्यलेशेन चित्रेऽपि तन्मयीभवनमित्यव्यवहितकालभावी भावभेदोदूरविप्रकृष्ट इति भावः । विरहमग्गो [विरमार्गः] इति पाठान्तरम् ॥

प्रजागरादिति । स्वप्ने तस्याः शकुन्तलायाः समागमः सम्बन्धः प्रजागरात् अनिद्रत्वादेव हेतोः खिलीभूतः शून्यस्संवृत्तः । बाष्पस्तु चित्रगतामप्येनां प्रियां द्रष्टुं चित्रगतप्रियादर्शनमपीत्यर्थः । अव्ययकृत्त्वाद्भावार्थत्वं । न ददाति प्रतिबध्नातीत्यर्थः ।

सानुमती—[1]सव्वहा पमज्जिदं तुए पच्चादेसदुक्खं सउंदलाए।

(प्रविश्य ।)

चतुरिका—[2]जेदु जेदु भट्टा । वण्णिआकरंडअं गेण्हिअ इदो मुहं पत्थिद म्हि ।

राजा—किं च ।

चतुरिका—[3]सो मे हत्थादो अंतरा तरलिआदुईआए देवीए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सबलक्कारं गहीदो।

विदूषकः—[4]दिट्ठिआ तुमं मुत्ता ।

[1]सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः ।

[2]जयतु जयतु भर्ता । वर्णिकाकरण्डकं गृहीत्वेतोमुखं प्रस्थितास्मि ।

[3] स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्याहमेवार्य पुत्रस्योपनेष्यामीति सबलात्कारं गृहीतः ।

[4]दिष्ट्या त्वं मुक्ता ।

अथवा एनामिति ददातेः कर्म दर्शनमात्रार्थमपि न ददाति । चित्रगतायास्तावन्मात्र प्रयोजनत्वात् । का कथा मनोरथान्तरस्येति भावः । ददातीत्यनेन वाप्यस्य स्वातन्त्र्येण दुर्निवारत्वं व्यज्यते । अनुष्टुप् वृत्तम् ॥

शकुन्तलायास्सम्बन्धि प्रत्यादेशदुःखं सर्वथा प्रमृष्टं निःशेषं विशोधितं । पत्युरनुशयवान् प्रणयो हि कश्चिदाश्वास इति भावः । वार्णिकाकरण्डकं वर्णद्रव्यपेटिकां । किं चेति दर्शनात्परं च किं येनसावरोषमिव ते वचनमित्यर्थः । देवीदर्शनात्याहितभयादन्तरा सम्भ्रमात् प्रश्नः । अन्तरा मध्ये तरलिका नाम चेटी द्वितीया यस्यास्तया देव्या महिष्या वसुमत्या नाम सः वर्णिकाकरण्डः गृहीत आश्लिष्टः । त्वं मुक्ता—यदि त्वमेव गृहीताभवेः तदानीमज्ञातदेव्यागमश्चित्र-

चतुरिका—[1]जाव देवीए विडवलग्गं उत्तरीअं तरलिआ मोएदि ताव मए णिव्वाहिदो अत्ता ।

राजा—वयस्य उपस्थिता देवी बहुमानगर्विता च । भवानिमां प्रतिकृतिं रक्षतु ।

विदूषकः—[2]अत्ताणं त्ति भणाहि । (चित्रफलकमादायोत्थाय ।) जइ भवं अंतेउरकलहादो मुच्चीअदि तदो मं मेहप्पडिच्छंदे पासादे सद्दावेहि ।

(इति द्रुतपदं निष्क्रान्तः ।)

---

[1]यावदेव्या विटपलग्नमुत्तरीयं तरलिका मोचयति तावन्मया निर्वाहित आत्मा ।

[2]आत्मानमिति भण । यदि भवानन्तः पुरकलहान्मुच्यते तदा मां मेघप्रतिच्छंदे प्रासादे शब्दायस्व ।

हस्तो वयस्ये देवीदर्शने कृच्छ्रगतो भवेदिति भावः । उत्तरीयं संव्यानं मोचयति विट-पाद्विश्लेषयति । आत्मा स्वशरीरं निर्वाहितः निर्गमितः वाहयतिर्गत्यर्थः । निर्वासित इति पाठान्तरम् । उपस्थिता संप्राप्ता बहुमानेन भर्तृवात्सल्येन । देवीत्वाद्बहुमानगर्वाच्च नमामन्यासक्तं मृष्येतेति भावः । प्रतिकृतिमालेख्यं रक्षतु देवीदर्शनादपनयतु । आत्मान-मिति यच्चित्रस्थं रक्षणं तत्रैव देवीकोपात् परित्राणमिति भावः । अन्तःपुरस्य वसुमती-देव्याः कलहात् अन्यासङ्गावगमननिमित्तात् कोपात् । कालकूटादिति पाठे अन्तःपुरं काल-कूटमिवेत्युपमितसमासः उद्वेजनीयत्वं व्यज्यते । यदि विमुच्यत इत्यनेन विमोचनस्या-शक्यत्वं व्यज्यते । मेघप्रतिच्छन्दे रूपोत्सेधाभ्यां मेघसदृशत्वात् कृतमेघप्रतिच्छन्दाख्ये-प्रासादे स्थितमिति शेषः । शब्दायस्व आह्वय "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे" इति क्यङ् । शब्दयेति पाठे शब्दशब्दात् "तत् करोती"ति णिच् । शब्दापयेति तु

सानुमती—[1]अण्णसंकंतहिअओ वि पढमसंभावणं अवेक्खदि। असिढिलसोहदो दाणिं एसो ।

(प्रविश्य पत्रहस्ता ।)

प्रतीहारी—[2]जेदु जेदु देवो ।

राजा—वेत्रवति न खल्वन्तरा दृष्टा त्वया देवी ।

प्रतीहारी—[3]अह इं । पत्तहत्थं मं पेक्खिअ पडिणिउत्ता ।

राजा—कार्यज्ञा कार्योपरोधं मे परिहरति ।

प्रतीहारी—[4]देव अमच्चो विण्णवेदि । अत्थजादस्स गणणाबहुलदाए एक्कं एव्व पोरकज्जं अवेक्खिदं । तं देवो पत्तारूढं पच्चक्खीकरेदु त्ति ।

राजा—इतः पत्रिकां दर्शय ।

(प्रतीहार्युपनयति ।)

---

[1]अन्यसंक्रांतहृदयोऽपि प्रथमसंभावनामवेक्षते । अशिथिलितसौहृद इदानीमेषः ।

[2]जयतु जयतु देवः ।

[3]अथ किम् । पत्रहस्तां मां प्रेक्ष्य प्रतिनिवृत्ता ।

[4]देव अमात्यो विज्ञापयति । अर्थजातस्य गणनाबहुलतयैकमेव पौरकार्यमवेक्षितं । तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति ।

प्रामादिकश्छायापाठः । शब्दशब्दादापुगागमस्याविधानात् । द्रुतपदं देव्युपस्थानशङ्कया त्वरितपदन्यासं । प्रथमसम्भावनां पूर्वकृतं देवीगौरवं अवेक्षते दाक्षिण्यादनुरुध्यते अस्य विस्मरणमेवातवर्यहेतुकमिति भावः । पत्रहस्ता "यत् प्रत्यवेक्षितं पौरकार्यमार्येण तत् पत्रमारोप्य दीयतां" इति पूर्वसन्देशानुरोधादमात्यप्रहितं पत्रं हस्ते यस्याः सा । अन्तरा मार्गमध्ये न खलु दृष्टा खल्विति प्रश्ने । "निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमरः । अथ किमिति—दृष्टेत्यर्थः । कार्यज्ञा राजकार्यगौरवाभिज्ञा कार्योपरोधं निजागमनेन राजकार्यस्य कालक्षेपं । अर्थजातस्य कार्यवर्गस्य गणनाबहुलतया संख्याधिकतया प्रत्यवेक्षितं परामृष्टं । तत् प्रत्यवेक्षितं कार्यं तावत् साकल्येन पत्रारूढं पत्रगतं । उपन-

राजा—(अनुवाच्य।) कथम्। समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसनेन विपन्नः। अनपत्यश्च किल तपस्वी। राजगामी तस्यार्थसंचय इत्येतदमात्येन लिखितम्। कष्टं खल्वनपत्यता। वेत्रवति महाधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम्। विचार्यतां यदि काचिदापन्नसत्त्वा तस्य भार्या स्यात्।

प्रतीहारी—[1]देव दाणिं एव्व साकेदसेट्ठिणो दुहिदा णिव्वुत्तपुंसवणा जाआ से सुणीअदी।

राजा—ननु गर्भः पित्र्यं रिक्थमर्हति। गच्छ। एवममात्यं ब्रूहि।

---

[1]देव इदानीमेव साकेतश्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायाऽस्य श्रूयते।

यति गृहीत्वा वाचनयोग्यान्तरे दर्शयतीत्यर्थः। कथमिति खेदे। समुद्रेत्यादि, तस्यार्थसञ्चय इत्यन्तं पत्रविषयः। समुद्रे व्यवहरति क्रयविक्रयं करोतीति समुद्रव्यवहारी सांयात्रिक इत्यर्थः। सार्थं वणिक्संघं वहति नयतीति सार्थवाहः प्रधानवणिक् "सार्थो वणिक्समूहे स्यादपि संघातमात्रके" इति मेदिनी। धनमित्रो नाम नौव्यसनेन वाल्यादिजनितेन प्लवविप्लवेन व्यसन इति पाठे निमित्ते सप्तमी "व्यसनं विपदि भ्रंशे दोषे कामजकोपजे" इत्यमरः। विपन्नः मृतः। अनपत्यः असन्तानः। तपस्वी शोच्यः। अर्थसञ्चयः धननिधानं राजानं गामी राजगामी गम्यादीनामुपसंख्यानात् द्वितीयातत्पुरुषः। अनपत्यता सन्तानाभावः कष्टं दुःखे। महाधनत्वात् प्रभूतधनत्वात् हेतोः तत्र भवता धनमित्रेण बहुपत्नीकेन अनेकभार्येण। तस्य सम्बन्धिनी काचित् अन्यतमा भार्या आपन्नः प्राप्तः सत्त्वो गर्भो यया सा। यदीति सम्भावनायां अपि स्यादित्यर्थः साकेतश्रेष्ठिनः अयोध्यास्थस्य प्रधानवणिजः। निर्वृत्तं समाप्तं पुमान् सूयते अनेनेति पुंसवनं नाम संस्कारविशेषो यस्याः सा। गर्भः गर्भस्थशिशुः पितुरिदं पित्र्यं रिक्थं धनं "द्रव्यं वित्तं

प्रतीहारी—[1]जं देवो आणवेदि ।

(इति प्रस्थिता ।)

राजा—एहि तावत् ।

प्रतीहारी—[2]इअम्हि

राजा—किमनेन संततिरस्ति नास्तीति ।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम् ॥ २३ ॥

---

[1]यद्देव आज्ञापयति ।

[2]इयमस्मि ।

स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमरः । अर्हति जन्मत एव स्वाम्यं जायत इति व्यवहारविदः । एवं गर्भोरिक्थमर्हतीत्युक्तप्रकारेण । एहीति—वक्तव्यस्यान्यत्वादिति भावः ॥

येनेति ॥ प्रजाः जनाः स्निग्धेन प्रियेण येन येन बन्धुना वियुज्यन्ते विरहिता भवन्ति दुष्यन्तः तासां प्रजानां स सः अतीतः सर्व एव बन्धुः भवति बन्धुकृत्यं करोतीत्यर्थः । पापादृते असति पाप इत्यर्थः । सति तु पापे दण्डधरत्वान्न बन्धुर्भवतीति भावः । उक्तं च "द्वेष्योपि संमतः शिष्टस्तस्यार्तस्य यथौषधं । त्याज्यो दुष्टः प्रियोप्यासीदंगुलीवोरगक्षता" इति रघुवंशे । यत्तु पापादृते पतिरहितानां स्वयमेव पतित्वेन प्राप्त्यादिरूपं पापं विनेति व्याख्यानं तदहृद्यं । बन्धुशब्दप्रयोगाच्च न पापप्रसङ्गः । अत एवोक्तं पञ्चमाङ्के "अतनुषु विभवेषु ज्ञातयः सन्तु नाम त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानां" इति । इति—अनेन प्रकारेण घुष्यतां प्रकटीक्रियतां । अनुष्टुप् वृत्तम् ॥ २४ ॥

प्रतीहारी—[1]एवं णाम घोसइदव्वं । (निष्क्रम्य । पुनः प्रविश्य ।) काले पवुट्ठं विअ अहिणंदिदं देवस्स सासणं ।

राजा— (दीर्घमुष्णं च निःश्वस्य ।) एवं भोः संततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने संपदः परमुपतिष्ठन्ति । ममाप्यन्ते पुरुवंशश्रिय एष एव वृत्तांतः ।

प्रतीहारी—[2]पडिहदं अमंगलं ।

राजा—धिङ्मामुपस्थितश्रेयोऽवमानिनम् ।

सानुमती—[3]असंसअं सहिं एव्व हिअए करिअ णिंदिदो णेण अप्पा ।

---

[1]एवं नाम घोषयितव्यम् । काले प्रवृष्टमिवाभिनन्दितं देवस्य शासनम् ।

[2]प्रतिहतममङ्गलम् ।

[3]असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा ।

काले योग्यसमये प्रवृष्टं वर्षणमिव अभिनन्दितं अनुमोदितं । सन्ततिच्छेदेन सन्तानाभावेन निरवलम्बानां निराश्रयाणां कुलानां वंशानां संपदः धनानि मूलपुरुषस्य कुलप्रधानभूतस्य पुंसः अवसाने अन्ते सति परं असम्बद्धं यं कञ्चित् उपतिष्ठन्ति । प्राप्नुवन्ति । कुरुवंशस्य श्रियः राज्यलक्ष्म्या अपि एषः परगामित्वरूपः वृत्तान्तः स्थितिः "कुरुवंशश्रीरकाल इवोप्तबीजा भूरेवंवृत्ता" इति पाठे अकाले उप्तबीजा भूमिर्यथा न फलिता भवति तथा कुरुवंशस्य श्रीरपि एवं परगामित्वरूपं वृत्तं दशा यस्याः सेत्यर्थः । अमङ्गलं सन्तानाभावरूपं प्रतिहतं निवृत्तं भूयात् "आशंसायां भूतवच्च" । उपस्थितं आत्मनैवोपनतं श्रेयः सगर्भायां धर्मपत्न्याः संप्राप्तिरूपं अवमन्यते निरस्यतीति तथाभूतं मां धिक् "उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते" इत्युक्त्वा धिक्शब्दयोगात् द्वितीया । हृदये कृत्वा श्रेयःपदेन अभिप्रेत्य॥

राजा—संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा ।
कल्पिष्यमाणा महते फलाय
वसुंधरा काल इवोप्तबीजा ॥ २४ ॥

सानुमती—[1]अपरिच्छिण्णा दाणिं दे संददी भविस्सदि ।

चतुरिका—(जनान्तिकम् ।) [2]अए इमिणा सत्थवाहउत्तंतेण विमणाअदि भट्टा । णं अस्सासेदुं मेहप्पडिच्छंदादो अज्जमाढव्वं गेण्हिअआअच्छेहि ।

प्रतीहारी—[3]सुट्ठु भणासि ।

(इति निष्क्रान्ता ।)

---

[1]अपरिच्छिन्नेदानीं ते संततिर्भविष्यति ।

[2]अये अनेन सार्थवाहवृत्तान्तेन विमनायते भर्ता । एनमाश्वासयितुं मेघप्रतिच्छन्दादार्यमाढव्यं गृहीत्वाऽऽगच्छ ।

[3]सुष्ठु भणासि ।

संरोपित इति । आत्मनि स्वस्मिन् संरोपिते गर्भरूपेण जनिते सत्यपि- "आत्मा वै पुत्रनामासि" इति श्रुतेरिति भावः । कुलस्य वंशस्य प्रतितिष्ठत्यनयेति प्रतिष्ठा सन्तानानामनुच्छेदहेतुः कीर्तिहेतुरित्येके । धर्मपत्नी शकुन्तला मया नाम मयैव त्यक्ता निरस्ता । तद्यथा काले बीजवापयोग्यसमये उप्तानि क्षिप्तानि बीजानि यस्यां सा । अत एव महते प्रभूताय फलाय कल्पिष्यमाणा संपत्स्यमाना । "कृपेस्सम्पद्यमाना" दिति वक्तव्याच्चतुर्थी । वसुन्धरा भूमिरिव । अथवा उप्तबीजा महते फलाय कल्पिष्यमाणा वसुन्धरा काले फलपाकसमय इव त्यक्ता । नान्य एवंवृत्तो भूतपूर्व इत्यर्थः। कृतश्रमस्य फलकाले परित्यागो मौर्ख्यमिति भावः । उपमालङ्कारः। उपजातिर्वृत्तम्॥

अपरिच्छिन्ना अविच्छिन्ना भविष्यति पुत्रकलत्रप्राप्तिः सम्भविष्यतीति भावः । सार्थवाहवृत्तान्तेन धनमित्रविपत्तिकथया विमनाः शून्यमना इव आचरति विमानयते

राजा—अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः । कुतः ।

अस्मात् परं बत यथाश्रुति संभृतानि
को नः कुले निवपनानि करिष्यतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति ॥ २५ ॥

(इति मोहमुपगतः ।)

चतुरिका— (ससंभ्रममवलोक्य ।)[1]समस्ससदु समस्ससदु भट्टा ।

सानुमती—[2]हद्धी हद्धी । सदि खु दीवे ववधाणदोसेण एसो अंधआरं अणुहोदि । । अहं दाणिं एव्व णिव्वुदं करेमि । अह वा

---

[1]समाश्वसितु समाश्वसितु भर्ता ।

[2]हा धिक् हा धिक् सति खलु दीपे व्यवधानदोषेणैषोऽन्धका-

विषीदति । विगुणत्वे ओ [द्विगुणद्वेगः] इति पाठान्तरं । आश्वासयितुं विनोदयितुं । गृहीत्वा आनीय । पिण्डभाजः पिण्डार्हाः पितरः संप्रति पिण्डसंदेहं आपन्नाः प्राप्ताः ॥

अस्मादिति॥ पितरः अस्मात् दुष्यन्तात् परं अनन्तरं यथाश्रुति यथाविधि सम्भृतानि संपादितानि निवपनानि निवापान् पितृदेयानि जलाञ्जलिप्रभृतीनीत्यर्थः । "पितृदानं निवापः स्यात्" । नः अस्माकं कुले वंशे कः करिष्यति न कश्चित् करिष्यति इति मत्वा प्रसूतिविकलेन सन्तानशून्येन मया कर्त्रा प्रसिक्तं आवर्जितं उदकं निवापजलं धौतं क्षालितं अश्रु येन तस्य शेषं अवशिष्टभागमेव पिबन्ति नूनमिति सम्भावनायां । मन्निवापदर्शनसमनन्तरं भाविनिवापाभावशोकेन सवाष्पाणां पितॄणां मद्दत्तं सलिलं अश्रुप्रमार्जनोपयुक्तं स्तोकमेव पानायावशिष्यत इत्यर्थः । "नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः । न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः" इति रघुवंशे । **वसन्ततिलकं वृत्तम्** ॥ २५ ॥

व्यवधानदोषेण कुड्यादितिरोहितत्वमात्रेण अन्धकारं अदर्शनं कार्ये कारणोपचारः। अन्धआरदोसं इति पाठे तमःप्रयुक्तमान्ध्यमित्यर्थः । दीपभूतस्य शकुन्तलापुत्रस्य

सुदं मए सउंदलं समस्सासअंतीए महेंदजणणीए मुहादो । जण्ण-भाओ सुआ देवा एव्व तह अणुचिट्ठिस्संति जह अइरेण धम्म-पइणिं भट्टा अहिणंदिस्सदि त्ति । ता जुत्तं एदं कालं पडिपालेदुं । जाव इमिणा उत्तंतेण पिअसहिं समस्सासेमि ।

(इत्युद्भ्रान्तकेन सानुमती निष्क्रान्ता ।)

नेपाठ्ये ।

[1]अब्बम्हण्णं अब्बम्हण्णं ।

रमनुभवति । अहमिदानीमेव निवृत्तं करोमि । अथ वा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखात् । यज्ञभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथाऽचिरेण धर्मपत्नीं भर्ताऽभिनन्दिष्य-तीति । तस्माद्युक्तमेतं कालं प्रतिपालयितुम् । यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि ।

[1]अब्रह्मण्यम् अब्रह्मण्यम् ।

असन्निकर्षेण सन्तानविरहानुशय इति भावः । निर्वृत्तं वृत्तान्तकथनेन सुखितं । शकुन्तलां प्रत्यादेशदुःखितां समाश्वासयन्त्याः महेन्द्रजनन्याः अदितेः । यज्ञभागे हविर्ग्रहणे उत्सुकाः साभिलाषाः देवा एव देवताः स्वयमेवेत्येवकारार्थः । अनुष्ठास्यन्ति करिष्यन्ति यज्ञद्विषां निरासाय दुष्यन्तस्य आह्वास्यप्रानत्वादिति भावः । त्वया सह दीक्षितेन राज्ञा दत्तं हविर्भागमादातुकामा इति भाव इत्यन्ये । अभिनन्दिष्यति प्रतिग्रहीष्यति । एतं कालं देवप्रवृत्तिसमयं प्रतिपालयितुं प्रतीक्षितुं प्रतिपालनमित्यर्थः । अव्यय-कृत्त्वेन भावार्थता । युक्तं न्याय्यं । नियतभाविनि श्रेयसि स्नेहं परांभूमिं गमयन् नान्त-रीयकः सन्तापो नान्तरा निरसनीय इति देवरहस्यमिति भावः । वृत्तान्तेन पतिप्रणयक-थया । उद्भ्रान्तकेन व्योमोत्पतनेन । अब्रह्मण्यं हाहतोऽस्मीत्याक्रोशः । ब्रह्मणि साधु ब्रह्मण्यं तन्न भवतीत्यब्रह्मण्यं । 'अब्रह्मण्यमवध्योक्तौ' इत्यमरः । प्रत्यागतप्राणः व्यप-

राजा—(प्रत्याश्वस्तः। कर्णं दत्वा।) अये माढव्यस्येवार्तस्वरः। कः कोऽत्र भोः?।

(प्रविश्य।)

प्रतीहारी—(ससंभ्रमम्।) [1]परित्ताअदु देवो संसअगदं वअस्सं।

राजा—केनात्तगंधो माणवकः!

प्रतीहारी—[2]अदिट्ठरूवेण केण वि सत्तेण अदिक्कमिअ मेहप्पडिच्छन्दस्स पासादस्स अग्गभूमिं आरोविदो।

राजा—(उत्थाय।) मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः। अथ वा।

अहन्यहन्यात्मन एव तावद्
ज्ञातुं प्रमादस्खलितं न शक्यम्।

---

[1]परित्रायतां देवः संशयगतं वयस्यम्।

[2]अदृष्टरूपेण केनापि सत्त्वेनातिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः।

गतमोहः रसान्तरोपनिपातादुद्बुद्धचित्त इत्यर्थः। आर्तस्वरः दीनध्वनिः। संशयगतं प्राणसन्देहं प्राप्तं। माणवकः बालः 'बालस्तु स्यान्माणवकः' इत्यमरः। मनोरयमित्यणि 'ब्राह्मणमाणवबाडबाद्यत्' इति णत्वं निपातितम्। आत्तगन्धः अभिभूतः आत्तः अपहृतः गन्धः गर्वः यस्य सः 'आत्तगन्धोऽभिभूतः स्यात्' इत्यमरः। आत्तकण्ठ इत्यन्यः पाठः गृहीतकन्धर इत्यर्थः। आर्तकण्ठ इति पाठे केन हेतुना दीनस्वरो जात इत्यर्थः। अदृष्टरूपेण अप्रत्यक्षशरीरेण सत्त्वेन भूतेन अतिक्रम्य अभिभूय आक्रम्येति पाठे गृहीत्वेत्यर्थः अस्य भूमिं शिरोगृहं। मा तावत् नायं सत्त्वातिक्रम इत्यर्थः। ममापि नाम राजर्षेरपि सत इत्यर्थः। अपिर्विरोधे। नामेति विस्मये। अभिभूयन्ते अतिलंघ्यन्ते॥

अहन्नीति॥ अहन्यहनि दिने दिने आत्मन एव स्वस्यैकस्यैव प्रमादेन अनवधानेन स्खलितं अपराधः तावत् साकल्येन ज्ञातुं न शक्यं। प्रजासु भूयिष्ठेषु पाल्य-

प्रजासु कः केन पथा प्रयाती-
त्यशेषतो वेदितुमस्ति शक्तिः ॥ २६ ॥

(नेपथ्ये ।)

[1]भो वअस्स अविहा अविहा ।

राजा—(गतिभेदेन परिक्रामन् ।) सखे न भेतव्यं न भेतव्यम् ।

(नेपथ्ये ।)

(पुनस्तदेव पठित्वा ।) [2]कहं ण भाइस्सं । एस मं को वि पच्चा अवणदसिरोहरं इक्खुं विअ तिक्खभङ्गं करेदि ।

राजा—(सदृष्टिक्षेपम् ।) धनुस्तावत् ।

(प्रविश्य शार्ङ्गहस्ता ।)

---

[1]भो वयस्य अविध अविध ।

[2]कथं न भेष्यामि । एष मां कोऽपि पश्चादवनतशिरोधरमिक्षुमिव तीक्ष्णभङ्गं करोति ।

जनेषु मध्ये कः पुरुषः केन पथा मार्गेण न्याय्येन अन्येतरेण प्रयाति प्रवर्तते इति इमं विषयमित्यर्थः । अशेषतः साकल्येन वेदितुं उपलब्धुं शक्तिः सामर्थ्यं अस्तीति काकुः नास्तीत्यर्थः । स्खलनस्य सम्भावनीयत्वात् सत्वाभिभवो न विस्मयायेति भावः । शकुन्तलाविषयं स्वापराधमभिसन्धायोक्तं आत्मन एवेति । अत्र प्रजास्खलनानवबोधस्य कैमुत्यसिद्धत्वादर्थापत्तिरलङ्कारः । उपजातिर्वृत्तम् ॥

अविधेत्याक्रोशे । गतिभेदेन त्वरितगमनेन । पश्चादवनता पृष्ठतो भुग्ना शिरोधरा ग्रीवा यस्य तं सन्तं इक्षुमिव तीक्ष्णभङ्गं कठोरभङ्गं त्रिखण्डमिति पाठान्तरं । इक्षूपमया भूतस्य आस्वादलोभो व्यज्यते । सदृष्टिक्षेपं सर्वतो दृष्टिं विक्षिप्य । तावत् अचिरेण । शार्ङ्गं धनुः हस्ते यस्याः सा यवनी ' किराती चामरधरा यवनी शस्त्रधारिणी ' इत्यमरः । ' शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ' इत्यादिवदिह धनुर्मात्रपरं शार्ङ्गपदं ।

यवनिका—[1]भट्टा एदं हत्थावावसहिदं सरासणं ।

(राजा सशरं धनुरादत्ते ।)

(नेपथ्ये ।)

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवन्विदानीम् ॥ २७ ॥

[1]भर्तः एतद्धस्तावापसहितं शरासनम् ।

हस्तावापः हस्तपरिक्षेपः चर्मनिर्मितं तलत्राणमिति यावत् 'आवापो भाण्डपचने परिक्षेपालबालयोः' इत्युक्तं ॥

एष इति ॥ अभिनवं सद्यो विदार्योद्धृतं कण्ठशोणितमित्यर्थः । कण्ठशोणितं हृदयसन्निहितं रुधिरं अर्थयते अभिलषतीति तथाभूतः । अथवा अभिनवेन कण्ठशोणितेन अर्थी कार्यवान् 'अर्थादसंनिहिते' इति मत्वर्थीय इनिः । शार्दूलोऽपि मृगाणां कण्ठादेव शोणितं पिबतीत्यौपम्यं । एषोहं अभीत इति भावः । शार्दूलो व्याघ्रः पशुं अजादिकमिव चेष्टमानं स्फुरन्तं सन्तं । वेष्टमानमिति पाठे भूमौ लुठन्तमित्यर्थः । त्वां हन्मि मारयामि । आर्तानां आपन्नानां भयं शत्रु भीतिं अपनेतुमहर्तुं आत्तं गृहीतं धनुर्येन स आत्तधन्वा 'धनुषश्च' इत्यनङादेशः 'क्षतात् किल त्रायत इत्युदग्रः क्षत्त्रस्य शब्दो भुवनेषु रूढः' इति चोक्तं । दुष्यन्तः इदानीं मदाक्रमणावसरे तव प्रियवयस्य स्येत्यर्थः । शरणं रक्षिता भवतु अन्यथा हि वृथैव स्यादायुधपरिग्रह इति भावः । वयस्यमरक्षन् कमसावन्यं रक्षिष्यतीति प्रतीयते । अत्र आत्तधन्वेति विशेषणस्य साभिप्रायत्वात् परिकरालङ्कारः । तस्य च शार्दूलः पशुमिवेत्युपमया सह संसृष्टिः । **प्रहर्षिणी** वृत्तम् ॥

राजा—(सरोषम् ।) कथं मामेवोद्दिशति । तिष्ठ कोणपापशद त्वमिदानीं न भविष्यसि । (शार्ङ्गमाकृष्य ।) वेत्रवति सोपानमार्गमादेशय ।

प्रतीहारी—[1]इदो इदो देवो

(सर्वे सत्वरमुपसर्पन्ति ।)

राजा—(समन्ताद्विलोक्य ।) शून्यं खल्विदम् ।

(नेपथ्ये ।)

[2]अविहा अविहा । अहं अत्तभवन्तं पेक्खामि । तुमं मं ण पेक्खसि । बिडालगहीदो मूसओ विअ णिरासो म्हि जीविदे संवुत्तो ।

राजा—भोस्तिरस्करिणीगर्वित मदीयमस्त्रं त्वां द्रक्ष्यति । एष तमिषुं संदधे ।

---

[1]इत इतो देवः ।

[2]अविध अविध । अहमत्रभवन्तं पश्यामि । त्वं मां न पश्यसि । बिडालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः ।

मामेव निग्रहीतारमपीत्यर्थः । निर्दिशति लक्ष्यीकरोति । कोणपापशद राक्षसाधम । कुणपाशनेति क्वचित् पाठः । न भविष्यसि नात्मानं धारयिष्यसि विनङ्क्ष्यसीत्यर्थः । सोपानमार्गं मेघप्रतिच्छन्दारोहणपथं । जीविते विषये निराशः गतप्रायत्वादाशंसारहितः । तिरस्करिण्या नाम आच्छादनविद्यया गर्विता नान्यो द्रक्ष्यतीति दर्पाविष्टदर्शने नावस्थातुं प्रभवसीति भावः । अस्त्रं द्रक्ष्यति दिव्यशक्तित्वाददृश्यमपि लक्षीकरिष्यति । स्थिरो भव न तु भयादपयाहीत्यर्थः । तमिषुं वक्ष्यमाणविशेषणमस्त्राभिमन्त्रितं बाणं सन्दधे योजये । सन्धत्त इति पाठे प्रौढिवशात् परोक्षनिर्देशः । तच्छब्दाक्षिप्तं विशेषणमादत्ते ॥

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥ २८ ॥

(अस्त्रं संधत्ते ।)

(ततः प्रविशति विदूषकमुत्सृज्य मातलिः ।)

मातलिः—कृताः शरव्यं हरिणा तवासुराः
शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥२९॥

राजा—(अस्त्रमुपसंहरन् ।) अये मातलिः । स्वागतं महेन्द्रसारथे ।

य इति ॥ य इषुः हन्तव्यं अपराधिनमित्यर्थः । त्वां हनिष्यति रक्ष्यं रक्षणार्हं द्विजं माढव्यं रक्षति त्वन्निग्रहेण त्रायते च वर्तमानसामीप्याद्वर्तमाननिर्देशः । तमिषुमिति पूर्वेणान्वयः । तद्यथा हंसो हि क्षीरं आदत्ते अद्भ्यो विभज्य गृह्णाति । तेन क्षीरेण मिश्राः व्याप्तिकीर्णाः अपो वर्जयति पृथक्कृत्य त्यजति । तथा ममापि बाणः त्वामदृश्यमप्यादाय त्वद्द्रोहितं वयस्यं मोक्ष्यतीत्यर्थः । " दुष्यन्तस्त्व शरणं भवत्विदानीमित्येतदिह प्रत्युक्तं । अत्र वध्यमिति विशेषणस्य सापराधत्वरूपप्रतीयमानार्थगर्भत्वात् परिकरालङ्कारः । द्विजमिति च विशेष्यस्य रक्षणावश्यं भावाभिप्रायात् परिकरांकुरः । इति द्वयोस्संसृष्टिः । अनुष्टुप् वृत्तम् ॥

कृता इति । हरिणा इन्द्रेण असुराः तव शरव्यं लक्ष्यं कृताः सङ्कल्पिताः । शरव्यमित्येकवचनेन एकहेलयैव सर्वासुरनिग्रहसमर्थत्वं व्यज्यते । इदं संहिताख्यमित्यर्थः । शरासनं धनुः तेषु प्रत्यर्थिषु विषये विकृष्यतां अस्त्रप्रयोगाय विनम्यतां । सतां सत्पुरुषाणां प्रसादेनानुग्रहेण सौम्यानि अतीक्ष्णानि चक्षूंषि दर्शनानि सुहृज्जने मित्रेषु विषये पतन्ति । न तु दारुणास्तीक्ष्णाः शराः । वंशस्थं वृत्तम् ।

(प्रविश्य।)

विदूषकः—[1]अहं जेण इट्ठिपसुमारं मारिदो सो इमिणा सा-अदेण अहिणन्दीअदि।

मातलिः—(सस्मितम्।) आयुष्मन् श्रूयतां यदस्मि हरिणा भवत्सकाशं प्रेषितः।

राजा—अवहितोऽस्मि।

मातलिः—अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः।

राजा—अस्ति श्रुतपूर्वो मया नारदात्।

मातलिः—सख्युस्ते स किल शतक्रतोरजय्य-
स्तस्य त्वं रणशिरसि स्मृतो निहन्ता।
उच्छेत्तुं प्रभवति यन्न सप्तसप्ति-
स्तन्नैशं तिमिरमपाकरोति चन्द्रः॥ ३०॥

---

[1]अहं येनेष्टिपशुमारं मारितः साऽनेन स्वागतेनाभिनन्द्यते।

इष्टिपशुमारं मारितः यज्ञियः पशुरिव निहतः "उपमाने कर्मणि च" इति णमुल्। अभिनन्द्यते प्रतिगृह्यते। कालनेमिर्नाम दानवेन्द्रः प्रसूतिरुत्पत्तिस्थानं यस्य सः। दुःखेन जीयत इति दुर्जयः नामेति प्रसिद्ध्यर्थं। दानवगणः असुरवर्गः नारदात् वक्तुस्तकाशात् श्रुतपूर्वः प्रथममेवाकर्णितः अस्ति व्यक्तमित्यर्थः 'असदीक्षा' इति भौवादिकात् क्तिप्। निङन्तप्रतिरूपकमव्ययं। अथवा श्रुतपूर्वा भवतीत्यर्थः॥

सख्युरिति—सः दुर्जयाख्यो दानवगणः ते सख्युः शतक्रतोरिन्द्रस्य अजय्यः जेतुमशक्यः खलु वरदानबलादिति भावः। "क्षय्यजय्यौ शक्यार्थे" इति निपातितं। तस्य इन्द्रेणाजय्यस्यापि दानवगणस्य त्वं रणशिरसि युद्धाग्रभागे निहन्ता नाशयिता स्मृतः महेन्द्रेण चिन्तितोऽसि लोकपालांशत्वादिति भावः। यत् तमः सप्तसप्तिः सूर्योऽपि उच्छेत्तुं नाशयितुं न प्रभवति शक्नोति तत् नैशं निशाभवं तैमिरं तमः कर्म चन्द्रः अपाकरोति व्युदस्यति सूर्यतेजसैवाप्यायितोऽपि यथा चन्द्रः सूर्यस्याप्य-

स भवानात्तशस्त्र एवेदानीमैन्द्रं रथमारुह्य विजयाय प्रतिष्ठताम् ।

राजा—अनुगृहीतोऽहमनया मघवतः संभावनया । अथ माढव्यं प्रति भवता किमेवं प्रत्युक्तम् ।

मातलिः—तदपि कथ्यते । किन्निमित्तादपि मनःसंतापादायुष्मान् मया विक्लबो दृष्टः । पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि । कुतः ।

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते जन्तुः ॥ ३१ ॥

विषयं निशातमो निरस्यति तथा दिव्यांशानुग्रहमात्रेण देवानामप्यविषयं भवान् विषयीकरिष्यतीत्यर्थः । अत्रोपमानोपमेयवाक्यार्थयोर्बिम्बप्रतिबिम्बभावाद्दृष्टान्तालङ्कारः । **प्रहर्षिणीवृत्तम्** ।

स भवानिति पूजायां । यद्वा सः सर्ववैरिनिराससमर्थ इत्यर्थः । आत्तशस्त्र एव अनुपसंहृतास्त्र एव । ऐन्द्रमिन्द्रसम्बन्धिनं । विजयाय शत्रून्विजेतुं । प्रतिष्ठतां प्रस्थानमात्रमेव विजयस्य विलम्ब इति भावः । "समवप्राविभ्यः स्थः" इत्यात्मनेपदं । एवमिदानीं तमैन्द्ररथमिति पाठान्तरं । मघवतः इन्द्रस्य सम्भावनया शासनार्पणानुग्रहेण अनुगृहीतः अभिवर्धितः । अथेति वाक्यभेदे । माढव्यं प्रति माढव्यस्य विषये एवं प्रयुक्तं दारुणं कृतं । किन्निमित्तादपि यत्किञ्चिद्धेतुकात् अज्ञातहेतुकादिति यावत् । मनसस्सन्तापात् अस्वास्थ्यात् विक्लबो दीनः दृष्टः उपलक्षितः । कोपयितुं कोपमुत्पादयितुं उत्साहप्रति कूलस्य दैन्यस्य विरोधिरसेन कोपेन अभिभवार्थमित्यर्थः । विदूषकपीडनमेवानतिदोषः कोपनोपाय इति भावः ॥

ज्वलतीति ॥ चलितानि इन्धनानि यस्य सः अग्निः ज्वलति । विप्रकृतो दण्डादिना प्रतिहतः पन्नगः सर्पः फणां कुरुते आविष्करोति । प्रायः बाहुल्येन जन्तुः प्राणिमात्रं क्षोभात् उद्दीपनाद्धेतोः स्वं सहजमेवापीत्यर्थः । महिमानं प्रभावं प्रतिपद्यते अङ्गीकरोति निमीलितमपि क्षिप्रमुन्मीलयतीत्यर्थः । अत्र अग्निपन्नगवृत्तान्ताभ्यां

राजा— (जनान्तिकम् ।) वयस्य अनतिक्रमणीया दिवस्पतेराज्ञा । तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि ।

त्वन्मतिः केवला तावत् परिपालयितुं प्रजाः ।
अधिज्यमिदमन्यस्मिन् कर्मणि व्यापृतं धनुः ॥ ३२ ॥

विदूषकः—[1]जं भवं आणवेदि ।

(इति निष्क्रान्तः ।)

मातलिः—आयुष्मान् रथमारोहतु ।

(राजा रथारोहणं नाटयति ।)

(निष्क्रान्ताः सर्वे ।)

इति षष्ठोऽङ्कः ।

---

[1]यद्भवानाज्ञापयति ।

विशेषाभ्यां उत्तरार्धोक्तस्य सामान्यस्य समर्थनाद्विशेषेण सामान्यसमर्थनमर्थान्तरन्यासोऽलङ्कारः । प्रतिपद्यते हि जन इति पाठान्तरं । **आर्यावृत्तम् ॥**

इतःपरं ' युक्तमनुष्ठितं भवद्भि ' रिति क्वचिदधिकपाठो दृश्यते तत्र भवद्भिरिति पूजायां बहुवचनं । दिवस्पतेरिन्द्रस्य । अमात्यपिशुनं पिशुननामानं सचिवं राजकार्यरहस्यसूचकत्वात् पिशुननामव्यपदेशः । परिगतार्थं ज्ञातवृत्तान्तम् ॥

त्वन्मतिरिति ॥ केवला एकाकिनी त्वन्मतिस्तावत् त्वद्बुद्धिरेव प्रजाः परिपालयितुं रक्षितुं भवतीति शेषः । अधिज्यमधिरोपितमौर्वीकं इदं मदीयं धनुः अन्यस्मिन् कर्मणि सुरेन्द्रनियोगे व्यापृतं प्रवृत्तं । अथवा प्रजाः पालयितुं त्वन्मतिः केवला एकाकिनी भवतीति सम्बन्धः । उभयसाध्ये कर्मणि अन्यतरमात्रप्रवृत्तौ भूयसाऽवधानेन भाव्यमिति भावः । **अनुष्टुप् वृत्तम् ॥ ३२ ॥**

॥ इति शाकुन्तलव्याख्याने सहृदयसमाख्याने षष्ठोऽङ्कः ॥

॥ अथ सप्तमोऽङ्कः ॥

ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च ।

राजा—मातले अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषा-दनुपयुक्तमिवात्मानं समर्थये ।

मातलिः—(सस्मितम् ।) आयुष्मन् उभयोरप्यपरितोषः ।

॥ अथ सप्तमोऽङ्कव्याख्याप्रारम्भः ॥

संप्रति समाप्तसुरकार्यस्य राज्ञः स्वर्गादवरोहमङ्कावतारेण प्रस्तौति । "अङ्कावतार स्त्वङ्कान्ते पातोऽङ्कस्याविभागतः" इति लक्षणात् । यत्तु "अङ्कान्तपात्रैरङ्कास्यमुत्तराङ्कार्थसूचनं" इति लक्षणादङ्कास्यमिति । तच्चिन्त्यं न ह्यत्र पूर्वाङ्कान्तपात्रैरुत्तराङ्कार्थः सूचितो भवति । जितदैत्यस्य भूम्यवतरणं हि सप्तमाङ्कार्थः । स्वर्गारोहणमेव च षष्ठाङ्कावसान-दार्शतम् । षष्ठाङ्कार्थेन सप्तमाङ्कार्थः । सम्बद्ध एव तु भवति । उक्तं च भावप्रकाशे "यथा हि वीरचरिते द्वितीयाङ्कावसानके । रामभार्गवयोर्मध्ये सुमन्त्रेण प्रविश्य च ॥ विश्वामित्रवसिष्ठौ च तदङ्कान्तेन सूचितौ । रामयोस्तत्र कलहाविच्छेदेनैव तौ पुनः ॥ तृतीयाङ्कप्रवेशेन सुमन्त्रेणैव सूचितौ । सूचनं सकलाङ्कानां ज्ञेयमङ्कमुखं बुधैः" ॥ इति । ततश्च पूर्वाङ्कपात्रेभ्योऽतिरिक्तस्य पात्रान्तरस्य भाव्यङ्कार्थसूचनार्थमेव केवलं प्रवेशः तेन च साकल्येन तदङ्कार्थसूचनं अङ्कास्ये विशेष इत्यवसीयते ॥

अनुष्ठितनिदेशः निर्वर्तितमहेन्द्रशासनोऽपि । सत्क्रियाविशेषात् बहुमानातिशया-द्धेतोः समर्थने चास्यान्वयः । अनुपयुक्तं अकिञ्चित्करमिव । समर्थये मन्ये । लघु मत्कृतं गरीयांस्तु सत्कार इति भावः । उभयोरपि न केवलं तव अपि तर्हि महेन्द्रस्यापीत्यर्थः । अपरितोषः आत्मकृते तृप्तिविरहः । उभयमप्यपरितोषं इति पाठे तव चेन्द्रस्य च द्वितय-मपिकृत्यं तृप्तेरपदमित्यर्थः । अपरितोषहेतुं दर्शयति ॥

यतः । प्रथमोपकृतं मरुत्वतः
प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानतोषितो
भवतः सोऽपि न सत्क्रियागुणान् ॥ १ ॥

राजा—मातले मा मैवम् । स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः । मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य ।

अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन ।

प्रथमेति ॥ प्रथमोपकृतं सत्कारादपि पूर्ववृत्तं स्वीयं साह्यं मरुतः सप्तवायुस्कन्धाः देवा वा सन्ति नियाम्यत्वेनास्येति मरुत्वान् "श्वयः" इति मतोर्मस्यवत्वं "तसौ मत्वर्थे" इति भसंज्ञया पदसंज्ञानिवृत्तेर्नश्चत्वाभावः । तस्य इन्द्रस्य प्रतिपत्त्या सत्कारेण भवान् लघु अल्पं मन्यते । अवदानेन भवदीयकर्मणा दुर्नयदानवजयरूपेण विस्मितः आश्चर्यान्वितः स इन्द्रोऽपि सत्क्रियायाः स्वीयसत्कारस्य गुणानतिशयान् न गणयति न मन्यते । सत्कारगौरवात् भवतः स्वकर्मण्यनादरः भवत्क्रियागौरवादिन्द्रस्य स्वसत्कारे न वैतृष्ण्यमित्यर्थः । अत्र प्रथमोपकृतमित्यनेन प्राप्तफलस्य गरीयानपि सत्कार्यं सत्कारो नातिशयायेति व्यज्यते । अपरितोषतुल्यताप्रतिपादनेन राज्ञो महेन्द्रसादृश्यव्यञ्जनात् तुल्ययोगिताऽलङ्कारध्वनिः "गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता" इति लक्षणात् । **वियोगिनीवृत्तम् ॥**

विसर्जनावसरे प्रतिप्रेषणसमये सत्कारो बहुमानः मनोरथानां सङ्कल्पानामपि अभूमिः अविषयः अचिन्तनीय इत्यर्थः । द्यौः स्वर्गः ओकः स्थानं येषां तेषां दिवौकसां पृषोदरादिः । समीपं अक्ष्णोः समक्षं । अर्धासने निजासनैकदेशे उपवेशितस्य अनिच्छतोऽपि स्वयं महेन्द्रेण स्थापितस्य मम पितद्वेत्यभिप्रेमेणान्वयः ।

अन्तर्गतेति ॥ अन्तर्गता उदात्तस्वभावतया बहिरदर्शिता प्रार्थना मालाभिलाषो यस्य तं अन्तिकस्थं समीपावस्थितं तावतैव दर्शितामिलाषमिति भावः । जयन्तं नाम स्वतनयं उद्वीक्ष्य दृष्ट्वा कृतस्मितेन स्वार्थतामयं मन्यत इति विदिताशय-

आमृष्टवक्षोहरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा ॥ २ ॥

मातलिः—किमिव नामायुष्मानमरेश्वरान्नार्हति । पश्य ।

सुखपरस्य हरेरुभयैः कृतं
त्रिदिवमुद्धतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः
पुरुषकेसरिणश्च पुरा नखैः ॥ ३ ॥

तया जातस्मितेन हरिणा इन्द्रेण आमृष्टं आर्द्रत्वादाहृतं वक्षसः मदुरसः सम्बन्धि हरिचन्दनं प्रथममालिप्तं रक्तचन्दनमेव अङ्कश्चिह्नं यस्याः सा मन्दारमाला मन्दारपुष्पदाम पिनद्धा साक्षात् बद्धा । नह्यतेरपिपूर्वात् कर्मणि क्तः "नहो धः इति धत्वं" "वष्टि-भागुरि" रित्यादिना अपेरल्लोपः । पुत्रादपि सविशेषा प्रीतिर्मयीति भावः । आमृष्टवक्षोहरिचन्दनाङ्केत्यनेन पूर्वं हरिचन्दनालेपनमपि व्यज्यते ततश्च चन्दनानुलेपनस्यार्द्रत्वप्रतिपादनेन पीतिप्रकर्षनिबन्धनो महेन्द्रस्य त्वराविशेषो गम्यते । केचित्तु । "आमृष्टवक्षोहरिचन्दनाङ्केत्यनेन दिसात्वरा व्यज्यते । मन्दारमालेत्यनेन भूलोकविलक्षणमन्दारमालामात्रं लभ्यांशः अन्यत् प्राप्यवस्तु नास्तीति सूच्यते" इत्याहुः । **उपजाति-वृत्तम्** ॥

किमिव नार्हति—सर्वथापि प्रसादः कृतो भवादृशे नातिरिच्यत इति भावः ॥

सुखेति ॥ सुखमेव परं प्रधानं यस्य तस्य स्वयमभियोगश्रमरहितस्येत्यर्थः सुरसुखस्येति क्वचित् पाठः । तदा सानुगस्य हरेर्न श्रमः शरमात्रसहायेन त्वया शत्रुनिरासादिति भावः । हरेः इन्द्रस्य सम्बन्धि यद्वा हरेः सुखपरस्य सत एव "षष्ठी चानादरे" इति षष्ठी । त्रिदिवं स्वर्गः उभयैः द्विप्रकारैर्वस्तुभिः । "सङ्ख्याया अवयवे तयप्" इति विहितस्य तयपः "उभादुदात्तो नित्यं" इत्ययच् । उद्धृताः उत्खाता दानवा एव कण्टकाः यस्मात् तथाविधं कृतं । कैः अधुना अस्मिन् समये नतपर्वभिः अनुन्नतग्रन्थिभिः तव शरैः । पुरा पूर्वकाले पुरुषश्चासौ केसरी च यस्य नरहरेर्भगवतः नखैश्च । पुरुषकेसरिण इत्यनेन यत् पुरा भगवतापि रूपद्वयपरिग्रहायासेन कृतं तत् कृ

राजा—अत्र खलु शतक्रतोरेव महिमा स्तुत्यः ।

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम् ।
किं वाऽभविष्यदरुणस्तमसां विभेत्ता
तं चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥ ४ ॥

मातलिः—सदृशमेवैतत् । (स्तोकमन्तरमतीत्य ।) आयुष्मन् इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः ।

त्वया केवलैश्शरैरिति व्यतिरेको व्यज्यते । शराणां नखानां च समीकृत्य वचनात् तुल्ययोगितालङ्कारः । द्रुतविलम्बितं वृत्तम् ॥

शतक्रतोः नियन्तुरेव खलु महिमा प्रभावः स्तोतुं योग्यः स्तुत्यः "एतिस्तु शास्वृदृजुषः" इति क्यपि "ह्रस्वस्ये" ति तुक् ॥

सिध्यन्तीति ॥ नियोज्याः प्रेष्याः महत्सु दुष्करेष्वपि कर्मसु कार्येषु सिध्यन्ति फलं प्राप्नुवन्ति इति यत् तमिति विधेयप्राधान्यात् पुंलिङ्गता । ईश्वराणां नियन्तॄणां सम्भावनायाः परिग्रहस्य गुणमुत्कर्षं अवेहि जानीहि । अरुणः सूर्यसारथिः तमसां बहुवचनेन दुरपोहत्वं व्यज्यते । विभेत्ता निवर्तयिता किंवा अभविष्यत् नैवाभविष्यदित्यर्थः । तं अरुण सहस्रकिरण इति तमोनिवारणशक्तिव्यञ्जनं । धुरि आत्मनः पुरतः नाकरिष्यच्चेत् । यस्मादकरोत् तस्मादभवदित्यर्थः । क्रियातिपत्तौ लृङ् । सहस्रकिरणशब्दस्य तमोविध्वंससामर्थ्याभिप्रायतया परिकरांकुरः । तदनुप्राणितश्च दृष्टान्तालंकारः । वसन्ततिलकं वृत्तम् ॥

एतदविकत्थनत्वं सदृशं महत्त्वस्यानुरूपमेव । नाकपृष्ठे स्वर्गस्योपरिष्टात् प्रतिष्ठितस्य स्थैर्यमापन्नस्य प्रबन्धो हि यशसः प्रतिष्ठेति भावः ॥

विच्छित्तिशेषैः सुरसुन्दरीणां
वर्णैरमी कल्पलतांशुकेषु ।
संचिन्त्य गीतिक्षममर्थबन्धं
दिवौकसस्त्वच्चरितं लिखन्ति ॥५॥

राजा—मातले असुरसंप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितः स्वर्गमार्गः । कतमस्मिन् मरुतां पथि वर्तामहे ।

विच्छित्तीति ॥ सुरसुन्दरीणां देवाङ्गनानां विच्छित्तिशेषैः कुंकुमचन्दनादिवर्णिकाविन्यासविशेषैः । "स्वल्पोऽप्यनादरान्न्यासः कुंकुमादेस्त्वमण्डने । यः परां जनयेच्छोभां सा विच्छित्तिरुदाहृता ॥" "मण्डनानादरान्न्यासो विच्छित्तीरूपदर्पतः" ॥ इत्यायुक्तं । अत्र तु विन्यासमात्रं विवक्षितं । वर्णैः करणैः अमी दिवौकसो देवाः गीतिक्षमं गानयोग्यं तालादिपरिच्छेदपरिच्छिन्नमित्यर्थः । अर्थो बध्यतेत्यनेनेत्यर्थबन्धं भूतार्थप्रतिपादकमित्यर्थः । त्वच्चरितं त्वदीयं दानवविजयादिचरित्रोदाहरणप्रबन्धं सञ्चिन्त्य सम्यगालोच्य कल्पलतांशुकेषु कल्पतरुप्रसूतेषु श्लक्ष्णाम्बरेषु लिखन्ति । सुरसुन्दरी विच्छित्तिशेषाणां कल्पलतांशुकानां च लेखनोपयोजनेन चरिते रसातिशयः सुरसुन्दरीणां प्रतीयते । कल्पवृक्षेषु लताशब्दः कविसमयात् प्रयुक्तो लालित्यं व्यञ्जयन्नंशुकानां श्लक्ष्णतरत्वं दर्शयति । "तुल्यानुरागपिशुनं ललितार्थबन्धं पत्रे निवेशितमुदाहरणं प्रियायाः" । इति विक्रमोर्वशीये । "इक्ष्वाकुच्छायानिषादिन्यस्तस्य गोप्तुर्गुणोदयं । आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः" । इति रघुवंशे । **उपजातिर्वृत्तम्** ॥

पूर्वेद्युः पूर्वस्मिन्नहनि । "सद्यःपरुत्परार्यैषमःपरेद्युरन्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः" । इति निपातितं । असुरसंप्रहारे असुरयुद्धे उत्सुकेन आसक्तिमता दिवं स्वर्गमारोहता सता न लक्षितः कार्यव्यग्रहृदयत्वाद्विशेषतो न गृहीत इत्यर्थः । मरुतां वायूनां सप्तानां सम्बन्धिनि कतमस्मिन् बहूनां मध्ये कस्मिन् ॥

मातलिः—त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्तयति च प्रविभक्तरश्मिः ।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम् ॥ ६ ॥

राजा—मातले अतः खलु सबाह्यान्तःकरणो ममान्तरात्मा प्रसीदति (रथाङ्गं विलोक्य ।) मेघपदवीमवतीर्णौ स्वः ।

मातलिः—कथमवगम्यते ।

त्रिस्रोतसमिति ॥ इदं स्थानं, यो वायुः प्रतितिष्ठत्यत्रेतिप्रतिष्ठा । गगनमेव प्रतिष्ठा स्थानं यस्यास्तां त्रिस्रोतसमाकाशगङ्गां वहति प्रवर्तयति । किंच प्रविभक्ताः असङ्कुप्रसारिता रश्मयः ज्योतिषां स्वे स्वे किरणाः येन तथाभूतः सन् ज्योतींषि सप्तर्षिमण्डलानि वर्तयति सञ्चारयति तस्य । परिवहाख्यस्य वायुस्कन्धानां सप्तानामन्यतमस्य षष्ठस्य वायोस्सम्बन्धिनं द्वितीयेन हरिविक्रमेण त्रिविक्रमचरणन्यासेन निस्तमस्कं तमोगुणरहितं मार्गं प्रसारपथं वदन्ति । ज्योतिश्शास्त्रे छायापथ इति प्रथिता व्योमगङ्गोच्यते । " आवहः प्रवहश्चैव संवहश्चोद्वहस्ततः । विवहाख्यः परिवहः परावह इति क्रमात् ॥ सप्तैते मारुतस्कन्धा महर्षिभिरुदीरिताः । आवहो वर्तयेद्वायुर्मेघोल्कावृष्टिविद्युतः॥ वर्तयेत् प्रवहश्चाथ तथा मार्तण्डमण्डलम् । वर्तयेदुद्वहश्चापि तथा नक्षत्रमण्डलम् ॥ संवहो मारुतस्कन्धस्तथा शीतांशुमण्डलम् । पञ्चमोऽपि विवाहाख्यस्तथैव ग्रहमण्डलम् ॥ सप्तर्षिचक्रं स्वर्गङ्गां षष्ठः परिवहस्तथा । परावहस्तथा वायुर्वर्तयेद्ध्रुवमण्डलम् ॥ " इति ब्रह्माण्डपुराणे । सप्तर्षिमण्डलस्थाने स्वर्भुवोर्मध्ये भुवर्लोकोयं गम्यत इत्यर्थः । **वसन्ततिलकं वृत्तम् ॥**

बाह्यैरन्तश्चकरणैः चक्षुरादिभिर्मनसा च सहितः अन्तरात्मा पुरुषशब्दितो जीवः प्रसीदति शोकमोहादिविगमरूपं नैर्मल्यमायाति । तामसस्थाने तु तमसा बहिरिन्द्रियाणि तदधीनं च मनः उपरज्यते । येनात्मन एवाप्रसादः तमसः परे तु स्थाने आवरणाभावाद्विमलीभूतेन्द्रियः प्रसीदत्यात्मेत्यर्थः । मेघपदवीं आवहाख्यस्य प्रथमस्य वायुस्कन्धस्य मार्गमित्यर्थः । अवतीर्णौ अवरूढौ ॥

राजा—अयमरविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ॥ ७ ॥

मातलिः—क्षणादायुष्मान् स्वाधिकारभूमौ वर्तिष्यते ।

राजा—(अधो विलोक्य ।) वेगावतरणादाश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः । तथा हि ।

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।

अयमिति ॥ शीकरैरम्बुकणैः क्लिन्ननेमिः सिक्तचक्रान्तः अयं ते रथः अराणां चक्रावष्टम्भयष्टिविशेषाणां नेमिनाम्न्योर्मिण्यगतानां विवरेभ्यः अन्तराळेभ्यः निष्पतद्भिर्निर्गच्छद्भिः चातकैः । "धरणीपतितं तोयं चातकानां सुखाकरं" । इति मेघोदकैकपरत्वादुत्पतितैरित्यर्थः । अचिरभासां विद्युतां तेजसा प्रभया अनुलिप्तैः छुरितैर्हरिभिः रथाश्वैश्च वारिगर्भोदराणां घनानां नवजलधराणां उपरि गतं गमनं पिशुनयति दर्शयति । रथनेमिक्लेदः चातकनिष्पतनं हरीणांच विद्युत्प्रभाच्छुरणमिति त्रिभिर्हेतुभिर्घनोपरिगमनानुमानादनुमानालङ्कारः । हरीणां निजरूपत्यागेन विद्युद्रूपापत्तिप्रतीत्या च तद्गुणालङ्कारध्वनिः । **मालिनी वृत्तम्** ॥

श्रमात् अविलम्बेन अवरोहणे वेगातिशयादिति भावः । आत्माधिकारभूमौ स्वनिदेशविषयस्थले भूतल इति यावत् । आश्चर्यं दर्शनं यस्य सः ॥

शैलानामिति ॥ मेदिनी भूमिरुन्मज्जतां उन्नमतां शैलानां शिखरात् अग्रात् अवरोहतीव । उन्नतानां शैलानां दृष्टिसन्निकर्षणमुद्गमनमिव भूम्याः पृथक्त्वेन दूरीभवनमवरोहणमिव च भातीति भावः । एवं पादपाः वृक्षाः स्कन्धानां मूलस्तम्भानां उदयात् दृष्टिगोचरीभावात् पर्णानां दलानामभ्यन्तरे मध्ये लीनतां गूढतां विजहति क्रमात् परित्यजन्ति विप्रकर्षे पर्णमात्रं दृश्यते सन्निकर्षे च सावयस्तरुर्दृश्यत इति भावः ।

संतानैस्तनुभावनष्टसलिला व्यक्तिं व्रजन्त्यापगाः
केनाप्युत्क्षिपतेव मर्त्यभुवनं मत्पार्श्वमानीयते ॥ ८ ॥

मातलिः—साधु दृष्टम् । (सबहुमानमवलोक्य ।) अहो उदग्ररमणीया पृथिवी ।

राजा—मातले कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यन्दी सांध्य इव मेघः सानुमानालोक्यते ।

मातलिः—आयुष्मन् एष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपस्विनां सिद्धिक्षेत्रम् । पश्य

तथा तनुभावेन दूरदर्शने सूक्ष्मोपलम्भतया नष्टसलिलाः आलक्षितोदकाः आपगाः नद्यः सन्तानैः सन्निकर्षक्रमेण विस्तारैः व्यक्तिं स्फुटोपलक्ष्यत्वं व्रजन्ति प्राप्नुवन्ति । मर्त्यभुवनं मनुष्यलोकः उत्क्षिपता उद्धृता केनापि पुरुषेण मत्पार्श्वं मत्समीपमानीयते प्राप्यत इव । व्योमगमस्य रथस्य स्खलनाभावाद्भूमेरेव सन्निकर्षेण प्रतीयत इति भावः । अत्र प्रथमान्तिमवाक्ययोः स्वभावोक्त्यनुप्राणिते वस्तूत्प्रेक्षे । अन्यत्र स्वभावोक्तिमात्रं । शार्दूलविक्रीडितं वृत्तम् ॥

सबहुमान दुष्यन्ताधिकारस्थानत्वबहुमानेनेत्यर्थः । उदग्ररमणीया प्रकामरमनीरमा उदाररमणीयेति पाठान्तरं । पूर्वापरौ प्राक्पश्चिमौ समुद्रौ अवगाढः अवतीर्णः । तावद्व्याप्त इत्यर्थः । " पूर्वापरौ वारिनिधी विगाह्य स्थितः पृथिव्या इव मानदण्डः " । इति कुमारसम्भवे । कनकरसं सुवर्णद्रवं निष्यन्दते विसृजतीति कनकरसनिष्यन्दी छायैवात्र रसत्वेनाध्यवसीयते । कनकरसशब्दः सुवर्णनिर्झरपर इत्यन्ये । सानुमान् पर्वतः । सन्ध्यायां भवः सान्ध्यः । आलक्ष्यते दृश्यते कनकच्छायायाः सान्ध्यरागनिभत्वादिति भावः । हेमकूटो नाम हेममयानि कूटानि शिखराणि यस्य स इत्यन्वर्थनामेति भावः । किंपुरुषाणां किन्नराणां पर्वतः देवभूमिरित्यर्थः । किंपुरुषाख्ये खण्डे वर्तमानः पर्वतो वा । तपस्विनां ऋषीणां सिद्धिक्षेत्रं तपः पूर्तिस्थानं तपसामिति पाठान्तरं ॥

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽस्मिन् सपत्नीकस्तपस्यति ॥ ९ ॥

राजा—तेन ह्यनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि ।

मातलिः । प्रथमः (अवतरणं नाटयित्वा ।) एतावदवतीर्णौ स्वः ।

राजा—(साविस्मयम् ।)

उपोढशब्दा न रथाङ्गनेमयः
प्रवर्तमानं न च दृश्यते रजः ।
अभूतलस्पर्शतया निरुद्धत
स्तवावतीर्णोऽपि रथो न लक्ष्यते ॥ १० ॥

स्वायम्भुवादिति । स्वायम्भुवात् ब्रह्मपुत्रात् मरीचेर्नाम प्रजापतेः "जनिकर्तुः प्रकृतिः" इत्यपादानत्वात् पञ्चमी । यः प्रजापतिः कश्यपः प्रबभूवप्रसूतः । ब्रह्मणैव सर्गाधिकारनियुक्तानामन्यतमः कश्यपः । अत उक्तं प्रजापतिरिति । सुराणाम सुराणां च क्रमाददितिसुतानां च गुरुः पिता सः सपत्नीकः अदित्या पत्न्या सहितस्सन् अस्मिन् हेमकूठे तपस्यति तपश्चरति । "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" वृति क्यङ् । "तपसः परस्मैपदं च" इति वक्तव्यात् परस्मैपदं । सुरासुरगुरुः सोत्रेति क्वचित् पाठः । प्रजापतेरपि तपः स्थानमिति भावः । उदात्तालङ्कारभेदः "उदात्तं वस्तुनः सपत् श्लाघ्यं चान्योपलक्षणं" । इति तल्लक्षणं । **अनुष्टुप् वृत्तम्** ॥

तेन हीति—प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामीति सम्बन्धः । श्रेयांसि महदुपसदनादीनि कल्याणानि अनतिक्रमणीयानि । भगवन्तं कश्यपं । प्रथमः प्रकृष्टः कल्पः प्रकारः ॥

उपोढेति । रथाङ्गनेमयः चक्रान्ताः उपोढशब्दाः न भवन्ति । स्खलनाभावादप्राप्तघोषा भवन्तीति भावः । प्रवर्तमानं प्रसरत् रजश्च न दृश्यते । अभूतलस्पर्शतया दिव्यतया भूतलस्पर्शाभावेन निरुद्धतः अनुल्बणः गतिस्थित्योर्निर्विशेष इत्यर्थः ।

मातलिः—एतावानेव शतक्रतोरायुष्मतश्च विशेषः ।

राजा—मातले कतमस्मिन् प्रदेशे मारीचाश्रमः ? ।

मातलिः— (हस्तेन दर्शयन् ।)

वल्मीकार्धनिमग्नमूर्तिरुरसा संदष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः ।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ॥

भूतलस्पर्शे हि स्खलनादूर्ध्वगमनं लक्ष्यत इति भावः । तव रथः अवतीर्णो हेमकूटमवरूढोऽपि न लक्ष्यते अवतीर्ण इति न ज्ञायते । भूतलस्पर्शे तु गमने शब्दरजसोस्सम्भवात्तदुपरमे गमनोपरमो ज्ञायेतेति भावः । निरुन्धत इति पाठे नियच्छतस्तवेति योजना । **वंशस्थं वृत्तम् ॥**

एतावानेव भूतलस्पर्शस्पर्शमात्र एव । विशेषः व्यतिरेकः । अविशिष्टस्तु प्रभाव इति भावः ॥

वल्मीकेति । वल्मीके कृमिभिश्चिते मृत्तुल्ये अर्धनिमग्ना अवगाढैकदेशा मूर्तिः शरीरं यस्य सः चिराय समाधिनिश्चेष्टतया वल्मीकावरणमपि न पश्यतीत्यर्थः । सन्दष्टसर्पत्वचा संश्लिष्टसर्पनिर्मोकेण उरसा वक्षसा उपलक्षित इति शेषः । कण्ठे जीर्णानां चिरप्ररूढानां लताप्रतानानां लताविटपानां वलयेन मण्डलेन अत्यर्थमतिमात्रं संपीडितः संनद्धः दारुवन्निभृतत्वादिति भावः । अंसव्यापि आस्कन्धलम्बं शकुन्तानीडैः गुल्मशङ्क्या रचितैः पक्षिणां कुलायैः निचितं नीरन्ध्रं जटामण्डलं जटावलयं बिभ्रत् वहन्नसौ मुनिः यत्र यस्मिन् देशे स्थाणुरिव छिन्नतरुस्कन्ध इव अचलः निभृतः सन् अभ्यर्कबिम्बं सूर्यमण्डलाभिमुखं स्थितः । " स्थाणु र्वा ना ध्रुवः शंकु " रित्यमरः । स्थाणुरपि वल्मीकच्छन्नैकदेशः सर्पत्वक्संवलितः जीर्णलतावलयितः नीडनिचितः शाखादिविरहान्निश्चलश्च भवतीति साधर्म्यं । उपमालङ्कारः । विस्मृतशरीरत्वमनेन व्यज्यते । **शार्दूलविक्रीडितं वृत्तम् ॥**

राजा—नमस्ते कष्टतपसे ।

मातलिः— (संयतप्रग्रहं रथं कृत्वा ।) महाराज एतावदिति-परिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ।

राजा—स्वर्गादधिकतरं निर्वृतिस्थानम् । अमृतह्रदमिवावगाढोऽस्मि ।

मातलिः—(रथं स्थापयित्वा ।) अवतरत्वायुष्मान् ।

राजा—(अवतीर्य ।) भवान् कथमिदानीम् ।

मातलिः—संयान्नितो मया रथः । वयमप्यवतरामः । (तथा-कृत्वा ।) इत आयुष्मान् । (परिक्रम्य ।) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः ।

राजा—ननु विस्मयादवलोकयामि ।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया ।

कष्टमितरदुष्करं तपो यस्य तस्मै ते तुभ्यं । "नमः स्वस्ती" त्यादिना चतुर्थी । "नमोस्त्वस्मै" इति पाठान्तरं । धृताः संयताः प्रग्रहाः हयरश्मयः यस्य तं निवृत्तगमनमित्यर्थः । एतौ आवां अदित्या कश्यपपत्न्या परिवर्धिताः स्वयं पोषिताः मन्दारवृक्षाः सुरद्रुमाः यस्मिंस्तं । अत्र मन्दारशब्दः सुरद्रुमाणामुपलक्षकः । प्रजापतेर्मरीचस्य । अधिकतरं विशिष्टतरं निर्वृतिस्थानं सुखभूमिः । अमृतह्रदं अमृतमयं सरः अवगाढः प्राविष्ट इव अन्तर्बहिश्च शरीरधातूनामाप्यायनादिति भावः । भाविश्रेयोलक्षणं चेदं । भवान् कथं किङ्करिष्यतीत्यर्थः । मातलिं पुरस्कृत्य कश्यपमुपगन्तुमभिसन्धिरनेन व्यञ्जितः । अवतरामः यन्त्रितत्वादवतर्तुं शक्नुयामिति भावः । ततश्च राजानुगमनौचित्यं दर्शितम् ॥

प्राणानामिति ॥ सन्तः कल्पवृक्षाः समीहितसर्वफलदातारो यस्मिंस्तस्मिन् अत्रापि कल्पवृक्षपदं देवतरूणामुपलक्षणं । वने हेमकूटारण्ये अनिलेन नभश्चरेण नभस्वता प्राणानां वृत्तिः धारणमुचिता अभ्यस्ता । अमीभिरिति विभक्तिपरिणामेना

ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥

मातलिः—उत्सर्पिणी खलु महतां प्रार्थना (परिक्रम्य । आकाशे ।) अये वृद्धशाकल्य! किमनुतिष्ठति भगवान् मारीचः? । किं ब्रवीषि! । "दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयती"ति ।

राजा—(कर्णं दत्वा ।) अये! प्रतिपाल्यावसरः खलु प्रस्तावः ।

मातलिः—(राजानमवलोक्य ।) अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान् यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि ।

कृष्यते । काञ्चनपद्मानां हेमतामरसानां रेणुभिः पवनविक्षिप्तैः परागैः कपिशे पीतवर्णे उपभोगयोग्य इति भावः । अत्र तोये जले धर्माभिषेकस्य नियमस्नानस्य क्रिया विधानमुच्चैतत्यनुषज्यते । रत्नानामेव शिलानां तलेषु उपरिभागेषु ध्यानं समाधिः उचितमिति विपरिणम्यते । शिलाशब्देन वैपुल्यं रत्नेष्वपि शिलासामान्यग्रहणमेव वीतरागाणामिति च प्रतीयते। विबुधस्त्रीणां अप्सरसां यदुपलम्भाय यज्ञादिक्लेशो याज्ञिकादीनामिति भावः । सन्निधौ शुश्रूषमाणानां सविध एव संयमः इन्द्रियजयः उचित इत्यत्रापि विपरिणामः । अन्यमुनयः भौमास्तपस्विनः तपोभिः यमनियमादिक्लेशैः यत् पदं सुखस्थानं काङ्क्षन्ति फलमिति प्रार्थयन्ति तस्मिन् स्थाने अमी मुनयस्तपस्यन्ति । "आब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इत्युक्तं सर्वसुखानां परिणामविरसत्वं विज्ञाय वीतरागा आत्मारामास्तपस्यन्तीति भावः । सत्यामपि सामग्र्यां भोगानुत्पत्त्या विशेषोक्तिः । सति प्रतिबन्धके प्रतिबन्धकाभावघटितसामग्रीमन्तरेणैव तपःसंपत्तिरिति विभावना वेति तयोः सन्देहसङ्करः । **शार्दूलविक्रीडितं वृत्तम् ॥**

उत्सर्पिणी ऊर्ध्वगामिनी । वृद्धशाकल्येति काश्यपशिष्याणामन्यतमस्संबोध्यते । दाक्षायण्या अदित्या "वा नामधेयस्य" इति वक्तव्याद्वृद्धसंज्ञायां उदीचां वृद्धादगोत्रात्" इति फिञ् । गौरादित्वाद् ङीष् । पत्युरिव व्रतं यासां तासां पतिव्रतानां धर्मं कर्तव्यमाचारं अधिकृत्य विषयीकृत्य । प्रस्तावः स्त्रीधर्मोपदेशप्रकरणं प्रतिपाल्यः प्रती-

राजा—यथा भवान् मन्यते । (इति स्थितः ।)

मातलिः—आयुष्मन् साधयाम्यहम् ।

(इति निष्क्रान्तः ।)

राजा—(निमित्तं सूचयित्वा ।)

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा ।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते ॥ १३ ॥

(नेपथ्ये ।)

[1]**मा खु चापलं करेहि । कहं गदो एव्व अत्तणो पकिदिं ।**

---

[1]**मा खु चापलं कुरु । कथं गत एवात्मनः प्रकृतिम् ।**

णीयः अवसरः कालः यस्य सः । प्रतिपाल्याऽवसराः खलु मुनय इति पाठान्तरं । इन्द्रगुरवे इन्द्रस्य पित्रे पुत्रसाध्यकारिणि प्रसादावश्यंभावव्यंजनमिदं । अन्तरान्वेषी समयप्रतीक्षः यावद्भवामि भविष्यामि । तावदास्तामिति पूर्वेण वा सम्बन्धः ॥

मनोरथायेति ॥ मनोरथाय प्रियाप्राप्तिरूपाय नाशंसे नेच्छामि । अत्र मनोरथविषये मनोरथोपचारः अनन्याभिलाषव्यञ्जनार्थः । "क्रियया यमभिप्रैति सोऽपि संप्रदानं" इति वक्तव्याच्चतुर्थी । हे बाहो अर्थादक्षिणभुज वृथा निष्फलमेव किं कुतः स्पन्दसे प्रस्फुरसि । पूर्वावधीरितं प्रथमनिरस्तं श्रेयः शुभं दुःखं दुःखरूपमेव हि परिवर्तते परिणमति । यद्वा दुःखमिति क्रियाविशेषणं । कृच्छ्रेण हि परिवर्तते प्रत्यागच्छतीत्यर्थः । उपस्थितमवमतं श्रेयः पुनः प्राप्तुं न शक्यमिति भावः । उत्तरार्धेन निमित्तवैयर्थ्यस्य समर्थनात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । **अनुष्टुप् वृत्तम् ॥**

चपलस्य कर्म चापलं । सत्वपीडारूपमविनयमित्यर्थः । प्रकृतिं स्वभावं सत्त्वावस्कन्दनरूपं गतः प्राप्तः निषिद्धोऽपि न जहातीत्यर्थः । अमूमिः अस्थानं सिद्धिक्षेत्रत्वादिति भावः । कोऽन्वेषः पुण्यक्षेत्रस्थितोऽपीत्यर्थः । शिक्ष्यते अविनयान्निवार्यते । शब्दानुसारेण शब्दागमनमार्गमनुसृत्य । अनुवर्त्यमानः अनुपदमनुगम्यमानः । बाल-

राजा—(कर्णं दत्त्वा) अभूमिरियमविनयस्य । को नु खल्वेष शिक्ष्यते । (शब्दानुसारेणावलोक्य । सविस्मयम् ।) अये को नु खल्वयमनुबध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः ।

अर्धपीतस्तनं मातुरा[1]कर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥ १४ ॥

(ततः प्रविशति यथानिर्दिष्टकर्मा सह तपस्विनीभ्यां बालः ।)

बालः—[1]जिंभ डिंभ दंताइ दे गणइस्सं ।

प्रथमा—[2]अविणीद किं णो अपच्चणिव्विसेसाइ सत्ताइ विप्पआरेसि । हंत वड्ढइ दे संरंभो । ठाणे खु इसिजणेण सव्वदमणो त्ति किदणामहेओ सि ।

---

[1]जृम्भस्व डिंभ दन्तांस्ते गणयिष्यामि ।

[2]अविनीत किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि - हन्त वर्धते ते संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।

स्येव सत्त्वं बलं यस्य स न भवतीत्यबालसत्त्वः महासत्त्वः बालः वयसैव बाल इत्यर्थः ॥

अर्धेति । मातुर्सिंहस्याः अर्धपीतः सशेषं पीतः स्तनो येन तं अर्धपीतमातुस्तनमित्यर्थः । स्तनंधयादिवदुपचारात् स्तन्ये स्तनशब्दः । पीतशब्दो वा पीतक्षीरे लाक्षणिकः । आमर्दनेन पीडनेन आमर्शेति पाठे स्पर्शनेत्यर्थः । क्लिष्टाः मृदिताः केसराः सटाः यस्य तं सिंहशिशुं प्रक्रीडितुं मृगमार्जारादेशावकानि वोपकरणीकृत्य विहर्तुं बलात्कारेण हठग्रहणेन कर्षति) **अनुष्टुप् वृत्तम् ॥**

यथानिर्दिष्टं कर्म सिंहडिम्भाकर्षणरूपं यस्य सः । हे डिम्भ जृम्भस्व मुखं व्यादेहि । जिम्भ सिङ्घ [जृम्भख सिंह] इति पाठान्तरं । नः ऋषीणामित्यर्थः । अपत्यनिर्विशेषाणि पुत्रतुल्यानि सत्त्वानि प्राणिनः । विप्रकरोषि अपकरोषि । हन्तेत्याक्षेपे । ते तव संरम्भः हठप्रवृत्तिः वर्धते प्रतिषेधेन न शाम्यति । सर्वं दमयतीति सर्वदमनः । ऋषिजनेन अनागतवेदिनेत्यर्थः । अस्मिन् बाले उरसा निर्मितः औरसः "स्वजाते

राजा—किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः। नूनमनपत्यता मां वत्सलयति।

द्वितीया—[1]एसा खु केसरिणी तुमं लंघेदि, जइ से पुत्तअं ण मुंचेसि।

बालः—(सस्मितम्।) [2]अम्हहे बलिअं खु भीदो म्हि (इत्यधरं दर्शयति।)

राजा—

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥१५॥

---

[1]एषा खलु केसरिणी त्वां लङ्घयति यद्यस्याः पुत्रकं न मुञ्चसि।
[2]अहो बलवत् खलु भीतोऽस्मि।

त्वौरसौरस्यौ" इत्यमरः। 'उरसोण् च' इति साधुः। तस्मिन् पुत्र इव। नूनमिति तर्के। अनपत्यता सन्तानाभावः। वत्सलं स्निग्धं करोति वत्सलयति। लंघयति अभिभवति निवर्तनाय वर्तमानभयप्रदर्शनं। अस्याः केसरिण्याः। हंहो इति मिथ्याभयाविष्करणं। अधरं दर्शयति अनादरसूचनार्थमिति भावः। "असूयावेदनाऽवज्ञालस्यादिषु विवर्तनं" इत्युक्तलक्षणं विवर्तनं" इत्युक्तलक्षणं विवर्तनाख्यमधरकर्मेह ज्ञेयम्॥

महत इति। अयं बालः महतः उपचयेन पृथूभविष्यतः तेजसः प्रभावस्य बीजं निदानं मे मह्यं प्रतिभाति। कथमिव स्फुलिङ्गावस्थया अभिकणदशया स्थितः एष इन्धनं इष्यते अनेनेति व्युत्पत्त्या "अवौदैर्धौद्यप्रश्रथहिमश्रथाः" इति निपातनात् साधुः। तमपेक्षत इत्येधापेक्षः वह्निरिव। उपमालङ्कारः "तेजसां हि न वयः समीक्ष्यते" इति न्यायो बोध्यः। यथा तनुरपि स्फुलिङ्गो दाह्यमासाद्य महान् भवति तथाऽयमपि बहूभविष्यतस्तेजसः कारणावस्थामात्रमिति भावः। तेजस्विन इति व्याख्याने तु बीजमिति वीर्यपरं। **अनुष्टुप् वृत्तम्॥**

प्रथमा—[1]वच्छ एदं बालमिएंदअं मुंच । अवरं दे कीलणाअंद - इस्सं ।

बालः—[2]कहिं । देहि णं । (इति हस्तं प्रसारयति ।)

राजा—कथं चक्रवर्तिलक्षणमप्यनेन धार्यते । तथा ह्यस्य ।

प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्रान्तरभिद्ररागया
नवोषसा भिन्नमिवैकपङ्कजम् ॥ १६ ॥

[1]वत्स एतं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।

[2]कुत्र । देह्येतत् ।

क्रीडनकं क्रीडासाधनं । चक्रवर्तिनः लक्षणं जालग्रथितांगुलित्वादि । न पुनस्तेजोमात्रमित्यर्थः ॥

प्रलोभ्येति ॥ प्रलोभ्यस्य स्पृहणीयस्य वस्तुनः क्रीडनकस्य प्रणयाय प्रार्थनार्थं प्रसारितः विवृतः जालेषु विवरेषु ग्रथिताः संश्लिष्टाः अविरला इति यावत् । अंगुलयो यस्य सः करः बालहस्तः इद्धरागया दीप्तारुण्यया नवोषसा अचिरोदितप्रभातः सन्ध्यया भिन्नं तदात्वोन्मीलितं अत एव अलक्ष्याणि अदृश्यानि पत्राणां दलानामन्तराणि विच्छेदस्थानानि यस्य तत् एकं पङ्कजं पद्ममिव विभाति । नवोषसेत्यनेन प्राभातिकरागसंक्रान्तिरसमग्रविकासश्च व्यज्यते । " उषः प्रत्युषसी अपि " " उषः प्रत्युषसी क्लीबं " इत्याद्यभिधानपाठात् उषःशब्दस्य नपुंसकत्वेऽपि " उषा वा अश्वस्य मेध्यस्य शिरः " " उषा वा अपूर्व्या व्युच्छति प्रिया दिवः " इति कौशीतिकीब्राह्मण ऋग्वेदाद्यनुरोधात् क्वेश्च निरंकुशत्वादत्र स्त्रीलिङ्गप्रयोगः । अत एव भवभूतिरप्याह " जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीं " इति । यत्तु नवं उषः यस्यास्त्या प्रातः सन्ध्येयति व्याख्यानं, तच्चिन्त्यं उषःप्रातःसन्ध्ययोरविशेषेण प्रातःसन्ध्येत्यनेन व्यावर्तनीयाभावात् । अध्याहर्तव्यविशेष्यानुरोधेन लिङ्गविशेषनिवेशानौचित्यात् । अन्यथा सामान्ये नपुंसकशास्त्रस्य निरवकाशत्वापातादिति उपमालङ्कारः । **वंशस्थं वृत्तम्** ॥

द्वितीया—[1]सुव्वदे ण सक्को एसो वाआमेत्तेण विरमावेदुं। गच्छ तुमं। ममकेरए उडए मक्कंडेअस्स इसिकुमारअस्स वण्णचित्तिदो मित्तिआमोरओ चिट्ठदि। तं से उवहर।

प्रथमा—[2]तह। (इति निष्क्रान्ता।)

बालः—[3]इमिणा एव्व दाव कीलिस्सं। (इति तापसीं विलोक्य हसति।)

राजा—स्पृहयामि खलु दुर्ललितायास्मै।

आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।

---

[1]सुव्रते न शक्य एष वाङ्मात्रेण विरमयितुं। गच्छ। त्वम् मदीय उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति तमस्योपहर।

[2]तथा।

[3]अनेनैव तावत् क्रीडिष्यामि।

वाङ्मात्रेण क्रीडनकमदत्त्वेत्यर्थः। विरमयितुं सिंहशिशुग्रहणान्निवर्तयितुं। मार्कण्डेयस्य मार्कण्डेयाख्यस्य। ऋषिकुमारपदेनास्यानृषिकुमारत्वं व्यज्यते। वर्णैः वर्णद्रव्यैः चित्रितः नानारूपः कृतः मृत्तिकामयूरः मृण्मयी मयूरप्रतिकृतिः। अनेनैव तावत् सिंहशिशुनैव सांप्रतं। दुर्ललिताय दुष्टविलसिताय अदान्तायेति यावत्। "स्पृहेरीप्सितः" इति संप्रदानत्वाच्चतुर्थी। स्वपुत्रत्वाज्ञानान्नेप्सिततमत्वम्॥

आलक्ष्येति॥ धन्याः भाग्यवन्तः पुरुषाः अनिमित्तैरकारणैः हासैः शैशवसहजैः आलक्ष्याः स्पष्टदृश्याः दन्तमुकुलाः दन्तांकुराः अचिरोद्भेदन मुकुलसादृश्यं। येषां तान् अव्यक्तवर्णाः व्यतिकीर्णाक्षराः रमणीयाः मनोज्ञाः वचः प्रवृत्तयः शब्दोच्चारणानि येषां तान् अङ्काश्रये उत्सङ्गासादने प्रणयिनः प्रार्थनावतः तनयान् पुत्रान् वहन्तः दधानाः सन्तः तेषां पुत्राणां अङ्गरजसा क्रीडालग्नेन शरीरपांसुना मलिनीभवन्ति अभूत-

अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥ १७ ॥

तापसी—[1]होदु । ण मं अअं गणेदि । (पार्श्वमवलोकयति ।) को एत्थ इसिकुमाराणं । (राजानमवलोक्य ।) भद्दमुह एहि दाव । मोएहि इमिणा दुम्मोअहत्थग्गहेण डिंभलीलाए बाहीअमाणं बालमिएंदअं ।

राजा—(उपगम्य । सस्मितम् ।) अयि भो महर्षिपुत्र !

एवमाश्रमविरुद्धवृत्तिना
संयमः किमिति जन्मनस्त्वया ।

[1]भवतु । न मामयं गणयति । कोऽत्र ऋषिकुमाराणाम् ? । भद्रमुख एहि तावत् । मोचयानेन दुर्मोचहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम् ।

तद्भावे च्विः । पुत्रशरीरसङ्गि रजोमालिन्यमपि महद्भागधेयं "पुत्रः स्पर्शवतां वरः" इत्युक्तेरिति भावः । स्वभावोक्तिरलङ्कारः । "स्वभावोक्तिस्तु डिम्भादेः स्वक्रियाद्यभिवर्णनं" इति लक्षणात् । **वसन्ततिलकं वृत्तम् ॥**

अत्र आश्रमे ऋषिकुमाराणां मध्य इत्यर्थः । भद्रमुख सौम्य "सौम्य भद्रमुखेत्येवं मान्ये राजसुते भवे" इत्युक्तं । दुर्मोचः मोक्तुमशक्यः हस्तस्य ग्रहः ग्रहणं यस्य तेन । डिंभलीलया बालक्रीडया सत्त्वपीडादोषानभिज्ञतयेति भावः । आश्रमसम्बन्धात् महर्षिपुत्रेति सम्बोधनम् ॥

एवमिति ॥ एवं अनेन प्रकारेण आश्रमस्य भूतसौहार्दरूपस्याश्रमधर्मस्य विरुद्धवृत्तिना विपर्यस्तव्यापारेण वर्त्तनेनेति पाठे विरुद्धं यथातथा प्रवर्तमानेनेत्यर्थः । त्वया कर्त्रा जन्मनः स्वोत्पत्तेरेव प्रभृतिसत्त्वानां प्राणिनां संश्रयः आश्रयणीयत्वमेव गुणः उत्कर्षो यस्य तथाभूतोपि संयमः तपः किमिति कुतो हेतोः कृष्णसर्पशिशुना चन्दन इव दूष्यते अपरिग्राह्यतां नीयते । जातमात्रस्य कथमयं कारणविरुद्धव्यापार इति भावः ।

सत्त्वसंश्रयगुणोऽपि दृश्यते
कृष्णसर्पशिशुनेव चन्दनः ॥ १८ ॥

तापसी—[1]भद्दमुह ण खु अअं इसिकुमारओ ।

राजा—आकारसदृशं चेष्टितमस्य कथयति । स्थानप्रत्ययात्तु वयमेवंतर्किणः । (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य । आत्मगतम् ।

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं तस्य जनस्य कुर्या-
द्यस्यायमङ्गात् कृतिनः प्ररूढः ॥ १९ ॥

---

[1]भद्रमुख न खल्वयमृषिकुमारः ।

सत्त्वसंश्रयसुखोपीति पाठे सत्त्वानां संश्रये सुखः अनुकूल इत्यर्थः । अथवा जन्मन इति षष्ठी जन्मनः सम्बन्धीति संयमविशेषणं । **रथोद्धता** वृत्तम् ॥

आकारसदृशं शरीरसंस्थानानुरूपं चेष्टितं व्यापारः कथयति आकारश्च चेष्टा-चेष्टुभयमपि नायमृषिकुमार इति दर्शयतीत्यर्थः । स्थानप्रत्ययादाश्रमरूपनिवासादेव हेतोः " प्रत्ययः शपथे रन्धे विश्वासाकारहेतुषु । प्रथितत्वे च सन्नादावधीनज्ञानयोरपि " इति विश्वः । एवं तर्कयन्तीत्येवंतर्किणः । यथाभ्यर्थितं तापसी प्रार्थितप्रकारेण ॥

अनेनेति ॥ कस्यापि यस्य कस्यचित् सुकृतिन इत्यर्थः । कुलांकुरेण वंशाभिवर्धनेन मदसम्बद्धेनापीति भावः । अनेन बालेन गात्रेषु अवयवेषु स्पृष्टस्य परामृष्टमात्रस्य मम सुखमानन्द एवं अनुभूयमानप्रकारो न तु निर्वक्तुं शक्य इत्यर्थः । अयं बालः यस्य कृतिनो धन्यस्य अङ्गात् शरीरात् प्ररूढः जातः तस्य जनस्य कां कीदृशीं निर्वृतिमानन्दं कुर्याज्जनयेत् । " पुत्रः स्पर्शवतां वरः " इति हरिवंशे । अत्र कैमुत्यप्रतीते रर्थापत्तिरलङ्कारः । **उपजातिर्वृत्तम्** ॥

तापसी—(उभौ निर्वर्ण्य ।) [1]अच्छरिअं अच्छरिअं ।

राजा—आर्ये किमिव ? ।

तापसी—[2]इमस्स बालअस्स रूवसंवादिणी दे आकिदित्ति विम्हाविद म्हि । अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो त्ति ।

राजा—(बालमुपलालयन् ।) न चेन्मुनिकुमारोऽयमथ कोऽस्य व्यपदेशः ।

तापसी—[3]पुरुवंसो ।

राजा—(आत्मगतम् ।) कथमेकान्वयो मम । अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्

भवनेषु सुधासितेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम् ।

---

[1]आश्चर्यमाश्चर्यम् ।

[2]अस्य बालस्य रूपसंवादिनी त आकृतिरिति विस्मापितास्मि । अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति ।

[3]पुरुवंशः ।

उभौ राजानं बालं च निर्वर्ण्य दृष्ट्वा । रूपस्य संवादिनी सदृशीत्यर्थः । आकृतिरवयवसन्निवेशः । अपरिचितस्य इदंप्रथमदृष्टस्यापि अप्रतिलोमः वशंवदः । उपलालयन् उपच्छन्दयन् प्रीणयन्निति यावत् । अथ तर्हि । व्यपदिश्यते व्यवह्रियते अनेनेति व्यपदेशः कुलं । एकान्वयः समानाभिजनः । पौरवाणां पुरुवंश्यानामन्ते भवमन्त्यं वार्धक्यकालिकमिति यावत् कुलव्रतं कुलधर्मः ॥

भवनेष्विति । ये पौरवा राजानः पूर्वं राज्यकाले सुधासितेषु प्रतिपदनवीकृतेष्वित्यर्थः । भवनेषु प्रासादेषु क्षितेः भूमेः रक्षार्थं परित्राणाय न तु स्वसुखार्थमिति भावः । उक्तं हि रघुवंशे "असक्तः सुखमन्वभूत्" । इति । निवासं स्थितिं उशन्ति इच्छन्ति "वशकान्तौ" इति धातोः संप्रसारणं । तेषां राज्ञां पश्चात् राज्यत्यागादनन्तरं नियतं अविप्लुतमेकमविच्छिन्नं यतिव्रतं इन्द्रियजयाभ्यासरूपनियमो येषु तानि

नियतैकपतिव्रतानि पश्चा-
त्तरुमूलानि गृहीभवन्ति तेषाम् ॥ २० ॥

(प्रकाशम् ।) न पुनरात्मगत्या मानुषाणामेष विषयः ।

तापसी—[1]जह भद्दमुहो भणादि अच्छरासंबन्धेण इमस्स बालस्स जणणी एत्थ देवगुरुणो तवोवणे पसूदा ।

राजा—(आत्मगतम् ।) हन्त द्वितीयमिदमाशाजननम् ।

(प्रकाशम् ।) सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ? ।

तापसी—[2]को तस्स धम्मदारपरिच्चाइणो णाम वि चिंतिस्सदि? ।

राजा—(स्वगतम् ।) इयं खलु कथा मामेव लक्षीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि । अथवा अन्याभ्यः परदाराणां व्यवहारः ।

---

[1]यथा भद्रमुखो भणति अप्सरःसंबन्धेनास्य बालस्य जनन्यत्र देवगुरोस्तपोवने प्रसूता ।

[2]कस्तस्य धर्मदारपरित्यागिनो नामापि चिन्तयिष्यति ? ।

तरुमूलानि गृहीभवन्ति तत्रैव गृहबुद्धिः क्रियत इत्यर्थः । यतन्ते जेतुमिन्द्रियाणि इति व्युत्पत्त्या वानप्रस्थसाधारणो यतिशब्दः अतश्च पुत्रजन्माविरोधः "वार्धके मुनिवृत्तीनां" इति रघुवंशे । रसाधिकेष्विति पाठे स्पृहणीयेष्वित्यर्थः । नियतैकपतिव्रतानीति पाठे । नियतमपरित्यक्तमेकस्य अनन्यापेक्षस्य पत्युर्नाथस्य व्रतं छायाफलादिभिस्तर्वथा रक्षणनियमः यैस्तानीत्यर्थः । तेषां परिवाणामन्यतमस्य अपत्यं भवितुमर्हतीति भावः । **वसन्ततिलकं वृत्तम् ॥**

आत्मगत्या शरीरगमनेन । विषयः प्राप्यः । सुकृतविशेषात्तु देवतानुग्रहसहायाच्छरीरावसाने लभ्य इति भावः । अप्सरसः मेनकायाः सम्बन्धेन दुहितृत्वरूपेण । प्रसूता पुत्रं जनितवती । अत्र सूयतेः प्राणिगर्भविमोक्षणार्थस्य कर्मणो धात्वर्थोपसङ्ग्रहादकर्मकत्वेन "गत्यर्थाकर्मक" इत्यादिना कर्तरिक्तः । इदमप्सरस्सम्बन्धरूपं । द्वितीयं पौर-

(प्रविश्य मृण्मयूरहस्ता ।)

तापसी—[1]सव्वदमण । सउंदलावण्णं पेक्ख ।

बालः—(सदृष्टिक्षेपम् ।) [2]कहिं मे अज्जू ।

उभे—[3]णामसारिस्सेण वंचिदो माउवच्छलो ।

द्वितीया—[4]वच्छ इमस्स मित्तिआमोरस्स रम्मत्तणं पेक्खत्ति भणिदोसि ।

राजा—(आत्मगतम् ।) किं वा शकुन्तलेत्यस्य मातुराख्या ? । सन्ति पुनर्नामधेयसादृश्यानि । अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते ? ।

बालः—[5]अज्जूए रोअदि मे एसो भद्दमोरओ । (क्रीडनकमादत्ते ।)

---

[1]सर्वदमन शकुन्तलावण्यं पश्य ।

[2]कुत्र मे माता ? ।

[3]नामसादृश्येन वञ्चितो मातृवत्सलः ।

[4]वत्स अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि ।

[5]मातः रोचते म एष भद्रमयूरः ।

वत्सं तु प्रथममिति भावः। आशाजननं इच्छासन्धुक्षणमात्रं । सर्वं ह्यनेकान्तं भवतीति भावः। का आख्या यस्य तस्य किन्नाम्नः राजर्षेः पौरवत्वाद्राजर्षिव्यपदेशः । चिन्तयिष्यति नामापि तथाविधस्य चिन्त्यमानं पापायेति भावः । लक्षीकरोति विषयीकरोति । नामतः नाम्ना । यदिः प्रश्नार्थः । तर्ह्यवगतं स्यादिति वाक्यशेषो वा । परदाराणां स्वदारत्वेनानवधारितायाः स्त्रिया इत्यर्थः । व्यवहारः प्रस्तावः न न्याय्यः अन्यथासिद्धिसम्भवादयुक्त इत्यर्थः । परदारपृच्छाव्यापार इति क्वचित् पाठः । तर्ह्यनर्हः परदारव्यवहार इति चान्यत्र । मृदो मयूरः मृण्मयूरः हस्ते यस्याः सा । शकुन्तस्य मृण्मयूरस्य लावण्यं स्निग्धत्वं पश्येत्यर्थके वाक्ये शकुन्तलापदमादाय कहिं इति बालस्य प्रश्नः । मातृवत्सलः मातृप्रीयः "वत्सांसाभ्यां कामबले" इति लच् । नामधेयसादृश्यानि नामैक्यान्यपि सन्ति पुनः

प्रथमा— (विलोक्य । सोद्वेगम् ।) [1]अम्महे रक्खाकरंडअं से मणिबन्धे ण दीसदि ।

राजा—अलमावेगेन । नन्विदमस्य सिंहशाबविमर्दात् परिभ्रष्टम् ।

(आदातुमिच्छति ।)

उभे—[2]मा क्खु एदं ओलंब । कहं गहीदं णेण । (विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः ।)

राजा—किमर्थं प्रतिषिद्धाः स्मः ।

प्रथमा—[3]सुणादु महाराओ । एसा अवराजिदा णाम ओसही इमस्स जातकम्मसमए भअवदा मारीएण दिण्णा । एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण गेण्हदि ।

---

[1]अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते ।

[2]मा खल्वेतदवलम्बस्व । कथं गृहीतमनेन ।

[3]शृणोतु महाराजः । एषा अपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमि पतितां न गृह्णाति ।

बहुशः सम्भवन्ति । नैतावत् पर्याप्तं निश्चयायेति भावः । मृगतृष्णिका मरीचिकेव नाममात्रस्य अर्थसंवादरहितस्य केवलस्य नाम्नः प्रस्ताव व्यवहारः । विषादाय प्रत्युत खेदाय । यथा न केवलं तृषितस्य मृगतृष्णा न तृषं शमयति अपि तर्हि परिश्रमणश्रममपि सविशेषमावहति तथाऽयं प्रस्ताव उत्कण्ठासंवर्धनेन भूयसे सन्तापाय किं भविष्यतीत्यर्थः । भद्रमयूरकः रम्या मयूरप्रतिकृतिः "इवे प्रतिकृतौ" । आदत्ते गृह्णाति "आङो दोऽनास्यविहरणे" इत्यात्मनेपदं । रक्षाकरण्डकं रक्षणार्थमन्त्रसंस्कारनिधानमोषधिः ओषधिगर्भा गुटिका वा । मणिबन्धे प्रकोष्ठे । अपराजिता भूतादिभिरनभिभाव्यतया तथा कृतनामधेया । आत्मानं बालं न गृह्णाति न स्पृष्टुमर्हति । भूमिपतितामित्यनेन हस्तास्थि-

राजा—अथ गृह्णाति ।

प्रथमा—[1]तदो तं सप्पो भविअ दंसइ ।

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ? ।

उभे—[2]अणेअसो ।

राजा—(सहर्षम् । आत्मगतम् । कथमिव संपूर्णमपि मनोरथं नाभिनन्दामि । (बालं परिष्वजते ।)

द्वितीया—[3]सुव्वदे एहि । इमं उत्तंतं णिअमव्वावुदाए सउंदलाए णिवेदेह्म ।

(इति निष्क्रान्ते ।)

बालः—[4]मुंच मं । जाव अज्जूए सआसं गच्छामि ।

राजा—पुत्रक मया सहैव मातरमभिनन्दयिष्यसि ।

बालः—[5]मम खु तादो दुस्संदो । ण तुमं ।

---

[1]ततस्तं सर्पो भूत्वा दशति ।

[2]अनेकशः ।

[3]सुव्रते एहि । इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयाव ।

[4]मुञ्च मां यावन्मातुः सकाशं गच्छामि ।

[5]मम खलु तातो दुष्यन्तः । न त्वम् ।

तायाः स्पर्शे न दोष इति व्यञ्जितं । अथ गृह्णाति यदि स्पृशति तदा किंस्यादिति शेषः । विक्रिया सर्पत्वेन परिणामः । संपूर्णं सर्वथा संपन्नप्रायमपि । नाभिनन्दामि नाद्रिये । नास्ति हि व्यभिचारशङ्केति भावः । इमं अपराजिताया विकाराभावं । नियमे तपसि व्यापृतायै व्यग्रायै । आभिनन्दयिष्यसि प्रीणयिष्यसि । विवादः तातो दुष्यन्तो न त्वमित्याक्षेप एव प्रत्याययति मदपत्यतां निश्चाययति । विकारकाले सर्पतया परिणामहेतूपस्थाने प्रकृतिस्थां अविकृतां । श्रुत्वापि श्रवणानन्तरमपीत्यर्थः । भागधेयेषु पति-

राजा—(सस्मितम् ।) एष विवाद एव प्रत्याययति ।

(ततः प्रविशत्येकवेणीधरा शकुन्तला ।)

शकुन्तला—[1]विआरकाले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसी अत्तणो भाअहेएमु । अह वा जह साणुमदीए आचक्खिदं तह संभावीअदि एदं ।

राजा—(शकुन्तलां विलोक्य ।) अये सेयमत्रभवती शकुन्तला।यैषा।

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः ।
अपि निष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति ॥ २१ ॥

शकुन्तला—(पश्चात्तापविवर्णं राजानं दृष्ट्वा ।) [2]ण खु अज्जउत्तो वि-

---

[1]विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न म आशाऽऽसीदात्मनो भागधेयेषु । अथ वा यथा सानुमत्याऽऽख्यातं तथा संभाव्यत एतत् ।

[2] नखल्वार्यपुत्र इव । ततः क एष इदानीमकृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति ।

समागमादिषु । प्रत्यक्षमवधीरितायाः कथं पतिसङ्गमसुखसम्भव इति भावः । सम्भाव्यते स्यादित्याशास्यते ॥

वसने इति ॥ परिधूसरे असंस्कारमलिने वसने वसाना धारयन्ती नियमेन तपश्चरणेन क्षाममुखी दुर्बलकपोला धृतैकवेणिः बद्धजटा अत एव शुद्धशीला निर्मलचारित्रा यैषा शकुन्तला निष्करुणस्य निर्दयस्यापि मम विषयं दीर्घमवधिरहितं विरहव्रतं बिभर्ति । समागमस्यानाशंसनीयत्वाद्दीर्घमेव तपश्चरितुं प्रवृत्तेति भावः । **वसन्तमालिका वृत्तम्** । औपच्छन्दसिकं वा ॥

प्रश्चात्तापेन विरहानुशयेन विवर्णं विच्छायं । नखल्वार्यपुत्र इव आर्यपुत्रसाधर्म्यं न लक्ष्यत इत्यर्थः । कः अन्यः पुरुषः अकृतरक्षामङ्गलं रक्षाकरण्डकभ्रंशादिति भावः ।

अ । तदो को एसो दाणिं अकिदरक्खामंगलं मे गत्तसंसग्गेण दूसेदि ।

बालः—(मातरमुपेत्य ।) [1]अज्जूए एसो को वि परकेरओ मं पुत्त त्ति आलिंगदि ।

राजा—प्रिये क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तं । यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

शकुन्तला—(आत्मगतम् ।) [2]हिअअ समस्सस समस्सस । परित्त्तमच्छरेण अणुअंपिअ म्हि देव्वेण । अज्जउत्तो एव्व ।

राजा—प्रिये ।

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥ २२ ॥

---

[1]मातः एष कोऽपि परकीयो मां पुत्र इत्यालिङ्गति ।

[2]हृदय समाश्वसिहि समाश्वसिहि । परित्यक्तमत्सरेणानुकम्पितास्मि दैवेन । आर्यपुत्र एव ।

गात्रसंसर्गेण दूषयति अपत्यस्य हि परपुरुषेणालिङ्गनं भावदोषादूषणं सतीनामिति भावः। रक्षा तु सर्वदोषनिवारणमिति भावः । परकीयः अस्मदसम्बद्ध इत्यर्थः । त्वयि विषये प्रयुक्तं कृतं क्रौर्यं प्रत्याख्यानरूक्षत्वमपि अनुकूलपरिणामं सुखपर्यवसानं । प्रत्यभिज्ञातं सोऽयमिति स्मृतं न तु मयैव त्वां विस्मृतमिति भावः । समाश्वसिहि कातरतां त्यज । परित्यक्तमत्सरेण पूर्वविरोधं मुक्तवता । आर्यपुत्रः खलु आर्यपुत्र एव । स्वरेण प्रत्यभिज्ञात इति भावः ।

स्मृतीति ॥ हे सुमुखि स्मृत्या प्रणयस्मरणेन भिन्नं निरस्तं मोहतमः अज्ञानान्धकारः यस्य तस्य मे प्रमुखे अग्रतः दिष्ट्येत्यव्ययं भाग्येनेत्यर्थः । स्थितासि । त्वयि सन्निहितायां स्मृतिरतीता स्मृत्यां च प्राप्तायां त्वं दुर्लभेति विप्रतिषेधेऽयं दैवान्निवृत्त इति भावः । तद्यथा उपरागस्य ग्रहणस्य अन्ते अवसाने रोहिणी शशिनश्चन्द्रस्य योगं सम्बन्धं समुपगता संप्राप्ता । अकस्मात् कश्चित् कालं स्मरणप्रतिरोधानमुपरागकल्पं

शकुन्तला—[1]जेदु जेदु अज्जउत्तो । (इत्यर्धोक्ते बाष्पकण्ठी विरमति ।)

राजा—सुन्दरि ।

बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।
यत्त दृष्टसंस्कारपाटलोष्ठपुटं मुखम् ॥ २३ ॥

बालः—[2]अज्जूए को एसो ? ।

शकुन्तला—[3]वच्छ दे भाअहेआइ पुच्छ ।

---

[1]जयतु जयत्वार्यपुत्रः ।

[2]मातः क एषः ? ।

[3]वत्स ते भागधेयानि पृच्छ ।

मोक्षकल्पश्च प्रतिबोध इति भावः । दृष्टान्तालङ्कारः । **आर्या वृत्तम् ॥** " समुपगते-वाशु रोहिणी योगमि " ति पाठे उपमालङ्कारः । **गीतिर्वृत्तम् ॥**

बाष्पः कण्ठे यस्याः सा । बाष्पनिरुद्धकण्ठीति पाठे बाष्पेण निरुद्धः प्रतिबद्ध-प्रसरः कण्ठः स्वरः यस्याः सा ॥

बाष्पेणेति ॥ जयशब्दे त्वया वक्तुमुपक्रान्ते बाष्पेण कण्ठरोधिना प्रतिषिद्धे प्रतिबद्धे सत्यपि मया जित सर्वोत्कर्षेण स्थितं कृतार्थीभूतमित्यर्थः । यस्मात् कारणाद-संस्कारेण यावकलाक्षादिसंस्कारेण विनापि पाटलं रक्तं ओष्ठपुटं अधरदलं यस्य तत् ते मुखं दृष्टं । " प्रोषिते मलिना कृशा " इत्यादिसतीलक्षणदर्शनादयमेव मे जय इति भावः। अत्र जयशब्दे कारणे विनापि जयरूपकार्योत्पत्त्या असंस्कारपाटलोष्ठपुटमिति च संस्का-राद्यतेऽपि पाटलिमोत्पत्त्या च विभावनालङ्कारौ । असंस्कारमिति व्यस्तपाठे अनलंकृत-मिति मुखविशेषणं । क्वचित् " पाटलोष्ठमिदं मुखं " इति अन्यत्र " पाटलोष्ठं मुखं प्रिये" इति च पाठो दृश्यते । "ओत्वोष्ठ्योः समासे वा" इति वक्तव्यात् वृद्धिविकल्पः । **अनुष्टुप् वृत्तम् ॥**

भागधेयानि भाग्यानि पृच्छ । यन्मां पृच्छसि तदित्यर्थसिद्धं । स्वभागधे-यस्य विपर्यस्तत्वानुभवात् पुत्रभागधेयस्येव विलसितमिदं यद्भूयः समागम इति शकुन्त-लाहृदयं । भागधेयानामेवात्रप्रधानकर्मत्वम् ॥

राजा—(शकुन्तलायाः पादयोः प्रणिपत्य ।)

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत्।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥२४॥

शकुन्तला—[1]उट्ठेदु अज्जउत्तो । णूणं मे सुअरिअप्पडिबंधअं पुराकिदं तेसु दिअहेसु परिणामाहिमुहं आसी । जेण साणुक्कोसो वि अज्जत्तो मइ विरसो संवुत्तो ।

(राजोत्तिष्ठति ।)

---

[1]उत्तिष्ठत्वार्यपुत्रः । नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामाभिमुखमासीत् । येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरसः संवृत्तः ।

सुतन्विति । हे सुतनु प्रत्यादेशव्यलीकं मदवधीरणारूपमप्रियं ते हृदयादपगच्छतु न स्मर्तव्यमिति भावः । तदा प्रत्यादेशावसरे किमपिअज्ञातनिमित्तः अत्र किमित्यव्ययं "किं प्रश्नाक्षेपकुत्सासु तत्रैव च किमव्ययं" इति नानार्थरत्नमाला । बलवान् दुष्परिहरः मे मनसः संमोहः अज्ञानं अभूत् । तथा हि । प्रबलतमसां उद्रिक्तमोहानां पुरुषाणां शुभेषु श्रेयस्तुवृत्तयः व्यवहाराः एवं प्रायाः भूयिष्ठमेतादृशा भवन्ति। यथा अन्धः शिरसि क्षिप्तां लीलया विन्यस्तां स्रजं पुष्पमालामपि अहिशङ्कया सर्पभ्रमेण धुनोति निरस्यति । विकल्पालङ्कारः । "यस्मिन्विशेषसामान्यविशेषाः स विकल्पः" इति लक्षणात् । हरिणी वृत्तम् ॥

सुचरितप्रतिबन्धकं सुकृतविरोधि पुराकृतं पूर्वजन्माचरितं कर्म दुष्कृतं । परिणामाभिमुखं फलोपभोगोन्मुखं । येनैतदशक्यनिरोधं भवतीति भावः । दुःखभागी दुःखशली इत्यर्थः । उद्भूतमपनीतं विषादरूपं शल्यं येन तथाभूतः सन् कथयिष्यामि विस्म-

मातलिः—(सस्मितम्।) किमीश्वराणां परोक्षम्। एह्यायुष्मन्, भगवान्मारीचस्ते दर्शनं वितरति।

राजा—शकुन्तले अवलम्ब्यतां पुत्रः। त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि।

शकुन्तला—[1]हिरिअमि अज्जउत्तरेण सह गुरुसमीपं गन्तुम्।

राजा—अय्येवमाचरितव्यमभ्युदयकालेषु। एह्येहि।

(सर्वे परिक्रामन्ति।)

(ततः प्रविश्यादित्या सार्धमासनस्थो मारीचः।)

मारीचः—(राजानमवलोक्य।) दाक्षायणि।

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य गोप्ता।
चापेन यस्य विनिवर्तितकर्म जातं
तत्कोटिमत् कुलिशमाभरणं मघोनः ॥ ॥ २६ ॥

---

[1]जिह्वेम्यार्यपुत्रेण सह गुरुसमीपं गन्तुम्।

न ज्ञातः किं। ईश्वराणां लोकातिरिक्तशक्तीनां। अक्ष्णः परं परोक्षं किञ्चिन्न किंचिदित्यर्थः। पुरस्कृत्य उपहारवदग्रे निधाय तवैवाप्सरः सम्भवतया प्रीतिविशेषास्पदत्वादात्मनश्चापराधपरिहारार्थत्वादिति भावः। अभ्युदयकालेषु मङ्गलावसरेषु एवमाचरितव्यं सहैव देवतागुरुवन्दनं कर्तव्यम्॥

पुत्रस्येति। अयं पुरुषः ते पुत्रस्य इन्द्रस्य रणशिरसि देवासुरसमरप्रधानभूमौ अग्रयायी अग्रेसरः नेतेति यावत् दुष्यन्त इत्यभिहितः प्रख्यातः भुवनस्य लोकस्य सुरवैरिविजयात् सम्मान्यतो लोकग्रहणं। गोप्ता रक्षिता "भर्ते"ति पाठान्तरं। पुत्रवदनुग्राह्य इति भावः। यस्य चापेन धनुषा विनिवर्तितं विरमितं कर्म शत्रुदलनरूपं यस्य तत् तत् प्रसिद्धं कोटिमत् प्रशस्तधारं शतकोटिप्रसिद्धेरिति भावः। व्यापाराभावादभ्रकोटिमित्यपि प्रतीयते। मघोन इन्द्रस्य कुलिशं वज्रं आभरणं वीरस्य हस्तभूषणं भवति।

अदितिः—[1]संभावणीआणुभावा से आकिदी ।

मातलिः—आयुष्मन् एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः । तावुपसर्प ।

राजा—मातले

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यज्ञभागेश्वरम् ।
यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसंभवमिदं तत् स्रष्टुरेकान्तरम् ॥ २७॥

[1]संभावनीयानुभावाऽस्याकृतिः ।

नत्वायुधमिति भावः । गम्यस्य भङ्ग्यन्तरेणाभिधानात् । पर्यायोक्तमलङ्कारः । **वसन्ततिलकं वृत्तम् ॥**

सम्भावनीयः संप्रतिपत्तुं योग्यः अनुभावः प्रभावः यस्याः सा । आकृतिः रूपं "रूपमेवास्येतन्महिमानं व्याचष्टे" इति श्रुतेः । पुत्रप्रीतेः पिशुनेन सूचकेन पुत्रमित्रत्वादिति भावः । माता च पिता च पितरौ "पिता मात्रा" इत्येकशेषः ॥

प्राहुरिति । यददितिकश्यपरूपं द्वन्द्वं कर्म "स्त्रीपुंसौ मिथुनं द्वन्द्वं" इत्यमरः । द्वादशधा स्थितस्य तेजसः सूर्यस्य कारणं मातापितृरूपं प्राहुः । अनेन लोकोत्तरं तेजस्वित्वं व्यज्यते । यत् द्वन्द्वं वर्तृ भुवनत्रयस्य भर्तारं यज्ञे भागाः येषां तेषां ईश्वरं देवाधिराजं इन्द्रं सुषुवे जनयामास । यस्मिंश्च द्वन्द्वे आत्मभुवः कमलासनात् परः प्रकृष्टः पुरुषो नारायणोऽपि भवाय जन्मने आस्पदं स्थानं चक्रे । "उपेन्द्रत्वेनावतातरे" त्यर्थः । दक्षश्च मरीचिश्च सम्भवौ उत्पत्तिहेतू यस्य तत् इदं तत् द्वन्द्वं यथासंख्यं मदितिश्च कश्यपश्च स्रष्टुः ब्रह्मणः सकाशात् एकान्तरं एकेन यथासंख्यं दक्षेण मरीचिना च अन्तरं व्यवधानं यस्य तथाभूतं । अत्र (१) धाता (२) अर्यमा (३) मित्रः (४) विष्णुः (५) विवस्वान् (६) पूषा (७) पर्जन्यः (८) अंशः (९) भगः (१०) त्वष्टा (११) इन्द्रः (१२) वरुणः इति द्वादशादित्यानां नामानि । "श्रुध्यंचान्योपलक्षणं" इत्युक्तलक्षणः उदात्तालङ्कारभेदः । **शार्दूलविक्रीडितं वृत्तम् ॥**

मातलिः—अथ किम् ।

राजा—(उपगम्य ।) उभाभ्यामपि वासवनियोज्यो दुष्यन्तः प्रणमति ।

मारीचः—वत्स चिरं पृथिवीं पालय ।

अदितिः—[1]वच्छ सप्पडिरहो होहि ।

शकुन्तला—[2]दारअसहिदा वो पादवंदणं करोमि ।

मारीचः—वत्से

आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः ।
आशीरन्या न ते योग्या पौलोम्याः सदृशी भव ॥ २८ ॥

आदितिः—[3]जादे भत्तुणो बहुमदा होहि । अवस्सं दीहाऊ वच्छओ उहअकुलणंदणो होदु । उवविसद ।

(सर्वे प्रजापतिमभित उपविशन्ति ।)

---

[1]वत्स अप्रतिरथो भव ।

[2]दारकसहिता वा पादवन्दनं करोमि ।

[3]जाते भर्तुर्बहुमता भव । अवश्यं दीर्घायुर्वत्स उभयकुलनन्दनो भवतु । उपविशत ।

उभाभ्यामिति क्रियया यमभिप्रैति सोऽपि संप्रदानमिति चतुर्थी । चिरं महीं पालय दीर्घायुरस्खलितैश्वर्यश्च भवेत्यर्थः । अप्रतिरथः निस्सपत्नः । वां युवयोः ॥

आखण्डलेति । भर्ता दुष्यन्तः आखण्डलसमः इन्द्रतुल्यः सुतः पुत्रः सर्वदमनः जयन्तः इन्द्रपुत्रः प्रतिमा उपमानं यस्य सः । ते एवं संपन्नसौभाग्यायास्तव अन्या आशीः अशासनीयान्तरं न योग्या नोचिता पुनरुक्तभावादिति भावः । पौलोम्याः इन्द्राण्याः सदृशी भव । दीर्घकालमनुवृत्तसर्वसौभाग्या भवेत्यर्थः । अनुष्टुप्-वृत्तम् ॥

उभे कुले मातापितृवंशौ नन्दयति समृद्धीकरोतीत्युभयकुलनन्दनः । प्रजापति-

मारीचः— (एकैकं निर्दिशन् ।)

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
श्रद्धा वित्तं विधिश्चेति त्रितयं वः समागतम् ॥ २९ ॥

राजा—भगवन् प्रागभिप्रेतसिद्धिः पश्चादर्शनम् । अतोऽपूर्वः खलु वोऽनुग्रहः । कुतः

उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु संपदः ॥ ३० ॥

मभितः कश्यपाभिमुखं " अभितः परितः " इत्यादिना द्वितीया । एकैकं अनुग्राह्यान् प्रत्येकशः निर्दिशन् लक्षीकुर्वन् ॥

दिष्ट्येति—साध्वी पतिव्रता शकुन्तला इदं सत् श्लाघ्यं अपत्यं पुत्रः महाप्रभावत्वादिति भावः । भवान् सिद्धानुभावत्वादविशिष्य निर्देशः । वस्त्रयाणां समागतं समागमः श्रद्धा आस्तिक्यबुद्धिः वित्तं द्रव्यं विधिः " शास्त्रविधानं च " इति त्रितयं । त्रयाणां समवाय इत्यर्थः। धर्मार्थमेव वः सङ्गतमिति भावः । धर्मपत्न्या आचारसहायत्वाच्छ्रद्धासाम्यं । ऋणप्रतीकारादपत्यस्य वित्तसादृश्यं । उभयानुगृहीतस्य प्राधान्याद्विधितुल्यत्वं राज्ञः । " दिष्ट्येति" हर्षे । **अनुष्टुप् वृत्तम् ॥**

अपूर्वः लोकदृष्टविलक्षणः । तदाह—

उदेतीति । पूर्वं फलोत्पत्तेः प्रथमं कुसुममुदेति लोके उद्भवति ततः पश्चात् फलं कार्यं उदेतीत्यनुषज्यते । एवं प्राक् प्रथमं घनोदयः मेघोद्गमः तदनन्तरं पयः वर्षोदकं भवति । निमित्तादागतं नैमित्तिकं निमित्तनैमित्तिकयोः हेतुहेतुमतोः अयं उक्तरूपः क्रमः पौर्वापर्यनियमोस्ति । तव तु प्रसादस्य अनुग्रहस्य हेतुभूतस्य पुरः पूर्वमेव संपदः समीहितसिद्धयः कार्यभूता भवन्ति । प्रथमं पुत्रफलवसमागमरूपं फलं प्राप्तस्यैव हि मे सर्वकल्याणनिदानं भवत्प्रसादो लब्ध इति भावः । अयं कार्यकारणपौर्वापर्यविध्वंसो नामातिशयोक्तिभेदः । **वंशस्थं वृत्तम् ॥**

मातलिः—एवं विधातारः प्रसीदन्ति ।

राजा—भगवन् इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्य चित् कालस्य बन्धुभिरानीतां स्मृतिवैकल्यात् प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य । पश्चादङ्गुलीयकदर्शनादूढपूर्वां तद्दुहितरमवगतोऽहम् । तच्चित्रमिव मे प्रतिभाति ।

यथा गजो नेति समक्षरूपे
तस्मिन्नतिक्रामति संशयः स्यात् ।
पदानि दृष्ट्वा तु भवेत् प्रतीति
स्तथाविधो मे मनसो विकारः ॥ ३१ ॥

विधातारः स्रष्टारः अनेन पुत्रवत्सलता व्यज्यते एवमनेन प्रकारेण प्रसीदन्ति सिषेविषामात्रेण समुद्धार्थान् पश्चादेवानुगृह्णन्तीत्यर्थः । पश्चात् प्रत्याख्यानानन्तरं ऊढपूर्वां प्राक्परणीतां अवगतः ज्ञातवानस्मि "गत्यर्थाकर्मके" त्यादिना कर्तरिक्तः । चित्रं विरुद्धमिव ॥

यथेति । यथा समक्षरूपे प्रत्यक्षाकारे वस्तुनि गजे गजोनेति नायं गज इति विपर्ययः विपरीतनिश्चयः स्यात् कस्यचिद्भवेत् । पुनः तस्मिन् वस्तुनि अतिक्रामति चक्षुर्विषयमतिगच्छति सति संशयः योयं मया दृष्टपूर्वः सगजो नवेति सन्देहः स्यात् । अतिक्रान्तस्य पदानि भूतलन्यस्तानि पादचिह्नानि दृष्ट्वा तु प्रतीतिः गज एवेति तत्त्व निश्चयः भवेत्, तथाविधः मे मनसः विकारः परिणामः अभूदिति विपरिणम्यानुषज्यते । साक्षादुपनतायां शकुन्तलायां नायं मत्परिग्रह इति व्यतिरेकनिश्चयः दिवमारूढायां च "कामं प्रत्यादिष्टा स्मरामि न परिग्रहं मुनेस्तनयां । बलवत्तु दूयमानं प्रत्याययतीव मे हृदय" मिति सम्भावनात्मा संशयः । अंगुलीयकं तु विलोक्य परिग्रह एवेत्यन्वयकोटिनिश्चयः इत्येवं कोयमुन्मत्तस्येव चित्तविकारक्रम इति भावः । **उपजातिर्वृत्तम्** ॥

मारीचः—वत्स अलमात्मापचारशङ्कया । संमोहोऽपि त्वय्युपपन्नः । श्रूयताम् ।

राजा—अवहितोऽस्मि ।

मारीचः—यदैवाप्सरस्तीर्थावतरणात् प्रत्यादेशविक्लबां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि दुर्वासः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति । स चायमङ्गुलीयकदर्शनावसानः ।

राजा—(सोच्छ्वासम् ।) एष वचनीयान्मुक्तोऽस्मि ।

शकुन्तला—(स्वगतम् ।) [1]दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो । ण खु सत्तं अत्ताणं सुमरेमि । अह वा पत्तो मए स हि साबो विरहसुण्णहिअआए ण विदिदो । अदो सहीहिं संदिट्ठ म्हि भत्तणो अंगुलीअअं दंसइदव्वं त्ति ।

मारीचः—वत्से विदितार्थोऽसि । सहधर्मचारिणं प्रति न त्वयामन्युः कार्यः । पश्य ।

---

[1]दिष्ट्याऽकारणप्रत्यादेशी नार्यपुत्रः । न खलु शप्तमात्मानं स्मरामि । अथ वा प्राप्तो मया स हि शापो विरहशून्यहृदयया नविदितः अतः सखीभ्यां संदिष्टाऽस्मि भर्तुरङ्गुलीयकं दर्शयितव्यमिति ।

आत्मापचारशङ्कया स्वापराधभयेन । उपपन्नः न्याय्यः । अप्सरस्तीर्थस्य अवतरणात् अवतारमार्गात् प्रत्यादेशविक्लबां भवत्प्रतिषेधविषण्णां "प्रत्यक्षवैक्लव्या" मिति पाठे "साक्षात्कृतविषादा" मित्यर्थः । आदाय सानुमत्युपनीतां गृहीत्वा । दुर्वासः शापात् "विचिन्तयन्तीयमनन्यमानसा" इत्यादिरूपात् । सचायं शापः । अंगुलीयकस्य दर्शनमेव अवसानं अवधिर्यस्य सः । सोच्छ्वासं ससमाधानं । एषः शापपराधीनोऽहं वचनीयात् दोषात् । सखीभ्यां अनुसूयाप्रियंवदाभ्यां । विदितः ज्ञातः अर्थः दुर्वासः शापरूपः परमार्थः यया सा । "चरितार्थेति" पाठान्तरं । सह धर्मचारिणं भर्तारं प्रति मन्युः प्रत्यादेशरोषः ॥

शापादस्मि प्रतिहता स्मृतिरोधरूक्षे
भर्तर्यपेततमसि प्रभुता तवैव ।
छाया न मूर्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥ ३२ ॥

राजा—यथा भगवानाह । अत्र खलु मे वंशप्रतिष्ठा ।

मारीचः—तथा भाविनमेनं चक्रवर्तिनमवगच्छतु भवान् । पश्य ।

रथेनानुत्खातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः ।

शापादिति । भर्तरि शापात् हेतोः स्मृतिरोधेन प्रत्यभिज्ञाप्रतिबन्धेन रूक्षे परुषे सति प्रतिहता नाभिनन्दिताऽसि । अपेततमसि अपगतध्यामोहे सति तदैव प्रभुता एश्वर्यं तवैवेमिति पाठान्तरं । मलेन उपहतप्रसादे नाशितनैर्मल्ये दर्पणतले छाया प्रतिबिम्बं न मूर्छति संक्रामति 'विभाति मलोहतप्रसाद' इति पाठान्तरं । शुद्धे अपनीतमलेतु सुलभः । अवकाशः प्रवेशो यस्याः सा भवति । यथा पयोदवातादिना मालिन्ये सति शुद्धमपि दर्पणं बिम्बग्रहणासमर्थं भवति तथा शापदूषिते भर्तुरात्मनि न विषयीभूतासीति नैष पुरुषदोषः येन मन्योर्न स्थानमिति भावः । **वसन्ततिलकं वृत्तम्** ॥

यथेति नान्यत् प्रत्यादेशनिमित्तामित्यर्थः । खलु यतः । अत्र शकुन्तलायामेव । वंशस्य प्रतिष्ठा स्थितिः सन्तानलाभादिति भावः । बालं हस्ते गृह्णातीत्यधिकपाठे अत्र बाल इत्यर्थः ॥

रथेनेति ॥ अयं ते पुत्रः अप्रतिरथः निस्सपत्नः सन् अनुत्खातेन व्योमयानादस्खलिततया स्तिमिता निश्चला गतिर्यस्य तेन रथेन तीर्णजलधिः अतिक्रान्तार्णवः सन् सप्तद्वीपां वसुधां कृत्स्नमेव भूतलमित्यर्थः । पुरा यजति जेष्यति "यावत्पुरानिपातयोः" इति भविष्यदर्थे लट् । इह आश्रमे सत्त्वानां सिंहादीनां प्रसभदमनात्

इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥३३॥

राजा—भगवता कृतसंस्कारे सर्वमस्मिन् वयमाशंसामहे ।

अदितिः—[1]भअवं इमाए दुहिदुमणोरहसंपत्तीए कण्णो विदाव सुदवित्थारो करीअदु । दुहिदुवच्छला मेणआ इह एव्व मं परिचरन्ती चिट्ठदि ।

शकुन्तला—(आत्मगतम् ।) [2]मणोरहो खु मे भणिदो भअवदीए ।

मारीचः—तपः प्रभावात् प्रत्यक्षं सर्वमेतत्तत्त्वभवतः कण्वस्य ।

राजा—अतः खलु मामनभिक्रुद्धो मुनिः ।

मारीचः—तथाप्यसौ प्रियमस्माभिः प्रष्टव्यः । कः कोत्र भोः

। प्रविश्य ।)

शिष्यः—भगवन् अयमस्मि ।

मारीचः—गालव इदानीमेव विहायसा गत्वा मद्वचनात् तत्रभवते कण्वाय प्रियमावेदय । यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति ।

---

[1]भगवन् अस्या दुहितृमनोरथसंपत्तेः कण्वोऽपि तावच्छ्रुतविस्तारः क्रियताम् । दुहितृवत्सला मेनकेहैव मां परिचरन्ती तिष्ठति ।

[2]मनोरथः खलु मे भणितो भगवत्या ।

बलादवमर्दनाद्धेतोः सर्वदमनः सर्वदमनाख्यो जातः पुनः इतः परं लोकस्य भरणात् परिपालनाद्भरत इत्याख्यां यास्यति प्राप्स्यति । बिभर्तीति भरतः भृञ औणादिकस्तप्रत्ययः । शिखरिणी वृत्तम् ॥

कृतः संस्कारो जातकर्मादिः यस्य तस्मिन् । सर्वं श्रेयः आशंसामहे सम्भावयामः । मनोरथसंपतेः अभीष्टसिद्धेः श्रुतविस्तारः विदितप्रकारः । श्रुतमनोरथसंपत्तिविस्तार इत्यर्थः । अत्रैव तिष्ठति न पृथक्सन्देशमर्हतीति भावः । भगवत्या अदित्या ।

शिष्यः—यदाज्ञापयति भगवान् ।

(इति निष्क्रान्तः ।)

मारीचः—वत्स त्वमपि स्वापत्यदारसहितः सख्युराखण्डलस्य रथमारुह्य राजधानीं प्रतिष्ठस्व ।

राजा—यदाज्ञापयति भगवान् ।

मारीचः—अपि च

तव भवतु बिडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञः स्वर्गिणो भावयाऽलम् ।
युगशतपरिवर्तानेवमन्योन्यकृत्यै-
र्नयतमुभयलोकानुग्रहश्लाघनीयैः ॥ ३४ ॥

अनभिक्रुद्धः अन्यथा हि शक्तवान् स्यादिति भावः । "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इत्यतो द्वितीया । तथापि विदितत्वेपि प्रियं दुहितृ कुशलरूपमिष्टं प्रष्टव्यः अनुयोक्तव्यः। "प्रियसमभियोगः सन्देष्टव्यः" इति पाठान्तरम् । समभियोगो वृत्तान्तः ॥

तवेति ॥ बिडति भिनत्तीति बिडं "इगुपधज्ञाप्रीकिरः कः" । तदोजः तेजो यस्य सः बिडौजाः इन्द्रः तव प्रजासु विषये प्राज्यवृष्टिः प्रभूतवर्षणः भवतु । त्वमपि विततयज्ञः विस्तृताध्वरः सन् स्वर्गिणः देवान् अलमत्यर्थं भावय आराधय "प्रीणय" इति पाठान्तरं । एवं उभयलोकयोः द्यावापृथिव्योः अनुग्रहेण परिपोषेण श्लाघनीयैः अभिनन्दनीयैः अन्योन्यकृत्यैः वर्षणयजनरूपैः युगशतानां परिवर्तान् पर्यायान् नयतं गमयतं । इन्द्रवत् त्वमपि स्वैः सुकृतैरायुश्चैश्वर्यविवेकलं प्राप्नुहीति भावः ॥ "देवान्भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्थथ" इति भगवद्गीता । रघुवंशे च "दुदोह गां सयज्ञाय सस्याय मघवा दिवं । संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं" इति । अन्योन्यालङ्कारः । मालिनीवृत्तम् ॥

राजा—भगवन् यथाशक्ति श्रेयसे यतिष्ये ? ।

मारीचः—वत्स किंते भूयः प्रियमुपहरामि? ।

राजा—अतः परमपि प्रियमस्ति । यदीह भगवान् प्रियं कर्तुमिच्छति तर्हीदमस्तु । भरतवाक्यम् -

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहतां महीयताम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥ ३५ ॥

(निष्क्रान्ताः सर्वे ।)

इति सप्तमोऽङ्कः ।

शाकुन्तलं समाप्तम् ।

श्रेयसे देवताराधनादिरूपपुण्यं कर्तुं । भूयः इतोऽप्यधिकं उपहरामि वितरामि । भरतवाक्यं नटवचनं समाप्तिकुत्सेन नटेन वक्तव्यमाचारप्राप्तं प्रशस्त्याख्यं निर्वहणसन्ध्येरङ्गं । "प्रशस्तिः शुभशंसनं" इति लक्षणात् ॥

प्रवर्ततामिति । ॥ पृथिव्या ईश्वरः पार्थिवः प्रकृतीनां प्रजानां हिताय सुखाय प्रवर्ततां प्रयततां । श्रुत्या शास्त्रश्रवणेन महतां पूज्यानां विद्यावृद्धानां कवीनामित्यर्थः । "श्रुतिमहिते" ति पाठे सरस्वतीविशेषणं । "श्रुतमहता"मिति च पाठान्तरं । सरस्वती सूक्तिः महीयतां पूज्यतां "महिङ् पूजाया" मिति धातुः । अपि च परिगतशक्तिः सर्वतो व्याप्तप्रभावः सर्वात्मत्वादिति भावः । पार्वत्येव शक्तिपदार्थ इत्यन्ये तदा प्राप्तशक्तिक इत्यर्थः । आत्मना भवतीत्यात्मभूः । अनन्यहेतुकः नित्य इति यावत् । नीललोहितः कण्ठे नीलः शेषांगे च लोहितो महेश्वरः गौरीभागे नीलः

अन्यत्र लोहितोवा । मम पुनर्भवं पुनर्जननं क्षपयतु दूरीकरोतु मोक्षं ददात्वित्यर्थः । रुचिरा प्रभावती च । मतभेदेन वृत्तम् ॥

इति अभिज्ञानशाकुन्तलव्याख्यायां सहृदयसमाख्यायां

॥ सप्तमोऽङ्कः ॥

शक्त्या गम्यमकुण्ठमार्गममलं दीक्षार्यजातोज्ज्वलं
श्लिष्टं शब्दगुणश्रिया नवरसासारप्रसारास्पदम् ।
काव्यं यत् कविवेधसो बुधगुरोर्वागीश्वरादागतं
तद्वर्त्मैव न मीयते वितरति स्थानं च वाचां पुनः ॥

स्रोतोभिस्तटिनीवया नवनवैः शब्दार्थयोगैर्जगत्
सिञ्चन्ती रसवेदिभिश्चिरतरं तृप्यद्भिरप्यायते ।
तीरक्षोभवदेष तां कविमणेर्विश्वेश्वरस्य स्तुतिं
श्लक्ष्णैरेव कषोपलो गुणवतां व्याख्यापराधो मम ॥

मद्व्याख्यानं यदिह विगुणं नैष दोषो नवो मे
श्लाघा सैषा यदि गुणलवः क्वापि दृश्येत सद्भिः ।
इत्थं धीरव्यवसितिरहं साहसेऽस्मि प्रवृत्तो
बालः श्रेयान् पदमपि वदन् न स्खलन् दूषणाय ॥

॥ शुभमस्तु ॥

Printed by V. Ramaswamy Sastrulu & Sons, at the 'Vavilla' Press, Madras.

SAKUNTALAM

NOTES.

ACT I.

Page 1.—या refers to तनु 'body or form'. सृष्टुः—आद्या सृष्टिः । The first creation of the Creator *i. e.* Water. *Cf.* Manu I. 8—10. अप एव ससर्जादौ । विधिहुतं—वेदविधानेन हुतं । होत्री—जुहोतीति होत्री 'the Brahman qualified by initiation to offer the oblation.' कालं विधत्तः—Divide time into day and night. Hence the name given to the Sun दिवाकर 'maker of the day' and निशाकर 'maker of the night *i.e.* the Moon.' There is also another division of time suggested. It is into सौर and चान्द्र । श्रुतिविषयगुणा—'That which has sound as its quality—sound which is perceptible by the ear' *Cf.* Manu: आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः । आकाश (Ether) is said to be vehicle of sound. व्याप्य स्थिता—i. e., 'remains occupying.' स्था with an indeclinable participle expresses a continued action. *Cf.* "व्याप्य स्थितं रोदसी" in the opening of Vikramorvasi. विश्वं—The Universe. सर्वभूतप्रकृतिः—'That which is the source of all material objects.' प्रकृति here means उत्पत्तिस्थानम् or आदिकारणम् "the original cause." This earth is called the prime source of all created things. The Bengal reading is सर्वबीजप्रकृतिः 'the primeval source of all seeds.' But in Manusmriti we have 'इयं भूमिर्हि भूतानां शाश्वती योनि-

रुध्यते'। प्रकृतिरित्याहुः = प्रकृतिमाहुः। If इति is not used the accusative प्रकृतिं may be used. प्रत्यक्षाभिः—प्रत्यक्षमासामस्तीति प्रत्यक्षाः ताभिः–perceptible to the senses. प्रपन्नः—'Endowed with.' अष्टाभिस्तनुभिः–Siva is said to have eight forms viz:—earth, air, water, fire, ether, (the five elements) the officiating Brahman, the Sun and the Moon. These are said to be his visible forms. In the Bhavishyat Purâna it is said that Siva has eight forms which are thus enumerated:—Rudra, Bhava, Sarva, Isâna, Pasupati, Bhima, Ugra and Mahâdêva which are represented by the eight forms here mentioned. *Cf.* The opening or the Nândi Sloka in Malavikagnimitra:—"अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः।" and also Kumaras.—IV–76. Again *Cf.* अवेहि मां किङ्करमष्टमूर्तेः Raghuvam. II. The benedictory sloka must contain an allusion to the incidents of the play. Thus:—"आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचक"। Even so this sloka is also explained by the commentators to correspond with the circumstances in the life of Sakuntala. Thus या सृष्टिः &c. is explained with reference to Sloka 9 Act II. "क्षीरस्रुसृष्टिरपरा &c." ये द्वे–refers to the two female friends. वहति विधिहुतं refers to Sakuntala's pregnancy after her Gândharva form of marriage by Dushyanta. अष्टाभिस्तनुभिः प्रपन्नः—Shows that this drama relates to the adventures of a king, because a king is also made of the essence of the eight ruling gods.

Page 3.—नान्दी—The opening benediction, invoking the favour of some deity. It is called नान्दी

because it gladdens the hearts of the gods. नन्दन्ति अस्यां सुरा यस्मात् तेन नान्दी प्रकीर्तिता । It is recited for the removal of all obstacles.

Page 4.—सूत्रधारः—सूत्रं (सबीजकं नाट्यानुष्ठानं) धारयतीति सूत्रधारः 'he who regulates the thread or the rules of the drama.' He takes a prominent part in the प्रस्तावना or the Prologue. He was usually a Brahman and when otherwise he was called the *Sthapaka* नेपथ्यं—'The tiring room behind the curtains.' Here it was that the decorations were kept and that the actors dressed themselves and remained in readiness before entering the stage. आर्ये– 'Honored Lady'; a respectable mode of address. नेपथ्यविधानं—वेषरचना 'the act of decorations; making the toilet.' नेपथ्ये यद्विधीयते तत् । अवसितं—Past Participle of सो with अव =to finish. नटी—The chief actress sometimes regarded as the wife of Sutradhara.

Page 5.—अभिरूपभूयिष्ठा—अभियुक्तं रूपं येषां तेऽभिरूपास्ते भूयिष्ठा यस्याम् । 'For the most part composed of educated men.' अभिरूप–पण्डित । परिषत्–परितः सीदन्त्यस्यां । कालिदास···वस्तुना —कालिदासेन ग्रथितं (निबद्धं) वस्तु यस्य तेन । वस्तु–The plot of a drama. उपस्थातव्यं—Potential Passive participle of स्था with उप–'to serve; to enact.' प्रतिपात्रं—पात्रे पात्रे । तत्–तस्मात् 'Therefore.' सुविहितप्रयोगतया—सुविहितः (सुष्ठुकृतः पात्रे न्यस्तः) प्रयोगः (अभिनयः) येन सः तस्य भावः तया—By reason of your good assignment of the parts of the play to the several actors. It may also be interpreted thus:—सुशिक्षिताभिनयप्रयोगतया । 'in virtue of your having well studied acting.' भूतार्थं=सत्यं or सत्यार्थं='the true state

of the case.' आपरितोषात्—परितोषं मर्यादीकृत्य । The particle आ means 'until.' प्रयोगविज्ञानं—'Skill in the representation of plays.' Distinguish between विज्ञान and ज्ञान । बलवद्–सुष्ठु 'very well.' शिक्षितानां--शिक्षा एषां सञ्जाता तेषां । अप्रत्ययं 'distrustful of.'

Page 6 — श्रुतिप्रसादनतः—श्रुतेः प्रसादनं तस्मात् = श्रवणेन्द्रियतर्पणात्। 'Other than the gratification of the sense of hearing.' अचिरप्रवृत्तं—'Just set in.' उपभोगक्षमं—'Fit for enjoyment.' ग्रीष्मः—ग्रसते रसानिति । अधिकृत्य–Lit: 'having placed over.' Hence it means कृते = concerning.

Page 7.—अवगाह । Another form is वगाह । *Cf.* अवतंस and वतंस अपिधान and पिधान &c. पाटलायाः कुसुमानि--पाटलानि । प्रच्छायां &c –प्रकृष्टा छाया यत्र तत्स्थानं प्रच्छायं । तस्मिन् सुलभा निद्रा येषु ते तथोक्ताः । The long final of a feminine noun becomes short when compounded with such prepositions as प्र, अति &c. प्र here gives intensity to the original idea. परिणामरमणीयाः—(The days) which are delightful at the close.' परिणाम = सायंकाल । ईषदीषच्चुम्बितानि । 'gently kissed (by the bees).' The bees kiss them gently on account of those flowers being very delicate. The Sirisha flowers were used by young women as ear-rings. *Cf.* Ragh. XVI. 61. अवतंसयन्ति—A nominal verb from अवतंस = अवतंसं कुर्वन्ति। दयमानाः–क्लेशभयादनतिस्पृशन्त्यः 'Careful not to handle the blossoms rudely.'

Page 8.—गीतानुबद्धचित्तवृत्तिः—'The feelings of whose mind are fixed by the melody.' आलिखितः—चित्रार्पितः = 'as if drawn in a picture.' The idea is that the audience is motionless through the influence of the

music. रङ्गः means 'the audience' as well as 'the stage.' प्रकरण । here means 'story' but it generally means a kind of drama with a fictitious plot. आर्यमिश्रैः —'By your reverence.' It is here used as an epithet to the manager, the plural being used to denote respect. मिश्र in similar compounds has the force of 'gentleman' or 'very learned.' अभिज्ञानशाकुन्तलं—शकुन्तलाया इदं शाकुन्तलं; अभिज्ञानप्रधानं शाकुन्तलमिति or some others dissolve the compound thus: अभिज्ञानेन स्मृता शकुन्तला यस्मिन् तत् । The former is an instance of मध्यमपदलोपी समास as शाकपार्थिव &c. It means 'token-Sakuntala.' अधिक्रियतां—प्रकटीक्रियतां 'let it be brought prominently forward.' Another reading is प्रयोगेऽधिक्रियताम् ।

Page 9.—हारिणा । When it is construed along with गीतरागेण it means मनोहरेण 'charming' and with सारङ्गेण it means 'drawing away.' सारङ्गः—सारं (चित्रवर्णं) अङ्गं यस्य तेन 'the spotted deer.' अतिरंहसा—अतिशयितं रंहः यस्य तेन The Prologue in every Sanskrit drama gives some information regarding the author, his lineage, his work, the actors and other incidents which do not actually form part of the subject matter of the story proper. But as a rule the conclusion of the prelude should prepare the audience for the entrance of one of the *dramatis personæ* and so the manager exclaims and cleverly introduces King Dushyanta upon the scene, himself disappearing presently. प्रस्तावना । प्रस्तूयते (प्रबन्धार्थः) अनयेति 'An introductory dialogue.' आयुष्मन् । 'O long-lived one!' a respectful

address to the king, Thus in Dasarupaka. 'रथी सूतेन चायुष्मान् पूज्यैरिशष्यात्मजानुजाः'।

Page 10.—कार्मुके—कर्मणि प्रभवतीति ; अधिज्य । 'having the string ज्या up.' पिनाकिनं—Siva armed with his bow known as पिनाक। When Daksha celebrated a great horse-sacrifice he did not invite his daughter Sati or her husband Siva. Sati nevertheless went to the sacrifice and being insulted, she threw herself into the fire. Thereupon Siva got enraged and suddenly presenting himself on the spot, completely confounded the sacrifice, pursued यज्ञ, 'the lord of sacrifice' who fled in the form of a deer and finally decapitated him. But in the Vayu-purana Siva is said to have created a manifestation of himself as a monstrous being named Vîrabhadra who was ordered to destroy Daksha's sacrifice and who accordingly pursued यज्ञ in the form of a deer. ग्रीवाभङ्गाभिरामं—'gracefully by the bending of his neck.' An adverb modifying बद्धदृष्टिषु। स्यन्दने बद्धदृष्टि cf. Raghuvamsam I–40, स्यन्दनाबद्धदृष्टिषु—प्रविष्टः पूर्वकायम् is equivalent to प्रविष्टपूर्वकायः Lit: 'entering the forepart of his body.' भूयसा—qualifies पश्चार्धेन। Some commentator takes it as adverbial to बद्धदृष्टिः। कीर्णवर्त्मा । 'the path strewn with.' अनुपतत एव मे—An instance of Gen. Abs. उत्खातिनीं—Lit: 'full of excavations;' hence 'uneven.'

Page 11.—अभीशवः—'reins.' निरूप्य–'gesticulating.' निरायता—'long stretched.' निभृतोर्ध्वकर्णाः—निभृत means निश्चल 'steady' or 'motionless.' The usual significance

of the word is secret.' In Raghuvamsa VIII–15 the sky is described as निभृतेन्दु–'having its Moon nearly set.' Hence the word is also explained as meaning 'bent backwards.' The horses running at full speed will naturally have their ears bent backwards so as to present the least resistance to the wind. आत्मोत्थितैः —'raised by themselves' and not 'arising from the body of the horses' as some suppose. रथ्याः—रथं वहन्तीति ।

Page 12.—अतीत्य हरितो हरींश्च—हरितः हरित्संज्ञान् सूर्याश्वान् हरींश्च इन्द्राश्वांश्च अतीत्य 'outstripping the horses of the Sun and of Indra.' Some take हरितः as the Geni. case of हरित् 'the Sun' and हरीन् as the Accus. plural of हरि 'a horse.' But the particle च after हरीन् shows that both हरितो and हरीन् are accusative cases after अतीत्य । Among the names given to the Sun and Indra we have हरिदश्व and हरिहय respectively. यदालोके—&c. This is a mode of describing great velocity. कृतसन्धानमिव—'As if united.' The speed of the chariot is so rapid that the adjacent things do not appear to the on-looker as they actually are. व्यापाद्यमानं—व्यापादयिष्यमाणं । बाणपातवर्त्तिनः—पतन्त्यस्मिन्निति पातः ; बाणानां पातः, तस्मिन् वर्तत इति ।

Page. 13.—आत्मना तृतीयः—'आत्मनश्च पूरणे' इति तृतीयाया अलुक् । स्वयमेकः अन्यौ द्वौ च । वैखानसः—विखनस इदं ।

Page 14.—न खलु &c. खलु—shows 'entreaty.' तूलराशाविवाग्निः—The arrow falling upon the deer is compared to the fire thrown on a heap of cotton. Another reading is पुष्पराशाविवाग्निः—'like fire upon a

heap of flowers.' क्व–repeated—expresses great contrast between two things च–च correlatives meaning 'on the one hand–on the other.' बत expresses 'pity.' वज्रसाराः–Another reading is सारपुङ्खाः। साधुकृतसन्धानं–सन्धा means properly 'to unite or fix an arrow to a bow,' hence 'to take aim.' वः–of those who are born in the race of Puru. प्रहर्तुं–here has the force of प्रहरणाय। The infinitive is interchangeable with the dative and often has the force of the dative.

Page 15—पुरुवंशप्रदीपः—'the pride of the race of Puru.' Dushyanta, the descendant of Puru, belonged to the Lunar race. युक्तरूपं—'fit' or 'proper.' रूपं–here means 'very.' चक्रवर्ती—चक्रे (भूमण्डले राजमण्डलेवा) वर्तितुं शीलमस्य, or चक्रं (सैन्यं) वर्तयितुं (सर्वभूमौचालयितुं) शीलमस्य। One who reigns over a चक्र or country reaching from sea to sea. According to the Vishnu-purâna a चक्रवर्ती is one in whose hand the चक्र or discus of Vishnu is delineated. प्रतिगृह्यतिम्—Properly applies to the receipt of a gift at the hands of a patron. कण्व—A great sage who brought up Sakuntala and who was the progenitor of the lines of Kanva Brahmanas. कुलपतिः—गोत्रप्रवर्तकः or कुलं मुनिसमुदायः तस्य पतिः—A sage who feeds and teaches 10,000 pupils with free boarding. Thus:—

'मुनीनां दशसाहस्रं योऽन्नदानादि पोषणात्।
अध्यापयति विप्रर्षिस्सवै कुलपतिः स्मृतः॥'

अनुमालिनीतीरं—मालिन्याः तीरं, तस्मिन्। The Mâlini appears to have been a tributary to the Ganges on the right, somewhere near Hastinapuram.

Page 16.—तपोधन—'One rich in penance.' कियत् 'how much' किं परिमाणमस्येति । मे भुजः रक्षति इति—There is nothing like the indirect form of speech in Sanskrit. मौर्वी—मूर्वा (लता) तस्याः विकारः A bow string was formerly made of tough, elastic threads spun out of the leaves of the मूर्वा plant. मौर्वी किणाङ्कः—'Having the marks of scar produced by the bow-string.' अपि at the beginning of a sentence introduces a question. सोमतीर्थ—सोमेन तपस्तप्त्वा कृतं तीर्थं । A place of pilgrimage in the west of India, on the coast of Guzarat, near the temple of Somanâth. It is also called Prabhâsa. It was so called because Soma or the Moon was here cured of the consumption brought upon him by the imprecation of Daksha, his father-in-law. A तीर्थ–is a place of pilgrimage generally near or on the banks of some sacred stream. विदित भक्ति—विदिता भक्तिः यस्य तं ।

Page 17.—आत्मानं—'Ourselves.' The singular is used for the dual and plural. आभोग—विस्तार, 'extension.' नीवार—Wild rice. मुख—'any opening.' शुकगर्भ-कोटराः—hollows filled with parrots. गर्भ–as the last member of a compound often denotes 'filled with.' इङ्गुदी—a tree from the fruits where of hermits got oil. It is known also as तापसतरु and मुनिपादप । Out of the fruits of this tree the hermits got oil for lamps and also an ointment as will be seen in Act II. अभिन्नगतयः 'with undeviating step.' It may also be translated, 'not running away; not stooping in their walk.' तोयाधारपथाः—'paths leading to the reservoirs of water.'

पथिन्—at the end of a Tatpurusha compound becomes पथ । वल्कलशिखा &c.—The paths are marked with lines formed by the drippings of water from the ends of the bark-dress.

Page 18.—उपपन्नं—युक्तं, भिन्नो रागः—भिन्न is explained in the commentary as निवर्तित 'altered'; but it may also mean 'partially obscured.' अर्वाक्—अग्रतः 'in front' or 'near.' This verse and the last are examples of the figure called अनुमानालङ्कार or Inference.

Page 19.—उपरोध—Disturbance. यावदवतरामि—It is equivalent to अवतरिष्यामि । यावत् and पुरा when used with verbs in the present tense will give them a future significance. नाम—has here the sense of 'indeed.' उपनीय—Taking away from his body. आर्द्रपृष्टाः—आर्द्रं पृष्टं येषां ते Lit: 'having their backs wet' *i.e.* let them be washed and refreshed. निमित्तं—'Omen': any sign such as the throbbing of the arm or eyelid. In men, if this is felt on the right side it presages good; if on the left, a bad omen. The reverse is true of women.

Page 20.—शान्तं—'Tranquil.' The throbbing of the right eye or the right arm is supposed to be a good omen leading to an unexpected union with a beautiful woman. Cf. वामेतरस्संशयमस्य बाहुः Ragh. VI-68. दक्षिणेन वृक्षवाटिकां—'To the south of the grove of trees' or 'to the right of the grove of trees.' Words indicating direction and एन as दक्षिणेन, उत्तरेण govern the Acc. or the Gen. of the place with respect to which the direction is shown. स्वप्रमाणानुरूपैः

'suited to their size' *i.e.* not too large for women to carry. Or it may perhaps be made to mean 'proportioned to their strength.'

Page 21.—शुद्धान्तः शुद्धाः (परिशुद्धाः रक्षकाः) अन्ते (समीपे) यस्य । It is also called अन्तःपुर and अवरोध 'the inner suite of apartments assigned to women in a king's palace.' The idea embodied in this sloka is that so beautiful a form is not to be easily met with even in the harems of the kings and consequently the shrubs that are carefully pruned and reared in a garden appear to have been excelled by the shrubs of the forest, whose growth is wild and spontaneous. दूरीकृताः—Lit: 'thrown at a distance' and hence 'surpassed.' यथोक्तव्यापारा—उक्तमनतिक्रम्य यथोक्तं; यथोक्तं व्यापारो यस्याः सा । 'engaged in the manner indicated before'

Page 22.—हला—Indeclinable; a vocative particle used in theatrical language to address a female friend. आलवालं आ (समन्तात्) जलस्य लवं आलातिः 'a trench for water round the root of a tree.' सोदरस्नेहः—सह उदरं यस्य सः सोदरः । सोदर means lit: 'coming out of the same womb.' Words of similar formation are सपत्नी, सनाभ &c.

Page 23.—असाधुदर्शी—असाधु यथा तथा द्रष्टुं शीलमस्य । काश्यप 'a descendant of Kasyapa.' The sage Kanva who was the descendant of Kasyapa; but Kasyapa was the son of Marichi, the son of Brahma and one of the seven Prajapatis. आश्रमधर्मे—'to the duties of the hermitage.' Kanva appears to the king as having little or no discrimination inasmuch as he

appoints her to look after the duties of the hermitage. अव्याजमनोहरं—'naturally loveable.' तपःक्षमं—'able to endure penance.' धारा—'edge.' समिद्धतां—Another reading is शमीलतां। The Sami is a tree supposed to contain fire. व्यवस्यति—'endeavours.' Pres. 3rd Pers. sing. of सो with वि and अव।

Page 24.—अदयपिनद्धेन—'mercilessly fastened.' Another reading is अतिपिनद्धेन tightly fastened.' Some editions insert the following before काममनुरूपमस्या &c.

सम्यगियमाह—इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिनावल्कलेन।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण॥

Translate:—'This youthful form of hers, with the bark dress fastened with fine knots upon her shoulder, and covering the expansion of her bosom, does not put forth its own charms, like a flower enclosed in faded leaf.'

न पुष्णाति इति न—Two negatives make an emphatic assertion.

Page 25.—सरसिजं—सरसिजातं–Lit: 'that which is born in a pool.' This is an instance of अलुक् समास। अनुविद्धं Lit: 'pierced' or 'bored' hence 'spread.' शैवल—A kind of aquatic plant. हिमांशुः—हिमाः अंशवः यस्य। लक्ष्म—'mark' or 'speck.' Some think it resembles a deer and hence the name हरिणाङ्क। किमिव—इव is added to interrogative pronouns and their derivatives in the sense of 'possibly; I should like to know.'

Page 26.—वातेरितपल्लवाङ्गुलीभिः—वातेन ईरिताः पल्लवा एवांगुल्यस्ताभिः । केसर—is the same as the Vakula tree. सम्भावयामि—' I shall honour.'

Page 27.—लतासनाथः—नाथेन सह वर्तत इति सनाथः; लतया सनाथः Lit: 'having a lord or master.' It is used towards the end of this Act, where the hermits are said to be सनाथाः—' possessed of a guardian' in Dushyanta ; a compound verb सनाथीकृ ' to cause to be possessed of master' occurs in Act II of this play. But here सनाथ = सहित ; ' joined.' प्रियंवदा—प्रियं वदति इति । प्रियमपि तथ्यमाह—She says what is both agreeable and true. अधर—is properly ' the lower lip ' as distinguished from ओष्ठ ' the upper lip.' यौवनं—यूनो भावः । सन्नद्धं—सर्वतो व्यापकं ' Pervades.' स्वयंवरवधूः—स्वयमेव वृणीते स्वयंवरा ; स्वयंवरा चासौ वधूश्च । ' self-electing bride.' The स्वयंवर was a form of marriage in which a princess made a free public choice of a husband from a number of assembled suitors. It is not mentioned amongst the forms of marriage in Manu III–21. However it may be inferred that such a form of marriage was prevalent at that period, as Manu himself says, that a girl when marriageable should wait for three years, after which, if she does not get a proper husband she is to choose for herself. सहकारः—सह किरति (सौरभं) इति ।

Page 28.—बद्धपल्लवतया—" by the state of young shoots formed on it." The Instrumental case of the abstract noun has the sense of ' by reason of,' ' on account of.' उपभोगक्षमं—क्षम here means

'capable,' 'suitable.' नवकुसु मयौवना—नवानि कुसुमानि तान्येव यौवनं यस्याः सा ।

Page 29.—अपि नाम—'would that' आवर्नयति—'bends.' अपि नाम—'can it possibly be?' असवर्णक्षेत्रसम्भवा—असवर्णात् क्षेत्रात् सम्भवः यस्याः सा । 'Born of a different caste.' The four varnas are—1. Brahma, 2 Kshatriya, 3. Vaisya & 4 Sudra. A Brahman might marry a woman of any of the four castes. A Kshatriya might marry a woman of his own order or one below his, but not a Brahmin woman. If Sakuntala were a pure Brahmini both on her mother's and father's side, she would be ineligible as the wife of a Kshatriya and that is why Dushyanta wishes Sakuntala were born of a woman different in caste from the sage. अथवा—पक्षान्तरे—This is used to correct a previous thought. कृतं—used adverbially like अलं; governs the instumental case.

Page 30.—क्षत्रपरिग्रहक्षमा—'capable of marriage with a Kshatriya.' आर्य—'honourable.' अभिलाषि—अभिलाषोस्यास्तीति । सन्देहपदेषु—'which are subjects of doubt.' प्रमाणं—प्रमीयतेऽनेन—Lit: 'that by which any thing is measured'; hence 'a criterion,' 'a sure guide' or 'an authority.' Words like प्रमाणं, पात्रं, भाजनं, आस्पदं, पदं and स्थानं when they are used as predicates are always singular and neuter irrespective of the number and gender of the subject. प्रवृत्तयः—'tendencies.' उपलप्स्ये—ज्ञास्ये—'I will inform myself.'

Page 31.—मधुकरः—Lit: 'a honey-maker'; 'a bee.' यतः and ततः—are correlatives meaning 'whence'

and 'thence.' षट्चरणः—षट् चरणाः यस्य सः 'a six-footed insect, a bee.' अकामापि—though not influenced by love.' दृष्टिविभ्रमं—' amorous glances.'

Page 32.—वेपथुः—'tremor,' derived from the root वेप् ।

Page 33.—व्याधून्वत्याः—'of her who waves.' धू with वि and आ means 'to shake about.' रतिसर्वस्वं—रतिनिधानं ; 'whose whole essence is delight.' अधरं पिबसि—means 'to kiss.' हताः—'disappointed.' कृती—'one who has gained the object of his desire, and is in full enjoyment of it.' दुर्विनीतेन—'ill-mannered.'

Page 34.—आक्रन्द—आह्वय 'call for,' नाम—'indeed.' विरमति—The root रम् 'to sport' is usually Atmanepada ; but when preceded by the prepositions वि, आ and परि it is Parasmai. कः पौरवे &c.—Dushyanta carefully avoids everything which might raise the suspicion that he is himself the king. He says पौरवे शासति and not मयि शासति ; Again यः पौरवेण राज्ञा नियुक्तः ; and राज्ञः परिग्रहोयं later on. शासति—Locative sing. of the Pres. Participle of शास्, used here absolutely and should not be confounded with the 3rd Person plural Pre. tense वसुमति—वसूनि अस्यां सन्तीति । दुर्विनीतानां शासितरि—Observe the idiom : the Gen. is used in the sense of the objective. मुग्धासु—बालिकासु—'innocent.'

Page 35.—अत्याहितम्—महाभीतिः 'great danger.' अपि तपो वर्धते—'Does your piety prosper ?' This was the regular form of salutation on meeting a Brahman. Thus in Manu :—ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयं । वैश्यं क्षेमं

समागम्य शूद्रमारोग्यमेवच ॥ कुशलं—implies an inquiry regarding the welfare of a Brahman's acts of penance which are ever liable to be impeded by evil spirits and demons. अतिथिविशेषलाभेन—' by the acquisition of a distinguished guest.' The rites of hospitality are held sacred among the Hindus. Say the Srutis: अतिथिदेवोभव । अर्घ्यं—is a respectful offering to venerable Brahmans consisting of rice, Durva grass, flowers fruits &c. with water in a small vessel. उपहर–आनी प्रयच्छ ' having fetched, present.' सूनृतया गिरा—' by kind and sincere words.' आतिथ्यं–अतिथये इदं । The four things with which even the poorest man was to greet a guest were:–"Grass and earth to sit on, water to wash the feet, *Arghya* and fourthly friendly yet sincere speech (वाक् सूनृता) are never refused in the houses of the good, even though they be poor—Manu iii. 101.

Page 36.—प्रच्छायशीतलायां–प्रकृष्टा छाया यस्यां सा चासौ शीतलाच तस्यां । सप्तपर्ण–' a tree having seven leaves on a stalk ' called also विषमच्छदः 'having an odd number of leaves' and विशालत्वक् ' having a broad bark.' वेदिका–विश्रामस्थानं ' a place of rest.' आत्मगतं Lit: ' gone to one's self ' used in theatrical language like the English 'aside' to indicate that the words following are spoken privately. किं नु खलु–' How can it possibly be.' तपोवनविरोधिनः ' inconsistent with a grove devoted to penance.' विकारः–' change of mind ' ; ' passion.' विकारस्य गमनीया–Note the use of the Genitive after सौहार्दं—शोभनं हृदयमस्य सुहृत्, सुहृदोभावः । An Abstract noun from सुहृत् । Observe that both सु and हृत् undergo वृद्धि ।

Page 37.—जनान्तिकम्–' aside to a person standing near.' This is a stage direction similar to आत्मगतं, but the speech which follows is supposed to be audible by some other person, to whom a private signal is made. The Sahityadarpana thus defines it.—" That which is spoken apart from the rest, with a signal, such as holding up three fingers of the hand (त्रिपताक), being a mutual speech (between two) " is called जनान्तिकं । चतुरगम्भीराकृतिः–चतुरा गम्भीरा आकृतिः यस्य सः । चतुर–generally means 'animated'; here it means 'polite.' प्रकाशं–'aloud', another stage direction. कतम–' which, out of many.' राजर्षि–A Royal Sage: a man of the Kshatriya caste who, by his pious life and austere devotion, has attained to the rank of a Rishi or Saint, such as Janaka, Ikshvâku, Visvâmitra &c. विरहपर्युत्सुकजनः—विरहेण पर्युत्सुको जनः यस्मिन् सः–with its people pining by separation.

Page 38. आत्मापहारः 'concealment of oneself.' अपहार=वंचना, 'deception.' भवति–vocative of भवती । A Brahman should be spoken to with the respectful pronoun भवत् and any woman not related by blood should be addressed भवति 'Madam', or सुभगे भगिनी 'amiable sister.' धर्मारण्यं–धर्मप्रधानमरण्यं–an instance of मध्यमपदलोपी समासः । 'a sacred wood.' सनाथाः–'possessed of a guardian.' शृङ्गारलज्जां–'abashment caused by love.'

Page 39. आकार=चेष्टा; 'a gesture' *i. e.* the expression of the face indicating the real state of the mind. जीवितसर्वस्वेन । Observe the double meaning of this expression. First it means fruits, roots,

and other necessaries of life. Secondly it may refer to Sakuntala who was the most valuable possessicn of Kanva. हृदये कृत्वा–'having formed some idea in your mind.' सखीगतं– 'concerning your friend' = शकुन्तलाविषयकम् ।

Page 40. शाश्वते ब्रह्मणि–'in perpetual celibacy' कौशिक इति &c,. कुशिकस्य गोत्रापत्यं पुमान् कौशिकः इति कृतं गोत्रनामधेयं यस्य सः–Visvamitra – He was the great grandson of कुशिक being the son of Gadhi, the son of Kusanabha, the son of Kusika or Kusa. प्रभवं–प्रभवत्यस्मादिति प्रभवः तं ; 'the operative cause of being.' उज्झितायाः = परित्यक्तायाः । Sakuntala was the daughter of Visvamitra by the nymph Menaka who was sent down by Indra to disturb the sage's penance, when he was striving to elevate himself to the rank of a Rishi. When Menaka went heavenward leaving the child in a lonely forest, she was taken care of by Sakuntas or birds, whence she got her name. She was afterwards found by the sage Kanva and brought up as his own daughter. Kanva was therefore her foster-father. अप्सरा–This word is usually in the plural. But the singular form आप्सराः occurs sometimes.

Page 41. नियमविघ्नकारिणी—Indra is said to be always afraid of the growing power of the penance of great sages which might raise them to his level and hence he is often said to send down the celestial nymphs Rambha, Urvasi &c. to draw them away from the path of rectitude and virtue. समाधि–'penance.' वसन्तावतारसमये–Another reading is

वसन्तोदारसमये । अवतार comes from तृ with अव 'to descend.' उन्मादयितृ Lit: 'that which causes to go mad or be intoxicated.' परस्तात्–An indeclinable meaning 'afterwards.' The suffix तात् in words like परस्तात्, अधस्तात् may stand for the Nominative case, as well as for Ablative and Locative. Hence परस्तात्=परवृत्तान्तः, 'the rest of the story.' अथ किं–means 'exactly.' It is a particle of assent. उपपद्यते—'It is fitting' (that she should be the daughter of an Apsaras).

Page 42. प्रभातरलं ज्योतिः—(प्रभया चञ्चलं वैद्युतं ज्योतिः) 'tremulously-radiant flash' *i. e.* lightning. Sakuntala of exquisite beauty is compared to the radiance of lightning. लब्धावकाशो मे मनोरथः—'My desire has found (free) scope' *i.e.* Since it has now been ascertained that she is not of the Brahmanical order, it is plain that my desire is directed' towards an attainable object अवकाश—'free course.' किं तु सख्याः &c.- Refers to Priyamvada's speech यथा वनज्योत्स्नानुरूपेण &c.- before. द्वैधीभावकातरं मे मनः—'my heart is held in suspense and anxious.' *i.e.* anxious to know if Kanva has already betrothed her to some one or if she herself has chosen any. धृतः द्वैधीभावः येन तत् तथोक्तं; अत एव कातरं । द्वैधीभावकातरं='doubt.' नायक—The hero of a play; in this case Dushyanta. The heroine is called नायिका । वक्तुकामः—वक्तुं कामो यस्य सः । अंगुल्या तर्जयति—'Reproves her with her finger.' She makes a threatening gesture as though she were angry with Priyamvada for giving Dushyanta her antecedents.

Page 43 —अनियन्त्रणानुयोगः—अनियन्त्रणः अनुयोगः यस्मिन् सः, 'one to whom questions may be freely put.' अलं विचार्य—अलं in the sense of prohibiting is usually found with the instrumental case of a noun, but like खलु it may sometimes be used in this sense with an indeclinable participle in त्वा, य । नाम—'indeed,' वैखानसं व्रतं—'the vow performed by a hermit'; the vow consisted in always living in the woods. आ प्रदानात्—प्रदानपर्यन्तं, 'up to the period of her marriage. मदनस्य व्यापाररोधि=कामक्रियानिवारकम् ; 'hindering amatory actions.' आत्मसदृशेक्षणवल्लभाभिः—Another reading is मदिरेक्षणवल्लभाभिः—in which case the word-splitting is मदिरेक्षणवल्लभा and आभिः, the former referring to Sakuntala and the latter agreeing with हरिणाङ्गनाभिः ।

